त्तौ नियमार्थं सूत्रम् तत्र स्वशब्द आत्मीयत्वेनार्थमाह रूपशब्देन स्वरूपमेतदुभयं संज्ञीत्यर्थः। तत्रार्थो न विशेष्य उक्तयुक्तेः किन्तु शब्दविशेषणम् एवञ्चा-
र्थविशिष्टः शब्दः संज्ञीत्यर्थग्रहणपरिभाषा सिद्धा। अत्र चार्थः कल्पितान्वयव्यतिरेककल्पितः प्रकृतिप्रत्ययादिबोध्यः शास्त्रीयोऽपि स च मुख्यः प्रसिद्धश्च अत एवायं
विशिष्टरूपोपादानेऽप्येवं सूत्रञ्च तत्रैवार्थोपस्थितेस्तत्रैवानियमप्रसक्तेश्च न तु वर्णग्रहणे इत्याकरे स्पष्टम् दाधाघ्वित्यस्य हल्यघोरित्यादौ चारितार्थ्येनोपस-
र्गे घोरित्यादौ स्वं रूपमित्यनेन परत्वाद्बाधशंकावारणार्थमशब्दसंज्ञेति नात्र षष्ठी तत्पुरुषः। कर्मसंज्ञायाम् अर्थसंज्ञात्वेन निषेधाप्रवृत्तौ कर्मण्यणित्यादौ स्वरू-
पग्रहणापत्तेः। किन्तु समासान्ततत्पुरुषः। शब्दपदेन च शब्दशास्त्रं तदाह शब्दशास्त्रे इति भाष्ये तु अर्थकार्यस्य बाधेऽप्युपस्थितत्वाद्वृद्धिरित्यादौ तज्ज्ञस्य बोधप्रकारस्त-
थाप्संमानस्यराजनशब्दस्यैव ग्रहणं भविष्यतीत्यर्थं सूत्रम् उपस्थितार्थस्यागमानाभावेन तस्य विशेषणतयान्वयसंभवेन चार्थवत्परिभाषापि सिद्धा। ल-
क्ष्यानुसारात् तत्तत्संज्ञाकरणज्ञानरूपप्रकरणाच्च पाठसंख्यावाचकस्य षष्शब्दस्य षट्संज्ञाकरणेन शब्दशास्त्रीयसंज्ञायां स्वरूपाग्रहणज्ञापनाच्चोपस-
र्गे घोरित्यादावदोषेणाशब्दसंज्ञेत्यपि व्यर्थमित्युक्तम् :अत एव जनपदमुपात्य पशुदेवनादिश

श॰ शे॰ द्वेपुनर्दोषोनएववृक्षादिषुविशेषाणांग्रहणंस्वपुषद्त्यत्रपर्यायाणांविशेषाणांस्वरूपस्यचग्रहणंसभाराजेत्यत्रपर्यायाणामेवग्रहणंपश्चिमत्स्यमृगान्हन्तीत्य
१२ त्रमृगपक्षिणोः पर्यायाणांविशेषाणांस्वरूपस्यचग्रहणंमत्स्यपदेनस्वरूपस्यविशेषाणांमीनरूपपर्यायस्यचग्रहणंसिद्ध्यति॰ अन्यथातदर्थेयत्नः कर्तव्यः।परे
श्वयुवांकयोरित्यत्रशब्देनस्वरूपग्रहणंनदीपौर्णमासीत्यत्रनदीपदेनस्वरूपग्रहणञ्चसिद्ध्यतिलक्ष्यानुसारिव्याख्यानेनममसर्वेष्टसिद्धिः।ज्ञापकपक्षेपिज्ञाप
कसिद्धस्यासार्वत्रिकत्वान्नदोषः।अतएवभगवताज्ञापकेनसिद्धंवचनंप्रत्याख्यानमितिदिक्॰ येनविधि॰ येनेतिकरणेतृतीया॰ विधिरितिभावेकिः।कर्मात्रवि
धेयंकर्त्ताचाचार्यः।प्रसिद्धत्वाल्लभ्यतएव॰ यस्तुकरणंकर्तृपरतन्त्रमितितृतीययापारतन्त्र्यंलक्ष्यतेतच्चशब्दानांविशेषणत्वेनेतिविशेषणमितिलभ्यमितितन्
न्नसुपविभक्तौनेलक्षणेत्यस्यसर्वसंमतत्वात्॰ किंबहुनायेषांप्रत्ययानामन्येषांशब्दानांवार्थेविधानंकृतंशास्त्रेणतेषामन्यत्रार्थितदर्थेचान्येषांलक्षणया
पिसाधुत्वाभावस्यप्रत्ययः पुंयोगादित्यादिभाष्येनोलाभात्॰ करणस्यव्यापारवत्त्वनियमादन्येषांचव्यापाराभावाद्विशेषणमेवात्रकरणंतृतीयानेनोच्य
तेतस्यचेतस्याद्दृत्तिकरणमेवव्यापारः नतुक्तंभाष्येयेनेतिकरणएषातृतीयान्येनचान्यस्यविधिर्भवतियथाचैत्रस्यसंग्रामंहस्त्यश्वादिभिर्विधनेएवम
चोयदिति॰ अचाषानोयंतंविधत्तेइति॰ अन्येनचान्यस्येत्यनेनयस्यकार्यंयस्मिन्परतश्चतयोरकरणत्वंदर्शितम्॰ अन्यस्येत्यन्यस्मिन्नित्यस्याप्युपलक्षणं
तत्रशब्दोपस्थितविशेष्यस्यतादृशंविशेषणमेवतदन्तग्राहकम्॰ क्वचित्तुतिगमकेः।तादृशंशब्दरूपंविशेष्यमादायापितदन्तविधिः तच्चानरङ्गत्वात्समा
नाधिकरणमेवातत्रतदन्तविधौसतितथाविशेषणत्वयोग्यताप्येतत्प्रवृत्तौनिमित्तम्॰ अतएवेहन्नित्यादौऽङ्नंशेतदन्तविधिर्नेहीनंगमित्यन्वयोभवति।
तदन्तस्येत्यस्यतदन्तशब्दस्येत्यर्थः।नन्वेवमेरजित्यपद्त्यत्रनस्यादतआह॰ स्वस्यचेतिस्वमित्यनुवर्त्तनंषष्ठ्याविपरिणम्यतइतिभावः।स्वंरूपमित्यस्यप्र।
त्याख्यानेतु तस्यचेतिपाठ्यमितिबोध्यम्॰ समासप्रेति॰ विशेषणविशेष्यभावव्यत्यासेनात्पर्यग्राहकमिदम्॰ एवञ्चद्वितीयाश्रितेत्यादौश्रिता १२
दयोःधिकारप्राप्तसमर्थैरित्यस्यविशेष्यभूताइतिनतदन्तविधिः।तस्यतत्प्रकृतिकेलक्षणयासुप्सुपेत्यनेनान्वयः।तेनकष्टंपरमश्रितइत्यत्रनसमासः
नडादिभ्यः [illegible] पिनडादिविशेष्यंप्रातिपदिकंविशेषणमितिसूत्रनाडिरित्यत्रनफक्उगिदिति॰ तेनातिभवतीत्यत्रोगितश्चेतिङीप्रत्ययस्थितिरित्यत्रा

तदन्तत्वसिद्धः। एवञ्चोक्तनिषेधः प्रत्ययांशे गृह्यमाणप्रातिपदिकविषये। प्रत्ययविषयेण गृह्यमाणप्रातिपदिकेन तदन्तविधिर्नास्तीत्यनेनैकवाक्यत्वलाभा
त्। उगिदचामिति त्वेकदेशानुवाद इति बोध्यम्। अत एव वनो र चेत्यादौ प्रत्ययग्रहणे तदन्तग्रहणमित्यस्य नायं निषेध इति दिक्। विरामो ऽवसानम्। शब्दानु
शासनप्रस्तावादाह। वर्णानामिति। उच्चारणाभाव इत्यर्थः। स च व्याख्यानात् क्वचिदुच्चारणानन्तरकालिक एव गृह्यते। प्रदेशा वावसानमित्यादयः। अभाव
स्यापि बुद्धिकृतपौर्वापर्यं वर्णवत्। परशब्दो नान्यार्थोऽन्यत्वस्याव्यभिचरितत्वादत आह। अतिशयित इति। स्वभावसिद्धार्द्धमात्राऽतिरिक्तकालव्यवायेन रहि
तः। तेन तद्व्यवायेन वाक्योच्चारणे संहितानसन्निकर्षस्य प्रायः परेणाक्षेवितपूर्वेण ।अत एवावसानकार्याणां संहिताधिकारे पाठः न चावसानसंज्ञयोपरस
त्वे सावकाशाया संहितासंज्ञायाः सत्यपि सम्भवे वा प्रतं भवतीति न्यायेन विषयभेदेऽपि बाधः स्यादिति तदसङ्गतिरेवेति वाच्यम्। तदधिकारे तेषां पाठेना
कडारसूत्रस्य स्वशास्त्रीयसंज्ञामात्रविषयकत्वकल्पनात्। एतेनु मतं तथा लोकेऽपि सत्त्वात्। तदुक्तं वार्तिककृता संहितावसानयोर्लोकविदितत्वादिति।
न चावसानकार्येषु संहिताधिकारासम्बन्ध एवास्तु अग्ने च म एङ् कप्लुतिरस्त्विति वाच्यम्। सत्यामुपपत्तौ मण्डूकानुवृत्तेरयुक्तत्वात्। ध्वनिनत्वं चेदं विसर्ज
नीयस्य स इति सूत्रे भाष्ये। सन्निकर्षः सामीप्यम्। सुप्तिङ्। सुबिति सुपः पकारेण प्रत्याहारो व्याख्यानात्। यद्यपि प्रत्ययग्रहणे तदन्तग्रहणमित्युक्ते स्या
द्रूपं विशेष्यमाक्षिप्य तदन्तग्रहणं सिद्धम्। प्रत्ययेन स्वप्रकृत्यवयवकसमुदायस्याक्षेपात्तद्विशेषणत्वेन तदन्तविधिरिति तु न युक्तम्। इयाबित्यादौ तस्य
तादृशसमुदायेन व्यभिचारेणाक्षेपासम्भवात्। आक्षिप्तस्य शाब्देनान्वयाच्च। तथापि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणाभावज्ञापनार्थमन्तग्रहणम्।
तेन घसंज्ञा तरपतमपोरेव न तदन्तस्य। तेन गौरिब्राह्मणितरेत्यत्र न ह्रस्वः एतन्निषेधसामर्थ्यादेव प्रदेशेष्वपि न तदन्तविधिः न च ज्ञापितेऽपि अर्थपद
प्रदेशे प्रत्ययग्रहणेन तदन्तग्रहणेनैव सिद्धेरिति वाच्यम्। पदत्वस्य प्रकृतिसाधारणतया पदग्रहणे प्रत्ययग्रहणस्यैवाभावात्। यस्मात्प्रत्ययविधि
रित्यस्याऽनुवृत्तेः पदसमुदायस्य न पदत्वम्। इयानित्यादौ यस्मात्प्रत्ययविधिस्तदादितद्धितान्तत्वे व्यपदेशिवद्भावेन बोध्यम्। तेषां शास्त्रीयस्याप्येका
र्थत्वादेरिति देशात्। विशिष्टनिष्ठव्यवहारनिमित्तकार्याणि असहायेऽपि कर्तव्यानीति तदर्थादत एव यन्मात्रमित्यादेवत्वं ना स्वार्थे इति मात्रच सिद्धिः

श·कौ· १३ ऽप्युपेत्यवादेन· ध्वनितञ्चेदं आदेच् उपदेशेनास्यनुदात्तेदित्यादौ भाष्ये· तत्र हि ढौकतइत्यौकारस्य हतइत्यादावकारस्य जन्तोपदेशत्वे प्रकारान्तोपदेश
पदे शिवद्भावेनाशंक्यार्थवत्त्वाभ्यपदेशिवद्भावइत्युक्तं मया वर्णोऽर्थवान् तेन व्यपदेशिवद्भावः वर्णस्यार्थवत्त्वञ्चेयायेत्यादावसहाय एवनमुप्रकृतेनेइतितदर्थ
एवञ्चैकस्मिन्नित्यस्यार्थोऽर्थवत्त्वेऽनेनोक्त इति दिक्। हलोनंतं। गर्गाः शतं दण्ड्यन्तामित्यत्र समुदाये शतदण्डनवदत्र समुदायस्यैव संज्ञा न प्रत्येकम्· अ
नराइत्युक्ते श्रुतस्य विशेषणतायाएवौचित्यात्· यत्तु संयुज्यन्ते वर्णा अत्रेत्यन्वर्थसंज्ञाबलात्प्रत्येकं संज्ञेति तन्न· घटपटौ संयुज्येते यत्रेत्यादौ संयुज्यमा
नपदार्थातिरिक्तस्यैवान्यपदार्थतया प्रतीतेर्व्युत्पन्नत्वेन तदतिरिक्ततद्घटितपदवाक्यरूपसमुदायस्य· संज्ञापत्तावनिष्टापत्तेः महासंज्ञानुपाद्यमनुरोधा
देवतेन सुदृषज्ञानीत्यत्र संयोगान्तलोपोऽनेत्यन्यत्र विस्तरः। हल इति बहुवचनं सौत्रम्· यद्वा हलौ च हलश्चेत्येकशेषः स्वरितान्संहितायामिति सूत्रेऽनुदा
त्तानामिति पदे तथैकशेषस्य भाष्ये करणात्· तेन द्वयोरपीति शिक्षेत्यादौ गुरोश्च हलइत्यप्रत्ययः सिध्यति। यत्रापि बहवस्तिष्ठन्ति तत्रापि द्वयोर्द्वयोरि
वनबहूनां झलि परे संयोगादिलोपविधानात्· बहूनामपीत्यपि चिन्त्यमेव। फलाभावात् तत्र तत्राङ्गपदधात्ववयवसंयोगस्यैवाश्रयणेन तार्द
शस्यसत्त्रयाणां संयोगस्याभावादिति भाष्ये स्पष्टम्· आनन्तर्यमव्यवधानाभावो व्यवधानञ्च विजातीयेनैवेत्याशयेनाह· अजभिरिति· अत्र कुत्वन्या
य्यम्। तएव हयवरट्सूत्रे चौ ह्वितिभाष्यप्रयोगे कुत्वं दृश्यते। स्वरैरव्यवहिता इति निरूपिता वृत्तिः हलः किम्· तितउरेव अत्र गुरोरिति प्लुतः स्यात्· अ
नन्तराः किम्· दृसम्· अत्र सकारमकारयोः संयोगत्वे स्कोरिति लोपः स्यात्· संयोगे गुरुः भेत्तेत्यादौ गुरुणास्तु क्कोः किन्त्वसामर्थ्येन भूतपूर्वलघूपधग्रहणाद्बोध्यः
इति संज्ञेति· प्रथमाध्यायस्यान्तः संधिकार्योपयोगिनीनां संज्ञानां प्रकरणमिति समाप्त· मित्यर्थस्तेनाम्रेडितप्रगृह्यभसंज्ञालोपसंज्ञाद्यनुपन्यासेऽपि नक्षा
तिः अअइत्याद्युपन्यासस्तु प्रासङ्गिकः ॥ इति संज्ञाप्रकरणम् ॥ ॥ इकोगुण· परिभाषेयं व्याख्यानात्· गुणवृद्धिशब्दा ॥ ॥
भ्यामिति गुणवृद्धिग्रहणानुवृत्त्यैव सिद्धे पुनर्गुणवृद्धिग्रहणसामर्थ्यादिति भावः। अननुवर्त्तमानञ्च संज्ञिपरमेव स्यात्। संज्ञाकरणेनान्यत्र संज्ञिप
रत्वात्· यद्वा तदप्यनुवर्त्त्य गुणवृद्धी इति योजनयैव लाभः। स्वादिष्विति सूत्रेऽनुवृत्तपदपदस्य संज्ञापरतायाएवदृष्टत्वात्· स्थानेनिसूत्रे संख्यापद

स्यतइत्यत्वासम्भवादर्थपरतेति बोध्यम् · लक्षणप्रतिपदोक्तपरिभाषयानुनात्र निर्वाहः । तत्र प्रतिपदोक्तस्येत्यस्य साक्षादुच्चरितस्येति साक्षात्तच्छब्दस्तनुवादे न विहितस्येति वार्थात् · ध्वनितञ्चेदमत्रैव भाष्ये । अस्याश्च विधेयसमर्पकगुणवृद्धिपदश्रुतिर्लिङ्गं तदाह · विधीयेते इति · अत एव ताविको गुणवृद्धी इत्यादौ नेको एतेन षष्ठ्यन्तपरयोः पूर्वयोर्गुणवृद्धिपदयोरेवानुवृत्त्या यत्र स्वर्थेन पदेत तत्रेदमुपतिष्ठते इति त्यदादीनामः इत्यादिस्थाने नौ सिद्धायामिह गुणवृद्धी इत्यर्थमित्यपास्तम् · एतन्मूलक एव विधौ परिभाषोपतिष्ठते नानुवादे इत्युद्द्योषः । एवञ्च पदोपस्थापकपरिभाषाविषये विधीयन्त इत्यस्यैवाध्याहारो बोध्यः । एवञ्च तस्मिन्निति निर्दिष्टे षष्ठी स्थानेयोग्यादि रनुवादेपि प्रवृत्तिः । तेन प्रत्ययस्यात्कात्पूर्वस्यादात्वस्वरितयोर्यणा इत्यादौ न दोषः । उदीचामातस्थाने इति स्थानेग्रहणं न स्पष्टार्थमेव तत्र विधिवाक्ये प्रथमाया विधेयविभक्तित्वेन तदन्तस्य विधेयसमर्पकत्वनिर्णयः । अत एव गुणादिपदानामिकूपदोपस्थापनेन चरितार्थानामपि वाक्यार्थान्वयिता । तदर्थे स्य तदन्वयिते विधेयत्वाभावेन उपस्थापकत्वस्यैव भङ्गापत्तेः । इयञ्च एधिते त्यादौ व्यञ्जनानां गुणवृद्धिव्यावृत्त्यर्थं भिन्नमित्यादौ निषेधप्रवृत्त्यर्थं इग्लक्षणत्व संपत्त्यर्थं चेति दिक् ॥ पुनः शब्दैरिति · ऊकालइति सूत्राद्ध्रस्वदीर्घप्लुत इत्यजिति चानुवर्तते ह्रस्वेत्यादिपदञ्च तृतीयया विपरिणतमिति भावः । तेन दिव उदित्यत्र आ विभक्ताविति त्यादौ वतदनुपस्थितिः । शेषं प्राग्वत् । आद्यन्तौ · यद्यप्यत्र मिलितस्यैकत्रान्वय इति द्वन्द्वेन प्राप्नोति तथापि समूहयोरन्वयबोधोत्तरं यथासंख्यमिति सूत्रारम्भसामर्थ्यात्पुनः प्रत्येकमन्वयः । लौकिकत्वेवरीत्या प्रयोगोऽसाधुरेवेति भाष्ये स्पष्टम् अत्रैव यथासंख्यसूत्रोपन्यासोयुक्तः द्वन्द्वेन श्रूयमाणस्यैकैकस्य प्रत्येकं सम्बन्धः । पुरस्तादपवादन्यायेन स्थानेयोगत्वस्यापवादः प्रत्ययपरत्वं तु परत्वादमुं बाधते तेन चरेष्टादयः पराएव भवन्ति · अत एव यत्रैतदभावे स्थानषष्ठी सम्भावना तत्रैवेदं प्रवर्तते तदाह · यस्योक्ताविति · आद्यन्ताक्षिप्तावयवीयच्छब्दार्थः यथासंख्यसिद्धमर्थमाह · क्रमादिति · इताविति किम् · इक् पर्यायेण वंतयोर्माभूत् · मिदचो · अयं बाध्यसामान्यचिन्तया स्थानेयोगत्वप्रत्ययपरत्वयोरपवादः । तृणह इति निर्देशात् · निर्धारणे इति · यस्य समुदायस्य मिद्विहितस्तस्याचां मध्ये इत्यर्थः · सोत्रमेकवचनमिति भावः । तस्यैवेति · यस्य विहितस्तस्यैवेत्यर्थः अत एव समुदायभक्तो मो नोऽस्ति हते वयवस्यैगन्तं विहन्तुमिति भाष्यं संगच्छते । अन्तावयव इति · पूर्वसूत्रात्समस्तमप्यन्तपदमेकदेशस्वरितत्वप्रतिज्ञाबलादनुवर्तत इति भावः । मुञ्चतीत्यादिविषये तु फलाभावोदयाम्यत्वाच्चान्तावय

सु·
शे·शे· बहुत्वंशास्त्रवृत्तिः परिभाषाणामनियमे नियमकारित्वादाह· अनिर्धारितेति· तेनेदुपधाया गोहइत्यत्र स्थानेयोगत्वबलात् उपधापदसन्निधानेनावयवषष्ठीत्वनि
१५ र्णयात्तु· स्थानेयोगेत्यस्य स्थानपदार्थनिरूपितसम्बन्धार्थिकेत्यर्थः। स्थानेनयोगोयस्याइतिविग्रहे निपातनात्साधुत्वस्य भाष्येउक्तत्वात्· अन्तरतमइत्यादेरपि
अन्तरादिनिरूपितसम्बन्धेइत्येवार्थः। षष्ठीमात्रोच्चारणेस्थानपदाध्याहारइत्यन्यत्र विस्तरः। प्रसङ्गइति दर्भाणांस्थानेशरैः प्रस्तरितव्यमित्यादौतथादर्शना
त्· भावेल्युट् स्थानशब्दोप्रसङ्गस्य सतिसम्भवेस्थेवनएवार्थप्रत्यायनार्थे शब्दप्रयोगात्· इकोयणित्यादिरचेरेकारघटितशब्दस्यार्थबोधनायप्रसङ्गे नत्परयका
रघटितःप्रयोक्तव्यइत्यर्थः। एरुरित्यादिस्थानेत्सुरितिअतोनशब्दनित्यताहानिः। किञ्चैकारवृद्धिप्रसङ्गेयकारवृद्धिरित्यप्यर्थः अतएवाचःपरस्मिन्नित्यादिप्रसङ्ग।
ङ्गेतोऽस्यष्टम्बिदर्हाथाध्विति सूत्रस्थानिवत्सूत्रयोर्भाष्ये· स्थानेन्तःषष्ठीत्यनुवृत्त्यायत्रस्थानषष्ठीतत्रेदमुपतिष्ठतेइतिविध्येकवाक्यतयैवास्यनियामकत्वेन
तु विहितानांनियमः भुक्तवन्तमिति न्यायविरोधात्· फलितमाह· प्रसङ्गइति· सदृशतमइति· अर्थात्प्राप्यमाणानांमध्येएव अतएवगङ्गोदकमित्यादौत्रिमात्रो
न· तमप्किम्· वाग्घरिरित्यादौमहाप्राणत्वसाम्येनजायमानःपूर्वसवर्णोवर्गद्वितीयोमाभूत्। किन्तुनादवान्महाप्राणश्चतुर्थोघएवयथास्यादिति· स्थानेन्तरतमे
इतिसप्तम्यन्तपाठस्तुदीर्घेषुयणसिद्ध्याद्युष्टइतिभाष्येस्पष्टम्। यत्रानेकेति· स्थानेग्रहणेएकदेशानुवृत्त्यानुवर्त्तमानेपुनःस्थानेग्रहणंतृतीययाविपरिणामेनवा
क्यभेदमाश्रित्यप्रसङ्गेसतिसम्भवेस्थानतएवान्तरतमइत्यर्थकमितिभावः। स्थानतइति· स्थानेनेत्यर्थः। तत्रस्थानतइकोयणचीति· अर्थतस्तुवर्क्षोदृरिति· इ
हक्कोष्ठुशब्दस्थानेपक्कृशब्दोनादेशः। गुणतस्तुवाग्घरिरित्यादौ। प्रमाणतोऽदसोऽमुरित्यादौ। तस्मिन्नितीति· अत्रतस्मिन्निति उत्तरत्रतस्मादि
तिसप्तम्यन्तपञ्चम्यन्तपदार्थकः स्वतन्त्रस्यसर्वनाम्नोनिर्देशो। व्याख्यानात्· बहुलस्यसंस्कारानुरोधाच्चानन्तुतन्त्रपदपरम्। अन्यथातस्मिन्नणि चतस्मान्नुडचितस्मात्
सोनडित्यत्रैवप्रवर्त्तेयाताम्· सप्तमीतुसप्तम्यन्तानामेवतत्त्वकार्यत्वमितिबोधनायतदुच्चार्यार्थस्यनिर्दिष्टरूपेणनसामानाधिकरण्यायचइतिशब्दः। पुनस्तस्यतदर्थ १५
परत्वंबोधयतीति· शब्दोनैरन्तर्येदिशिरुच्चारणएवञ्चसप्तम्यन्तार्थेऽव्यवहितोच्चारितेउपश्लिष्टस्यपूर्वस्यकार्यमितिवाक्यार्थः। एवञ्चैतत्परिभाषाद्वयोपस्थितौ
सप्तम्यन्तपदस्यपञ्चम्यन्तपदस्यचार्थोलिङ्गम्· अत्रसूत्रेउपश्लिष्टपदाध्याहारेणनिर्दिष्टइतिश्रौपश्लेषिकेऽधिकरणेसप्तम्येवोचितेत्युपपदविभक्तेरितिन्याय

त्यानन्तर्ये निसप्तमीति तत्र चदीयन्ते इति सूत्रे कैयटे स्पष्टम्। स्तुक्रमोरिति सूत्रे च कैयट आह तस्मिन्निति परिभाषायां सत्यां सति सप्तम्याश्रयणमशक्यमिति उपश्लेषः समी
पवृत्तित्वं न च वर्णयोर्वौ द्वंद्वष्टव्यम्। एवमिको यणचीत्यादावपीयमेवेति संहितायामिति सूत्रे भाष्ये। तत्रोपश्लेषः पूर्वस्यैव परस्याव्यवहितस्यैवाव्यवहितस्यैवेति नि
र्देश्यैवेति नियमार्थमिदं अव्यवहित एवेति च। अत एव लक्ष्यानुसारात् क्वचित्सतीत्यध्याहारात्सति सप्तम्याश्रयणे नास्याः प्रवृत्तिरिति श्नान्नलोपसूत्रे भाष्ये उक्तम्।
अत एव कर्तृकर्मणोः कृतीत्यत्र नास्याः प्रवृत्तिः। कृति सति प्रत्यासत्त्यानन्तरकृत्यर्थकर्तृकर्मणोः षष्ठीति तदर्थेन तस्मादिति सूत्रे निर्दिष्ट इति निर्दिष्टादिसप्तम्यर्थकविभ
क्तिविपरिणामात्। सचोत्तरस्येति दिग्योगलक्षणेति दिग्योगलक्षणपञ्चम्यामेव तत्प्रवृत्तिः। उदः स्थास्तम्भोरित्यादौ तु दिग्योगलक्षणा पञ्चमी। तत्रानियतदि
कुत्रस्याध्याहारे प्रसक्ते परशब्दस्यैवाध्याहार इति तस्मादित्यनेन नियम्यते। अव्यवहितोच्चारितत्वं पञ्चम्यन्तात्परस्येति तदर्थस्तत्फलितमाह सप्तमीनिर्दे
नेत्यादि। यदि तु अर्धमात्राधिककालेन वर्णान्तरेण वा व्यवधाने उपश्लेष एव नेत्युच्यते तदा निर्दिष्टपदं संहिताधिकारश्च विफल इति संहितायामिति सूत्रे भाष्ये
स्पष्टम्। अवग्रहे च संप्रदाय एव शरणमिति आनङादिविषये आदेशान्तरमेवावग्रहेऽन्यत्र ततः प्राक्। अक्तानूहपरिभाषात्वनित्यानास्येव वा तल्लक्षणेन
परकार्याणामनुवर्त्याः परकार्येणामलक्षणमनुवर्त्यमिति भाष्येणान्वयेन शास्त्रासंकोचस्य शास्त्रकरणाभावस्य च स्पष्टमुक्तत्वाच्च। एतेन संहिताधिकारस्य
द्वहिर्भूतानामर्धमात्राधिककालव्यवाये प्रवृत्तिज्ञापनार्थेनेत्याविष्कृतत्यादावग्रहे आनङादिसिद्धिरित्यपास्तम्। प्रत्ययः परश्चेत्यादौ तु तरांशविकल्पानस्मा
दिति परिभाषा प्रवर्तते। तेन प्रत्ययाव्यवहिताः। अत एव छन्दसि परेऽपि व्यवहिताश्चेति सूत्रं सार्थकम्। आगमविधावप्यानेमुगित्यादौ तस्मिन्निति परिभाषया पू
र्वसम्बन्धित्वनिर्णयः। अत एवात्र पूर्वस्येत्यादि न स्थानषष्ठीन्तत्वे विधिभिरेव सम्बन्धस्य निर्णीतत्वेन षष्ठी स्थान इत्यस्या प्रवृत्तेः। गाङ्कुटादिभ्य इत्यादावपि
पञ्चम्यर्थाधिकलेऽन्यपरिभाषाप्रवृत्तिर्बोध्या परिभाषाणां नियमत्वं तु यदि परिभाषासूत्रं न स्यात्तदा व्यवहितादावपि प्रवृत्तिः स्यादित्येतावतेति दिक्। अलोऽन्त्यस्य
षष्ठी स्थाने इत्यनुवर्तते तदाह षष्ठीत्यादि। स्थाने विधीयमानः स्थानषष्ठीनिर्दिष्टान्त्यस्येत्यर्थः। स्थाने इत्यादि किम्। इट् चकारात्पूर्वो मा भूदिति। अन्त्यस्येति
साहचर्यादल इति षष्ठ्यन्तमन्त्यस्याल इत्यर्थः। अल इति किम्। परस्येति विधीयमानं सुप्तिङ्न्तमिति तस्य अनडुह्यामित्यादावन्त्यस्य पदस्य मा भूत्। स्थाने विधीयमा

सु॰ प्र॰ शे॰ नइति प्रत्यासत्तिलभ्यम्। एवञ्चाल एवेति अन्त्यस्यैवेति नियम इयमत्र अल समुदायोन्तरस्थानषष्ठ्यस्यालिङ्गम्। अत एवेतोऽदित्यादौ नोत्तराः प्रवृत्तिः पथ्यादी
१५ नामित्यस्यावयवषष्ठीत्वादिनइत्यस्यात्समुदायोन्तरत्वाभावाच्च। ङिच्च। अनेकाल्त्वर्थमिदम्। आदेरिति। आदेरलइत्यर्थः तेन द्वीपमित्यादौ पान्त्यसमुदायस्यने
त्वम्। अत्र परस्येत्यावर्तते तेन परबोधकशब्देन यत्र परस्य स्थाने विधानं तत्रैवेदं तेन नित्यं ङि नइत्यादौ न दोषः। तत्र विकरणाव्यवधाने प्रवृत्तये धातोरित्यस्य वि
हितविशेषणत्वात्। अनेकाल्शित्। शितउदाहरणमिदमइश्। ननु शकारोच्चारणसामर्थ्याद्भूतपूर्वानेकाल्त्वमादाय सर्वादेशत्वसिद्धेः शिदिति व्यर्थम्। किञ्च
सानुबन्धकनिर्देशे यथा नालः स्थानित्वं मोभगोइति सूत्रे भाष्ये उक्तं तथा देशत्वमपि सूत्रोपात्तस्यैवेति तदर्थम्। विधौ निर्दिश्यमानेऽनेकाल्सर्वस्येति सूत्रार्थः।
उद्देश्यत्वविधेयत्वास्य विषयतयावीचविषयतातु अनुबन्धविनिर्मुक्तस्येति नाणुदित्सूत्रभाष्यविरोधः। ध्वसोरेति लोपस्याल्लोपो यीति प्रकृते पुनर्लोपग्रहण
सामर्थ्यात्सर्वादेशत्वसिद्धिः। अनुबन्धानामेकान्तत्वमेवन्याय्यमित्युक्तमिति चेन्न नानुबन्धकृतमनेकाल्त्वमिति ज्ञापनेन चारितार्थ्यात्। तेनादिव ओ दिवि सादीना
त्सर्वादेशत्वम्। अस्य च यथैव संज्ञा तथा वक्ष्यते नानेकाल्शिदिति तु नोक्तम्। अनन्तरस्येति न्यायेनादेः परस्येत्यस्यैव निषेधापत्तेः। परत्वादिति आदेः परस्ये
त्यस्यावकाशः। इञ्जनरूपसर्गेभ्यो द्वीपा। इत्सर्वस्येदमइश्। एवमतो भिस इत्यादिविषयेऽनेकालित्यनेनादेः परस्येति परत्वाद्बाध्यते। एतेन ङिच्चेत्यत्र ङिदेवाने
कालन्त्यस्येति नियमेन सिद्धेऽनेकाल्ग्रहणं व्यर्थमित्यपास्तम्। स्वरितेन। इत्थंभूतलक्षणे तृतीया। स्वरितत्वलक्षणाप्योधिकारो विनियोग इत्यर्थः। स्वरितत्वञ्चेदं दे
षविशेषरूपमेव हल्साधारणं स्वरूपमधिक्रियमाणपदघटकाज्विषं वा न चानुनासिकवत्प्रतिज्ञागम्यम्। विनियोगश्च प्रायेणोत्तरत्रोपस्थितिः क्वचित्पूर्वत्रा
पि क्रियदूरमधिकार इत्यत्रास्मतिगमके व्याख्यानमेव शरणम्। किञ्च स्वरितेनाधिकारगति स्तेन गोस्त्रियोरित्यादौ स्त्र्यधिकारस्य प्रत्ययग्रहणमित्याद्यधिकाराद
वसेयम्। एतेन व्याख्यानादेव निवृत्तिवदनुवृत्तिरपि भविष्यति आकांक्षायामनुसत्यामश्रुतकल्पनाया अन्याय्यत्वात् श्रुतापेक्षणस्य न्याय्यत्वाच्च किं सूत्रेण। १५
न्यपास्तम्। स्पष्टञ्चेदं भाष्ये। परनित्येति। परं विप्रतिषेधसूत्रादुलवत् नित्यं कृताकृतप्रसङ्गि तद्विपरीतमनित्यम्। तत्राकृताभावकस्याभावकल्पनापेक्षत्वात्।
प्राभावकस्यैव तत्कल्पनं युक्तमिति तस्य बलवत्त्वे बीजम्। अन्तर्मध्ये बहिरंगशास्त्रीयनिमित्तसमुदायमध्ये अन्तर्भूतान्यङ्गानि निमित्तानि यस्य तदन्तरङ्गम्। नदी।

यन्निमित्तसमुदायान्तर्भूताङ्गकं बहिरङ्गमन्तस्वबलवत्त्वे बीजमाह· असिद्धमिति· इयञ्च वाहऊठ्सूत्रेऽज्ञापिता· यद्यपि प्रत्यङ्गवर्त्ती लोको दृश्यते मनुष्योऽयं प्रातरुत्थाय प्र
थमं शरीरकार्याणि करोति ततः सुहृदां ततः सम्बन्धिनामिति न्यायमूलकत्वमस्या अचः परस्मिन्निति भाष्ये उक्तम्· तथापि तेन न्यायेन युगपत्प्राप्तिविषयत्वे बलवत्त्वं ज्ञा
पकेन तु सर्वविषयता बोध्यते इति वाहऊठ्सूत्रे कैयटे स्पष्टम्· अन्यथा वाहः सम्प्रसारणे पूर्वरूपे च कृते एत्याग्रये गुणे वृद्धिरेचीति वृद्धौ प्रष्ठौह इत्यादिसिद्धावूठ्वि
धानं व्यर्थं स्यात्· नाजानन्तर्ये परिभाषानुत्पत्त्यैवेति नायं यत्रेन्द्रमित्यादौ दोष इति परिभाषेन्दुशेखरे विस्तरः· अपवादन्यायेनैव न प्रामाण्यादुत्सर्गस्य उक्तत्वेति न
कृते विशिष्टोऽहल्को निमित्तं विनाऽपि कार्यस्थितिरूपः यथा दण्डनाशेऽपि घटस्थितिः संयोगे इत्यर्थमनसाह· निमित्तमित्यादिना· तत्र पूर्वकार्यं जातमपि न
कुर्वन्निनोद्धारयतीत्यर्थ इति कैयटादयः। अन्ये तु बहिरङ्गशास्त्रं बहिरङ्गोपोहनरूपत्वान्निमित्तविनाशे दृष्टापूर्वमपि न कुर्वन्तीत्यर्थ इत्याहुः· इयं परिभा
षा निष्फला निर्मूलेति परिभाषेन्दुशेखरे निरूपितम्· ॥ ॥ ॥ इति परिभाषाप्रकरणम् ॥ आहुः आस्यान्नमेयत्नरूपत्वादिति· कार्यशब्दवादे इदम्· संहितायां
विषय इति· कार्यिनिमित्तयोः संहिताया विषयभूताया मित्यर्थः। स्थानेऽन्तरतम इति· इदं यथासंख्यसूत्रे भाष्ये स्पष्टम्· जातिपक्षे यथासंख्येनापि निर्वाह इति स्था
नेऽन्तरतमसूत्रे भाष्ये स्पष्टम्· अनुनासिकस्थाने निरनुनासिक एव विधीयमानत्वेन सवर्णाग्राहकत्वात् गुणभेदकत्वपक्षेऽपि न विधेयाण्विषये· दीर्घा
दीर्घाणामिवादिपदेन उपस्थितेर्यण्प्रत्याहारेषु जातिपक्ष एवेत्यणुदित्सूत्रभाष्ये स्पष्टम्· अत एव सवर्तकारादीनां ऋत्वादिसिद्धिर्ल्वादिभ्य इत्यादिनिर्देशाद् यथाऽऽ
त्मापर्णमानमिति दिक्· व्याकरणस्य साध्वनुशासनत्वमनुशब्दनित्यतापक्षे शब्दानां सिद्धत्वेन शास्त्रेणैव पथ्यापथ्याभूतप्रसङ्गमार्जिः साधुर्भवतीत्यादि द्वि
द्विसंज्ञासूत्रादिस्थभाष्यप्रामाण्येन यदिह परिनिष्ठितेन तात्पर्यं न तत्साध्वित्यर्थोपत्तिकल्प्यवाक्येन बोध्यम्· कार्यशब्दवादे तु पूर्वभाष्योन्नीतानादितात्पर्येण
शानत्वकल्पनं बोध्यम्· एतेन स्थानप्रमाणोऽनुयान्तरतमे ह्रस्वेकारे चरितार्थो यणो दीर्घे कथं स्यादित्यपास्तम्· स्थानेन आन्तर्यस्य सर्वेष्वबलवत्त्वात्स्थानेऽन्तर
तम इति सूत्रस्यैतत्पाठस्यैवैतद्दूषणेनैव भाष्ये दूषितत्वादिति भावः। चो विध्यर्थः· ध्वनितश्चेदमेओङिति सूत्रे भाष्येनदाह· हेवास्त इति· सूत्रकृता शाकल्य
स्य मते सर्वत्र द्वित्वाभावोक्तेरिति भावः। अवसाने द्वित्वसिद्धये नचीति प्रसज्यप्रतिषेधस्तदाह· न लचीति इदं द्वित्वं प्राप्नुवद्विकल्पेन बाधितः प्रयोग एव परत्वादिर

सु॰
शे॰ थ्यादतो च्चारणक्रियानिरूपितकर्मषष्ठीत्वौचित्यात् इति ध्येयमिति· ननु द्वित्वे पूर्वे धस्थाने जश्त्वनिष्पन्नदस्यापि लक्ष्ये लक्षणस्येतिन्यायात्। विकारान्यत्वे
१६ न तल्लक्ष्यं भेदात्। अन्यत्र प्रपञ्चितम्· स्थान्यादेशयोर्भेदात्स्वरूपमित्युक्तेश्च तत्स्थानापन्नस्तद्धर्मं लभते यथा गुरोः स्थाने शिष्यो याज्यकुलानि गत्वाऽग्र्यासनादी
नि लभत इति लोकन्यायेन स्थानिकार्यमादेशेन स्यादतः स्थानिवत्सूत्रम्· ननु स्थान्यलेति· प्रत्यासत्तिन्यायलभ्यमिदम्। आदेशस्य स्थानिभूतयोः ल्तस्थानि स
म्बन्धी चयोऽसत् इति धर्माश्रयेणेत्यर्थः अत एव रेफस्थानिकविसर्गस्य रुशब्दत्वं न स्थानिवत्त्वेनेति भो भगो इत्यत्र भाष्ये स्पष्टम्· ऋधातोर्द्वित्वेऽभ्यासस्यारत्वे
ऽरित्यस्य हलादिः शेषस्तु अरित्यस्य पुनः पूर्वोऽभ्यास इत्यनेनाभ्यासत्वात्। तस्यापि द्विरुक्तधातुपूर्वभागत्वात्। प्रक्रियाज्ञानवतां तथाज्ञानस्य सुलभत्वात्। अत ए
व धिन्वीत्याद्याविरुत्ने। उकारस्यापादे धातुकत्वस्य वकारेऽनतिदेशात्। यत्त्वत्रैणि वृत्तये स्वविधावपि स्थानिवत्त्वमपरविधावितिन्यासे न साधितं भाष्ये सात्वेक
देशसुक्तिः असिद्धवत्सूत्रेणासिद्धत्वाऽऽयत्नाऽऽसन्निन्यादेशात्फलत्वेनोपन्यासात्· अस्यापि अचः पूर्वत्वविज्ञानाद्धिनि वार्त्तिके पञ्चमीसमासेन सिद्धेः कैयटेनो
क्तत्वाच्च। प्रदीव्ये स्यादेः षत्वलादिलक्षणे इति। स्थान्यलित्युक्ते वेभूविवेत्यादौ वलादिलक्षणेट्सिद्धिर्न हि तत्र वलादित्वं स्थानिनोऽलभ्यं किन्तु स्वाश्रयमेव यन्नि
मित्तैककल्पप्रयुक्तोपदेशापन्नावतिदिशो मृग्यते नस्य स्थान्यलसाधारणधर्मत्व एव निषेधप्रवृत्तेः। अत एवार्द्धधातुकत्ववैकल्पप्रयुक्ताऽप्राप्तिर्ने
तस्थान्यलसाधारणायचतावच्छ्रावत्त्वघटितं वलादित्वं न तद्वैकल्पप्रयुक्ताऽप्राप्तिरिति बोध्यम्· प्रत्यासत्त्या च शास्त्रीयकार्य एव स्थानिवत्त्वं तेन नायकासि
द्धिः। प्राधान्यात्कार्यातिदेशोऽयम्· शास्त्रातिदेशस्तु कार्यातिदेशादभिन्नरूपः तस्यापि कार्यफलकत्वादिति नव्याः स्पष्टं कैयटः। भाष्येपि तत्राङ्गशास्त्रातिदेशा
त्सिद्धमाङ्गकार्यमिति दृश्यत इत्युक्त्या तयोरभिन्नरूपत्वं सूचितम्। तत्रानपेक्षितार्थसन्निधानमात्तन्निमित्तरूपकार्यव्यवहार एवातिदेशकार्येऽनुस्यशास्त्रे
णैवेति अत एव रामायेत्यादौ स्थानिवत्त्वेन सुप्त्वात्सुपि चेति दीर्घ इति सङ्गच्छते परिवीरित्यादौ परत्वाद्दीर्घ इति च सङ्गच्छते। यत्तु किञ्चिन्निमित्तवैकल्येपि १६
दीर्घादिकार्यमनेन न क्रियते न च कार्यं किमित्याकाङ्क्षायां तत्स्वरूपनिर्णयस्य विधिशास्त्रमूलकत्वेन तद्देशेनैव परशास्त्रविहितत्वरूपं परत्वं तेषां बोध्यम्·
एतदेव भिन्नत्वात्त्रिदिश्यमानकार्याणामुत्पत्ति देश एव देश इत्यभियुक्ताः। अत्राद्यपक्ष एव भाष्यसंमतः अत एव स्थान्यलविधिप्रतिषेधे कुरु वधापि वांप्रतिषेधो

वकुमर्हत्वेन तदुपपादनावसरे स्थानिवद्भावादङ्गसंज्ञा स्वाश्रयश्च लघूपधत्वादि तत्र लघूपधगुणादि प्राप्नोतीत्यादि भाष्योक्तेरिति बोध्यम्। एवं पन्निमित्तत्वैक
त्वप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तातिरिक्तसर्वनिमित्तकत्वमतिदेशस्यापि। अत एवेष्टवद्भावेनातिदिष्टस्य त्वस्य वर्णाश्रयत्वमित्यादिव्यवहारः। सर्वातिदेशोप्येवं
तुल्यम्। यन्निमित्तत्वैकत्वप्रयुक्तोपदेशाप्रवृत्तिस्तन्निमित्तं शास्त्रीयमेव प्रत्यासत्तेः। स्थानिवदित्युक्ते सम्बन्धिशब्दमहिम्नैवादेशलाभे आदेशग्रहणसामर्थ्यान्न स्थान्यादे
शाभावस्यैव ग्रहणमिति शंकावारणद्वारा एकः रित्यादौ शब्दानित्यत्ववारणाय सर्वे सर्वपदादेशा इति न्यायेन कल्प्यमानस्य तस्य स्थान्यानुमानिकादेशस्यापि संग्रहार्थं ते
पचतिस्थारेः पदत्वसिद्धिरिति भाष्ये स्पष्टम्। ननु नोत्तिलत्वमपि छिन्नपुच्छे श्वनि श्वत्वव्यवहारवल्लोकसिद्धन्यायेनैव सिद्धम्। तदुक्तं प्राग्दीव्यतोऽणिति सूत्रे भाष्ये
दीव्यतिशब्दैकदेशदीव्यच्छब्दानुकरणमिदमित्युक्त्वा किमर्थं विकृतनिर्देश एतदेव ज्ञापयत्याचार्यो भवत्येषा परिभाषैकदेशविकृतमनन्यवदिति। अत एवात्र विका
रोऽशास्त्रीयोपि अत एव आयस्य शब्दादर्णानाद्विर्वचने आयसाविन्यत्र वृद्धौ कृतायां सानुस्योगित्वेनानेन न्यायेनाङ्गतया प्राप्नोत्यानुपूर्व्वसम्बन्धित्वेनाचः परस्मिन्निति
स्थानिवत्त्वेन वा मितोऽचः परस्मिन्निति सूत्रे भाष्ये एतन्न्यायानाश्रयणे तदुक्तमेव दुर्लभम्। अनादिवत्सूत्रे भाष्ये यटयोरपि गुडोदकमित्यादौ विकारादेशकृते रक
शब्दस्यानेन न्यायेनोदकशब्दत्वमाश्रित्यार्दके केवले इति पूर्वपदान्तोदात्तत्वमुक्तम्। शब्दानां नित्यत्वं तु रेखागवयन्यायेन समाधेयम्। अनन्यवदित्यस्य अन्यव
देत्यर्थः तत्रान्यसादृश्यनिषेधे अन्यत्वाभावः सुतरामिति चेन्न। अङ्कस्यान्यथात्वे जातिव्यञ्जकभूयोवयवदर्शनाभावेन तोस्तित्वप्रतीतेर्न्यायेनानुपपादनात्। किञ्च
तिङ् संज्ञायास्तिवादिसूत्रोपात्तपरिच्छिन्नपरिमाणनिष्ठतया परिच्छिन्नपरिमाणार्थवाचकशब्दानां न्यूनेऽधिके वा शास्त्रव्यापारं विनाऽप्रवृत्तेरयं न विधिरिति सू
त्रेऽङ्गसंज्ञासूत्रे च भाष्ये उक्तं तयानदभावात् न्यूनाधिकत्वं त्ववैरूप्यस्योपलक्षणं न च तण्डुलानित्यादौ स्थानिवद्भावेन प्रत्ययान्तत्वेपि स्वतः प्रत्ययान्ताभिन्नत्वा
त्प्रातिपदिकत्वापत्तिरिति वाच्यम्। अतिदेशस्वभावेनातिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावात्। अत एव जहीत्यादौ जादेशस्यासिद्धवत्त्वेन स्वाश्रयो
हेर्लुङ् न सिद्धत्वासिद्धत्वयोर्विरोधात्। असिद्धवत्सूत्रे शाधीत्यादौ स्थानिप्रयुक्तधिभावसंपादनेन चरितार्थम्। न चाप्रत्यय इत्यस्य पर्युदासत्वे शास्त्री
यकार्याभावात् स्थानिवत्त्वं दुर्लभमिति वाच्यम्। वेः स्कन्देरनिष्ठायामिति षत्वविधायके तिङन्तेषु षत्वाभावायावश्यकेनन्याप्येन चानिष्ठायामिति पर्युदासेन

मु.
शा.शे. इत्यादिसमतेन पर्युदासलभ्याशास्त्रीयेपि शास्त्रतात्पर्यविषये शास्त्रीयवदतिदेशबोधनात्॥ विस्कन्न इत्यादौ हि निष्ठानत्वस्य नित्यत्तया स्थानिवत्त्वेनैव नि
१७ ष्ठात्वस्य वं क्रमत्वात् नञ्प्रसज्यप्रतिषेधत्वे तु लक्ष्यानुसारिव्याख्यानादेवोक्तार्थसिद्धिरिति बोध्यम्। केचित्तु भाष्ये तस्यानापन्ने तद्धर्मलाभस्य तत्कार्यस्य च
लोकन्यायेनैव सिद्धेरयमतिदेशः स्वरूपमित्यतच्छास्त्रमतत्वाद्धनेः कार्यं वधो न स्यादित्युक्तम्। एवं च स्वरूपमिति शास्त्राविषये तेन न सिद्धिरिति सूचितम्॥
एवं च शास्त्रीयस्यापि धर्मस्यातिदेशो भवत्येवातिप्रसङ्गस्तु लक्ष्यानुसारेण क्वचिल्लौकन्यायानाश्रयणेन परिहरणीयो यदि प्राप्नोति एवं च न कश्चिद्दोषः
न पदान्तेति सूत्रे ब्राह्मणकंडूतिरित्युदाहरणाच्च क्वचित्तदनाश्रयणं तत्र हि कंडूयतेः क्विप् तत्रालोपस्य स्थानिवत्त्वादुवङ्यणिवा नादिष्टादचः पू
र्वत्वे स्थानिद्वारके गृह्यमाणे ऊ एन स्यादित्याहुः। अत एवार्थवत्सूत्रशेषेऽप्रत्यय इत्यस्य पर्युदासत्वमेवोक्तं भाष्ये अल्व्यवहाराभावबोधनद्वारेति शेषः
ध्वनितं चेदं क्ङिति च गाङ्कुटि हलः श्न इति सूत्रेषु भाष्ये तत्राद्ये यासुटो ङिद्वचनात् ङिदादेशा ङितो नेति ज्ञाप्यत इत्युक्तम् द्वितीये गाङो ङित्त्वस्य सानुबन्धका
देश इत्कार्याभावज्ञापकतोक्ता तिवाद्यादेशेषु पित्त्वासिद्ध्या दूषितं च ज्ञापकं अन्त्ये शानचः शित्त्वस्य सार्वधातुकादेशे अनुबन्धानां स्थानिवत्त्वज्ञापकत्वमुक्तं
तत्र दूषणैरेव दूषितं च। अन्यथानल्विधाविति निषेधेन तत्त्वाप्राप्त्या ज्ञापकत्वासंगतिः। तिवाद्यादेशेषु पित्त्वाद्यसिद्धेश्चेति बोध्यम् अचः परस्मिन्। आदेश
ग्रहणमनुवर्तते तदनुरोधादच इति स्थाने षष्ठी। परस्मिन्नित्यादेशविशेषणं तदाह: परनिमित्त इत्यादि अच एवादेश इत्यर्थः तेन मरुतमाचष्टे मारयतीत्या
दिसिद्धिः। अत्र सूत्रे प्रयोगे णेऽचः स्थानिक इत्यर्थो न तु स्थानित्वेनोपात्ताचः स्थानिक इत्यर्थस्तेन णिलोपादेरनेन स्थानिवत्त्वं सिध्यति अत एव बहुपटूनि
ह्रीसे एयं ताणि चिअवीवददित्यादिसिध्यर्थो निषेधः सार्थकः। अच इति किम् आगत्य। मलोपस्य स्थानिवत्त्वाद्ध्रस्वस्येति तुङ् न स्यात् परस्मिन्निति किम्
युवजानिः निङः स्थानिवत्त्वेन यलोपो न स्यादिति पूर्वविधाविति किम् नैधेयः। निपूर्वाद्धाञः किप्रत्यये आतो लोपे तस्य स्थानिवद्भावात् अच्त्वव्यपदे १७
शाविरोधात्तदाश्रयढ्ढ्चत्वनिवृत्तौ ठगनापत्तेरिति दिक् अत्र स्थानिनि सति यद्भवति तदादेशेपि भवति स्थानिनि यन्न भवति तदादेशेपि नेति भावाभा
वयोरुभयोरप्यतिदेशः तत्र भावोदाहरणं निगाल्यते इति अन्योदाहरणं पटयतीत्यादि स्थानिनिमित्तकं भवत्यादेशनिमित्तकं नेति च तदर्थः लघूपध

त्वं पदन्तद्याल्लोपनिमित्तिकावृद्धिरित्याहुः। स्थानिभूतादच इति सूत्रे श्रवणाद्याख्यानोऽच्चस्यैव पूर्वत्वेऽवधित्वमिति भावः पूर्वविधावित्यस्य पूर्वसम्बन्धि
न्यैव शास्त्रविधेयकर्त्तव्ये इत्यर्थस्तेन पूर्वपरयोर्विधौन। तेनारत्नुरित्यादौ क्रुञ्च्छ्रतामिति गुणस्य सवर्णदीर्घेन स्थानिवत्वम्। वस्तुतोऽत्र पूर्वविधिशब्देनं त्र
मेकस्योक्तोऽर्थः। द्वितीये भावे किः। सम्बन्धसामान्यषष्ठ्यन्तपूर्वशब्देन समासः। विधिभावः। पूर्वसंबन्धिभावेन तन्निमित्तौ स्थानिवदित्यर्थः। अत एवैनेय इत्या
दौ यस्येति लोपेन तस्य स्थानिवत्वात्संनियोगशिष्टन्यायप्राप्तनिवृत्तिप्रतिबन्धेन नकारस्थितिः। अत एवमपदान्तसूत्रे पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्र इत्यत्र
किन स्थानिवदित्यस्योदाहरणं दत्तं भाष्ये अन्यथा पूर्वत्वेन दृष्टस्य सम्बन्धिनः कस्य चिद्विधेयस्याभावात्स्थानिवत्वाप्राप्तिरेवेति न तदसङ्गतिः स्पष्टैवाप्रकृ
तसूत्रेपि भाष्ये कर्मसाधनस्य विधिशब्दस्योपादाने तु सर्वमिष्टं संगृहीतमिति भावसाधनो विज्ञास्येते पूर्वस्य विधानं प्रति पूर्वस्य भावं प्रति स्थानिवदित्युक्त
म्। तत्र भावसाधन इत्यस्य सोपीत्यर्थः। पूर्वत्वञ्चाव्यवहितान्यवहितसाधारणमव्यवहितग्रहणमानाभावात्स्वरेनिषेधांश्च तेन पटपतीति सिद्धम्। प्रकृते
च द्वित्वनिषेधे स्थानिवत्वप्राप्तिः नपदान्त अत्र द्विर्वचनसवर्णादिग्रहणं वृतिघटितान्यातिदेशानां त्रिपाद्यामपि प्रवृत्तिबोधनार्थं तेन राम इत्यादौ विसर्गा
दिसिद्धिः। अत्र विधिशब्दो भावसाधनः। पदान्तेत्यत्रान्तशब्दश्चरमावयववाची। कर्मषष्ठ्या समासः। तिनैषायन्हसतीत्यादावेतन्न दोषमिति सुलोपो नाइणः श
न्तरिरूपं। नत्रयणः स्थानिवत्वात्। उत्वेच न स्थानिवत्त्वेन निषेधात्। स्पष्टञ्चेदम्भाष्य इति भाष्यप्रदीपोद्योतेन निरूपितम्। अत्र पदेऽन्त इति सप्तमीसमासो
भाष्ये उक्तस्तेन प्रत्यासत्त्या परपदस्थाजादेशस्यैवानेन स्थानिवद्भावनिषेध इति वेत स्वानित्यादौ न दोषः। न चैवमपि पूर्वत्रासिद्धीयेन स्थानिवदिति निषेधो
ऽत्र दुर्वारः पदेन्त इत्यर्थेन तत्र स्थानिवत्त्वनिषेधस्याप्रवृत्तिपरभाष्यप्रामाण्येन पूर्वत्रासिद्ध इत्यत्र पदचरमावयवविधायकातिरिक्तस्यैव त्रैपादिकस्य ग्रह
णात्। अत एव महिष्मानित्यत्र जश्त्वन्ना सूत्रे जश्पदेन फलाञ्जशित्यस्यैव ग्रहणं। चरसन्निहितस्यैव ग्रहणौचित्यात्। कार्यकालपक्षेपि त्रिपाद्यामन्त
रङ्गपरिभाषा न प्रवर्त्तत इति वक्ष्यत इति न तयाऽस्य सिद्धिः। गोचेत्यादौ गतिकारकोपपदानामित्यस्यानित्यत्वेन सुबुत्पत्त्यनन्तरमेव समासः उत्तरपदत्वे
चेति प्रत्ययलक्षणप्रतिषेधश्च प्रत्यासत्त्योत्तरपदस्य कार्यित्वे एवेति न दोषः। पदे इति पदत्वयोग्योपलक्षणं वा। अत्रेदम्भाष्यमपि मानम्। अत्र पदचरमावयवा

सु॰ शे॰
१८ दिसाधकः प्रतिबन्धकश्च स्थानिवद्भावो निषिध्यते विनिगमनाविरहात्। एतत्सूत्रभाष्यं कमेर्णिङि इत्यादिसूत्रभाष्ये पूर्वत्रासिद्धेन स्थानिवदित्यवष्टभ्य वेर
पलोपस्वरदीर्घग्रहणवर्जं द्विर्वचनादि प्रत्यासत्त्यात्वमिति लभ्यते। निषेध इति। द्विर्वचनग्रहणात् पूर्वत्रासिद्ध इति निषेधादिति भावः। दकार इति। स्थानत आन्त
र्यादिति भावः। अदर्शनं। स्थाने इति वर्तते प्रसंगे सतीति तदर्थमुदाह। प्रसक्तस्येति। शास्त्रतोऽर्थतो वेति भावः। अत्र दृशिर्ज्ञानसामान्ये तत्र ज्ञानस्यावर्जनीय
त्वेन तत्सामग्र्यन्तर्गततदुच्चारणाकृतासत्ता निषिध्यते। तत्र प्रत्ययलोपे शास्त्रतोऽर्थतश्च प्रसक्तोच्चारणस्य लोपविधानेन तस्य तस्मिन्विषयेऽनुत्पन्ने र
वान्वाख्यानं प्रत्ययलक्षणार्थमिति बोध्यम्। अर्थस्यैषा संज्ञा व्याख्यानात्। यत्तु प्रसक्तस्येति किम् ग्रामे तिष्ठतीत्यादौ ल्यब्लोप इति पञ्चम्यापत्तेः। अस्ति वा
त्रल्यपो दर्शनं शास्त्रतोऽर्थतश्च न तत्प्रसक्तिरिति न दोष इति तन्न। तेन प्रत्यासत्त्याल्यबन्तार्थकर्माधिकरणयोरेव पञ्चमीविधानेन तस्यात्राप्राप्तेः। न त्वेतु
अत्र्येवार्थतो ल्यबन्तस्य प्रसक्तिः। तस्मात्र पुरुत्यत्र क्विपो दर्शनसत्त्वेन प्रत्ययलक्षणेन तुगापत्तिर्दोषः। कृत्प्रत्ययेन प्रकृत्याक्षेपस्तु न अत्रैव प्रकृतिं विनातिदेश
तः प्रत्ययज्ञानसत्त्वेन व्यभिचारात्तदाक्षेपासंभवात्। इति पक्षे इति। विनिगमनाविरहादिति भावः। द्वित्वस्यात्रैपादिकत्वात्तत्र न यणो बहिरङ्गासिद्धत्वम्।
अत एव दध्यत्रेति भाष्ये उदाहृतम्। धकारयकारयोरिति। तेन विसर्गादिद्वित्वेनाधिक्येऽपि न क्षतिः। द्विधमिति। द्विधत्वप्रक्रियायां बोध्यम्। न चैका
त्सा आकृतेश्चरितः प्रयोगो न द्वितीयस्यात्तृतीयस्याश्च भविष्यतीति कृत्वानुप्रयुज्यते इति सूत्रभाष्योक्तन्यायेनैकस्य द्वित्वे परस्य तदभावो नुचित इति वा
च्यम्। सार्थकानेकविषय्येतन्न्यायाङ्गीकारात्। यत्रान्यो कृतिकरणे भिन्नार्थत्वसंभावना न द्विषयत्वाच्च हलो यमामिति लोपे द्वित्वाभावे चैतद्वैरूप्यम्। ना
दिन्या। यरोनुनासिक इत्यतो यर इति वर्तते। पुत्र शब्द इत्यवयवषष्ठी आदिनीशब्दे परे इति च प्राधान्याद्यरो विशेषणम्। आदिनीति ङ्यन्तानुकरणात् लुप्त
सप्तमीकम्। अत एव तत्परे चेत्यस्यादिनीशब्दे यस्मात्परस्तत्र परे इत्यर्थं हरदत्तो व्याख्यत्। अस्य धातौ माधवोऽप्येवमेव। ईदृशाक्रोशस्य स्त्रीत्वे वदर्शना १८
च्चाभाक्रोशे निन्दाम् उदाह। पुत्रादिनीति। ताद्दृशाक्रोशस्य स्त्रीत्वे वदर्शनादाह। पुत्रहतीति। अत्र चिचेति सिद्धे पुत्रस्य क्षानेचेद्धत अध्ययोरेवाक्रोश
एवेति नियमार्थमिदम्। संयुक्तेष्विति। सूत्रे वर्णानां सजातीयानामेव ग्रहणं परस्परसाहचर्यात्। न च तथा चः संभवति। अत एवाचो रहाभ्यामिति सार्थक

मः । तिर्वारणे सप्तमी । अच इत्यनुवर्तते । त्रिप्रभृतिसंयुक्तवर्णमध्ये चः परस्य यरो द्वित्वाभावस्तु इत्यर्थः । इन्द्रो राष्ट्रमित्यत्र नकारषकारयोः प्राप्तद्वित्वस्यैव निषेधः वि
कल्पः । अनचि च सर्वत्र शाकल्यस्येत्येव सिद्धे इदं सूत्रद्वयं विकल्पस्य मतं मतभेदप्राप्तव्यवस्थाबोधनार्थमिति बोध्यम् । यरोऽनुनासिकेऽनुनासिको वेत्यनुवृत्त्यान
न्वीत्येव सिद्धे तु सूत्रत्रयमपि तथेति बोध्यम् । अचो र । अच इति कृतत्वाद्व्याख्यानाच्च रहाभ्यां सम्बध्यते । तस्मादित्युत्तरस्येत्येन तल्लभ्यमानम् । अचः पराभ्या
मिति । वायमीति । झयो ह इत्यतोऽन्यतरस्यामित्यनुवर्ततइति भावः । दीर्घादाचार्याणामित्युत्तरसूत्रस्वारस्यमपि वापदानुवृत्तौ लिङ्गम् । उदाहरणं झयो हो शश्छोऽटीति
षट्सूत्रीपाठोत्तरं झलां जश् झशि अभ्यासे चर्च । वावसाने । अणोऽप्रगृह्यस्येति पञ्चसूत्र्याः पाठ इति भाष्यसंमताष्टाध्यायीपाठे तु वावसाने इत्यतोऽनुवृत्तिर्वि
ध्यास्यं चास्य वैकल्पिकत्वं लक्षणसूत्रे भाष्ये । आदित्यशब्दात्त्वेपार्थे ण्यान्तादेवतापत्यार्थे ण्य । यस्येति चेत्यल्लोपेन न यलोपः । आपत्यस्येति तु न आपत्यत्वा
भावात् । हल इति किम् । शय्या । यमामिति किम् । आर्ध्नीत । यमीति किम् । रामाभ्याम् । एचोऽयवायावः । अवीवोऽपि प्रत्यये इति सूत्रमपि तु मुचित
मित्याहुः । यथासंख्यसूत्रलभ्यमर्थमाह । क्रमादिति । उदात्तादिगुणयुक्तानामन्यगुणकव्यावृत्तिस्तु स्थानेऽन्तरतमपरिभाषया बोध्या । एतदेवाभिप्रेत्य
यथासंख्यसूत्रे भाष्ये प्रकृतसूत्रे स्थानेऽन्तरतमसूत्रेण व्यवस्थोक्ता संवृतावर्णस्य संवृतावर्णो विवृतावर्णस्य विवृतावर्ण इति । एतद्भाष्यप्रामाण्येन एओ इत्य
नयोरकारांशे संवृतत्वमितरांशे विवृतत्वं तदुपरागाच्च न संवृतत्वस्य पृथग्ग्रहणं एओ इत्यनयोस्त्वकारांशेऽपि विवृतत्वमेवेति बोध्यम् । तस्य लोपः । उपदे
शे । जित्यन्त इदित्यनुवृत्त्या विभक्तिविपरिणामेन च सिद्धे तस्य ग्रहणं सर्वलोपार्थम् । तेन जिदुइनामन्त्यस्य लोपो न । नानर्थकेऽलोऽन्त्यविधिपरिभाषा तु भाष्ये प्रत्या
ख्यातैवेति दिक् । न भवतीति । फलाभावादिति भावः । वान्तो यि । येन विधिरित्यस्यापवादभूतया तस्मादुड चीत्याद्यर्थमावश्यिकया वाचनिक्या । यस्मिन्विधि
स्तदादावल्ग्रहणे इति वार्त्तिककृदुक्तपरिभाषया लभ्यमर्थमाह । यकारादाविति । ओदौतोरिति । ओदौतोरिति वक्तव्यमिति वार्त्तिकमूलात्तद्व्याख्याना
दिति भावः । पूर्वसूत्रे वान्तो प्रति तयोरेव स्थानित्वनिर्णयादिति स्थानेऽन्तरमसूत्रस्य कैयटोक्तं तु न युक्तं । वान्तज्ञानार्थं पूर्वसूत्रपर्यालोचनस्यावश्यकत्वेऽपि
तद्वाक्यार्थपर्यालोचने मानाभावात् यथासंख्यसूत्रसहकारेणाबोधान्तरं तयोस्तत्त्वनिर्णयात् । अन्तरतमपरिभाषया निर्वाहे तु लक्ष्यपर्यालोचनकालेन सि

श· शा·शे· णेयः अत एव पूर्वसूत्रेस्यानिविशेषलाभोयथासंख्यसंबंधादिहतुनिमित्ताभावात्तस्याभाभावइति षष्ठे प्रकृतसूत्रेकैयटः।गव्यमिति· भत्वाद्दलोपोन·यीति।
१९ किम्· गोभ्याम्· प्रत्ययेकिम्· गोयानम्· ननुगव्यूतिरित्यत्रवस्यहलिसर्वेषामितिलोपःशाकल्यस्येतिवालोपः स्यादत आह। वानइत्यत्रेति· नचविशेषविहि
तेनकार्यित्वेनलोपेवस्यनिमित्तत्वबाधइतिवाच्यम्· निमित्तत्वानाक्रान्तेविषयेकार्यित्वस्यचारितार्थ्यात्।तक्रकौण्डिन्यन्यायश्चानवकाशविषयोविधयवि
षयश्चेतिस्पष्टंतद्धितेष्वचामितिसूत्रेयद्विधायकेचभाष्ये।अत्येउत्तरयोर्विग्रहेण।विशेषासंप्रत्ययान्नित्यग्रहणानर्थक्यंक्रियासमभिहारेचनैतंभ्योयइभ
वितव्यमितिभाष्यंचेनविशेषासंप्रत्ययादित्यनुकृष्यते।अन्यथातक्रकौण्डिन्यन्यायेनसिद्धविशेषासंप्रत्ययादित्यनुकर्षकचकारवैयर्थ्यापत्तिः।निरूप
यिष्यतेचेदंयङ्नि।तस्यचवार्तिकेनुवृत्त्यायूतौश्रूयमाणवकारान्तआदेशइत्यर्थः सूत्रेतुनफलंगव्यादौभत्वेनवान्तस्यपदत्वाभावात्। लव्येस्वमएवनद
भावाल्लोपाप्राप्तेः।गोशब्दादिभ्यःक्यजादावपिनःक्येइतिनियमेनपूर्वस्यपदत्वाभावात्।एवंतर्हिवार्तिकएवप्रश्लेषउचितइत्याशयेनाह· ऊकारादिति।लो
पोव्योरितिसूत्रेवकारप्रत्याख्यानन्तुलौकिकोदाहरणाभावेनतदर्थपरतयाबोध्यम्।अत एवैकोगुणेतिसूत्रेऽऽतोल्लान्तस्येत्यत्रलुप्तनिर्दिष्टोवकारइत्युक्तं
भाष्येशास्त्रीयसौत्रप्रयोगार्थंतदितिनसंशयः।नचैवंविष्णवेइत्यादौतस्यलोपइतिदुर्वारंगव्यूतावुच्चारणस्यचारितार्थ्यादितिवाच्यम्।गविचयुक्तेइत्या
दिनिर्देशैर्वारणात्· परेतुसापूर्वपक्ष्युक्तिरितिनवकारप्रश्लेषोलोपेनोचितः।किन्त्वछन्दसिसर्वेविधीनांव्यवस्थितत्वान्नवलोपप्रसक्तिस्तत्रत्येगव्यूतौ।
अध्वपरिमाणेपिसंज्ञाशब्दोयम्।तत्रसंज्ञात्वभंगापत्तेर्नवलोपः।यथारघुनाथेतिसंज्ञाशब्देनित्यस्यापिणत्वस्याभावःसर्वनामशब्देणत्वाशंकातुतस्यसं
ज्ञाविशेषेआधुनिकविनियोगात्।शास्त्रानुसारिशब्दस्यैवविनियोगउचितइत्यभिप्रायेणनिरूपितंचैतत्सर्वादिसूत्रेभाष्यप्रदीपोद्योतेइत्याहुः।निरूपयि १९
ष्यतेचेदंपूर्वपदात्संज्ञायामितिसूत्रे।धातोः।धातोरित्यस्याभावेप्रातिपदिकमात्रविषयोनियमःस्यात्।तथाचगव्यमित्यत्रनस्यात्।ओयतइत्यत्रचस्या
त्।तदभावेसमान्यतोनियमापादनन्तुयोगविभागेवकारवैयर्थ्यापत्तेरयुक्तं तन्निमित्तस्येद्धातोरेवेतिनियमेवाभ्रव्यासिद्धस्तद्वारणायैववकारः।लव्या
नित्यादौ अत्रगुणहेत्वोर्यण्यन्निमित्तकत्वेनैचोयादिप्रत्ययनिमित्तकता तन्निमित्तस्येतिकिमिति।सूत्रमेवकिमर्थमितिप्रश्नः ओयतइति·वेञः कर्मणिल

टिपो क्रियजादित्वात्संप्रसारणेऽकृतसार्वेति दीर्घे आङ्सहाद्गुणः। न धातुलोप सूत्रभाष्य[illegible] बहिर्भूतधातूपसर्गकार्यस्य बहिरङ्गत्वादन्तादेशे गुणोऽसिद्ध
इत्यरुचेराह· ओयतेति। तस्मादेव कर्मणि लङ् आडागमे वृद्धिः शेषं पूर्ववत्· क्ष्यज· क्षि क्षये जि जये इत्यनयोरेवग्रहणं न तु क्षीष् हिंसायां क्षि जि क्षय इत्यनयो।
र्व्याख्यानात्। अत एव क्षिज्योरेवेच इति भाष्य उक्तम्। तस्मै प्रेति· क्रयार्थं वस्तु निक्रय्य इति निपातनात् इत्यर्थो व्याख्यानात्। गुणभूतस्यापि न तु परामर्शः। क्रया
र्थत्वञ्च फलोपधानरूपं तदर्थ इति विशेषणात्तदाह· केतार इति· योग्यतामात्र ग्रहणे तु व्यावर्तकं तत्स्यादिति भावः· केचित्तु स्वीयं धान्यादि द्रव्यायत्र न मूल्या
ग्रहणं तत्र धान्यं क्रय्यम्। यत्र तु स्वयं द्रव्यं दत्वा परकीयधान्यादिग्रहणं तत्र धान्यं क्रेयम्· द्रव्ये तु न क्रय्यत्वं नापि क्रेयत्वं किन्तु धान्यादेरेव शक्तिस्वभावात्। भा
ष्यस्वरसोऽप्येवमेवेत्याहुः· लोपः शा· भोभगो॰ घो॰ पूर्वस्येत्यशीति चानुवर्तते तत्रोकारान्ते ओतो गार्ग्यस्येति बाधकमित्याशंक्यनाह। अवर्णपूर्वयोरिति· व्योरित्य।
नुवृत्तावपि वर्णसमाम्नाये यकारस्य प्राक्पाठात्तत्क्रमेणाह· यवयोरिति· स तस्मा आ॰ दद इत्यादि भाष्यप्रयोगात् इत्यत्र यवयोरित्यसासम्बन्धः इदं सूत्रं लघुप्रयत्नेन।
शाकटायनमते तयोर्विधानेन शाकल्यमते तदभावात्· अवर्णेति किम्· गोयत्र। पदान्तयोः किम्· हरये। अशि किम्· वृक्षवेतीति वृक्षवीः क्विपूतमाचष्टे
इति ण्यन्तादिवृक्षवकरोतीति क्विपि तु ठस्यात्· विश्विमित्त को लोपो व्योरिति लोपस्तु न णिलोपटिलोपयोः स्थानिवत्त्वात्। प्रातिपदिकात्धात्वर्थ इत्यत्यापदत्वाभा
वेन परपदस्थाजादेशाभावेन च लोपस्य पदचरमावयवत्वाभावेन च न पदान्तेति निषेधाप्रवृत्तेः। एतेन कनिमित्तकोवलोपोत्र दुर्वार इत्यपास्तम्· किञ्च
—स्थानिवत्त्वाभावज्ञानमित्यन्योन्याश्रयस्तत्राप्रवृत्तौ बीजम्· इदञ्च न पदान्तसूत्रे भाष्ये स्पष्टम्· न च पदसंज्ञायां टिलोपस्य स्थानिवत्त्वाद्दृस्य पदान्तत्व
मेव नास्तीत्यशीति व्यर्थमिति वाच्यं पूर्वत्रासिद्धीयमपापकस्य प्रतिबन्धकस्य वातिदेश
स्य तेन निषेधादिति केचित्· परे तु न पदान्ता हलोणः सनीति लणसूत्रस्थभाष्याद्वृक्षवादेरनभिधानमेव। भोभगोइति सूत्रे [illegible]ग्रहणमनर्थकमन्यत्रा
भावादिति वार्त्तिकाच्च। अशोन्यत्र तन्निमित्तार्थे हलि सर्वेषामिति वृक्षवकरोतीत्यत्र माभूदित्युक्तम्· अस्य चैकदेश्युक्तित्वं लणसूत्रस्थोक्तभाष्यविरोध
न स्पष्टमेव कैयटेनोक्तम्· अत एव भाष्य उत्तरार्थमित्युक्त्वा हलि सर्वेषामित्यत्रैव प्रयोजनमुक्तम्। हलि सर्वेषामित्यत्र वकारनिवृत्त्यैवात्र तदुदाहरणसंभवा
पं॰ ग॰ कार्यकार्यिणोरभावादिति तदर्थः। न ह्यन्यत्रास्तीति न व्याख्यानभाष्ये रूग्रहणमुपलक्षणमेतदाशयमजानानैकदेशिनोक्तम्॥

सु॰
श॰ रो॰
२०

तत्रान्यग्रहणप्रयोजनमिति तद्भाष्यमेकदेशयुक्तिरित्याहुः कृतिसन्तीति॰ वाक्यसंस्कारपक्षेपि पूर्वोपस्थितमिन्नकत्वरूपान्तरङ्गत्वमादायान्तरङ्गत्वेन
पूर्वपरयोर्द्वित्रिरीकारादेः स्थानिभूतादचः पूर्वत्वं वोध्यम्॰ एकः। गुण इत्यादेर्विधेयसमर्पकत्वेन तत्रैकत्वसंख्याया अविवक्षणेनोभयोः पूर्वपरयोरेकवाक्यत
येकविधेयान्वयेन चानयोः पूलयोः कटकुविल्पादितरद्वोभयसम्बन्ध्येकविधेयस्यैव प्रतीतेरेकग्रहणं स्पष्टार्थम्॰ उरण् रपरः इति षष्ठी स्थाने इतिप
रिभाषालब्धम्॰ उदात्तस्वरितयोर्यणः इति वत्। स्थानेऽन्तरतम इत्यतः स्थाने ग्रहणमनुवर्तते तस्य लक्षणायाप्रसंगाव स्थाप्यामित्यर्थस्तदाह॰ रपरः सन्नेवे
ति॰ रपर इत्यवयववाचिना परशब्देन षष्ठ्यर्थे बहुव्रीहिस्तेनास्यावयवत्वात् यदागमा इति न्यायेन विशिष्टस्य गुणवृद्धिसंज्ञेन नकारस्य गुणवृद्धी अ
रावेवेति नियमोपपत्तिरत एव रदाभ्यामिति सूत्रे थलि च सेटीति सूत्रे च भाष्ये गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसंज्ञकोभिनिर्वर्तत इत्युक्तम्॰
उः स्थानेऽण प्रसज्यमान एव रपरो भवति पूर्वभक्तश्च रेफ इत्ययं गुण इति कैयटः। अवयवत्वं वाचनिकमेवतत्सादृश्यवोधनपर्यवसायि। अन्यथा वर्णस्य व
र्णान्तरावयवत्वं हलन्ताच्चेति सूत्रभाष्योक्तरीत्या संगतं स्यात्। पञ्चम्यर्थे बहुव्रीहिणानवयवत्वे तु गुणवृद्धिशब्देनाकारादेरेव रेफपरस्यैतदेकवाक्यत
याविधानं स्यात्। गुणत्वादिकं त्वकारादिनिष्ठमेव स्यादित्युक्तनियमानुपपत्तिः। अत एव वृक्ण इत्यादौ हलादिः शेष सिद्धिरभ्यासावयवस्यैवानादित्वेननि
वृत्तेः। एतेनाणमनूद्य रपरत्वं विधीयत इति परास्तम्। उक्तनियमानुपपत्तेः। अत्र पक्षे कस्य रपरत्वं कलपरत्वमिति व्यवस्थानुपपत्तिस्तु नरेफवत्स्थानिकस्य
रेफपरत्वं लकारवत्स्थानिकस्य लपरत्वमिति व्यवस्थासम्भवात्। तत्रान्तरतम्यादिति॰ स्थानतः इति भावः। रेफादिद्वारा देशस्यापि मूर्धादिस्थानत्वात्। तत्र तत्रा
देशानेव रलपरानुच्चार्येदं सूत्रं न कार्यमिति तु न वाच्यम्। आपृच्छ्य धामीः भृत्तामिदित्यादौ दोषापत्तेः। अत्राणपूर्वेणैव प्रत्याहारणमिति निर्देशात्॰ व
स्तुतो रप्रत्याहाराभावेन रपर इत्यस्य स्थाने ल्र पर इति पठनीयमिति लपरत्वं सक्ष्यामीति तुल्यरत्वं सूत्रभाष्याल्लभ्यते। करोकनजयोः ह इत्येतो वावसाने इत्य २०
तो वा विकल्पोनुवर्तते हयवरट् सूत्रे भाष्ये स्पष्टमिदम् लोप इति॰ ऋ धधातोर्फ इति भावः। असंतीति॰ द्वित्वाभाव इत्यनुकृष्यते त्रिधुमिति॰। त्रिधकार
स्य प्रक्रियाभिप्रायेण। न च द्वित्वभिन्ने पूर्वत्र कर्तव्ये परमसिद्धमित्यर्थे केन पूर्वत्रासिद्धीयमद्वित्व इत्यनेन धातुधकारस्य जश्त्वे दस्य द्वित्वमितीदमयुक्त

मिति वाच्यम्· फले विशेषाभावेन तदनादरणात्· नचात्र जश्त्वात्पूर्वमनन्तरत्वादिरूपविशेषोऽस्ति। तदनन्तरं जश्त्वप्रवृत्तेः तस्य परिभाषात्वेन फलविशेष
एवप्रवृत्तेरित्यन्यत्र विस्तरः। पञ्चमीति· विनिगमकाभावादिति भावः। अत एवास्य वैकल्पिकत्वम् क्रमेकेति· क्रमेति संबुद्ध्यन्तं पृथक्पदमिति कश्चित्
एत्येधत्यूठ्स्वग्रादिशः एव व्याख्यानात्। एचीति निर्दिष्टो विशेषणमूठस्तत्वासम्भवात् एत्येधत्योरिति योगं विभज्य तयोरेवेचीति विशेषणस्य भाष्ये कृतत्वा
च्चैतदाह। एजाद्योरिति· एतिरत्रैणोव प्रसिद्धत्वात्। उपेतीत्यादौ वृद्धिरेचीत्यनेनैव गतार्थत्वमाशङ्क्याह· पररूपगुणेति·। एत्येधत्योर्ङि पररूपस्याठि चा
ङ्गुणस्येति विवेकः। उपैधत इति अत्र न सर्वादेशः एत्येधत्याद्यवयवे चीत्येवं क्रमेण सूत्राणामर्थात्। अयमेवार्थ इति प्रत्ययलक्षणोऽर्थो नैस्य भाष्यस्वरसः
प्रष्ठेशारवेति क्वेत्येधत्यूठ्स्विति सप्तमी बोध्या· प्रष्ठौह इति· प्रष्ठं वहतीत्यर्थे वहेर्ण्विः ...ठि संप्रसारणं पूर्वरूपं अनेन वृद्धिः। प्रदिध इति· पर्येत्विणीकारा
दौ प्रतिषेध इति वार्त्तिके एधप्यनुपादानात्। न त्वेधतेरव्यभिचारादिति· तत्तेष्वाख्यानभिधानमेव एत्येधत्योरचीति विशेषणमिति भाष्यस्यैधत्यंशे संभव
मात्रेणोपरञ्जकतया विशेषणमित्याशय इत्याहुः। उपैधयत इत्यादावपि वृद्धिर्भवत्येव प्रकृतिभागस्यैधरूपत्वात् किन्त्वेत्येधत्यवयवे चीत्यर्थः प्रत्ययल
क्षणासूत्रभाष्यसंमत इति अत्र न दोषः पुरस्तादिति· पुरस्तादपवादा अनन्तरान्विधीन्बाधन्ते नोत्तरानिति न्यायः अवश्यं स्वपरस्मिन्बाधनीयेऽभेदनापे।
क्षायां प्रथमोपस्थितबाधेनाकाङ्क्षानिवृत्तेरिति हितदोऽजम्· असाधुरेवेति· आङि णौ रकारादेशस्य पूर्वान्तवत्त्वया ङिपररूपेण बाधादिति भावः। अर्थवद्ग्रहणा
ति। अस्यावीजं स्वरूपमिति सूत्रे उक्तम् पररूपे प्राप्त इति· पूर्वं धातुः साधनेन युज्यत इति सिद्धान्तादिति भावः उपसर्गादिति· नप्रकरणादुपक्रकारीय
नीत्यादौ वा सुपीति न वृद्धिः। सोऽत्र ऋति सुन गृह्यत इति व्याख्यानात्· आदित्यनुवृत्तेन तदन्तविधिरित्याह· अवर्णान्तादिति· यस्मिन्विधिरिति परिभाषया
आह· ऋकारादाविति· पूर्वपरयोस्तयोः समुदाययोरन्त्याद्योर्वर्णयोरेकादेश इत्यर्थः। उपसर्गावयवाकाराद्धात्ववयवे ऋकारे [illegible] पूर्वपरयोर्वृद्धिरसु
चितम्· गतेरिति तु नोक्तं अच्छर्च्छतीत्यादौ दोषात्· अन्ता· इह पूर्वपरयोरिति वर्त्तते यथासंख्यं च अन्तादिशब्दौ चोपस्थितैकदेशस्थानिपरौ पूर्वपरशब्दौ च
तद्घटितसमुदायपरौ· एवञ्च पूर्वस्य परस्य च समुदायस्यान्तादिभ्यां वर्णाभ्यां पृथगवस्थिताभ्यां ये व्यवहाराः प्रातिपदिकत्वसुबन्तत्वप्रत्ययत्वादयस्ते

शु· शे· २१ कृतैकादेशस्य भवति न तु तद्वर्णमात्रवृत्तयोः स्वह्रस्वत्वादय इत्यर्थस्तत्फलितमाह· योयमित्यादि· तेन रामावित्यादौ परादिवत्त्वेनौ इत्यस्य सुब्त्वे पूर्वभा
गस्यैकदेशविकृतन्यायेन प्रकृतित्वे यस्मादिति हितस्तदादितदन्तत्व मार्थसमाजग्रस्तमिति पदत्वसिद्धिः तेन तद्वर्णमात्रवृत्तिधर्मो नातिदेशात् स्वाद्याभिर्लि
ङ्गात्वनिबन्धन ऐत्व न अयं जइन्द्रमित्यादौ सवर्णदीर्घश्च न। अत एव नुक्यसिद्धवचनं चरितार्थमन्यथा धीत्यित्यादावादिवत्त्वे कृतत्व प्रयुक्तनुकसि
द्धौ तद्वैयर्थ्यं स्पष्टमेव। तदुक्तं वर्णाश्रये चानादिवत्त्वप्रतिषेधो वक्तव्यो न वा तादूप्यातिदेशादिति। अन्तादिवर्णमात्रवृत्तिधर्मो नातिदेशादिति तदर्थः
ह्रीरपेणाम्य स्वे कारविशिष्टे एकादुत्तरपदत्वं भवत्येव स्थानिवद्भावेन तु नैतल्लभ्यम् अप्राधान्येनालाश्रयणात् किञ्चैकादेशवर्णयोरेव स्थानित्व
न समुदायस्येति भीईभिप इत्यादावेकादेशविशिष्टे धातुत्वापत्तिः धातुत्वस्यैकादेशस्थानिधर्मत्वाभावात्। आनुमानिकादेशकल्पकवाक्यमना
दिघटितसमुदायस्यैकादेशघटित आदेश इत्येवं न तु प्रत्येकं तयोः स्थानित्वबोधकं तथा सति स्वाश्रयशब्दस्य स्थानिकत्वेन स्वशब्दतया ततईमश
ब्दस्यापत्तेः किञ्चोभयत आश्रयणे नान्तादिवदित्यस्यासंगतावभीयादित्याद्यसिद्धिः स्थानिवत्त्वं तूभयत आश्रयणे इष्यत एव। अन्यथा च तुः
रस्मिन्नित्यस्याप्युभयत आश्रयणे प्रवृत्त्यापत्तौ ह्वायत इत्याद्यसिद्ध्यापत्तिरिति दिक्· निर्देशादिति· न च कर्तृरिच्यर्षौ त्यादौ गुणस्य पदद्वयस
म्बन्धिवर्णद्वयाश्रितत्वेन वहिरङ्गत्वाद्रफाभावेन न विसर्ग इति वाच्यम्· गुणस्यैव पदद्वयसम्बन्धिरफस्वरात्मकवर्णद्वयाश्रितत्वेन विसर्गा।
स्यापि तत्त्वात् परनिमित्तकत्वमप्युभयोः समम् किञ्च कार्यकालपक्षे त्रिपाद्यां तदुपस्थितावपि पूर्वं प्रति परस्यासिद्धत्वादन्तरङ्गाभावेन पूर्वस्यान्त
रङ्गनिरूपितवहिरङ्गत्वाभावात्कथं तस्यासिद्धत्वप्रतिपादनम्· न चान्तरङ्गस्य पूर्वस्यासिद्धत्वाद्भावेन तं प्रति परासिद्धत्वं पूर्वत्रेत्यनेन वक्तुमशक्य
मिति वाच्यम्· एवं हि विनिगमनाविरहादुभयोरप्यप्रसक्तौ विसर्गो दुर्वारः एवं च विरोधात्कार्यकालपक्षेपि तदनुपस्थितिरेव त्रिपादीस्थेऽन्तरङ्गे उ
चिता। अत एव विसर्जनीयसूत्रे भाष्ये इमामेव युक्तिमुक्त्वा युक्तोयं परिहारो न वा वहिरङ्ग· लक्षणत्वादित्युक्तम्· एवं चान्तरङ्गवचनान्येकवाक्यतया ज्ञापका
द्युपसंख्यानं वा कर्तव्यम्। अत एव निगाल्यत इत्यादौ लत्वार्थं तस्य दोष इति वचनमिवारभ्यम् अन्तरङ्गत्वात् सिलोपात्पूर्वं वैकल्पिकलत्वे चक्रत्रे भाष्यकपनी

त्वादीत्वं बहिरङ्गासिद्धत्वेन च सिद्धे तद्द्वैयर्थ्यं स्पष्टमेव । यत्तु लक्ष्यानुरोधात्कार्यकालपक्षेऽपि उपस्थितं नान्तरङ्गपरिभाषया आनुमानिक्या प्रत्यक्षसिद्धस्यापि पूर्वत्रेत्यस्य
बाध इति तन्न लक्षणैकचक्षुषामादरणीयं । अन्तर्द्वारिणीति सूत्रे रेफस्य पूर्वान्तवत्त्वे विसर्जनीयप्रतिषेधो वक्तव्यो नार्कुटाद्यर्थमित्युक्तं भाष्ये इति दिक् । उप
सर्गाणीवेति · तत्संज्ञायाः क्रियायोगनिमित्तत्वादित्यर्थः । यदर्थे क्रियापदं प्रादीनामन्वयस्तं प्रत्येवोपसर्गत्वमिति भावः प्रकृते च प्रत्यासत्त्या ऋकारादिनिमित्तो
पसर्गग्रहणात् प्रगतः ऋच्छः प्रर्च्छ इत्यत्र न । पुनरिति · प्रकृतसूत्रे भाष्ये स्फुटमेतन्नेति सुब्धाताविति · सुबन्तप्रकृतिके धाताविन्यर्थः तुल्यास्यसूत्रे उपाकीरीयती ।
त्यादेरेतदुदाहरणत्वस्य भाष्ये उक्तत्वात् । यस्मिन् सुबन्तस्य धातुप्रकृतित्वेनोक्तं नयोन्नत्प्रकृतिक इति व्याख्यानमेवोचितम् । ऋषभस्य समीपमुपर्षभं तदिच्छा ।
त्युपर्षभीयतीत्यत्र तु न वृद्धिः । उपेत्यस्यानुपसर्गत्वात् · अत्रापि धाताविन्यनुवर्त्य वाक्यभेदेन व्याख्येयम् · तेन सुब्धातावपि न प्रकृतिभावः । आर्षभीयतीत्य
त्र शरोचीत्यस्यानुपन्यासेन व्यंजनात्परस्यैकस्याने कस्य वोच्चारणे विशेषाभावेनाचो रहाभ्यामित्यस्य तन्निषेधस्य चानावश्यकतासूचिता । वाक्यभेदेनेति · इदं ।
वृत्तौ स्पष्टम् । भाष्ये तु न दृश्यते । एवे चेति · वार्त्तिकासूत्रे धाताविन्यनुवृत्तेरारब्धम् । अवधारणं नियमः । एवशब्दस्य द्योत्यमर्थद्वयम् अवधारणमसंभवरूपान
वक्लृप्त्यादि च तयोरन्यो त्रैव शब्दार्थ इत्यभिप्रेत्याह । अनवक्लृप्ताववेति · क्वेव भोक्ष्यसे इत्युक्ते स्थलसंकीर्णत्वादिना नास्ति सम्भवस्तव भोजनस्येति गम्यते । अ
चोन्त्यादि । अच इति निर्धारणे षष्ठी । अंते भवोऽन्त्यः । अन्त्यादीति गमकत्वाद् बहुव्रीहिः । मान्ते एङ इति · मृताण्डादागतो मार्त्तण्डः । जस्विषय एव पररूपम् । ननुमा
र्तण्ड इत्यत्र चन कारोऽकारः स आदिर्यस्येत्यन्यपदार्थो दुर्लभ इति चेन्न · एकस्मिन्नेव समुदायरूपत्वारोपेण तदवयवत्वारोपेण चोपपत्तेः । एतन्मूलकमेव
व्यपदेशिवदेकस्मिन्निति परिभाषितमित्यलम् । वस्तुन आरोपस्य नात्रोपयोगं शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति पतंजल्युक्ते रसत्यभावेऽपि विकल्पात्मकज्ञा
नमंत्रं तदपि लक्ष्यानुरोधाच्छास्त्रप्रवृत्त्युपयोगीति वोध्यम् · पतंजलिरिति तु अंजलेः पतित इति विग्रहे मयूरव्यंसकादित्वात्समासे निपातनादित शब्द
स्य लोपः पृषोदरादित्वाद् तल्लोपे साधुः । गोनर्दे देशे कस्यचिद् ऋषेरंजलेः संध्याकरणसमये पतित इत्येतिह्यात् । आत्त्वोष्ठयोः । अत्र समर्थपरिभाषानियतिष्ठ
ते । समासे अङ्गुलेः सङ्ग इत्यादौ समासग्रहणेन पदविधिरिति सूत्रस्वरसेन चैपदत्वेन सुबन्तत्वेन च यत्र सामर्थ्योद्देश्यता तत्रैवैतत्परिभाषाप्रवृत्तिस्वीकारात् ।

सु.
श.प्र.
२२

ओत्वोष्ठादिमात्रस्य पदत्वाभावात्। अवर्णादोत्वोष्ठयोः चिनद् घटितः समास इत्यर्थात् हन्वोष्ठयोवः स्मृत इति प्रयोगसिद्धिः। अन्यथा प्रत्यासत्त्यौष्ठाद्युत्तरपदके
समासएवेम वृद्ध्यापररूपानापत्तौ तदसंगतिः स्पष्टैव ओतुर्विडालः ओमाङोः ओत्रैङीति नानुवर्तते तेनेवेषदर्थे काङ्समूह ऋषभशब्दस्य समासेऽध ऋषभः अत्र
पररूपेऽघर्षभसिद्धिः नचात्र परत्वाद्दीर्घप्रसंगः प्रतिपदविधित्वञ्चनिरवकाशत्वेसत्येव बाधकत्वेप्रयोजकमिदञ्च मध्येऽपवादन्यायेनाकेहोत्साहो वृद्धेरेव बाधकं
स्यात् इति वाच्यम् लक्ष्यानुरोधेनात्र बाध्यसामान्यचिन्ताश्रयणात् अन्यत्र प्रतिपदविधित्वस्य बलवत्त्वेप्रयोजकतादर्शनेन परादीर्घात्पूर्वपररूपप्रवृत्तेश्च अव्य
क्तशब्दार्थो ध्वनेरिति अविद्यमानकत्वादिशब्दस्येत्यर्थः तस्याव्यक्तत्वेनानुकरणेऽत्र असंभवतीत्याह अनुकरणस्येति अत्रालोन्त्यस्येति न प्रवर्तते नानर्थके
इति निषेधात् आम्रेडितस्यैवेति वक्तव्ये नाम्रेडितस्येत्यारम्भाद् अत इति किम् वटगिति नाम्रेडित· अव्यक्तानुकरणस्यात इति च वर्तते अव्यक्तानुकर
णावयवीभूताम्रेडितावयवाच्छब्दस्येत्यर्थः नाम्रेडितस्यतस्तु वेति न सूत्रितं वैचित्र्यार्थम् फलकल्पनाभिनिवेशस्तु न युक्तो भाष्यानुक्तेः अत एवात तदधीते
तद्वेदेति सूत्रे द्विर्ग्रहणप्रमाद कृतमाचार्यस्येति भाष्ये उक्तम् लाघवानवधानलक्षणोऽत्र प्रमाद इति कैयटः उक्तदनवधानमिति तु भाष्यकृदुक्तप्रयोजनेत
दवधानमन्यत्रान्यदिति निर्णेयम् ननु डाचो भावादेतदप्राप्तिरत आह बहुलवचनादिति तस्य परम· अवयवः चिपरशब्दयोगे अत एव ज्ञापकात्षष्ठीतस्य प्रह
णास्य षष्ठ्यर्थे इत्यनुवृत्त्या षष्ठीविपरिणामेन सिद्धेः अन्यद्विरुक्तपरस्यतु न संज्ञा अवयवस्यैवेत्यत्र प्रकरणसंज्ञाकरणात् फलाभ्या· अन्तग्रहणं कस्येति नि
वृत्त्यर्थं सर्वोपकारकतया च प्रकरणान्त्यस्थलेस्या· एतेन अदित्यत्रैव तलेखउचित इत्यपास्तम् अज्झलौ सावर्ण्ये निषेधादाह अचि किमिति· अनिष्पत्तेरिति ना
कलाविति सूत्र विषयनिर्णयेऽपवादविषयपरिहारेणान्तद्गुणिप्रसवर्णयदवाह्य निर्णयोत्तरं तावत् ग्रहणस्य ग्राहकशास्त्र बोध्यतयैतद्विधिकाले ग्रहणक २२
शास्त्रस्य तावद्ग्रहणबोधकत्वानिष्पत्तेरित्यर्थः सूत्रस्थसवर्णपदानुवृत्तिमभिप्रेत्याह ऋतिसवर्णइति तत्फलंदध्यृकारादावेतदप्रवृत्तिः एतद्धि धैर्ययोर्द्
उणास्तुस्थानन्तरस्याठादच्चवनेनतयोः स्थानेप्लुतेसिद्धिस्तयोश्च नरपरत्वम् द्विमात्रमिति अतएवाकः सवर्णे इत्यनेनैव ऋकारद्वयस्य स्थाने रेफद्वयवता
पगुणाकृतान्तर्येण कदाचिद्रेफद्वयमध्यस्य विवृतत्वान्तर्येण कदाचिद्द्विष्ठेनस्य लृकारे लकारश्चान्तर्येण कदाचित् द्विलकारस्य कदाचिद्द्विष्टतत्वसाम्येन रे

फवतासाम्येनचतादृशस्यऋकारस्यचसिद्ध्या विकल्पफलसिद्धिमाश्रित्यैतद्वचनद्वयं तुल्यास्यातसूत्रभाष्यप्रत्याख्यातम् ह्वौरेफावित्ति अत्रापि तदेवभा
ष्यमानं ह्वेरेफत्वे हिरेफद्वयवत्तिस्थानित्वप्रयं लकारवत्त्वपरइतिचप्रसंस्थानिद्धाति अभितइति ह्वौरेफावित्यनुषज्यते नचद्वितीयानन्तर्मभितः पर्यायोगा त
ए ओङ् सूत्रेभाष्ये मान्द्रणामित्यादौ णत्वासिद्ध्यर्थमवश्यमङ्गीकर्तव्ये वर्णैकदेशा वर्णग्रहणेनगृह्यन्त इति पक्षे प्रलूयस्वह्वाभिर्वा सानरतीत्यादौ तुगेसन्धि
न्नलक्षणठनां शंकायांदीर्घादिति तुग्विधानसामर्थ्यात्परकरणसामर्थ्यं नौऽग्लु वइतिसूत्रस्यनैऽग्रहणसामर्थ्यभेदेनाप्रतिभासमाने ऊ ग्वयवेषु अवयवस
दृशस्वतंत्रवर्णाश्रयकार्याभावत्तापन्नरूप समाधानस्यचकरणावत् प्रानर्थ तधित्यत्ररोरीत्यस्यत लृकारइत्यादौ तोलीत्यस्य च शंकासमाधानाकरणेनप्र
तद्रेफान्परभक्तेरितिहयवरट्सूत्रस्थभाष्येणाचऋलृक् सूत्रस्थयोरर्द्धमात्राभागस्याभितः ऋत्वेनतथैवोचितत्वादितिभावः द्वौलकारावितिह लृद्व्यच
त्पूर्वसाहचर्यादितिभावः अत्रह्रस्वऋकारद्वयस्थानिकैकादेशएवपूर्वस्यसाधुत्वं ह्रस्वऋकारलृकारस्थानिकैकादेश एवोत्तरस्यसाधुत्वमत एव लृतिनऋ
कारेणाप्यृनिलृकारः अतएववार्तिके ऋतीतिनपरकरणमुनरवार्तिके लृतीतिचरितार्थम् तुल्यास्यसूत्रेभाष्ये यदेवृदतीत्यतत्तदिति वक्ष्यामीति
तद्वचनाश्रयणेनऋलृवर्णयोःसावर्ण्येनकार्यमितिचसंगच्छते उपस्थितेरेफोऽप्रयत्नत्यागेमानाभावादीषत्स्पृष्टाविमौ विवृतत्वे हि विवृतऋकार
लृकाराभ्यामनयोरपिग्रहणोऽकः सवर्णेइत्यनेनैव सिद्धे वार्तिकस्यवैयर्थ्यापत्तेः राङः पदान्तात्किम् भवति सर्वत्रविप्र कृत्यान्तः पादमितिसूत्रात्प्र
कृत्येत्यनुवर्तते प्रकृतिशब्दोऽत्रस्वभाववाची डस्याजाप्रकृतिरित्यादौ तथादर्शनात् प्रकृत्यास्वभावेनावस्थानमित्यर्थः अतएवप्रकृतिभावेनेनपूर्वरूपंना
प्याद्यय इतिभावः नान्तःपादमि तिपठितव्ये नन सूत्रेण गोशब्दस्यप्राप्तं तन्नेति व्याख्यानेननान्तः पादमित्यनेनैवपूर्वरूपप्रत्याद्दिकं विकल्पेननिषिध्यतइ
तिबोध्यम् अवङ् स्फोटोऽयनोयस्यसस्फोटप्रतिपादक इत्यर्थः स्फोटायन इति पाटेनडादित्वंकल्प्यं स्फोटायनोऽवङः स्मर्तान्यस्यऽत्वस्यभाव स्यतिस्यत्वन्तरानु
संधानद्वारेणात्रविकल्पोबोध्यः निवृत्तमिति अतएवेन्द्र इतिसामर्थ्यान्नित्य मितिभाष्यादावुक्तम् गवाग्रमिति सन्निपातपरिभाषायाअनित्यत्वाद्दीर्घे
इतिबोध्यम् व्यवस्थितेति देवत्रातोगलोग्राह इति योगेचसद्विधिः मिथस्तेनविभाष्यन्ते गवाक्षः संशितव्रतस्तेनप्राप्त्यवयवेनेति आद्गुण इतिसूत्रेभा

सु॰
शे॰ शे॰ ष्येस्फुटं अग्नौ अपरोऽद्दुति सूत्रे अग्नौ इदग्नौ विहरेत्यत्र आत दव्या वृत्त्यर्थवार्त्तिककृद्धलग्रहणघटितन्यासं कृतवान् तमस्वाख्यानाय भाष्यकृतेन विभाषेति योगविभाग

२३ विभाषेत्यस्य व्यवस्थितविभाषात्वं ध्वनितम् तथा जेर्ध्व घञपोरिति चव्यवस्थितविभाषेति अजेर्वीति सूत्रे भाष्ये स्पष्टम् न च व्यवस्थितविभाषयाऽस्मिन्द्रे नित्यावङ् सि

द्धेः इन्द्रे चेति व्यर्थमिति वाच्यम् भाष्योक्तानि विकल्पव्यवस्थितविभाषाणामप्रामाणिकत्वज्ञापनार्थं तत्सत्त्वादित्याहुः इन्द्रे च इति विज्ञाष्य पुलके च शब्दरहितः पाठः इन्द्रा

वयवे चेत्यर्थः तेन षष्ठीतत्पुरुषोत्तरपदषष्ठीतत्पुरुषे गवेन्द्रयज्ञ इत्यादावचङ्सिद्धिः अन्यथा वाक्ये गोशब्दस्येन्द्रशब्दपरत्वासंभवेन समासासंख्यादि इन्द्रशब्दस्योत्तरप

दत्व एव तत्र वृत्तिः स्यात् प्लुतप्रगृह्या इत्येतस्य प्रकृत्येति पाठे असामंजस्यं मत्वाहाऽथ प्रकृतीति नचैतद्घटकपदार्थज्ञानाय प्रगृह्यादिकमत्र पूर्वं युक्तमिति वाच्य

म् इन्द्रे चेत्यत्र प्राचीनपठितनित्यग्रहणस्य प्रामादिकत्वं बोधयितुं तदव्यवहितमेतत्सूत्रलेखनात् तत्र नित्यग्रहणेन तदव्यवहितोत्तरे तद्वैयर्थ्यं स्पष्टमेवेत्याशयेनाह

प्लुताः प्रगृह्याश्च वक्ष्यन्त इति अचीत्यनुवर्तमाने पुनरज्ग्रहणं प्रत्यासत्त्या यत्राच्येतयोः प्रकृतिभावस्तदज्निमित्तककार्यस्यैव तेनाभाव इत्यर्थलाभार्थम् तेन गा

नु३ अस्य रुजति जानू३ अस्येत्यादौ सवर्णदीर्घरूपसंधिर्भवत्येव एहि कृष्णेति दूराद्धूते चेति प्लुतः अत्र प्लुतस्याश्रयात्सिद्धत्वं बोध्यम् नित्यमिति किमिति विभाषा

ग्रहणनिवृत्त्यैव तल्लाभात् इति प्रश्नः माभूदिति नित्यग्रहणसामर्थ्येन पुनर्विधानाद्बाधकविषयेऽप्ययमेवेति भावः इकोऽस॰ शाक॰ इत्यतः पदान्तादित्यनुवृत्तं प्रथम

या विपरिणम्यत इत्याह पदान्ता इति चेति ह्रस्वयणोर्विधानसामर्थ्यात्तु न विकल्पसिद्धिः अपदान्तादेयणश्चरितार्थत्वात् सामर्थ्यादेवेति चेन प्रकृतिभावाप

कर्षणोऽप्यत्र कद्र्वत्र चाक्रुष्टेन॰ दसम्वेन्द्र इति तदर्थं ह्रस्वविधानसामर्थ्यस्यावश्यकत्वेन चकारो व्यर्थ इति भावः भाष्ये स्थितमिति प्रकृतसूत्रे इति शेषः ए

तेन ह्रस्वाभावे प्रकृतिभावार्थश्चकार इति न्यासाद्युक्तमपास्तम् चक्री अत्रेति तु संहितायाः अविवक्षायां बोध्यम् न समासे सितीति चेति वार्त्तिकम् पार्श्वमिति पर्श्वो

णां समूह इति ण्यः सितीति चेति पदत्वम् ऋत्यकः सवर्णार्थमनिगर्थं च इदम् होतृ ऋकारः ब्रह्म ऋषिः आर्च्छदिति आटो धात्ववयवत्वेनापदान्तत्वादिति

भावः एतेनाटश्चेति पुनर्वृद्धिविधानार्थेन चेनोस्योमाङ्क्षु पररूपबाधवत्प्रकृति भावस्यापि बाधेनेष्टसिद्धिरित्यपास्तम् समासेऽपीति व्याख्यानादिति भावः सप्त

ऋषीणामिति दिक्संख्ये संज्ञायामिति समासः प्रकरणाशुद्धये प्रकृतिभावविधायकसूत्रद्वयमुपन्यस्य प्लुतप्रगृह्या इति सूत्राकांक्षितप्लुतप्रगृह्ययोर्मध्ये प्रथमोपजत्वात् प्लु

तमप्रकरणमारभते वाक्यस्य टेः वाक्यस्येत्यस्याभावे पदस्य टेरित्यर्थे ऽन्त्यस्यापि पदस्य टेः प्लुतः स्यात् न तु सर्वस्य वाक्यस्य टिरन्त्यपदस्यैव संभवतीति न दोषः । ग्रहणाभा
वे प्लुतश्रुत्योपस्थिता तु परिभाषयान्तस्यैव स्यादिति ग्रहणे तु तत्सामर्थ्यादिना चोविशेषणात् व्यञ्जनान्तस्यापि भवति प्रत्यभि० प्रणामादिभिराशीर्वाच्यमानो गुर्वादि-
र्येन प्रतिसंभाषते तत्प्रत्यभिवादः नत्वाशीर्वचनं तस्माद्द्रुः आशीर्वादरूपप्रत्यभिवादाभावेनाशूद्र इत्यस्य वैयर्थ्यापत्तेः अत एव भाष्ये ऽशूद्र इति किं कुशल्यसि तुषजके
त्युक्तम् अभिवादय इति नमस्कारपूर्वकमाशीरादि वाचयामीत्यर्थः आयुष्मानित्यायुष्मत्त्वस्य विधेयत्वात् सम्बोधनविभक्त्यभावः राधीविभवेत्यस्याप्युपलक्षणम्
प्रत्यभिवादे शर्मादिप्रयोगो न नियतः एचो प्रगृह्यस्येति सूत्रे प्रत्यभिवादे नस्यैवः प्लुतविधानात् आयुष्मानेधि अग्निभूता इति भाष्ये तदुदाहरणाच्च शर्मादिप्र
योगे तु तदेव प्लुतः शर्मान्तं नाम ब्राह्मणस्येत्यादिस्मृत्या तस्य नामावयवत्वबोधनात् स्त्रियामपीति स्त्रिया अपि नाम्नाभिवादप्रत्यभिवाद इत्यर्थस्य भाष्यसंमतत्वा-
दिति भावः नामगोत्रं वेति अभिवादप्रत्यभिवादयोर्नामगोत्राभ्यामेव स्मृतिषु प्रसिद्धेः तत्राधिकृतस्य पदस्येत्यस्य प्रत्यभिवाद इत्यनेन विशेषणात् प्रत्यासत्त्या प्र
त्यभ्युद्यमानार्थवाचकस्यैव प्लुत इति भावः तत्र नामशब्देन द्वादशेऽह्नि पित्रादिकृतं गृह्यते अत एवायुष्मान्भव दाण्डिनित्यादौ प्लुतो नेति स्पष्टं भाष्ये भो राजन्यति० भोश-
ब्दस्य राजन्यविश्यवाचकनाम्नश्च टेः प्लुत इत्यर्थः भोशब्दस्याप्राप्ते इतरयोस्तु नामत्वात्प्राप्ते विभाषेयम् दूराद्धूते० यावति देशे प्राकृतप्रयत्नोच्चारितं सम्बोध्यमानो न
शृणोति किन्त्वधिकं प्रयत्नमपेक्षते तावद्दूरम् दूराद्धानं च दूराद्बोधनस्योपलक्षणम् ननु संबोधनविभक्तिनियामकस्याभिमुखीकृत्य बोधनरूपस्य संबोधनस्योप
लक्षणम् आगच्छ भवान्देवदत्त इत्येवमाह्वानस्यापि सम्भवात् अत एवाकडारसूत्रेण नदीगुरुसंज्ञयोः समावेशवान्सीवन्धुरित्यत्र गुरोरनृत इति प्लुतो नदी वन्धुनीति पूर्वे
पदान्तो ऽन्तरेण संचपलमुक्तं भाष्ये अन्यथा ऽत्र सम्बोधनाभावेन गुरोरित्यस्याप्राप्तौ तदसंगतिः स्पष्टैव इत्युपलक्षणत्वादसत्यप्याह्वाने भवतीति न दोषः … त्यादि अत्राभि
दूराद्धूत इत्येतस्मिन्नुक्तस्य पदस्येत्यस्य विशेषणमतो न हूयमानार्थवाचिनः पदस्यैव टेः प्लुतः … नेकं चेत्पदं तेन न हे हे प्र० हेहयोः सम्बोधनद्योतकत्वेन केवलयो-
भ्यामपि ताभ्यां संबोधनदर्शनेन च तयोरपि हूयमानार्थपदत्वात् गुरोरनृत इत्येव सिद्धे नियमार्थमिदमित्याह हेहयोरेवेति० हे हे ऽनेनेत्येव सिद्धे प्रयोग … दनं त्य
योरिति तदाह हे रामेति केचित्तु राके हे हे ग्रहणमनन्त्यार्थम् अन्यथा वाक्यस्य टेरित्यधिकारादन्त्ययोरेव स्यादतः आ हे रामेति प्रयोग इति … तु

श॰
प्र॰ टी॰
२४

योः प्रयोगमात्रमनेनैवाभिमुख्यस्य द्योतितत्वेन द्योत्याभावादनर्थयोरपि तयोः प्लुतार्थेनदाह रामहेइति अन्यथा प्रयुक्तयोः प्लुतासंभवात् है यथैस्य [illegible]
हूयमानार्थपदत्वाभावाद्दमीपे विध्यर्थम् नियमेतु नमानम् तेनात्रप्लुतसमावेशः सततसर्वम्भाष्यकैयटयोस्स्पष्टमित्याहुः यत्वयं हूयमानार्थपरस्पष्टः प्लुत [illegible]
ककौण्डिन्यम्पृयायादिति नमशिवहेइत्यादौ तस्याप्राप्तत्वान्न्यायविषयाभावात् गुरोरः दूराद्धूत इत्यनुवर्त्ततेतेन दूराद्धूयनरावप्रवृत्तिस्तदाह दूराद्बोधनेच्छा छुतेचा
नाविवक्षितत्वेन प्रत्यभिवादे भोराजन्येत्यस्य विषयेप्यप्रवृत्तिः तद्विषयेप्युपलक्ष्य बोधनसत्वात्सर्वे प्लुतप्रकरणस्य तु शेषः तथाहि सा तु [illegible] रित्यनेनसूत्रे
वास्याप्यधिकारत्वमेव कुर्यात् एतत्त्रयविषयएवेदमिति प्रकृतसूत्रे ऽनुदात्तं प्रश्नान्तेतिसूत्रे च वक्ष्यामीस्पष्टम् अपिशब्दो यथाप्राप्तटिसमुच्चयार्थः अपिगुरोः सन्निधा
नादन्योगुरुरित्यसमुच्चीयते नरा ऽन्यलघुमति अनंत्यगुरावेनस्यान्त्यलघोर्दूराद्धूते चेत्यादीनां दुर्वारत्वेन प्लुतसमावेशापत्तिः एकैकग्रहणन्त्वेनहि ह्रितानामेवप
र्यायार्थस्यात् तेनयथान्योपि गुरुरनन्त्य इत्यादिर्वातत्रैव पर्यायः स्यात् [illegible] नतदर्थलाभः अनन्त्यस्यापीति अपिनान्त्यगुरोरगुरोश्चेत्यर्थः पर्यायार्थमिति।
अन्यथा समावेशः स्यादिति भावः अनुदात्तं पदमिति तु त्रिपाद्यां न प्रवर्त्तत इति तत्रैव वक्ष्यते प्राचामिति तु पक्षे सर्वेषां प्लुताभावार्थम् विकल्प्यत इति साचव्यवस्थित
विभाषा तेनाप्यीदस्तेन्वि दूरेत्यादावपीन्नेषणो इति न भाष्ये तु विभाषा पृष्टेति सूत्रे विभाषेति योगविभागो दर्शितः सा च व्यवस्थितविभाषेति कैयटः अतएव श्रो
आवयेपरस्येति वक्तव्यमिति वचनस्याग्नीदग्नीनित्यादौ प्लुतनिवृत्तये कृतस्य विभाषेतियोगविभागेन प्रत्याख्यानं भाष्योक्तं संगच्छते सर्वस्वभाष्यसम्मतेषाव्यव
स्थितभाषेत्याहुः अप्लुतवदित्येतु तथा प्लुत इत्यध्याहारस्तदाह प्लुतो ऽप्लुतवदिति प्लुतएवनिषिध्येतेति नत्वानेप्लुतविधानेनसहैवनिवर्त्तते इति भावः प्रसज्यप्रतिषेधे
न व्याख्यानञ्जुनयुक्तं गौरवात् किञ्च तथा सति प्लुतप्रकरणस्यैवनोपस्थित इति वदेत् न च पर्युदासे अग्नी इतीत्यादौ प्रगृह्याश्रयप्रकृतिभावस्याधिकापरत्वादप्लुतव २४
द्भावेदीर्घादिकं स्यादिति वाच्यम् शब्दनइति शब्दसापेक्षा वर्णमात्रापेक्षप्रकृतिभावस्यान्तरङ्गत्वात् अप्लुतवदित्यस्य प्लुतकार्येन्नेत्यर्थे प्लुतशब्दमर्यादाल
भ्यः प्लुतो ऽप्लुतसादृश्यविधानस्यैव शब्दतो लाभात् नाप्येप्लुतकार्यप्रतिषेधार्थमित्युक्तिस्तु फलितार्थाभिप्रायेणैवेतिबोध्यम् प्रगृह्याश्रयइति प्लुतेऽकृतेपि तस्य
सिद्धत्वाद्दीर्घत्ववृद्धिवत तदन्तस्य गृह्यत्वमनुकार्ये सुलभम् अनुकरणे तु प्रकृतिवदनुकरणमित्यतिदेशात्तत्वमिति भावः किं मयात्रकर्त्तव्यमिति पृष्टे आह वि

१ अत्र नव ह्रावापेक्ष्यां॥

नुहीदमिति विभाषाप्रश्नप्रतिवचने हेरिति प्लुतः इदम्शब्दोऽत्र वाक्यानुकरणम् इति हे रिकारस्य वाक्यटित्वम् उभयत्र विभाषेयमिति उपस्थिते प्राप्ते ऽनुपस्थिते ऽप्राप्ते
इत्यर्थः विभाष्यते विकल्प्यते इति विभाषा गुरोश्च हलः इत्यप्रत्यये टाप् नवेति विभाषायामिति भाष्यप्रयोगात् भाष्ये तु किमर्थमिदमुच्यते नानुपस्थितार्थम् तत्र
ईषद्ग्रहणेन नार्थः अविशेषेण चाकवर्मणस्याप्लुतवदित्येवेदमपि सिद्धम् एवं शाकटायनस्य वर्शेयम् इत्युक्तम् तत्फलेनोपस्थिते पूर्वविप्रतिषेधेन ईषद्ग्रहणेऽपि नित्यप्लुतत्व इत्व
त्विष्टः प्रत्याख्याने नित्यप्लुतवद्भावस्य येन नाप्राप्तिन्यायेन वैकल्पिकतद्बोधिताभावांशस्य बाधकत्वात् उपस्थितत्वस्य निकृत्या परविप्रतिषेधात्तु भूयत्रे विभाषे
ति कैयटस्य प्रमादः मूलं त्विति शब्दभिन्ने वैदिक इति शब्दे चेत्येवं परतया कथंचिद्व्याख्येयमित्यन्ये उद्देश्यप्रतिनिर्देश्ययोरैकरूप्यादाप्यतत् सर्वं नाम्नापर्यायेण तन्नि
गभागितायमिति निर्देशः विशेषणेन तदन्तविधिमाश्रित्याह ईदूदेदन्तमिति द्विवचनमिति सप्तम्यर्थे प्रत्ययग्रहणे तदन्तविधिनिषेधादिति भावः एदन्तमिति।
व्यावर्त्यमानेन फलमाह पचेते इति निपात एकाजनाङ् निपात इति किम् चकारात्र प्रत्ययस्य शास्त्रकल्पितार्थवत्त्वात् एकाजिति कर्मधारयो वर्णपदार्थप्रधान
त्वेनान्तरङ्गत्वात् व्याहरति मृग इत्यादि निर्देशाच्च तेन प्रेदमित्यादौ न दोष इत्याह एकोऽजिति आङ्वर्ज इति पर्युदासस्यौचित्यात् अनराधवेकाज्नाङिति नास्ति त्विवा
गुदेववाचकस्याऽऽशब्दस्याङोऽसहाव्ययीभावे व्याप्त्यात्रामित्यादौ सत्यभिधाने सतआङ् भिन्नत्वेन पूर्वोक्तत्वेन निपातत्वे प्रगृह्यत्वं न पूर्वानत्वे नाङ्त्वातिदेशाति
दिश्यमानधर्मविरुद्धस्याश्रयधर्मप्रयुक्तकार्येनिवृत्तेरतिदेशस्वभावसिद्धत्वात् प्रादित्वेनाङ्भिन्नत्वं तु न लभ्यमशास्त्रीयत्वात् ओदिति सूत्रे आउ ओ [illegible] माना
ङिति प्रतिषिद्धार्थीयमारम्भ इति भाष्यं तु पर्युदासेऽपि गम्यस्य प्रतिषेधस्य सत्त्वान्नानुपपन्नम् अनाङिति पर्युदासादेव निपातैकाच् त्वेनलक्षणे निपातैकाज्ग्रहणांसंग्र
हेम् स्याङ् समुदायेस्याङ्त्वाभाववदच्समुदायेऽच्त्वाभावादजित्येवाच्समुदायग्रहणाभावे सिद्धे एकग्रहणमन्यत्र वर्णग्रहणे जातिग्रहणमस्तीति ज्ञापयितुमितीनार्द
सिद्धमिति भाष्यस्य स्पष्टम् जातिग्रहणार्थमित्यस्योपात्तजात्याश्रयैकानेकव्यक्तिग्रहणार्थमित्यर्थस्तेन तिततउ शब्दे एकदेशस्य [illegible] तस्यानुकरणे [illegible]
नुकरणे ज्ञानितीति निपातत्वेऽपि प्रगृह्यत्वाभाव एव एकग्रहणफलं बोध्यम् ननु उङ्कारस्य क्वाप्यश्रवणान्न ङित् दङ्ङिति द्विवक्रोरित्यत्र इत्यत आह वाक्यस्मरणीये इति
वाक्यशब्देन स्वार्थगतमनभिमतत्वम् स्मरणां विस्मृतस्य स्मृतिविषयता एवं किल न दिति स्मृतार्थनिर्देशः निपात इत्यनुवृत्तमोरित्यनेन विशेष्यते [illegible] नेहेति

सु॰ प्र॰ निपातसंज्ञा चादिपदोपस्थितचादीनां सन्निसंभवे ऽर्थवतामेव निसार्थकनिपातानां निपातपदेन तन्न दर्थविशिष्टानमेवोपस्थितिरिति गौणानां ...यिन प्रकृत
२५ त्रस्थनिर्यो... पदेन गौणार्थानाञ्च ग्रहणमिति गोभवदित्यादौ ... ननास्य प्रवृत्तिः एवं च कार्यकालपक्षे ... न्ना निपाताद् इत्यस्यानुपस्थितिरेतत्परिभाषावैयर्थ्यानन्यथा...
दौ नु नैनस्य परिभाषा प्रवृत्तिरनिमत्वादन एवानर्थकेपि निपातेन तत्संज्ञा सिध्यति अयोरु तीत्यादौ प्रगृह्यत्वायाह सम्बुद्धिनिमित्त इति सम्बुद्धिपरत्वनिमित्तस्थानेन तु सं
बुद्धिकालुप्तत्वेन ...त्यरत्वाभावान्न स्यात् न लुमतेति निषेधानित्यत्वं त्वगति कगतिः इत्ताविविक्किम्पदेत्र अनार्षे कि ... एवं धोरुत्यत्र ... नैमित्तिकापादि वर्णाः
मप्यवादिरहित ...योमार्थमिदं तद्विवक्षाचेवर्णोच्चारणेनियतेनार्द्धमात्राकालव्यवाये नोच्चारणे क्वात दथि कार्द्धमात्राकालव्यवाये ... चत्तदविव
क्षेतिवोध्यम् ऊञ ओञ निपात एव ऊञ ऊ इत्येकसूत्रत्वे तु शाकल्यग्रहणानानुवृत्तौ ऊँ इतीत्येकमेव स्यात प्रगृह्यसंज्ञाकरणेन प्रगृह्यस्य ...स्य च सहविधा
नात् उ इति वितीति च न स्यात आदेशे प्रगृह्यकार्यं नु स्यानिवद्भावेन वोध्यम् प्रगृह्यत्वस्य साक्षादुदेश्यसंवन्धस्यक्त तथात्र विधेयविशेषणात्वमानाभावा
त् शाकल्यग्रहणानुवृत्तावपि प्रगृह्यत्वस्य ऊँ आदेशस्य च विकल्पत्वे ऊ इति वितीति सिध्यति न तु उ इतीति प्रगृह्यत्वविकल्पे तु पक्षे तदभावेपि असन्तात्यपीन् ए
तदभावे निपात एकाजित्यस्याप्रवृत्तेः तदुक्तम्भाष्ये योगविभागं प्रदर्श्य किमर्थो योगविभागः शाकल्यमते ऊँ विभाषायथा स्यात् ऊँ इति उ इति अन्येषामाचा
र्याणां मते विनीति अनेन हि योगविभागस्य उ इति रूपसिद्धिः फलमिति स्पष्टमेवलभ्यते तो योगविभागेन व्याचष्ट ऊञ इति ... वाचकं प्रगृह्यपदमिति अ
र्थः शाकल्यस्येतौ प्रगृह्यमित्यनुवर्त्य तदाहो जइतौ वेत्यादि विकल्पानानुवृत्तौ हि निपातएकेत्येव सिद्धे इदं व्यर्थमेव स्यादेवञ्च प्राप्तविभाषेयम् ऊँ इत्यत्र श
कल्यप्रगृह्यपदयोः संवन्धे ऊञ इत्यर्थाधिकाराद प्रगृह्यस्यैवादेशे तस्यैकोपणीति ऊ इतीत्यस्यासिद्धिः दीर्घोच्चारणावैयर्थ्यापत्तिश्च विकल्पमात्रसम्बन्धेपि ऊँ
इतीत्यस्यासिद्धिरिति विधानसामर्थ्यात्प्रगृह्यपदसम्बन्धः प्रगृह्यमात्रसंवन्धेर्थाधिकाराद प्रगृह्यास्य नित्ये ऊ आदेशे ऊँ इतीति प्रगृह्यस्य उ इतीति सिद्ध्यपि वि... २५
न सिध्येत् तदाहोञ इत्यादौ चोऽनुनासिकेत्यादि अत्र विशिष्टस्य विधिरिति न वाक्यभेदः न च प्रगृह्यत्वमादेशश्च शाकल्यमते इति न यो ... योग एव प्रवृत्तिः स्या
दिति वाच्यम् योगविभागसामर्थ्येन शाकल्यमते एव भावाभावकल्पनात् वस्तुत उञः ऽनुवर्तिमसञ्ज्ञादेशयोः सहविधानमेव न्याय्यमादेशे स्थानिवद्भावान्नरम्भा

ह्यकार्यमभावप्रगृह्यसंज्ञकत्वेऽप्यस्यानिवद्भावलब्धार्थस्वरूपकथनमिति न्यायविदो विचारयन्तु मपञ्जो व्याख्यानादत्रमयप्रत्याहारः अत्रत्रैपादि
कत्वेनासिद्धत्वान्मप्लुतप्रगृह्याइत्यनेनबाधः नानुस्वारइति किंचितीत्यादौप्रगृह्यसञ्ज्ञाभावेऽस्यासिद्धत्वादिकोयणीतियणिअनुस्वारोऽभवत्येव ननुपं श्लिष्य
तेसंलुप्यमानार्थाभिधायीतिन्यायेनगौरीशब्दस्यसप्तम्यर्थवृत्तित्वेपीकारस्यतत्वाभावोऽनयाहे ईदूतौ चसप्तम्यर्थ इति ग्राह्यस्वरूपस्यविशेष्यत्वात्तदनविधिरितिभा
वः मामकीतनूइति प्रगृह्योच्चितिशब्दप्रयोगस्यपदकारैर्नियमितत्वात्पदपाठेप्रगृह्यत्वफलमवबोध्यम् ईदूतौकिम अत्राभवातिसप्तम्याअदेशः तदग्रत्व
मसंदेहायसप्तमीतिकिम धीतीमर्ताह्रस्वान्तात्तृतीयैकवचनस्यपूर्वसवर्णसवर्णदीर्घः अर्थग्रहणंकिमिति नचतदभावेईदूदेद्द्विवचनन्यायास
प्तमीत्यर्थापत्तिः तथाचपपीत्यादावेवस्यात् एकादेशस्यपरादिवद्भावेनसप्तमीत्वात्नतुगौरीत्यादावितितत्सिद्ध्यर्थनदावश्यकमितिवाच्यम् ईदूतौसप्तमीप्र
गृह्यम् अदसः एद्द्विवचनमित्येवसिद्धेगुरुभूतन्यासकरणेनतत्प्रकरणापेक्षयावैजात्यबोधनादेकादेशेसंभवाच्चसेत्यर्थविधावितितदग्रहणनियमा
यत्वात् सप्तम्यन्तमित्यर्थेनेष्टसिद्धेरितिप्रश्नः पपीत्यादेरनभिधानमेवेतिपरे वृत्ताविति अर्थग्रहणसामर्थ्यात्सप्तम्यर्थमात्रेपर्यवसन्नमित्यर्थेनात्रतत्संसृष्ट
धियार्थेपिवृत्तेर्नदोषः सञ्ज्ञायामिति समासेजहत्स्वार्थायांवृत्तौपूर्वपदस्यानर्थकेपिसुप्सुपेतिसमासेजहत्स्वार्थायांप्रसक्तदोषस्योक्तरीत्यैववारणमितिभावः गौरी।
अधिश्रितइत्यत्राधिश्रयणक्रियायामेवगौरीपदवोध्याधिकरणत्वान्वयइतिगौर्यधिकरणेलक्षणायामप्रमानाभावइतिनतत्रदोषः आप्यामस्वइति सुप्सुपेति
समासःसञ्ज्ञायामितिवामनुसञ्ज्ञायामितिसमासेवाक्येनसंज्ञाऽनवगमान्नित्यसमासत्वेनविग्रहोऽनुचितइतिचेन्नतेप्समानार्थकवाक्याभावेननित्यसमासस्य
ग्रावेपिनित्यसमासाभावात् विभाषाधिकारबाधेमानाभावात् नित्यसमासेहिवृत्तिघटकपदानांपृथक्प्रयोगाभावएवात्रतुपृथक्प्रयोगेपितद्बोध्यविशिष्टार्थाप्रती
तिमात्रमित्याहुः अणोऽप्र० अण इति किम कर्तृहर्तृ अत्राणपूर्वेणैवव्याख्यानात् आगच्छतमग्नीइत्यादौप्लुतस्यासिद्धत्वात्ततः प्रागेवयथोद्देशत्वाज्जातिपक्षत्वेन
स्थात्प्लुतेऽप्यनुनासिकप्रतिबन्धार्थमपुनःसंज्ञेतिनानुनासिकःसंज्ञायाःकार्यार्थत्वात्पुनःप्रवृत्तौकार्यमेववीजम् स्थानिवत्त्वन्तुनेहतस्यानल्विधित्वेनाल्विधि
त्वात्पूर्वसवर्णेकृतेद्विवचनत्वन्तुपरादिवद्भावेनतेनतदूर्ध्वानतिदेशेपितद्धर्मातिदेशाङ्गीकारात्अतएवरामाविद्येत्यादौपरादिवद्भावेनसुबन्तपदत्वमितिविभक्तिरन्ते

सु॰
रा॰ शं॰ ष्येदिति संसृष्टमाकरे अच्छान्वितिरिति सिद्धमनच्चादिति वार्तिकप्रयोगेण अस्याच्चरमिति सौत्रप्रयोगेण कथमनच्चमिति भाष्यप्रयोगेण च वृत्तिग्रन्थः पदान्तकार्ये
२६ स्यान्तस्य निषेधेन श्चुत्वस्य चाभावो बोध्य इति केचित् ॥ ॥ विसर्गसन्धिः ॥ स्तोः श्चुनेति शिति च लुप्तविभक्तिके भिन्नेपदे योग इति संयोग इति तदर्थमनेन चित्तमित्यादौ न
दोषः अनपदस्य योग्यधिकृतमपि न सम्बध्यते शादिति ज्ञापकेन तेन याच्ञा सिद्धा शात्परस्य तो श्चुत्वनिषेधकात् शादिति लिङ्गादेव निमित्तकार्यिणो पेषा संस्कारावश्या
रसूत्रे पिता पौ ज्ञापकान्तत् शकारश्चवर्गोस्तीति यथार्थत्वमिति शेषः हरिश्शेते इति वा शरीति विसर्गाभावे शः सचिदिति चुत्वस्यासिद्धत्वात् जश्त्वे दत्वे तस्य चु
त्वेन जकारे चर्त्वे इति बोध्यम् तयोस्त्वाऽस्त्वसत्त्वे चित्यार्थः विश्न इति यजयाचयतविच्छप्रच्छरक्षो नङिति नङि कोर् इति शादेशे ङित्वात् गुणाभावः प्रश्नश्चासन्नका
लइति निर्देशात्सम्प्रसारणाभावः न पदान्ता पदान्तादिति एव सिद्धे अनाम्ग्रहणं स्पष्टार्थम् टोः किमिति षकारस्यापि पदान्ते जश्त्वविधानात् ष्णः ह्रस्वान्तादिति षत्वस्यासि
द्धत्वात् जश्त्वाभावः उत्तरम् षण्णवतिरिति षडधिका नवतिरिति विग्रहः षण्णगर्य इति पृथक्पदे परोनु पञ्चमस्येति किम् वक्षि वध्नाति स्पर्शे च रितार्थ इति उपल
क्षणमिदं वलयोरपि प्रवृत्तिः यान्तं जातिपक्षस्य स्पष्टमेव व्यक्तिपक्षेपि तादृशव्यक्तौ चरितार्थस्य एतद्व्यक्तिविषयतया पञ्चवरावने निबोध्यम् सम्यञ्चेदमिकोपपाद्यत्वं कैयटे
परे तु स्थानेन्तरतम इत्यत्र समपमपाठस्य भाष्यकृता दूषितत्वेनैतद्युक्तेरुक्तिसम्भवरावन् तस्मादनुस्वारस्येति सूत्रं सवर्णग्रहणमपकर्षणात् सवर्णोनुनासिको भवती त्यर्थो
न दोषः नतु कं भाष्ये रेफिऽनुनासिकपरसवर्णत्वयोः प्रतिषेधो वक्तव्यो न वक्तव्यो रेफोष्मणां सवर्णा न सन्तीति चिन्मयमिति स्वार्थिकमयटः निबचने इति मयङ्तत्वादिति
वाक्यभेदेन कचित्मात्रे चतुर्थरूपप्रकृतवचनाभावेपि मयडर्थम् अत एव चिन्मयं ब्रह्मेति सामानाधिकरण्यम् चिन्मात्रमिति क्वचित्कोषपाठः मात्रके अन्यपस्यात्रोपपत्त्यभा
वात् मृच्छ्रव्यं सकारादि चेतवार्थमात्र शब्देनात्र समासस्य वक्ष्यमाणत्वात् निपातनादिति पृषोदरादिगणे ककुद्मानिति प्रकृतिप्रत्ययसमुदायः पक्ष्यन्तरेति मतेनेदम् उदः राम
स्था तस्मादित्युत्तरस्येति परिभाषालभ्यमर्थमाह उदः परयोरिति अत्राघोषस्येति समनियतत्वेनान्यत्र मयहमेवाधकाभावेन स्वासविवारयोर्न्यायोपि न न्यूनतेति बोध्यु २६
म् यस्यासिद्धत्वादिति त्रिपा परत्वादिति भावः हलोयमामिति सूत्रोक्तभाष्यसंमताष्टाध्यायीपाठे तु यस्यासिद्धत्वाभावेन च त्वम्भवत्येव अत एव पूर्वसंदेशोपम्
न त्वं देशो गर इति भाष्यं सङ्गच्छते मूलन्तु प्राचामनुरोधेनेति परे न चेदं सूत्रं व्यर्थम् झलो झलीत्यनेन सस्य लोपे उत्थानस्यासिद्धेरिति वाच्यम् झलो दीपमयेन निलोप

इत्यर्थस्यानेन ज्ञापनात् उदस्थादित्यत्र तु निर्दिश्यमानपरिभाषया निर्दिश्यमानादेशे वेति स्थानित्वान्न दोषः ऊपइति पञ्चमीत्याह ऊपः परस्येति पूर्वस्य सवर्णमनुवर्तते —
घोषवत इति समनियतत्वेपि विनिगमनाविरहात् स्वरूपप्रतिपादनाय चरित्रार्थग्रहणाम् ऊपइति पञ्चम्यादित्यभिप्रेत्योध्यम् तेनेति उपश
मित्यादौ कुत्वन्न जकारे कृते इति कुत्वमिति शेषः पूर्वोक्तभाष्यसम्मताष्टाध्यायीपाठे चर्त्वस्य कुत्वं प्रत्यसिद्धत्वात् मोनु: परस्यैत्यधिकृतममइत्यवेन विशिष्यते इ
त्याह मान्तस्येति हलि सर्वेषामित्यतो हलीत्यनुवर्तते हलि किम् एममाश्रय नश्चा· चेन मोनुकृष्यते अपदान्तस्य किम् राजन्याहि पशंसीति प्रशासशब्दे जसः शे
नपुंसकस्येति नुमि सान्तेति दीर्घः आकंस्यत इति क्रमेर्लृट् आउ·उदुमनेत इः स्यः अनुस्वारस्य· परेति लुप्तषष्ठीकं पृथक् पदम् अत एवोदः स्याद्यादौ सवर्णनुइति ये
ऽनुनासिक इत्यत्र तदपकर्षेण सिद्धः पयीति स्पष्टार्थम् दंशानमित्यादौ न दोषः शकारसवर्णासिद्धेः सूपलभेदेनाज्झलोः सावर्ण्याभावात् अच्यनुस्वाराभावात् मो
राजि मेति सिद्धेमे इत्युक्ति हेमपरे इत्येन ह्रिपश्र शाम्सलपतीत्यादौ मोनो धातोरिति नत्वबाधनार्थानि वैधस्त्वनन्तरत्वादनुस्वारस्येषु स्यात् ध्वनितं चेदमेतदारम्भो
महिति सूत्रयोर्भाष्ये हेमपरे मपर इति बहुव्रीहिः ननु तत्पुरुषोसम्भवात् मोनुस्वार इत्यतो म इत्यनुवर्तते यथासंख्यं· सम्यक् संख्याक्रमवैशिष्ट्येन ज्ञानम् प
रिसंख्येः प्राप्यतिष्ठानेमित्यत्र संख्याशब्दस्य ज्ञानार्थतया दृष्टत्वात्तामनतिक्रम्य यथासंख्यम् अनुदेशः पश्चाद्वक्ववाक्यार्थबोधकालिकः सम्बन्धः साम्यं स्वया
योग्यता व्यापानाश्च तेवव समसंख्यानां सम्बन्धेयेन क्रमेण पदज्ञानं पदादुपस्थितिर्यो तेनैव क्रमेणवाक्यार्थबोधविषयः संबन्धस्तेषामित्यर्थः फलितमाह स
मसम्बन्धीति अयपि स्थानास्य लौकिकप्रमाणदेवसिद्धं तथापि परस्मैपदानामे चोपवायावस्कारोशब्दः सूत्रानरसाकमसामाद्यसम्बन्धबोधार्थमाद्यं नीटकि
ताविन्नामैसमुसनिर्दिशे साहित्ये द्वन्द्वविधानाद् प्राप्तकमान्वयबोधनार्थं चेदम् एवञ्च तत्र यथासंख्येनान्वयबोधकवाक्यकल्पनेन तस्मामाणान्तब्यबोध इति बो
ध्यम् अत्र स्वरितेनेत्यपकृष्यते इतिस्यन्त्यादित्यादौ नातिप्रसङ्गः तत्र प्रतिपत्तिकालिकमेव संख्यासाम्यमेतच्चाल्पक्षमुपयोगीति जमङणानमिति सूत्रे भाष्ये स्पष्टम्
एते यथला गिरनुनासिका एव विधीयमानत्वेन सवर्णाग्राहकत्वात् जातिग्रहणाप्राप्तस्य वगुणाभेदकत्वप्राप्तस्यापि अभूत्पद्धत्येनेन निषिधाच एवं मपउक्तम् अत्रापि
अत एव ततो मस्य नानुनासिको वकारः अन्यथा तद्वाश्वसामित्यादौ नित्यानुनासिकापत्त्या तन्निर्देशासंगत्यापत्तिरित्याहुः चयो द्वितीया इति नाभ्याको इत्यत्रमेः

मु. श्री.
२७

येइदमुरान्तसामर्थ्यादेतत्कृतद्वितीयस्य नचर्त्वमुक्तं ओदपं प्रथमं स्पर्शमेके द्वितीयमाहुरयदान्तभाजमिति प्रातिशाख्येऽपदान्तभाजमिति चर्त्वासिद्धत्वलब्धा
र्थानुवादः पदान्तेजश्त्वप्रवृत्त्या चर्त्वं विना चयो ऽलाभात् अत्र तु —— कृते तेनजश्त्वप्राप्तिस्यासिद्धत्वान्नफक्सरावथुसाइति भाष्यादावृते छान्दसत्वाच्चर्त्वस्यासिद्धत्वं
एवं च प्रातिशाख्येऽपदान्तभाजमित्युत्सर्गः यद्वा तयोरयुत्वेनत्वम् नत्वपूर्वोत्सर्गैरसिद्धेः सोवेत्यन्यत्र विस्तरः ङः सिकीति सप्तमीषष्ठ्यर्थे व्याख्यानान्न तदाह सुपा
ति पदस्येत्यनुवर्तमानस्यवैयधिकरण्येनान्वयात्पदावयवस्य सस्येत्यर्थः षट्सन्तइति धुटि धस्य चर्त्वेलक्ष्यभेदात्तु नेड्स्य चर्त्वम् नश्च नकारोऽन्तादिति पदस्येत्यनु
वृत्तं पञ्चम्याविपरिणम्यतइतिभावः वैयधिकरण्येनैवान्वयइतिङ्मुट्सूत्रभाष्यस्वरसः नस्यपदान्तस्येति अपदान्तेनकारोऽनुस्वारप्रवृत्त्याफलितार्थप्रदर्शनमि
दमन्तानस्यपदस्येत्युक्तं चतुष्टयमिति वक्ष्यमाणविकल्पैरितिभावः तेनतुकश्चुत्वेकृतस्यासिद्धत्वाच्चयोद्वितीयाइतिपक्षेवस्यकृत्वेनञ्छकारछकारशकार
घटितरूपद्वयाधिक्यंअशानुस्वारविसर्गाणां द्वित्वविकल्पेनाधिक्येपिनक्षतिः ङ्मो पदस्येत्यनुवृत्तं सामानाधिकरण्यानुरोधात्पञ्चम्याविपरिणम्यतइत्याह तदा
न्तंपत्यदंतस्मादिति तत्रङ्स्वपंक्तस्वादितिविशेषणसम्बन्धमनुभूपपदविशेषणत्वेनतदन्तपरइतिभावः ङमइति पञ्चमीबलादचीतिसप्तमीषष्ठ्यर्थेनदाहअच
इति सप्तमीनिर्देशः सुखलाघवार्थः ङमुडचस्याचइतिनस्मिन्निति सूत्रस्थभाष्यात् ङमन्तंयत्पदमितिकिमुअनितीत्यादौङ्मुण्मीभूदितिभाष्येतु विभक्तिव्यत्यय
कल्पनेगौरवात् पदावयवङमः परस्येतिवैयधिकरण्यमेवोक्तमदग्डिनेत्यत्रङमुड्भावोमणड्रूकध्रुण्भाउत्सिचपदेइत्यतः पदइत्यनुवृत्त्यांजादौपदस्यङमुडित्यर्थेन
बोध्यः पदस्येत्यस्यात्यायुतंबन्धेपिविशेषणविशेष्ययोरुभयोः सप्तम्यन्तत्वएवतदादिविधिप्रवृत्त्यातल्लाभः स्यात् एतदर्थमेवाचीतिसप्तमीनिर्देशः ङमन्तंपद
मित्यर्थेपिपरमदण्डिनेत्यादावेतद्वारणोपपदेइत्यनुवृत्तिरावश्यकैवान्तर्वर्तिविभक्त्यादण्डिनित्यस्यपदत्वात् उत्तरपदत्वेचेतिप्रत्ययलक्षणनिषेधस्तुनप्राप्तःकुंभ श्य
वार्येनित्यादौपदत्वबाधेपीतिनिषेधसिद्धयेनस्यपञ्चोत्तरपदस्यकार्यित्वंतत्रैवप्रवृत्तेः तेननिषेधेनसिद्धमिन्येनसूत्रस्यसामाप्यात्किं स्वेकारिणिवइतिदिक् इकोयणची २७
तिसोऽनिर्दिश्यप्रकरणाइति अतएवसमःसुटीत्यादौप्रश्लेषेलसविधानमितिभाष्यउक्तम् गुणः पूर्वस्येत्युपलक्षणं रूपकरणविधेयत्वस्य एवमुत्तरत्र पूर्वस्येति
विग्रयंमधिकारः तेनोत्तरसूत्रविषयेवास्यप्रवृत्तिर्न तु मतुवसोरित्यत्रतत्सूत्रस्थवार्तिकयोश्चअत्रेतितु रूपकरणार्थवास्यसंबन्धेनतंयवेटलोपइत्यादौसवन्प्रथसूत्रना

धस्यतार्थमेवनुराद्धः परस्यनित्यंहत्वंपूर्वस्यवानुनासिकइतिविशेषयोनन्नर्थौः पूर्वस्येत्यस्यवहस्यानिनः पूर्वस्येत्यर्थोबोध्यः
अनुनासिकात्परइत्यमानुनासिकादिनित्वबलोपपक्षे मीव्याख्यानात् अयमागमोनवयवत्वे
वयवत्वेमानाभावात् खरीति विसर्गास्तित्वस्याप्यवसानस्यनसम्बन्धोव्याख्यानात् सोवक्तव्यइति समः सुटीत्यादिसूत्रत्रयेपसंख्यायसमः सुटीत्यत्रसकारः
प्रश्लिष्यतेतेः संकारएवविधेयइत्यर्थः एवञ्चा स्यासिद्धत्वाद्रुत्वाभावेनविसर्गाभावेनत्तद्धीनामप्राप्तिरेवेतिभावः स्पष्टञ्चेदंभाष्ये विसर्गस्यानेनसत्वविधानेनुणी
रत्रंस्फुटम् लोपस्यापीति यत्पूपधारंजनंकुर्यान्नमोरुकरणेमतिलोपेप्रकृतिभावेच नोपधारंजनंमतम् उपधारंजनमनुनासिकानुस्वारागमरूपम् नमोनेकारमकारयोः
प्रकृतिभावोदाहरणम् न्द्रन्याहीति तत्पूपानिशास्त्रत्वात्त्वाखामात्रविषयमितिभावः अतएवभाष्येसमादिषुसत्वंवक्तव्यमित्युक्तम्रुत्वपक्षेवानुनासिकाद्युपत्ति
दीर्षत्वेमनोक्ता ननुलोपपक्षेएवद्वित्वेनद्विसकारस्यसिद्धत्वात्समः सुटीनिव्यर्थमित्यतआह त्रिसकारंकमेपीति क्वोरितिसलोपस्तुनास्यासिद्धत्वात् पुनर्द्वित्वेनत्रि
सकारस्यसिद्धिरितिचेन्नयुक्तम् लक्ष्येलक्षणस्येतिन्यायात् एतेनसमः सुटीत्यत्रवेतिपाठेनैवपक्षेमोनुस्वारेणासिद्धेनुनासिकान्याइतिव्यर्थमित्यपास्तम् ननुव्यंजना
न्तरस्यैकस्यानेकस्यवोच्चारणेविशेषाभावात् आह अनुनासिकवतामिति तत्रोच्चारणेविशेषाभावकल्पनेइदंवचनंव्यर्थमितिस्यादितिभावः हयवरट्सूत्रभाष्ये
क्तेप्राप्नूपसंख्यानैष्फल्यमाहानुस्वारवतामिति अपिनाकस्यसंग्रहः लक्ष्येलक्षणस्यसकृदेवप्रवृत्तेराह वचनान्तरेणेति णत्वमपूइत्यनेनएकस्यैवशास्त्रस्यपुनः प्रवृ
त्तोहिसन्यायइतिभावः पूर्वत्रासिद्धत्वेनपूर्वद्वित्वस्यपूर्वम्प्रवृत्त्यातेनद्वितीयस्यसाधुत्वेबोधितेतदनन्तरंपरद्वित्वप्रवृत्त्यातयोर्मध्येपुनरन्यस्यसाधुत्वम्बोध्यतइति
त्रितयस्यानिर्वाहोबोध्यः अनचिचेत्यत्रपणोमपइत्यस्योपसंख्यानाद्चोरह्याभ्यामित्यतस्तस्यपरत्वंबोध्यम् पुमः खय्यम्परइति बहुव्रीहिः ५कः उपधायाइति कुर्वारितिसू
त्रविधययोरित्यर्थः इदुदुपधस्येतिसूत्रेऽप्रत्ययस्येत्यस्यप्रत्ययावयवभिन्नस्येत्यर्थोदितिभावः अव्युत्पत्तेरिति तत्पक्षेप्रकृतिप्रत्ययविभागाभावादितिभावः पंचेति
इदमनुनासिकपक्षेऽनुस्वारपक्षेतुकुर्वारित्यस्यैवप्राप्तिः अनुस्वारव्यवधानेनोदुपधत्वाभावात् पुंक्षीरमिति क्षरधातोरुपधापाइत्वेऽचप्रत्ययेक्षीरमितिभावः नन्व
वि अपरोधनितिपक्षार्थेप्रथमा नृन्पे नृनिति द्वितीयान्तानुकरणम् षष्ठ्याः सौत्रोलुक् नलोपस्तुसौत्रत्वान्नएवंकानित्यत्रापि चाद्विसर्गइति रपरइतिसूत्रान्तद

नुकर्षश्चेनेतिभावः येननेति येननाप्राप्ते यो विधिरारभ्यते स तस्य बाधक इति न्यायेनेत्यर्थः येननेत्यादेर्यस्मिन्नवश्यं प्राप्ताविन्यर्थः नञ्द्वयस्य प्रकृतार्थदार्ढ्यबोधकत्वा
त् प्राप्त इति भावे क्तस्तदप्राप्तियोग्यविषयेऽचारितार्थ्यं हि बाधकत्वबीजमिति तदुक्तम् शर्पूर्वा इति सूत्रे भाष्ये शर्पूर्वा इत्येतद्धलादिः शेषस्य बाधकमनवकाशत्वाद्विषयभेदे क्व
यम्बाधकत्वमनुवृत्तावदपि प्रष्टव्यः पदितन्त्रोऽन्येन किमिह स्यात् हलादिः शेषश्चेन्नाप्राप्ते तस्मिन्नारभ्यमाणादिदं तद्बाधकं भविष्यतीति अजाद्येर्द्वितीयस्येति सूत्रभाष्ये
पि स्फुटमेतत् नेनु शर्पर इति न चास्यापि विसर्गस्य ऽकःऽपौ कुप्वोरीकिच्चास्येव तोऽस्याताभ्यां सानयोरिति विहितस्य तु तानयोरसिद्धत्वात्सत्वमेव स्यादिति वाच्यम् शर्पर इ
ति सूत्रं कुप्वोरिति सूत्रेणानुवर्त्य शर्परयोः कुप्वोः ऽकःऽपयोरपवादो विसर्गस्य विसर्ग इति वाक्यभेदेन व्याख्यानेनादोषात् स्पष्टं चेदं भाष्यवार्तिककाभ्यां ग्रहणं शक्यमकर्तुमित्या
ह यद्वेति एवं समग्रहणमपि त्यक्तुं शक्यं पुमग्रहणं त्वावश्यकमेवानुनासिकपक्षे इणः परत्वेन षत्वापत्तेः राष्विया इति गणीकृतसत्वषत्वानामेव पाठादिति भावः।
ऽकःऽपयोरपवाद इति तद्विहितविसर्गस्यापीत्यपि बोध्यम् कांस्कानिति वीप्सायां द्वित्वम् संहितायाम् संहिता च स्वारसिकार्द्धमात्राकालव्यवायेनोच्चारणम् त
तोधिकार्द्धमात्राकालेनोच्चारणेऽवग्रहे तदधिकाराक्तकार्यव्यावृत्तये इदं तदधिककालव्यवायेनुसाधुत्वं नापि बाधइष्यत इति वृद्धा इति नेपां शास्त्रविषयत्वेवनेति भावः
केच स्केरत्यका उच्चारणार्थ सेना च्छिन्नमित्यत्र तुक ह्रस्वस्येति तुगिति च वर्त्तते जश्त्वेनेति स्वशब्दे उपपदे क्ष्यते केस्व स्कशाब्दो निर्मलेश्वरः एवं नञ्पूर्वा च्छादयने ईऽत्र
स्कुशब्द इति पदान्तत्वं बोध्यं स्पष्टं चेदममरटिप्पणे आङ्माङोः आङ्साहचर्यान्माङः व्यपमेव दीर्घस्यापमिति वक्ष्यमाणज्ञापकाद्व्याख्यानाद्वा दीर्घादिति च सवर्णेग
त्वमिति भावः एङ्ओङ् सूत्रभाष्ये ध्वनितमेतत् चेच्छिद्यत इति तुको हलादिः शेषस्तुनाभ्याससंज्ञाप्रवृत्तिकाले स्थानिद्वारा साक्षाद्वा सन्निहितानां हलामेव शेषनिवृ
त्तेः अत एवमुगत इत्यादि चरितार्थम् दीर्घात्पदान्ताद्विति पदान्तस्य दीर्घस्येत्यर्थः योगविभागोऽनयोरेओङिति सूत्रे भाष्ये स्पष्टः दीर्घान्तस्य पदस्येत्यर्थेन सिद्धे ग्रा
हणं पदान्तविधित्वमेवास्य न पदविधित्वमिति बाधनहारासमर्थपरिभाषानुपस्थित्यर्थं तेनासामर्थ्येऽप्यस्य प्रवृत्तिरिति समर्थसूत्रे कैयटः॥ ॥ इति हल्सन्धिः॥
विसर्जनीयस्य सः प्राग्व्याख्यातमपि विसर्जनीयपदानुवृत्तिप्रदर्शनाय स्मारितम् शर्पर इति बहुव्रीहिः विशेष्यत्वाच्चाव्ययविधिमतोः साजात्यादि सर्जनीया [illegible]
स्य विसर्गविधौ फलमाह नत्वन्यदिति अन्यदेव विरोणीति इहेति नैरूप्यमिति विकल्पद्वयसामर्थ्यादिति भावः सोप अपदाद्योरिति सूत्रे सौत्रत्वादेकवचनम्

अनव्ययस्येति अत्राव्ययीभावातिरिक्ताव्ययस्यैवग्रहणं व्याख्यानात्तेनोप यस्काम्यतीत्यादौ सत्वसिद्धिरितिएतच्चमव्ययीभावश्चेसत्र भाष्ये गीः काम्यतीति कः काम्यतीत्यस्या
प्युपलक्षणमिदम् इणः षः इदुदुपधस्येत्यस्यासिद्धत्वात्सर्पिष्याशमित्यादौ सत्वनिवृत्त्यर्थं गीष्पाशं दोष्कल्पमित्याद्यर्थश्चेदम् अत्रानव्ययस्येत्यपकृष्टदाविति काम्येइतिच।
संबंध्यतेतेनोच्चैः कः संदो पश्यगीः काम्यतीत्यादौ षत्वनत्वमतएवात्रप्रकरणेसर्वत्रसत्वमेवविधेयमित्युत्तरत्र विसर्गस्थानिकसस्यानेनषत्वमितिभाष्योक्तपक्षान्तरं।
सङ्गच्छते विसर्जनीयस्थानिकेत्युक्तापुंस्युत्रइत्यादौमदोषः तत्रहिमस्थानिकः सः अत्रविसर्जनीयस्येत्यनुवृत्तस्यैतदर्थलाभः अनव्ययस्येत्यादि च अत्रपक्षेनसंबध्यतेते
नदिष्कृतं दुष्काम्यतीत्यादौ षत्वसिद्धिः गीः काम्यतीत्यादौ सकाराभावादेवनदोषः अपदादाविति च न संबध्यतेतेन दुष्करोतीति षत्वसिद्धिः परस्त्वपमप्य संगतः उत्तर
सूत्रस्यासिद्धत्वेननिष्कृतमित्यादौ षत्वासिद्धेः प्रकरणेप्रकरणमसिद्धं नयोगेयोगइतिपक्षस्तुनास्त्येवज्ञापकाभावादित्युपसर्गादसमासेपीत्यत्रनिरूपयिष्यामः विस।
र्जनीयस्यैवषत्वमितिमूलोक्तपक्षेतुसकारषकारयोः स्वरितत्वेपियथायोगसम्बन्धोमएङ्कद्भुत्येत्यत्रविस्तरः नमस्पुरसोर्गत्योरित्यत्रापदादाविति न सम्बध्यते व्याख्याना
त् सास्सात्प्रभृतिस्वारेजि ऊर्यादित्वाद्गतित्वंस्वरादिपठितस्यतुगतित्वाभावस्तेनसास्सात्प्रभृतिषुच्च्यर्थवचनेपिनस्यादितिरित्यन्ये इदुदुपधस्यचाप्रत्ययस्येतिपर्युदासोला
घवात् तत्रप्रत्ययदन्तसंबंधिपरं तेन ——— प्रत्ययसम्बन्धिभिन्नस्येत्यर्थोऽतएवाक्कविभिः कृतमित्यादौ षत्वनस्पष्टञ्चेदं भाष्ये इत्यन्यत्र विस्तरः एकादेशशास्त्रेति
एकादेशशास्त्रसंपन्नरेफस्थानिकत्वेनविसर्जनीयस्यैकादेशशास्त्रनिमित्तकत्वंबोध्यम् स्पष्टं चेदमत्रैवसूत्रे उरण्रपरइतिसूत्रेचभाष्ये इत्यन्यत्रविस्तरः प्रत्ययभि
न्नसंबन्धिनइत्यर्थात्तुनार्थः अग्निः करोतीत्यादावपिप्रत्ययभिन्नसमुदायसंबन्धित्वेनषत्वापत्तेः तपरकरणं किम् गीः करोतीति उपधाग्रहणं व्यर्थम् उपधाग्रहणं न क।
रिष्यते इदुद्भ्यामुत्तरं विसर्जनीयं विशेषयिष्यामि इतिहयवरट्सूत्रभाष्योक्तेः तिरसोऽन्य अत्रगतिग्रहणानानुवर्ततेपराभवेपितिरस्कारशब्दप्रयोगात् अनार्षत्वेवति
रसोमतित्वात् द्विस्त्रि श्चतुरितिकृत्वोर्थइतिन विसर्गविशेषणम्चतुःशब्देऽसंभवात् किन्तुद्विरादीनामित्याह वर्त्तमानानामिति इसुसोरितिसूत्रव्याख्यामाणरीत्यासुवइतिप्र
त्रपितुमुचितंमुसुजन्तानन्तस्यपदस्येत्यर्थात् चतुष्कपालइति इदुदुपधस्येतिनिसंधः चतुःशब्दोऽग्रुसन्तइति अप्रत्ययस्येतिपर्युदासोनअतएवचतुष्कपालो द
तित्यादिनिर्देशाः संगच्छन्ते चतुष्पदाशदित्यत्रापिषत्वंभवत्येवनचेदुदुपधस्यसत्ययोविसर्गइतिहयवरट्सूत्रभाष्योक्तेः कथमत्रषत्वमितिवाच्यम् विसर्गस्यपा

सु॰
शा॰ शे॰
२९

नामिसंनेनह्विविधिरेवाप्त्रिसाशंकापुंस्कामेसत्रषत्वापादनं संगच्छते नचकृत्वोर्थइत्येव कृत्वोर्थे विद्यमानस्य पदस्य इदुदुपधस्य यो विसर्ग इत्यर्थान्न प्रसञ्जकत्वः करोतीत्या
दौ दोषो नापि चतुष्करोतीत्यादावव्याप्तिरिति द्विस्त्रिश्चतुरिति कृत्वोर्थमिति वाच्यम् कृत्वोर्थे इत्यस्यासिद्धत्वेन चतुःशब्दे इदुदुपधस्येति निस्यषत्वापत्तेः प्रकरणे प्रकरस्य
मसिद्धमिति पक्षस्तूपसर्गादसमासेपीति सूत्रे कैयटपूर्वपदादिति सूत्रे भाष्ये च दूषित एव उपसर्गादिति सूत्रे चोपपादयिष्यते किन्त्वपूर्वत्रेति पूर्वशब्देन प्रकरण
पहणेऽव्यवहितप्रकरण एव त्रिपाद्या असिद्धत्वं स्यान्न संपूर्णसपादसप्ताध्याय्याः किन्त्वाधिकारत्वात्सति सूत्रमुपस्थितस्य प्रतियोगमसिद्धत्वं दुर्वारमित्यन्यत्र।
विस्तरः इसुसोः अत्र इसुसोः प्रातिपदिकावयवयोर्ग्रहणं तेन पेचुंः काष्ठैः सक्थुः पाकं क विभिः कृतमित्यादौ षत्वं न निसंसमास इति सूत्रोदाहरणे समासविषये तयोरेव
संभवेनार्थाधिकारानुरोधात्साहचर्याच्च इसुसन्तपदावयवविसर्गस्येत्यर्थः पदस्येत्यधिकारात् न च प्रत्ययग्रहणपरिभाषया परमसर्पिष्करोतीत्यादौ षत्वानापत्तिरव्य
वस्येसुसन्तत्वेपि उत्तरपदत्वे चेति निषेधेनापदत्वादिति वाच्यम् अनुत्तरपदस्थस्येति निषेधेन क्वचिदुपात्तविशेष्यसत्त्वेपि शब्दरूपविशेष्यमादाय तदन्तविधिज्ञाप
नेन शब्दरूपविशेष्यमादाय प्रत्ययग्रहणपरिभाषया लभ्यतदन्तार्थेकस्य पदविशेषणात् पेसुसन्तान्तस्येत्यर्थेनादोषात् अत एव वनोरचेत्यादौ न दोषः ब्राह्मणस्य सर्पि
ष्करोतीत्यादौ सापेक्षत्वेनासामर्थ्येनाशंकितं तस्यैकार्थीभावसामर्थ्यविषयत्वात् अधात्वभिहितं समानाधिकरणमसमर्थवदिति सुत्तेः सर्पिः कालकमित्यादौ न षत्वम् अ
धात्वभिहितमित्युक्तेः सर्पिष्ट्वीयत इत्यत्र षत्वसिद्धिः धातुसहचरितप्रत्ययाभिहितार्थेन समानाधिकरणमसमर्थवन्नेति तदर्थः यदा तु सर्पिरादिकमव्युत्पन्नं प्रातिपदिकं पा
णिनेरुणादिष्वव्युत्पत्तिपक्ष इति आपनेपीनीति सूत्रे भाष्ये स्पष्टमुक्तेः तत्र हि शंस्व इत्यादावादेशानां शंकोर्णादीनां प्रतिषेधो वक्तव्यः प्रातिपदिकविज्ञानाच्च भगवतः।
पाणिनेः सिद्धमित्युक्तम् अकमन्तात्वाव्येल्वि [illegible] णुब्विति सूत्रं पाणिनेर्व्युत्पत्तिपक्षस्यापि स्वीकार इत्यस्य धमकमव्याकरणान्तरीसैव सर्वनामस्थानमिति महासंज्ञाव
त् अत एव भाष्ये उणादयोऽव्युत्पन्नानीत्येवोक्तमनन्तत्वनेकार्था अपि धातव इति वदव्युत्पन्नान्यपीत्युक्तम् तदा इदुदुपधस्येति निस्येषत्वे प्राप्तेऽनेन विकल्प इति प्रत्यय।
ग्रहणाभावात्तत्परिभाषानुपस्थितेः परमसर्पिष्करोत्यादौ षत्वविकल्पः सिद्धः निसंसमासे इति सूत्रमनुत्तरपदस्थस्येति प्रतिषेधार्थं निसग्रहणं [illegible] कर्तव्यमेव समासे नि
त्यषत्व[illegible]स्यैव सिद्धेः सर्पिषेत्यादौ षत्वं त्वत्र पक्षे क्वचिदन्यदैवेत्यर्थकाद्बहुलग्रहणादिति स्पष्टं भाष्ये ——— व्यपेक्षेति व्याख्यानात् एकार्थीभावसामर्थ्यग्रहे परमसर्पि २९

स्यादौ समासे विकल्पापत्तिः अनुत्तरपदस्थस्येति निषेधादुत्तरसूत्रस्य न प्रवृत्तिरिति भावः नन्वनेनैव सिद्धे कस्कादिषु सर्पिष्कुण्डिकाशब्दपाठो व्यर्थ इत्यत आह कस्कादिष्विति
एतेन तत्सामर्थ्यादुत्तरपदस्थस्यापि षत्वमित्यपास्तम् व्यपेक्षाविरहेपीति आनय सर्पिष्कुण्डिकां तिष्ठतीत्यादौ व्यपेक्षायामिति इदं सर्पिष्कुण्डिकामाइत्यत्र प्रसपभिन्न
विसर्गस्येत्यर्थे मिदुदुपधस्येत्यत्र व्याचख्यानं व्याख्यादर्शी कृतामतेः व्यपेक्षायां तेन न सिद्धेरिति भावः एतेन कस्कादिपाठस्याव्यपेक्षायां चारितार्थ्येन व्यपेक्षायां तस्य सिद्ध
त्वाद्धिकस्य स्वोचितद्दूषपास्तम् प्रसयस्येवन्धिमिन्नविसर्गस्येत्यर्थे तु तदप्राप्तिरेवेति व्यपेक्षायां विकल्प एवेति बोध्यम् अतः कृशब्देन तदादिग्रहणम् समासासिद्धे
त्तरपदस्य विशेषणत्वात् तु विषयदेवयोरिति सूत्रे च प्रत्ययग्रहणेन धातोर्विशेषणत्वे तदादिविधिज्ञापनात् अयस्कुंभीत्यादौ लिङ्गविशिष्टपरिभाषया सत्वं बोध्यम् भा
स्करइति तपरकरणादतः कृञ्स्याप्राप्तिः ॥ ॥ इति विसर्गसन्धिः ॥ ॥ पत्नुस्वौजसित्यत्र हरेव पाठः सर्वत्र सुग्रहणे हृग्रहणमेवास्त्विति तन्न यशः त्रे स्यादौ ण र
सिद्धत्वादुत्वानापत्तेः अणोरित्यस्य प्रथमैकवचने चारितार्थ्यात् तदुक्तं नयन्नाह स्वौजसेति पदस्येत्यनुवृत्तं स सजूर्भ्यामिति शेष्यते तेनैतदन्तविधिरादेशस्त्वलोऽन्त्यस्येत्यस
न्न एतेत्फलितमाह पदान्तस्येत्यादिना सजूरित्यत्र व्यपदेशिवद्भावेन सिद्धिः व्यपदेशिवद्भावोऽप्रातिपदिकेन ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नेति परिभाषा
द्दूयंप्रत्ययविधिविषयमित्यसमासे निष्कादिष्वित्यत्र भाष्ये स्पष्टम् इदं जस्त्वापवादः श्रेयानित्यादौ तु स्यासिद्धत्वात्संयोगान्तलोप एवेति हि दिक् यत्वस्यापवाद इति यदीदं न
स्यात्तर्हि यत्वं प्राप्नोतीत्येतावता कृते त्वस्मिन्पत्वस्यासिद्धत्वादुत्वगुणयोर्यत्वाप्राप्तिरेवेति भावः प्रथमयोः व्याख्यानात्प्रथमयोरित्यनेन प्रथमाद्वितीयाद्रूपमुव्विभ ॥
क्तौ ग्रहणान्नत्राह प्रथमाद्वितीययोरिति पूर्व्वग्रहणाद्धि अम् अमीइत्यत्र पक्षे परसवर्णो मा भूदिति दीर्घग्रहणानुत्रिमात्रस्थानिनस्त्रिमात्रो मा भूदिति सवर्णग्रहणानुस
स्वार्थम् पूर्वस्य दीर्घत्वात्सूत्रे जातीयइत्यर्थे नेष्टसिद्धिरिति स्पष्टं भाष्ये आद्गुण इति नोसदिति निर्देशेन प्रष्टावसत्यायस्यात्रशास्त्रे नाश्रयणादिति भावः देवदत्तहन्त
हतन्यायस्त्वनुनात्र प्रवृत्तिः देवदत्तहन्तृहनने हि नोज्जीवनम् देवदत्तहननप्रसक्तहननेत्वस्यैव देवदत्तजीवनम् प्रकृते तु न हननस्थानीयो गुणाच्च हि इहन्तु पूर्व्वस
वर्णदीर्घस्य लक्ष्ये प्रवृत्तिः किन्तु हनननिषेधसजातीयं प्रसक्तिमात्रम् प्रसक्तस्य निषेधे बाध्यो ज्जीवनेन बाधकमिति स्पष्टञ्चेदं स्वादिष्विति सूत्रे कैयटे सुस्तोत इति
सुद्यौ न सूशब्दः कस्यचित्संज्ञा सम्बुद्धौ दूराद्धूते चेति प्लुतः न तत्सामर्थ्यादिति प्रतियोगित्वेन तदाश्रयणसामर्थ्यादित्यर्थः आ ॥ ॥

ख·शा· अस्मात्सिद्धमिति भाष्योक्तिः पयस्य इति पयोदानीसर्थे आगच्छ हे पयो३इ आगच्छ हे पयो३ इत्यादावेकपदस्थवर्णद्वयसापेक्षमनार्द्गमुत्वं प्रतिवाक्यसम्पादकपदा
शे·सु न्तरसापेक्षप्लुतस्यासिद्धत्वादुत्वे प्लुतसिद्धिः अन्यथा प्लुतस्योत्वदृष्ट्यासिद्धत्वात्सरत्वात्प्लुते आ ये३ प्लुतपरत्वाभावादन्येप्लुतासरत्वाभावादुत्वं न स्यात् परिभाषा
१० दृष्ट्यावहिरंगासिद्धत्वेपि न क्षतिः स्वदृष्ट्यासिद्धत्वेपि परं प्रत्यसिद्धत्वप्रतिपादनसंभवात् स्वदृष्ट्याविद्यमानस्य परं प्रत्यविद्यमानत्वप्रतिपादनात् अंतरंगस्यासिद्धत्वे
तु प्रतिपाद्याभावे इवकं प्रत्यसिद्धत्वं प्रतिपाद्येत तत्राद्ये वाक्यस्य टेरित्यस्य इ शब्दाकारः प्लुतो सेरेफदकारसंयोगपरत्वेनाकारस्य गुरुत्वात् गुरोरिति प्लुतः आश्रयेणात्तु येन
नाप्राप्तिन्यायेन प्रत्यसूत्रेन च पूर्वत्रासिद्धमेव वाध्यते न च विदं सुलोताइत्यादौ त्वेकवाक्यमात्रसापेक्षत्वात् प्लुतोंतरंगो भिन्नवाक्यस्याकारसापेक्षत्वादुत्वं वहिरंगमिति
स्पष्टं भाष्ये उकारानुवंधेति उकारोत्संज्ञकरेफस्येत्यर्थः तेन देवरहीत्यादौ न दोषः भोभगोरो सुपीत्यतो रोरित्यनुवर्त्तते न तु रोरीत्यतो र इति प्रातस्त्रे त्यादावति प्रसंगा
त् अशब्दांतद्वंद्वेन पूर्वशब्दस्यैव हृत्त्रीहिमभिप्रेत्याह एतत्सूत्रस्येति नन्वेवं पूर्वरूपापत्तिरत आह असंधिरिति भगोअघोशब्दयोरकारयोरेकाराभ्यां प्राप्तः पूर्व
रूपात्मकसंधिकार्याभाव इत्यर्थः इदं प्राचामनुरोधेन वस्तुतः सूत्रेरांतानामेवानुकरणमसंधिर्योग्य एवेति बोध्यं न स्वयमिति इदमर्वाचामनुसारेण भाष्ये तु रेफा
स्य विसर्गस्यानिवत्वेन न रुत्वमिति कृत्वाश्रयमपीदमलविधिरेव स्यान्यल्वृत्तिधर्माश्रयत्वात् अग्रहीदित्यत्र च दीर्घलोपे चेड्ढेनैव निवेश इति विशेषोऽतः पयः स्वि
त्यादौ दोषः तत्र हि रोः सुपीति विसर्गः नियमशास्त्राणि च विधायकान्येव वाच्यवृत्त्या आर्थिकार्थमादाय तु निषेधकानीति तत्रापि रोरेफस्य विसर्ग इत्यर्थे लक्षणप्रहण
मर्थमित्युक्तं नन्वेवं हे ए मे इत्यादौ संबुद्ध्यवयवस्य हलः सस्य लोपे तद्वृत्ति सुत्वस्याल्धर्मत्वेन स्थानिवत्त्वाभावे पदत्वासिद्धिरिति चेन्न आनुमानिकादेशस्थापि भेसस्य।
स्थानिवद्भावेन सुवंतत्वस्य तत्प्रयुक्तकार्यस्य वा लाभेन तत्सिद्धेः प्रत्ययलक्षणेनापि न प्रत्ययमात्रवृत्तिधर्मलाभः लक्षणपदोपादानेन प्रत्ययनिमित्तककार्यस्यैता।
न्निमित्तकत्वव्यवहारस्य वातिदेशात् एवं दीर्घाहो निदाघेत्यादौ हल्ङ्याब्भ्य इति लोपे उकारीसाख्यानिनिजायमानस्य सुपीति रत्वनिषेधस्यादेशदीर्घाहन् शब्दे निदेशानम
दृष्ट्यानरेफ इति दिक् तेषां रोरिति इदं च निपातानाम्स्यायविभाषा भवतीति वार्तिकं प्रत्याख्यानस्यवृत्तिकृतो मतेन परेणतु तेषामपि रोरित्यर्थः अपिना विभाषा भव १०

कनिष्पन्नसंग्रहः एषामंत्यस्य रूः स्यादवस्य चौकारः संबुद्धाविति तदर्थः अवग्रहणसामर्थ्याद्लोत्पस्येति नेति बोध्यं वार्तिकनिष्पन्नानां त्रयाणां भोः शब्दनिपातस्य चा
वश्यकत्वमन्यत्रस्पष्टमित्याह: व्योर्लघुप्रयत्नपिवर्णसमाम्नायस्य प्राथम्यात् व्योरिति उचितं तथापि लोपो व्योरिति लोपवारणाय सौत्रत्वमाश्रयणीयं स्यादतो व्यो।
रित्युक्तं लघुतरः प्रयत्नो यस्योच्चारणे सोऽस्य लघुप्रयत्नतरः अन्यपदार्थसंबंधोऽतंवर्तिपदार्थप्रकर्षविवक्षया साधुरयं लघुतरस्तवेमाशैथिल्यजनकत्वमेव लघूच्चारणाविति लघूच्चा
रणावित्यर्थः सूत्रेमात्रत्वादेकवचनं वकारोदाहरणमसावादित्य इत्युक्तेति वृत्तिः ओतो व्योरित्यत्रयकारसाहचर्याद्धकारोधात्वनवयवएवात्राप्यर्थाद्विकारो नैव
तेवस्मृतो वच्युतेत्यादौ न दोषः तदाह पदस्येति तादृशवस्यासंभवादिति भावः भोभगो इति नानुवर्तते विच्छेदादनपवर्स्पाति पदांतस्य किं तोयमिति इह लघुप्रयत्नयो।।
वैगार्ग्यपक्षे तेलदाह अलघुप्रयत्नस्येति पूजार्थमितिव्याख्यानादिति भावः तादृशस्य भोस दिपूर्वक एवेत्याशयेनाह भोअच्युतेति भाष्यानुसारिणस्तु भो इत्याद्य
नुवृत्ते . मतोऽवित्यादौ न दोषस्तस्यानभिधानाच्च अपूर्वस्येति त्वेतदित्यनेन न विरोधान्न संबध्यते लोपः शाकल्यस्येत्येव भोभगो इत्याद्यनुवृत्त्यासिद्धे नित्यत्वार्थमिदमि
त्याहः उञि च भो इत्यादिपूर्वस्य पूर्वेणासिद्धे राह अवर्णपूर्वयोरिति एतदपि नित्यमेव अत्रापि गार्ग्यग्रहणानुवृत्त्या लघुप्रयत्नस्यैव लोपः एतेन भो इत्यादिपू
र्वेलघुप्रयत्नलोपार्थमत्रापि तदनुवृत्तिरित्यपास्तं वकारोदाहरणं तु असाउएकाग्निरितिवृत्तिः उत्तरार्थमिति ङमो ह्रस्वादचीत्यर्थमित्यर्थः एतत्तत्रैव निरूपितं
हलिसर्वेषामित्यादौ तु न संबध्यते व्यवहितेङमइत्यत्रैव प्रयोजनकथनपरभाष्यप्रामाण्यात् अत एव लिङ्वित्यादौ धुडादयः अन्यथा सादौ पदे इत्यर्थात्
स्युः अत एव माभ्यामित्यादौ हलि सर्वेषामिति लोपसिद्धिरिति दिक् हलि स भोभगो इत्याद्यनुवर्तते तत्राकारात्परस्य लघूच्चारणस्यैवानेन लोपः अलघूच्चा
रणस्य तु ओतो इत्येव सिद्धे अपूर्वेत्युभयोरपि न चापूर्वोक्तलघुप्रयत्ने अस्यासिद्धत्वाल्लोपः शाकल्यस्येति प्राप्नोतीति वाच्यं लघुप्रयत्नस्यैवानेन लोपो व्योरिति मिसद्धे
अचीति करणात् हलि विधानाभावेनैव सिद्धेः अस्य सूत्रस्यैव यथा प्रत्याहाराधात् न चालघुप्रयत्नयोरेव लोपः स्यात् व्योरित्ययाधिकारात् सिद्धिर्वाच्यं कपिञ्जलसंग्रह
णार्थस्य सर्वेषामित्यस्यैव व्याप्तेः विकल्पस्य विच्छिन्नत्वेन नित्यत्वसिद्धेः अत्र च पकारएवानुवर्तते न वकारानुवृत्तौ तथैवोक्तेः फलाभावाच्च यपरइमावित्यादि शी
च अन्यथा तत्रैव तत्वाध्याय यणीयं स्यात् दाहल घल घूच्चारणस्य यस्येति न तु सुपीति पर्युदासे हि सुसदृश प्रत्यये एव स्यादेवं च अहभोतीत्यत्र न स्यात् यदि तु सुपि भैष्य

ल॰ श॰ द्वेस्मान्दीर्घोऽचि निदाघेत्यत्रापिस्यात् सुवंतइत्यर्थस्तु नउत्तमैकाभ्यामित्यादिनिर्देशेः स अमौनिर्दिष्टप्रत्ययेतदंतविध्यभावज्ञापनात् लस्यानुरोधेन कचित्प्रत्ययग्रहणे सो
शे॰ सु॰ शब्दस्वरूपस्यविशेषणतापाणवाश्रयणाच्च अतएवस्दाभ्यांनिष्ठत्यादौनदोषः अहरहइति नित्यवीप्सयोरितिद्वित्वं नलुमतेतिनिषेधात्सुपो त्वाभावः गतमहोरात्रि
३१ रिति केचित्तुभाष्यस्थातिदेशिकस्यैवाहोरात्रस्योदाहरणात्नलोपः प्रातिपदिकांतस्येतिसूत्रेनहि रूपरात्ररथंतरेषुरोरेवाविशेषोस्तीत्यत्रप्रायेणास्मीतिपाठादे
दृशानामनभिधानमेवेत्याहुः अनन्यत्वादिति रात्रिशब्दांतसमासाद्विसमासांतेयस्येतिचेतिलोपेपिरात्रिशब्दत्वास्तेरितिभावः अनुवादेरेफविशिष्टस्यो
पादानात्रेफविधानंव्यर्थमत आह विसर्गोपवादइति द्रलोप नायंतन्त्रसुरुषोः नीपस्वचान्यादौचदोषापत्तेः नापिवहुव्रीहिर्व्यधिकरणत्वात् अतोराजेना
कर्मण्यपदसमासइत्याहुरेफादिस्यादि भाष्येप्यधिकरणावहुव्रीहिरेवदर्शितः नचाऽजघोइत्यादौसिपिधातोरितिरुत्वस्यलौढइत्यादौदत्वादौमापित्
राज्यमित्यादौसंयोगांतलोपस्यासिद्धत्वात्कथंदीर्घइतिवाच्यंदग्रहणेनलण्सूत्रेऽजषीइतिभाष्योदाहरणेन च नतच्छास्त्रैकवाक्यतापन्नपूर्वत्रासिद्धमितिसूत्र।
स्यपूर्वग्रहणेनैतत्सूत्राग्रहणबोधनात् अणःकिमिति अवइत्येवासिद्धमितिप्रश्नः तृंहइति पाठेनकारजावनुस्वारपंचमाविति इदितोनुमिति नलोपे तृ
दृंतिसिद्धं अत्राणपूर्वेणैवव्याख्यानात् विप्रतिषेधे विप्रतिपूर्वात्कर्मव्यतिहारेवर्तमानात्सेधतेर्घञि परस्परविरोधीर्थोविप्रतिषेधशब्दः तत्रनित्यस्यावश्य
कतयांतरंगस्यज्ञापकादिनाऽपवादस्यवचनप्रामाण्यात्वाधकत्वस्थितेतद्भिन्नोऽस्यविषयइत्याह तुल्यवलेति द्वयोःशास्त्रयोःक्वचित्सव्यावकाशयोरेकत्रप्र
योगेयुगपदसंभवित्स्वकार्यं समर्पयेणाच्चस्तः तत्रप्रायेणएकस्यकार्यद्वययोगकृतेऽसंभवेएवतस्यप्रवृत्तिः यथाहृस्वस्भ्यइति तत्रदीर्घत्वयोर्युगपत्प्रवृत्तौस्वस्वनि
मित्तानंतयोसंभवः कचित्केवलासंभवेपियथाशिष्टादित्यादौअन्नहिता तदृशाभावयोर्युगपत्प्रवृत्तौस्वस्वनिमित्तानंतयोसंभवः यद्यपितानङादेःस्थानिवत्त्वे
नास्त्येवतत्तथापि अतिदेशआदेशप्रवृत्त्युत्तरमेवनतुनत्प्रवृत्तिकालइतियुगपदसंभवोस्त्येवेतिपरत्वात्तानङि सहहृतिन्यायेननशादेशःस्पष्टंचेदंप्रकृता
सूत्रेइकोगुणवृद्धीअदसोमादित्यादावाकरे तत्रयुगपदुभयोःकार्ययोरसंभवात्पर्यायेणातृजादिवद्धास्त्रद्वयप्रसंगेनियमार्थमिदंपरमेवेति तेनतिसृणा राम
मित्यत्रयोगपद्यासंभवेनपरत्वात्तिस्रादेशेपुनःस्थानिवत्त्वेनत्रयादेशोनतत्पस्यतसकृद्गतोविप्रतिषेधेयद्वाधितंतद्वाधितमेवेतियद्वा तुल्यवलयोरेकः प्र ३१

ष्योभवतिसन्नयोः पर्यायेणाकार्यंकरोतीति यदा तमुभौ युगपत्प्रेषयतो नानादिक्षु वकार्यंमनुतलदोभयोर्नकरोति यौगपद्यासंभवात् तथाशास्त्रयोर्लक्ष्यप्रेष्ययोः क्वचिल्लक्ष्ये।
यौगपद्यासंभवात्प्रतिपत्तौ प्राप्तायामिदं परं भवतीति विध्यर्थं तत्रकृते यदि पूर्वस्यापि निमित्तमस्ति तदा तदपि भवत्येव तत्पठ्यते पुनः प्रसंगविज्ञानात्सिद्धमिति पथा।
भिंधीत्यत्र परत्वान्नातङि पुनर्घिर्भवतीति अन्नतातङ्घिभावयोर्युगपदेकस्यानिसंबंधस्यत्रगरूपनिमित्तानं तयेस्य वानसंभवइतिभाष्येस्पष्टं कार्येपरत्वं च परशास्त्रविहि
तत्वं कार्यकालपक्षेप्पष्ठाध्यायीपाठक्रेतत्परत्वमेवनियामकं अतएवङमोह्रस्वादित्यादौत्रिपादीस्थे कार्यकालपक्षेएवपरिभाषयोः प्रवृत्त्या एकदेशस्थत्वेपि परत्वा
त्तस्मादित्युत्तरस्येत्यनेनैवव्यवस्थेतिसंगच्छते त्रिपादीस्थेनशास्त्रेणाविरुद्धपरिभाषाद्वयमध्ये पूर्वकालत्वमाकृष्यतेनपूर्वेतितत्त्वं संज्ञानांतुकार्यकालपक्षेप्रदेशदेश।
एववाकार्थेनतद्बोधोत्तरमेवविरोधप्रतिसंधानं कार्यज्ञानं चेतितत्रत्यपरत्वमेवैतत्सूत्रप्रवृत्तौ बीजं अतएवकार्यकालपक्षे अपादिभ्यः परैवप्रगृह्यसंज्ञेति अद
सोमादिति सूत्रेभाष्येउक्तं परिभाषाणांतुतत्पक्षेतद्देशस्थत्वेपि स्वस्वदेशार्थबोधोस्त्येवेतिता संपाठक्रमेवतदेतत्सूत्रप्रवृत्तौ नियामकमिति बोध्यं यद्यपीयंप
रिभाषा तथापि कार्यग्रहणेन कार्यमात्रग्रहणात्तस्मिन्निति तस्मादिति परिभाषयोरपि व्यवस्थापिका कार्यकालपक्षेपि नैषऋपरिभाषादिवद्धिव्येकवाक्यतां गत्वा
नस्वकार्यनिष्पादिका किंतु वाक्यभेदेनैवकार्यव्यवस्थापयति यथा इत्येभ्यश्चेत्यदीर्घत्वयोः प्राप्तयोः परमेत्वं प्रवर्तयति एवमसिद्धं बहिरंगमित्यादयोपीति विर
वसानयोर्विप्रकृत्यकेपर्यस्यष्ठ एवं च विप्रतिषेधइत्यस्य यथोद्देशेवेति स्थितं त्रिपाद्यां कार्यकालपक्षेप्यप्रवृत्तेः पूर्वत्रासिद्धपरवस्थानाभावादित्यन्यत्रविस्तरः इति
लोपइति उत्वंनित्यमिति तुनभोभगोइति सूत्रोक्तरीत्या लोपस्याल्विधित्वात् स्थानिवत्वेनतद्धर्मातिदेशेपि उच्चारणप्रसंगरूपस्यानषस्यर्थो भावेन लोपेनतद्प्राप्ते
श्च एतत्तदोः अनुकार्यस्वरूपभंगभियाकोशङ्केकशेषाभावः एतत्तदोरनंतरइत्यर्थः तेनपरमसद्ददातीत्यादौनदोषः गौणेतुनदोषः तत्रांत्यपदाद्यत्वाभावेनहल
ङ्यादिलोपस्यदुर्वारत्वात् सुइतिप्रथमैकवचनमेवव्याख्यानात् अनञ्समासेकिमिति तस्यपूर्वपदार्थप्रधानत्वादुपसर्जनत्वात्सादेशत्वाभावेहल्ङ्यादिलोप
लोपेतुवारइतिप्रश्नः उत्तरपदार्थप्रधानः सइत्युत्तरं सोचि समिति प्रथमांतस्यलुप्तषष्ठीकमनुकरणं समासमविद्धीति द्वादशाक्षरपादाज्जगतीछंदः तस्यसक्विति
लोपेत्रैपादार्थेनैनलोपइतिभावः अवधारणंत्विति दृष्टेर्व्याख्यातमवधारणंत्वित्यर्थः वहुलेत्यादौति गमकांतराभावादितिभावः एवंचतद्वृत्त्यैवक्वचिदप्रवृत्तौ।

सिद्धायामेव श्रीगुणपरतयाव्याख्यानं व्यर्थमितिभावः सर्वमेतदवधारणं त्विति तु नासूचितमित्यलं ॥ ॐ इति स्वादिसंधिः ॐ ॥ स्वादिविधौ प्रातिपदिकादिसंज्ञाधिका
ॐ णोसंज्ञामाह अर्थवदिति अधातुरित्यादिः पर्युदासो लाघवात् प्रत्ययांतमिति आवर्जितं प्रत्ययपदे प्रत्ययग्रहणपरिभाषया तदंतग्रहणं संज्ञाविधावि
ति निषेधस्तु प्रत्ययं स्वरूपत्र संज्ञा तद्विषये इति भावः अत्र सूत्रे उत्तरसूत्रे चार्थवत्त्वमेतत्संज्ञाफलभूतविभक्तितरसमभिव्याहारानपेक्षया लोके यद्विषयकबोधजनकत्वं अ
न्यथा ऽधातुरिति पर्युदासेन व्याख्यानादर्थवत्त्वेनैव सादृश्यग्रहणेन सिद्धे उत्तरसूत्रे कृदादीनामनर्थकानामप्रसिद्धेस्तद्वैयर्थ्यं स्यात् न च नञिवयुक्तन्यायानित्यत्वज्ञा
पनायैतत् तदनित्यत्वज्ञापने भाष्यसंमतत्वे अन्यफलाभावात् अहन् कांडे इत्यादावेतत्साध्यविभक्त्यनपेक्षत्वेपि तद्धितानपेक्षत्वमस्त्येवेति पर्युदासः सार्थकः
चतन्के वर्धे अन्ययस्य तदुक्तं संख्याया अतिशदंतायाः कन् इति सूत्रे भाष्ये नहि लोके केवलेन प्रत्ययेनार्थो गम्यते केनेतर्हि सप्रकृतिकेनेति केनेति हरिरप्याह धात्वादीनां
विशुद्धानां लौकिको र्थो न विद्यते कृत्तद्धितानामर्थश्च केवलानामलौकिकः प्राग्विभक्तेस्तदंतस्य तथैवार्थो न विद्यत इति अतएव पदसंज्ञासूत्रे तंतग्रहणास्य संज्ञाविधौ।
न दंतविध्यभावज्ञापकत्वे कृत्तद्धितेति सूत्रे तद्ग्रहणाकर्तव्यं नकर्तव्यमर्थवदितिवर्तते कृत्तद्धितांतं चैवार्थवत् न केवलाः कृतस्तद्धिता इति भाष्यमुपादाय कैयटेनोक्तं।
शास्त्रीयार्थग्रहणे ऽर्थवद्ग्रहणानुवृत्तिवैयर्थ्येन तदनुवृत्तिसामर्थ्यात् लौकिकार्थप्रत्यासन्नो ऽभिव्यक्ततरो यो र्थः प्रत्ययांतेषु लक्ष्यते स आश्रीयते इति लौकिकार्थकं
यत्पदं तदर्थस्य प्रत्यासन्नः शास्त्रकल्पितः स्वादिप्रकृतेरर्थः प्रत्ययांतेषु सुबंतेषु योऽभिव्यक्ततरो लक्ष्यते ऽभिः सहेत्यन्वयः यत्तु प्रत्ययांतेष्वित्यस्य कृदाद्यंतेष्वित्य
र्थ इति तन्न तावन्मात्रेण कस्याप्यर्थस्याभिव्यक्तेरप्यभावेनाभिव्यक्ततरत्वस्य सुतरामभावात् अर्थवत्सूत्रेप्येवमेवेति अनुवृत्तिसामर्थ्यादित्यनेन सूचितं अन्य
थानत्सामर्थ्यादित्येव वदेत् पूर्वसूत्रे यादृशार्थवत्त्वग्रहो त्राप्यनुवृत्तिसामर्थ्यात्तादृशार्थस्यैव ग्रहः शास्त्रीयार्थग्रहणे तु तदनुवृत्तिर्व्यर्था स्यादिति तद्भावः किंच
पूर्वसूत्रे सामान्यतो र्थवत् अर्थवद्ग्रहणेन किंचित्फलमस्त्येवेति व्याप्तिरानातिरिक्तं अतएव तद्धितग्रहणस्य नियमार्थत्वाश्रयणेन ह्रस्वो नपुंसके पत्स्येति न्यासे न कांडे इत्या
दौ ह्रस्ववारणात्फलाभावेन भाष्योक्तेन प्रत्याख्याने पंचनावप्रिय इत्यादौ पंचनावेत्यस्यानेन न प्रातिपदिकत्वं नाप्युत्तरसूत्रेणेति प्रातिपदिकत्वे तु ङीबापत्तिः एवं चा
प्रत्ययस्य प्राप्तिरेव नेति केवलप्रत्ययपर्युदासो विफलः दशदाडिमा षडपूपा इत्यादिनिरर्थकपदसमुदायव्यावृत्तिरर्थवद्ग्रहणफलं तत्रापि सुपो धात्विति लु

गायत्तिरितिभाष्यस्थमित्रितिदिक् पूर्वसूत्रेणेति प्रत्ययग्रहणेयस्मादितिप्रत्ययांतत्वाभावेदितिभावः नियमस्यतुल्यजातीयविषयत्वात्समाजात्यंदर्शयितुमाह पूर्वोभागइति
एतेनयमच्छत्वर्थयोरननुगतत्वेनशब्दानुगमस्याप्रयोजकत्वेनव्यवच्छेद्यानुगमेपिसत्यभावेनयत्रसंघातइत्यादिव्यर्थमेवेत्यपास्त पादशब्देनात्रसूत्रेणापिप्रयो
माहेमर्थवद्ग्रहणेतेअतएवार्थवत्समुदायानांसमासग्रहणंनियमार्थमित्युक्तमत्रभाष्येभाष्येतुसुबंतानामित्यनेनभेदसंसर्गेहारकार्थवंतउपलक्ष्यंतइतिकेयटेनस्पष्टमेवो
क्तंतेनगवित्ययमाहेत्यादौगोइत्यादीनांसुबंतत्वाभावेपिनसमुदायस्यप्रातिपदिकत्वं अनुकरणस्यानितिपरस्यापिप्रयोगसत्वेनतेषामपिस्वातंत्र्येणप्रयोगार्हत्वात् ब
हुपटवइत्यादौप्रातिपदिकत्वसिद्धयेस्वातंत्र्येणेति तत्रपूर्वइत्यासिप्रपरेषामपिस्वातंत्र्येणप्रयोगार्हार्थवतामेवग्रहणात्तत्रकाम्पेत्यादौनदोषः अतएवागमसंज्ञाम
पिभाष्येप्रत्ययग्रहणेयस्मात्सविहितस्तदादेस्तदंतस्यग्रहणमितिपरिभाषायाफलनिरूपणावसरेदेवदत्तोगार्ग्यइतिसमुदायस्यप्रत्ययांतत्वेनप्राप्तप्रातिपदिकसंज्ञायाःअभा
वःफलत्वेनोक्तः यथाश्रुतमूलोक्तनियमेतुनियमेनैवतदप्राप्त्यातदसंगतिःस्पष्टैव एतेनदृषद्वदुरित्यादौपूर्वभागस्यमत्वात्पूर्वोभागःपदमित्य पास्तं वा
क्यस्येनेति प्रातिपदिकत्वेहिसुपः श्रवणानापत्तिः पिंडीमित्यादौवाक्यैकदेशप्रयोगेलुकुसमासेचागाधिकारवि हितसुप्प्रत्ययनिमित्तकार्याणांसुबादेशानां
चवारितार्थ्यविकल्पेनसमासविधानंचस्वरादिद्यर्थमितिभावः शशशृंगादिपदानांचवीडशशृंगादौशक्तिरिति पूर्वैरोच्यप्रातिपदिकत्वसिद्धिः स्वप्राद्यनुरोधेनचवीड
पदार्थस्यात्पूपकत्वं असौहिरिणीरथंतरादिपदेषुअवयवानामत्यंतनिरर्थकानामप्यन्यत्रदृष्टार्थारोपेणप्रातिपदिकत्वसुबुत्पत्यादिनायथाकथंचित्साधुत्वान्वाख्यानंबो
ध्यं अधिकारोयमिति संज्ञाधिकारइत्यर्थः संज्ञात्वावगमस्तुव्याख्यानात् विकारागमानांतुनसंज्ञाप्रत्ययइतिमहासंज्ञयास्वस्वप्रकृत्यन्यतरार्थप्रत्यायकस्यैवतत्संज्ञक
त्वात्स्वप्रकृत्यर्थकत्वेचधातुप्रत्ययोक्तोशादौतमुचार्येबोधितत्वं अतएवनभवधात्वादेशानांनसंज्ञातेषांस्थान्यर्थनैवार्थवत्वेनतुस्वार्थेति अतएवकोशादौतदर्था
कथनं एतदर्थमेवभाष्येस्वीयमर्थप्रत्याययंतीतिविग्रहेस्वीयपदोपादानं भाष्यप्रामाण्याच्चतदर्थांतर्भावेनाप्रत्ययशब्दस्यवृत्तिः यत्तुविकारागमादेशानांदेशांशेनिरं
कांक्षत्वात्स्वेनस्यानुपस्थितौतत्संनियोगशिष्टप्रत्ययसंज्ञायाअप्रवृत्तिरिति तन्न अमकचवहुच्प्रवृत्यापत्तेः किंचलविषयित्वत्रविशेषविहितत्वात्परस्याच्चपू
र्वसीयुटितेनात्वादेशप्रत्ययसंज्ञासंनियोगेनेटोविधीयमानमाद्युदात्तंसीयुटएवस्यादतआगमानुदात्तत्वंवक्तव्यमित्याद्युदात्तश्चेतिसूत्रस्थेभाष्येकैयटयोसंगतिरि

ल॰ श॰ स्थानिकत्वेनाशेनिराकांक्षत्वेन परश्चेत्यस्याप्रवृत्तौ प्रत्यय इत्यस्याप्यप्रवृत्तौ तत्संनियोगकथनासंगतेरितिदिक् परश्च गुप्तिजकिद्भ्य इत्यादावपादानत्वासंभवाद्दिग्योग
शे॰ सु॰ लक्षणां पंचमीं तत्र परः पूर्वो वेति अनियमेनाध्याहारे प्रसक्ते पर एवेति नियमार्थमिदं गापोष्टगित्यादावपि षष्ठ्यर्थ आनंतर्यं पूर्वं परस्माद्धर्षणमित्र अनियमो स्त्येव आ
३२ नंतर्यादिति परिभाषोक्तरंगविकल्पाप्रवृत्ते इत्यव्यवहिता एव प्रत्ययाः नचैवं षष्ठ्यंशविकल्पं संपूर्णसूत्रमुपतिष्ठतां किं परश्चेत्यनेनेति वाच्यं प्रकृत्यर्थमात्रविवक्षायां के
वलप्रकृतेः पचपदित्यादिप्रयोगे माभूदिति प्रत्ययः पर एव भवत्येवेति नियमार्थत्वात्तेन न केवला प्रकृतिः प्रयोक्तव्या नापि केवलः प्रत्यय इति अन्नुकरणे तु अभेदवि
वक्षया अर्थवत्वाभावात्प्रातिपदिकत्वाभावेन प्रकृतित्वाभावात् गवित्ययमाहेत्यादौ नानुपपत्तिः प्रकृतित्वं प्रत्ययविधावुद्देश्यतावच्छेदकाक्रांतत्वं अयं न्यायः शा
स्त्रबोधितान्तरप्रयोगविषय अत एव लिडियादित्यादौ न दोषोऽत्र प्रकृतिविशेषोद्देशेनैव प्रत्ययानां विधानान्नापि केवल इति न्यायमूलकं एतन्मूलकमेव
न्यतेः पदं न प्रयुंजीतेति अपरिनिष्ठितमिति तदर्थः परिनिष्ठितत्वं चाप्रवृत्तनित्यविध्युद्देश्यतावच्छेदकानाक्रांतत्वं निहतेति ङ्नादावव्याप्तिवारणाय प्रवृत्तेति
वैकल्पिके आगमोद्देश्यतावच्छेदकानाक्रांतेऽसिद्धत्वादावव्याप्तिवारणाय नित्येति दिक् ङ्याप्प्रातिपदिकात् समाहारद्वंद्वः ननु परश्चेत्यनेन प्रकृतेरपेक्षा प्राति
पदिकाधिकारो व्यर्थः तिङं नानुनद्धितीयादिः संख्यायाश्च ङ्योक्तत्वाच्च धातुभ्यस्तु नेति ज्ञमपवादत्वात् तस्येत्यादिसमर्थविभक्तिनिर्देशात्तमप्विधौ तिङश्च
तिज्ञापकाच्च न तेभ्यस्तद्धितव्याक्त्यर्थ इति चेन्न तदभावे स्वार्थद्रव्यलिंगसंख्याकारकप्रयुक्तकार्यैः संस्कृतस्य बहिर्भूता पत्याद्योग इति कुत्सितसूत्रस्य भाष्योक्त
न्यायेन तस्याप्यन्यमित्यादेस्तत्संबंधपत्रमित्याद्यर्थे प्रथमोच्चारितेन बोध्यस्तत्प्रत्यय इत्यर्थस्य सत्वेन स्वसार्थकतद्धितानां सुबंतादुत्पत्त्यानुदात्तादेरिति सस्य प्राप्त्या
दुपस्थितसुबंतविशेषणपत्नी सर्वस्य विकारः सार्व इत्यत्रानापत्तेः सर्वस्य सुपीत्याद्युदात्तत्वात् तदधिकारसामर्थ्यात्तु प्रातिपदिकस्यैव तद्विशेषणामिति न दो
षः स्वं गशिटेत्याद्युदात्तप्राप्तेः सर्वेशब्दस्यांक्षादिपाठे नांतोदात्तत्वात् स्पष्टं चेदं मन्त्रभाष्ये नचांतरंगानपीति न्यायेन लुक् निमित्तप्रत्ययात्पूर्वमाद्युदात्तप्राप्त्या त
स्य सुबंतविशेषणत्वेपि न दोष इति वाच्यं नेन न्यायेन धर्मिग्राहकमानादंतरंगनिमित्तविनाशकलुक एव प्राबल्यबोधने नादोषाच्च सर्वस्य सुपीत्यत्रस्यैव राम
रीणां सप्तमीनांतदंतसप्तमीत्वात्प्रत्ययेपरतः पूर्वकार्यत्वा भावेन न लुमते तस्याप्रवृत्तौ प्रत्ययलक्षणेन सुबंततया तस्यांतरंगनिमित्तविनाशकत्वाभावात् अत एव ३२

वस्त्वेकोमाद्विबहुव्रीहेरानुदात्तत्वसिद्धिः नचानुदात्तादिप्रकृतिकषष्ठ्यन्तादित्यर्थेनमङ्गोष इति वाच्यं गर्गादिभ्य इत्यादौसुबन्तं प्रति गर्गादीनां विशेषणत्वासंभवादमन्त्यो।
लक्षणत्स्वीकारेपिप्रकृते लक्षणायांमानाभावात् वस्तुतस्तत्रापि न लक्षणा गर्गादिरूपात्प्रातिपदिकान्तसंबंध्यपत्यमित्यर्थे प्रत्ययइत्यर्थेप्रातिपदिकात्परत्वेन तद्
वधोनेन भविष्यतीतितदतिरिक्तव्यवधाने तु न मानाभावात् एतच्च मन्तुप्सूत्रे कैयटे स्पष्टमित्यन्यत्र विस्तरः लिंगविशिष्टस्येति इयं च प्रातिपदिकसामान्यग्रहणेन तद्
विषग्रहणे च अनयापरिभाषयाड्याप्ग्रहणवैयर्थ्यस्य भाष्ये शंकितत्वात् विशेषविषयेबहुतरोदाहरणदानाच्च स्त्रीप्रत्ययसमभिव्याहारे प्रातिपदिकत्वेन तद्धाय
धर्माः विशिष्टेनानेनापि दिश्यन्ते अत एव बहुव्रीहिरूधस इति सूत्रे भाष्येनद्युतश्चेत्यस्य नद्यन्तस्य बहुव्रीहिरित्यर्थेन कुडोध्नी यत्र कवापादितः अन्यथा तु ङ्यन्त
स्य बहुव्रीहित्वाभावात्तदसंगतिः नद्यन्तानां यो बहुव्रीहिरित्यर्थेन च परिहृत इत्यन्यत्र समासान्तेषु तत्परिभाषाभावस्तु ङ्याप्सूत्रभाष्योक्तो वसव विषयः एव सु
दायविषयेन तत्प्रवृत्तावपि दोषाभावेन तदंशे तत्प्रवृत्तौ न मानमित्याशयः ङ्याबन्तादिति ङ्याप्ग्रहणं स्त्रीप्रत्ययमात्रोपलक्षणं तेनब्रह्मबंधूतरायुवतितरेत्यादि
सिद्धिः जातेश्चेति निषेधान्न पुंवत्त्वं वयोवाचिनां वैकल्पिकजातिकार्यस्य वक्ष्यमाणत्वात् तद्धित इति एतच्च समासान्ततप्रत्ययाद्यतिरिक्तपरं व्याख्यानात् ए
तेन यूनीति र्बहुगोमतीकेतिस्यादि व्यपास्तं एवं च स्त्रीप्रत्ययेषु अस्वार्थिकानारभ्यतद्धितेषु च ङ्याप्ग्रहणासंबंधो व्याख्यानात् अत एव लोहिनिकेत्यत्र सिद्
धिलोहितादिलिंगबाधनं वेति चरितार्थं अस्वार्थिकानांसुबुत्पत्तेः पूर्वमुत्पत्तिरिति सर्वस्य द्वे इति सूत्रे भाष्ये स्पष्टं कैयटे च तत्र हि पदस्य प्रयोजनं द्विपदिकेत्या
दौ द्वित्वं स्वार्थयुक्तपदार्थस्य वीप्सितत्वात् वीप्सायामेकत्वं समासस्यायान्ना नन्तर्भावात्समासाद्विभक्त्यभावेन पदत्वाभावात्प्राक्तद्धितोत्पत्तेः द्विर्वचनाभा
वइत्युक्तं पुंयोगादिति सूत्रे भाष्येपि स्फुटमेतत् तत्र हि गतिकारकोपपदानामित्यस्याः परिभाषायाः सांकुटिनमिति प्रयोजनमुक्तं तत्र हि अभिविधौ भावइनुणि
कूटिन्शब्दरादृशाविमतेप्राप्नयोः स्वार्थिकत्वेनांतरंगत्वादणि कुटिनित्यस्यैव वृद्धिः स्यादित्युक्तं तस्यापि सुबन्तादुत्पत्तौ तु पूर्वं सुपि इनुणन्तत्वरूपाधिकस्य
सत्त्वेन बहिरंगतयाणः पूर्वं समासविशिष्टादणिरूपसिद्धो भाष्यासंगतिः प्राक्सुबुत्पत्तेः समासेतु उक्तरीत्यैवांतरंगत्वात्पूर्वं समासेन तेन विशिष्टादणि सांकू
सिद्धिरित्यन्यत्र विस्तरः स्वौजसूत्रे समाहारद्वन्द्वः टङ्पाश्चेत इति न च फलाभावः लोपस्यैव फलत्वात् न तेन तत्र व्याख्यानाचरितार्थानां लोपफलकत्वस्वीकारे॥

द्वे·श· धाकाभावात्कौम्मजादौ तु लोपे सति वर्णोच्चारणवैयर्थ्यान्न तन्मात्रफलिकेत्संज्ञेति बोध्यं नविभक्तौ वितिनिषेधोपयोगिनो विभक्तिसंज्ञाप्रकृत्य विभक्तिश्च चकार
शे·सु· एकसंज्ञाधिकारेपि पुरुषवचनसंज्ञाभ्यां समावेशार्थोऽन्यथा पर्यायः स्यात् सुप इति सूत्रं तिङ स्त्रीणि त्रीणीति सूत्रात्तिङ इति चानुवर्तते प्रथमयोरित्यादौ व्याख्या
३४ नात्सा चावैयाकरणानां प्रथमाद्वितीयापदवाच्ययोर्ग्रहणं बोध्यं अन्यथा औजसाः पूर्वं त्येवं वदेत् विभक्तिप्रदेशेषु सुप्तिङिति न वक्तुं शक्यं यत्र तत्रेत्यादौ त्यदाद्यत्वा
नापत्तेः तेषां सुप्संज्ञात्वशङ्काया एतनहि इत्यादौ सुपि चेति दीर्घापत्तेः सप्तम्यन्ता इति स्त्रीलिंगादिति शेषः प्राचां वैयाकरणान्तराणां इहापि अस्मिन्व्याकरणेपि सुपः सुवि
भिप्रेत्याहोस्वित्सुप्स्वत्र द्व्येकयोः नियमार्थमिदमिह सूत्रे द्व्येकशब्दौ संख्यापरौ न संख्येयपरौ बहुवचनापत्तेस्तदाह द्वित्वैकत्वयोरिति लौकिकप्रयोगेत्वादृशतः संख्याः सं
ख्येय इति कोशभाष्याद्युक्तेः संख्येयपरत्वस्यैव प्रायः साधुत्वं क्वचित्संख्यापरत्वेपि संख्येयगतसंख्यारोपेण साधुत्वं अत एव कस्याद्वित्वं इत्याद्यर्थे कया द्वयोः केषां बहु
ष्विति भाष्यप्रयुक्तमिति बोध्यं एकशब्दो —— द्विशब्दसाहचर्यात्संख्यावाच्येव एकग्रहणात्पक्षे कवचनमुत्सर्ग कर्तव्यस्तेनाव्ययेभ्यः पचतिकल्पमित्यादौ
चाव्यर्थैकवचनप्रयोगसिद्धिरिति तद्वितश्चेति सूत्रे भाष्ये स्पष्टं बहुषु बहुशब्दो त्रित्वादिपरः द्वौ तसंख्यानां व्यापको यो धर्मविशेषो बहुत्वं तत्परः बहुवचनं नात्र
योगं तं बहुत्वं धर्मे आरोप्यकृतं तेन वैपुल्य —— वाचिनो ग्रहणं दारा इत्यादौ त्ववयवादिगतबहुत्वस्यावयविन्यारोपो बोध्यः स च कोशादिव्यवहारानुसारेणैवेति नाति
प्रसंगः भर्तृदारयोरपि तेजसोरित्यादौ वृत्तौ तु द्विवचनमेवारोपमानाभावात् अत एव द्व्येकयोरिति संगच्छते एतेनैकस्मिन्नपि गुरवः समागता इत्यादि समर्थितं
अन्वर्थ —— संज्ञयैव सिद्धे इदं सूत्रद्वयं स्पष्टार्थं एम इति एत्वे एकदेशविकृतन्यायेन सुबन्ततया पदत्वाद्विसर्गः सरूपाणां द्वन्द्वायूनेति सूत्रादेवकारोपकृष्यत इ
त्याह सरूपाण्येवेति तेन जननीपरिकृत्स्वाचिनोर्मातृशब्दयोर्भ्यामिनैकशेषः न चैकविभक्तावितिव्यर्थं यानि सरूपाण्येव तेषु तेनैवोक्तदोषवारणादिति वाच्यं
हरिणस्त्रीवाचकहरिणीशब्दस्य हरितवर्णविशिष्टस्त्रीवाचकहरिणीशब्दस्य चैकशेषानापत्तेः पुंवद्भावेन तद्धितादौ वैरूप्यात् हरिणीति लौकिकप्रयोगे इति शे
षः एकशेषस्य यमनैमित्तकत्वेनान्तरंगत्वाद्विभक्त्युत्पत्तेः पूर्वमेवेति एतद्विषये द्वन्द्वप्राप्तिरेव नेति बोध्यं ननु तत्रैव सिद्धे किं व्यर्थं —— यथा अक्षाः भज्यन्तां भुज्य एम:
न्तां दीव्यन्तामित्यत्राक्षा इति कारकस्य सकृदुपादानेपि सर्वत्रान्वयः तत्र कारणं तु शब्दानां —— तुल्यरूपता एवमक्षा भज्यन्तां भुज्यन्तां दीव्यन्तामित्यत्रापि। तत्र ॥ ३४

द्विधा शक्तिं तत्र मर्थे तं त्रं च शब्दस्य पर्यायपरिवृत्त्यसहत्वं आद्यं यथा अक्षा इत्यादौ तत्सहत्वे त्वं यथा पटा इत्यादौ तत्राक्षा भज्यंतां भुज्यंतामित्यादावन्वयिपदार्थभेदा
र्थभेदाद्वोद्धुरन्यस्यैव बोध उच्चारणं तु तंत्रेण अन्वयिपदार्थस्यैकत्वे तु एकोपस्थित्यैवान्वयो यथा अक्षा अश्वपटाऽन्यश्वेत्यादाविति चेत्सत्यं सरूपाणामेकशेषए
वेति विधिर्माथेत्वात्फलं तु प्रत्यर्थं शब्दनिवेशस्यापि दर्शनेन कदाचित्तादृशप्रयोगप्राप्तद्वंद्वस्य निवृत्तिः स चायं नियमो विभक्तौ यानि सरूपाण्येवं तद्विषयः सहविवक्षा
विषयश्च अत एव विभक्त्यंतानामेकशेष इति पक्षे द्वंद्वप्रतिषेधो वक्तव्य इत्याशंक्यानवकाश एकशेषो द्वंद्वं बाधिष्यते इति भाष्ये उक्तं किं चासहविवक्षायामपि
तत्प्रवृत्तौ सहविवक्षायां द्वंद्वस्येवान्यत्र कर्मधारयस्यापि बाधापत्तौ सारवसारवौ मिंज इत्यादि प्रयोगविरोधापत्तिः असहविवक्षाविषयेण विभक्त्यंतं तंत्रेण ब्राह्म
णाभ्यां कृतेदद्विपयोजरयतीत्यादिनीलोत्पलस्पर्द्धिनौ नेत्रे तनु वो हरेरिति वाद्विद्वन्मानसहंसेति वच्चेष्टमेवेति बोध्यं न चासहविवक्षायां तत्र सत्त्वे इदितइतिगु
णे निर्देशो व्यर्थः अन्यपदार्थावगतये तत्सत्त्वात् द्व्यचस्य धातोरिति करणे तु गौरवं एतच्च सूत्रं भाष्ये प्रत्याख्यातं अर्थावबोधप्रतिपदय्योनर्थान्त्रतिचयत्तदपि प्र
त्यर्थमेवेत्याशयेन अनेकघटादिपदानां साहित्ये प्रवृत्तिरेव नानभिधानात् एकस्यैव त्वनेकार्थस्य तत्र वृत्तिरभिधानस्वाभाव्यादिति तदाशयः द्विवचने चो
त्यादावेकशेषशब्दस्तु भाष्ये तंत्रपरः स चोच्चारयितुर्वादृत्वात् त्तिरेवेति बोध्यं एकविभक्तावित्यत्रैकपदं तु स्पष्टार्थं एकस्यामपि विभक्तौ यानि विरूपाणि ने
त्यर्थे बोधयितुं ध्वनितं चेदं विभक्तिसारूप्ये उपलक्षणमिति भाष्ये एकपदानुच्चारणेन समाहारद्वंद्वविषये तु नैकशेषः एकवच्चास्यान्यतरस्यामित्यनेनैकशे
षविषयप्रदानां समाहारे वृत्त्यभावबोधनात् न ब्राह्मणं हन्यादित्यादौ तु जातिपक्षेणैव निर्वाहः अत एव तत्र व्यक्तिपक्षे यं कंचिद्ब्राह्मणं महत्वात्कातोस्यादि
तिदूषणं भाष्ये उक्तं एकशेषशब्दार्थश्चेतरनिवृत्तिपूर्वकमवस्थानं तदाह एक एवेति एकेति लुप्तविभक्त्यंतं पृथक्पदं अत एव तत्र सरूपाणामित्यस्यान्वय
न्नावस्थानस्य सिद्धत्वं यानिवृत्तिरेव विधेया तत्र शिष्यमाणं लुप्यमानार्थाभिधायीति न्यायेन श्रूयमाणपदवृत्त्या बोधः धातुषु तु नास्य प्रवृत्तिः एकनिष्ठाने
कव्यापाराणामिवानेकनिष्ठानामपि एकधातुत एव निवृत्तभेदानां प्रतीत्यानेकधातुप्रयोगाप्रसक्तेः सरूपाणां किं घटपटौ शेष इत्येतन्मात्रोक्तौ हि बहूनामपि शेषः
प्रसज्येत एक इत्येतावदुक्तौ त्वेकत्वादेश इत्यर्थः स्यात् यथा वाश्व श्वा श्व श्वेत्यादौ कदाचित्त्वुदात्तवत्व —— दाचश्चानुदात्तवत्त्वरूपे साम्यमादाये भयस्व

त॰ बो॰
शे॰ सु॰
३५

पितकादेशं प्रसज्येत नचाप्तस्यादेवनस्येतिफिट्सूत्रेणा शकटाक्षे आद्युदात्तस्यदेवनाक्षेफिषइत्यंतोदात्तस्यैकशेषेकदाचिदंतोदात्तस्यापिश्रवः स्यादितिवाच्यं स्वर
भिन्नानांप्रसक्तरस्वरविधिरितिवचनेनैवनिर्वाहात् एकादिदशांतसंख्यावाचिनामेकशेषद्वंद्वावनभिधानान्नभवतः विंशत्यादौ लिंगएवैकशेषइत्यलं चुटू
आदिर्ञिटुडवइत्यत आदिरितिषः प्रत्ययस्येत्यतः प्रत्ययस्येतिचानुवर्तेते तदाह प्रत्ययाद्याविति तेनवाचाटेनेत्वं प्रत्ययेतिकिं चामरादावित्वंमाभूदि।
ति चुंचुंपुचुणायोर्योदित्वात्परनिमित्तयलोपस्यवहिरंगासिद्धत्वात्प्रत्ययादित्वाभावान्नेत्वं नविभक्तौ हलंत्यमित्यस्यनिषेधोयं अनित्यमिदंयमोमर्का
रपरित्राणाद्यर्थत्वादित्करणात्तेनकिमोतद्केतिसिद्धंप्राग्दिशीयत्वादयंविभक्तिः अतएवक्वाना मोमस्यनेत्वमितिनव्याः भाष्येतुप्राग्दिशीयेष्वसाप्रष्टतावुदित्वंज्ञापकमि
त्युक्त्वादनीवेति सूत्रेलोपेव्योरितिलोपिनयकारप्रश्लिष्टेत्संज्ञावारिता अन्यत्रानित्यत्वस्यफलाभावाच्चैवमे— वोक्तंलोपस्यासिद्धत्वाच्चानांनत्वमितिवाध्यंविभक्तौपि
मचोयत् अतेगुणे उस्यपदांतादित्यंतोपदांतादितिएङिपररूपमित्यतः पररूपमितिचानुवर्तते पुरस्तादिति अतएवनादित्वौतोजग्रहणंचरितार्थंतद्धिरमाः रमा
नित्यादौदीर्घनिषेधाभावायपररूपेणपूर्वसवर्णदीर्घवाधिहितैयर्थ्येस्यष्टमेवनोत्तराणिति— अनंतरापेक्षयोत्तरएनव्यवहितानित्यर्थः एकवचनंसंबुद्धिरित्युचितंसंबोधनेचे
त्यतःसंबोधनइत्यनुवृत्तेः सप्तमीबहुवचनेनदोषः संबुद्धावंगस्यगुणाइतिव्यवहारएनंतदंतस्यसंज्ञा तस्मात्पारायणादावदृष्टीर्थमेवंन्यासइतिवाध्यं संबुद्ध्याक्षिप्तस्ये।
ति संबुद्धेश्चयत्वेनयस्मात्सविहितस्तदादीत्यंशोपस्थितिः सचात्रयोग्यतयापंचम्यंतइतिभावः प्रत्ययेगृह्यमाणेयस्मात्सविहितस्तदादिस्तत्याद्युपतिष्ठतइतिप्रत्ययग्रहणेयस्मात्
विहितइत्यादिपरिभाषार्थइत्यंगस्येतिसूत्रेभाष्येस्पष्टं अनुमानरूपाक्षेपसमुनात्रफलाभावात् पथापीनत्व नपपत्यानुमीपमानरात्रिभोजनस्यपीनत्वोपपत्तिःफ
लनतथाएनतत्सूत्रेनदनुमानेनसंबुध्युपपत्तिर्भवति किंचप्रत्ययस्योत्पत्तावंगापेक्षत्वेपिज्ञानेतंग्रहसापेक्षत्वाभावेनशाब्देनदाक्षेपमानाभावः अतएवांगस्येतिसूत्रेता
त्स्यादिभूत्स्यइत्यधिकारःकार्यइतिपक्षेप्राकरणेदित्यादौउपसर्गात्पूर्वमडादिः स्यादित्याशंक्यप्रत्ययग्रहणेयस्मात्सविहितस्तदादेरितिपरिभाषापस्थित्यासमा।
हितंभाष्येनत्वंगाक्षेपेणेतिदिक् अंगस्य उक्तार्थस्यहल्ङ्याविति सूत्राद्धलित्यनुवर्ततेहेकतरदिति प्रकृतमकारस्यटिलोपेनापहारादितिभावः नन्वंगात्परस्याः राम
संबुद्धेरवयवस्यहलोलोपइत्युचितंसंबुद्ध्याक्षिप्तस्यसंबुध्येवान्वयस्याचितत्वादतआह कुलेनीति अत्रपरत्वात्पूर्वरूपेउभयतआश्रयणेनादिवद्भावाभावात्त ३५

कारेऽपि ह्रस्वसंबुद्ध्योः पौर्वापर्यव्यवहारासंभवान्नाद्दूष्यानतिदेशाच्च ह्रस्वान्तांगात्परसंबुद्धेरभावान्मलोपो न स्यादेवं च लक्ष्यानुरोधादन्यास्मिन्न स्थाप्यन्यत्रान्वय इति भावः एतद
र्थमेव हल्लुप्यते संबुद्धेश्चेदिति व्याख्यातमस्य सम्बुद्धित्वाभावादर्द्धे विकारेणैकदेशविकृतन्यायेनापि न संबुद्धित्वं एकवचनसंज्ञा संबुद्धिसंज्ञयोः रूपपरिमाणनिष्ठतया तयो
स्तन्मयोर्मेलालाभाच्च मकारस्यादेशाभावाच्च नात्र स्थानिवद्भावः अत एव राममित्यादौ सुपि चेति दीर्घो नेन च संबुद्धित्वस्य सकारमात्रनिष्ठत्वेन स्थानिभूतास्धर्मत्वे नामः संबु
द्धित्वाभावे कथमस्य संबुद्धव्ययवत्त्वमिति वाच्यं सुसंज्ञाया उकारविशिष्टसत्वेन तद्रूपस्याप्युपजायमानैकवचनसंज्ञाया विशिष्टसत्वेन संबुद्धिसंज्ञायामित्संज्ञोकारविशिष्टस्ये
वोद्देश्यत्वेन तस्य चलविधित्वात् एतेनादड्डादेशेनैव नपुंसकत्वाभिव्यक्तौ कुलेति व्यर्थमित्यपास्तं एङ्ग्रहणं किमिति हे रविश्नो इत्यादावंगाधिकारस्थात्परनिमित्तापेक्षा
च्च गुणात्पूर्वं ह्रस्वान्तत्वादेव सिद्धिः सेप्रभृतीनां संबोधने प्रयोगसत्वे एङ्ग्रहणेनैव सिद्धे प्रत्याहारग्रहणं व्यर्थमिति प्रश्नः हरे इति सामर्थ्यादेवात्र संनिपातपरिभाषानगुणा
त्संबुद्धेरिति वक्तव्ये एङ्ग्रहणसामर्थ्याच्च अत एव हे लस्मि इत्यादौ लोपसिद्धिः परत्वादिति अभ्युच्चयः नित्यत्वाच्चेति चेनानवकाशत्वसंग्रहः नपुंसकेत्रपोइत्यादावस्यापि
लुका बाध इत्यन्यत् अमिपूर्वः पूर्वसवर्णो इत्यत्र तत्त्वेऽप्यसिद्धे पूर्वग्रहणान्तरममित्यादौ द्विमात्रत्ववारणाय लशक्व समाहारद्वंद्वः अतद्धिते किं कर्णललाटात्कन्नलंकारे
कर्णिका कित्त्वफलं त्वादिवृद्धिः स्यात् आदिग्रहणं ह्वाङ्घाकंनो न तस्य कित्त्वे गुणो न स्यात् तस्माच्छ पुंसीति पंचम्यर्थे सप्तमी पुंसो विहितस्येत्यर्थः तत्र विद्यमानादि
हितस्येत्यर्थो वा तस्मादिति किं एतान्गाः पश्य पुंसि किम् तीः अङ्कुबाधितुमिति तेन पर्याणद्धमित्यत्रोपसर्गादसमासेऽपीति णत्वसिद्धिरिति भावः अयोगवाहानामिति न
विद्यन्ते योगोऽक्षरसमाम्नाये येषां ते अयोगाः अनुपदिष्टत्वादुपदिष्टैरगृहीतत्वाच्चेत्यर्थः ते च ते वाहयंति प्रयोगं निर्वाहयंतीति ते वाहाः ते चानुस्वारविसर्गजिह्वामूलीयोपध्मानी
ययमाः अत एवोरःकेणेत्यादौ विसर्गव्यवधानेऽपि णत्वसिद्धिः तदुक्तं भाष्येनार्थोनुम्ग्रहणेनानुस्वारभूतेनाड्व्यवायेत्येव सिद्धमिति आदर्शेनेत्यादौ तु नातिप्रसंगः अडिति
त्रिसंव्यवायात् तस्मादित्युपस्थितं निर्दिष्टग्रहणमेतत्समभिव्याहारेऽड्डादि व्यवहितातिरिक्तपरं तदुक्तं णत्वेऽन्यप्रतिषेधो वक्तव्यो नवान्येन व्यवहितत्वादिति
थन एतस्वार्मम्व्यवायसत्वात्प्राप्नोत्येव अटैकव्यवाय इत्यर्था दित्यादि भाष्यमेकदेशिनो हक्तिप्रत्युक्तिपरं चुटुतुलशर्व्यवायेनेति प्रतियोगिज्ञानसापेक्षनिषेधवो
क्यात् न्यासेन सिद्धेऽट्कुप्वाङ्नुमित्यपाणिनेरेकव्यवाय इत्यर्थवदन्ति तस्यास्तदुक्तित्वध्वननात् एतद्वार्तिकमतं भाष्ये तु रषाभ्यामिति सूत्रे ऋवर्णान्नस्येत्यस्य प्रत्या

प·शे·
ए कु
३६

व्यवायेऽपीतियोगविभज्याट्कुप्वा इ·नुम्भिरित्येतदेतौरेवाक्षरसमाम्नायिकैर्व्यवायेनान्यैरित्यर्थकं व्याख्या तं तदात्वादर्शनेत्यादौ प्राप्तिरेवनेतिवोध्यं णत्वे णकारइत्यर्थः पू
र्वांतस्य नभाभूपूइतिसूत्रान्नानुवर्त्तते अत्रसूत्रे अनंतरस्येत्यादिव्यवस्थापकन्यायानामप्रवृत्तिर्वोध्या अपदांतस्येत्यनुवर्त्यैतस्य भाष्ये प्रत्याख्यानात् यस्मात्प्र
त्ययः यस्मादिति तदादीनितच्छब्दाकांक्षापूरणाय तदादीति तत्रकृतिरूपमादिर्यस्येत्यर्थः प्रत्यासत्तिन्यायलभ्यार्थमाह तस्मिन्प्रत्ययइति गुणःकृतात्मसंस्का
रइति भाष्ये नात्रापितस्मिन्निति परिभाषाप्रवृत्तिः प्रकृतिमात्रस्यतुव्यपदेशिवद्भावेनतदादित्वंबोध्यं स्त्रीइयतीति इदम्शब्दाद्वतुपिवस्सकिमिदंभ्यांवोघइति घादे
शेतस्येयोरिशइदंकिमोरितीशियस्येतिलोपेङीपि इयतीतिरूपं नचतत्रपरत्वात्स्त्रीशब्दस्येयङाद्यापत्तिःरूपादोषोनयस्येति लोपस्याभीयत्वादसिद्धत्वेनात्र तदप्राप्ते
रितिवाच्यं व्याश्रयेनाभीयासिद्धत्वाप्राप्तेः तत्रहिसमानाश्रयत्वमसिद्धत्वाश्रयशास्त्रसंबंधिनिमित्तसमुदायान्यूनानतिरिक्ताश्रयकत्वं अस्तिचयस्येतिलोपा
पेक्षयास्त्रियाइतिसूत्रेधिकस्यस्त्रीशब्दस्यापेक्षामत्यासत्याजादिप्रत्ययनिरूपितांगएवेयङःप्रवृत्त्यास्त्रीशब्दस्यतुनिरूपितांगत्वेपिनदोषः विधिग्रहणादेवभन
क्तीत्यादावतोदीर्घोयञीतिननतदादिग्रहणंकरोमीत्यादेविकरणस्यगुणार्थं प्रत्ययविशिष्टस्येति नचासतिअंगेनप्रत्ययपरत्वलाभानापत्तेर्व्रश्चेत्यस्यासिद्धिः किंच
राजपुरुषइत्यादेनलुमतेतिनिषेधात्पूर्वपदेपदत्वाभावेननलोपानापत्तिरितिभावः ततोप्यधिकस्यवेति देवदत्तओदनमपाक्षीदित्यादेदेवदत्तादिशब्दोत्तरसुपनिमि
त्तीकृत्यलङ्पर्यंतमगत्वात्तस्यलुङ्परत्वेनदेवात्पूर्वमडापत्तिः अंगसंज्ञायाःप्रत्ययनिमित्तत्वाभावेनलुङादिनिरूपितांगस्येत्यर्थस्यदुर्लभत्वादितिभावः टाङसि
ङसामिनात्स्याः अतोभिसऐस् इत्यतोनुवृत्तेनात इत्यनेनपंचम्यंतेनसामानाधिकरण्यानुरोधात्पंचम्याविपरिणामइत्याह अकारांतादिति अकारात्परेषामंगसंज्ञानिमित्त
टादीनामित्यर्थइतिपक्षांतरंभाष्ये किंचादंतादित्यर्थेपिब्राह्मणभिस्सेत्यादावतिप्रसंगः ब्राह्मणेत्यस्यापि युवोरनाकावितिसूत्रभाष्योक्तरीत्यांतर्वर्तिविभक्त्यांगत्वा
त् अर्थवत्परिभाषयाप्रत्ययग्रहणपरिभाषयावाप्रत्ययस्यैवभिसोग्रहणेत्वेषामंगाधिकारेपाठोव्यर्थः भिसःप्रत्ययस्यैवग्रहणेहिप्रत्यासत्त्यातन्निरूपितांगस्यग्रह
णमितियुज्यतेवक्तुं नान्यथा इदमेवहि अतोभिसइत्यत्रांगाधिकारस्यप्रयोजनंभाष्येदत्तमित्यलं सुपिच अतोदीर्घोयञीति अनुवर्त्ततेयञीत्यनेनात्विधित्वा राम·
न्तदादिविधिरित्याह यञादाविति ङेर्यः चतुर्थ्येकवचनस्यैवग्रहणंव्याख्यानादित्याह ङेइत्येतस्येति संनिपाततेति उपजीव्यविरोधन्यायमूलेयासंनिपातःसश्लेषः ३६

तन्निमित्तकोयोविधिसतंसंनिपातंयोविहंतिसतद्विघातस्तस्यानिमित्तमित्यर्थः नच यञादित्वसापेक्षदीर्घस्यबहिरंगतयासिद्धत्वान्नात्रसंनिपातविघातइतिवाच्यं आपे
पितासिद्धत्वेपिवस्तुतस्तद्विघातस्यजायमानत्वेनतत्प्रवृत्तेः किंचांतरंगेकर्तव्येबहिरंगस्यासिद्धत्वेपितत्रकृतेऽसिद्धत्वेमानाभावः किंचातिदेशिकसंनिपातविघाता
भावेप्याश्रयेतदप्रवृत्तौगौरीत्यादौसंबुद्धिलोपेपिस्थानिवत्त्वेनह्रस्वनिमित्तविघाताभावात्तत्रैतस्याअतिव्याप्तिपरभाष्यासंगतिः संनिपातस्याशास्त्रीयत्वान्नात्र।
स्थानिवत्त्वमिति चेत्तत्रासिद्धत्वमपिकथमितिवद। कार्यस्यनिमित्तंययोःसंनिपातःस्तयोःसूत्रेउपादानमितितुनाग्रहः अतएवदासिरित्यत्राकारांतप्रकृतौसंनिपा
तनिमित्तांगसंज्ञानयापरिभाषयाल्लोपस्यनिमित्तेनस्यादित्याशंक्यानित्यत्वेनसमाहितंभाष्ये कृन्मेजंतइतिसूत्रेनह्यंगसंज्ञायामदंतस्यांगसंज्ञेत्युक्तमस्तिनचकष्टा।
येत्यस्याकृत्सार्वेतिदीर्घेणोपपत्तेरनित्यताज्ञापकंकथमितिवाच्यंतस्यापिसंनिपातपरिभाषयाऽप्राप्तेःविरोधाभावात्फलेविशेषाभावाच्चपरत्वेप्यकृदितिनोप
न्यस्तं तस्याकृदित्यादिपर्युदासेनासुप्येवप्रवृत्तिरित्यन्ये झलिकिमिति उतोवृद्धिरित्यतोहलित्येवानुवर्त्यसंनिपातपरिभाषयारामाणामित्यत्रनदोषइतिप्रश्नः।
झल्ग्रहणमेत्वेसंनिपातपरिभाषायाअप्रवृत्तिज्ञापनार्थं तेनसर्वेषामित्यादावेत्वसिद्धिरित्युत्तरं एतेनबहुवचनेकिंरामस्येतिव्याख्यातं रामाभ्यामित्यपिप्रत्यु
दाहरणंबोध्यं बहुवचनेझल्येतितुनसूत्रितंज्ञानयोरित्यादौनुमापत्तेःजश्त्वमिति बाधित्वेतिशेषः अवसानेच त्वेस्यपदांतजश्त्वापवादत्वात् द्वित्वेरूपेति
पूर्वत्रासिद्धमद्वित्वेइतिन्यायाच्चर्त्वेजरौद्वित्वेबोध्यं नादेशइति अन्यथास्वरितेतिचर्त्वेनसिद्धाविदंव्यर्थंस्यादितिभावः ह्रस्वन ह्रस्वनद्यापइतिपंचमी आमिस
वेनाम्रइत्यतआमीतिवर्तते तच्चषष्ठ्याविपरिणम्यतेनामीतिलिंगादित्यतआह ह्रस्वांतादित्यादि आमत्रषष्ठीबहुवचनमेवनतुङेरामादीतिस्पष्टंभाष्ये यत्तु
नुडितिविभज्यसामान्येनतुड्विधेयः नद्यापइतिदीर्घोताच्चेन्नद्यापएवेतिनियमार्थमिति दीर्घेषुनदोषः हलंताच्चेत्सट्चतुर्भ्यएवेतिनियमइति हलंतेषुनदोषः एवं
चर्ह्रस्वग्रहणंनकार्यमिति तन्न नद्यापइत्यस्यस्त्रीलिंगानांचेन्नद्यापएवेतिनियमपरतयापिव्याख्यातुंशक्यत्वेननदीत्वापूत्वयोर्ह्रस्वेपिदृष्टत्वेनतद्व्युत्क्रमनिय
मेदृष्टांतस्यानाभावेनचमतीनामित्यादौनुडनापत्तेः नामि इतिलोपइत्यतोदीर्घइत्यनुवर्तने अंगस्येतिकिं चर्मणां नन्वामीत्येवास्तुनित्यत्वात्पूर्वंदीर्घेपिकृते
तान्नुडित्येततसामर्थ्याद्भूतपूर्वह्रस्वांततमादायनुट्सिद्धेः नचनृचेतिदीर्घविकल्पान्नृणामित्यत्रनुट्चरितार्थःनृनद्यापइत्येवसिद्धेः तदुक्तंभाष्येनैकमुदाहरणयोगार

ल·श·
शे·मु·
३७

मंत्रयोजयतीतितिसृणामितिषट्चतुर्भ्यइत्यत्रत्रेरित्यनुवृत्त्यासिद्धमितिभाष्येस्पष्टं एतेनक्रान्नघापइतिन्यासेभाष्यतात्पर्यमित्यपास्तं चतसृणांप्रियचतसृणामित्यत्रषट्चतु
र्भ्यइतिसिद्धं गोरोमतदभक्तौतुनमानं बहुवचनंतुलाघवार्थंद्विवचनेहिचतुर्भ्यामितिगुरुनिर्देशःस्यात्नैकमुदाहरणमितिभाष्यविरोधश्चसमाहारद्वंद्वेननिर्देशेकार्यंबहु
वचननिर्देशस्तदर्थमितितुनयुक्तं स्थिदधितिसृभ्योजसइत्यादौव्यभिचारात् नृचांमाधिकारेपंचम्यायद्युच्यतेवक्ष्यमाणविभक्तेस्तद्भवतीतिसर्वादिसूत्रभाष्याद्वक्ष्यमाणाद्वि
हितविभक्तेरित्यर्थकादस्यनुदोगोरोःप्रवृत्तिः षड्भ्यइत्यत्रापिविहितविशेषणमेवेत्याशयेनपरमपंचेत्यादौलुगभावमाशंक्यषट्प्रधानएवसमासइत्युक्तं समासस्यषट्प्रधा
नत्वेनसंख्याप्रकारकसंख्येयबोधजनकत्वेनषट्त्वसत्वान्नदोषइतितदर्थः स्मांतेत्यत्रलोकेगणनायांप्रसिद्धानामेवग्रहणमित्यत्रनमानंप्रकृतेपितथैवषड्भ्यइत्यादौपं
चम्याविरुद्धविभक्तित्वादंगस्येत्यनेनसंबंधायोग्यत्वाद्विहितेत्यध्याहारेणप्रत्ययविशेषणतैवेतिभाष्योक्तेरितिगौणेनुटोऽप्रवृत्तिरितिवाच्यंनामीतिसूत्रस्योक्तभाष्यप्रामाण्या
न्नुड्विधायकेविहितपदानध्याहारेणषडादिभ्यःपरस्यागसंज्ञानिमित्तस्यामोनुडित्यर्थेनगौणेपिप्रवृत्तेः अतोभिसइत्यादावंगस्येत्यस्यैवमन्वयस्येवांगसंज्ञासूत्रेभाष्यउक्त
त्वात् अतएवपरमचतुर्णामित्यादौनुट् यद्यप्येवंषड्भ्योलुगुत्तरादिभ्यइत्येतयोरपिवक्तुंशक्यंतथापिलक्ष्यानुसारात्तत्रतत्रविहितविशेषणं विरुद्धविभक्तित्वादितिभाष्या
नासक्तिस्त्वेकदेशिनइतिबोध्यं अद्गुत्तरादिभ्यःषड्भ्योलुगितिअनयोरेवसर्वादिसंज्ञासूत्रेभाष्येउपन्यासाच्चषड्भ्यइत्यादेःषडर्थगतसंख्याभिधायिजश्शसोरित्यादिक्रमेणा
र्थइतिकैयटोक्तंतुअद्गुत्तरादिभ्यइतिसूत्रेभाष्यविरोधादिभिर्दूषयिष्यते नचपदादतामित्यादावतिप्रसंगह्रस्वत्वंनाममात्राकालिकावृत्त्वंतत्रसामर्थ्याद्विशेषणभूतमात्राकालि
कत्वांशेभूतपूर्वगत्याश्रयणंनतुविशेष्यभूता च्वांशेपीत्यदोषादितिचेन्न नोपधायाइत्युत्तरार्थत्वात् तेनचमणामितिदीर्घाभावःसिद्धइतिदिक् परिभाषाविरोधादित्ति
सर्वत्रानित्यत्वाश्रयणेमानाभाव इतिभावःकृताकृतप्रसंगित्वान्नामीतिनित्यंनचविशेषाभावेनफलाभावान्नकृतेतत्प्राप्तिरितिवाच्यं विशेषाभावेपिपर्जन्यन्यायेनशा
स्त्रप्रवृत्तेरंकोक्तस्तितिसूत्रेभाष्येउक्तत्वात् आयादयइतिसूत्रेभाष्येस्यादिभिःपरत्वादायादिबाधमाशंक्यानवकाशत्वादायादयः नचगोपायतीत्यादिरवकाशः अत्रा
पिशपःस्यादेःप्राप्तेःनचनास्तिविशेषःअन्यदिदमुच्यतेनास्तिविशेषइतियदुक्तंआयादीनांस्यादिभिरप्राप्तावकाशइतिसनास्त्यवकाशइतिभाष्योक्तेश्चेत्यपिबोध्यंआ एम·
रंभेतियत्तुकर्तोनामित्यत्रषट्चतुर्भ्यइतिनुट्सिंनिपातपरिभाषायाअप्राप्तेःसावकाशत्वमस्त्येवेतितन्ननह्येकमित्युक्तन्यायेनकर्तेनामीत्येवसिद्धेसामान्यस्त्रारंभेत्यर्था ३·

न् स्वं चनतिसच्चतस्मित्यकरणेन लाघवमितिभावः नुटीतितुनोक्तं उणादीनां व्युत्पन्नत्वपक्षे भङ्गः किन्तु ड्वेतिनिष्पन्नभंगशब्दे दीर्घापत्तेः इदमेव व्युत्पत्तिपक्षे ज्ञापकमिति
दिक् अपदांतस्य षड्त्येव सिद्धे मूर्द्धन्यग्रहणमिणः षीध्वमित्यत्र ढत्वविधानार्थं रषाभ्यामित्यत्रानुवृत्त्यर्थं च स्वं च तत्र णग्रहणं पदांतस्येति च न कर्त्तव्यमिति भाष्यस्पष्टं इण्कोः
वर्गव्यवहितं णु च र्त्वस्यासिद्धत्वात्तस्मिन्नित्याद्यर्थे आदेश प्रत्ययशब्दस्तद वयवपरो व्याख्यानात् सातिः षत्वनिषेधात्त्रिंगाच्च तदाह प्रत्ययावयवेत्यादि विहिताघोषस्येति विहतत्व
रूपाभ्यंतरप्रयत्नवतोऽघोषरूपबाह्यप्रयत्नवतश्चेत्यर्थः ठकारोच्चारणाद्यं कारोच्चारणाय द्वितीयं णमस्येति टाङसीतिसूत्रे सकारोच्चारणं त्विण्कोरित्यनुवृत्त्या वेदतात्पर्यग्रा
हकमिति भावः सर्वादीनि तद्गुणसंविज्ञानो बहुव्रीहिः आदिशब्दोऽवयववाची तेन सर्वशब्दघटितउद्भूतावयवभेदः समूहः समासार्थ इति बहुवचनं उद्भूतावयवभेदइत्य
स्यारोपितावयवगतसंख्यं इत्यर्थः तत्रैवेयर्थ्याद प्रवृत्तावपि अवयवेषु प्रवर्तमानाः विशेषात्सर्वशब्देपि भवति सर्वनामानीत्यत्र पूर्वपदादिति णत्वं अतएव निपातना
न्न नाप्राप्तेणत्वे कृतस्य निपातनस्य तद्बाधकत्वाण्णत्वसहितमसाधुइतिस्पष्टं भाष्ये प्रयोजनं सर्वनामाव्ययसंज्ञायामिति वार्तिकाच्छब्दरूपं विशेष्यमादाय ज्ञापकात्तदंतविधि
रित्याह ह्रूहृचेनोति प्रथमार्थे सप्तमी द्वंद्वः सर्वनामसंज्ञायामिति तदर्थः नहि तदंतविधिं विना समुदाये संज्ञाप्रवृत्तिरस्ति यानिषिध्येतेति भावः ननु तदंतस्यापि सर्वनामत्वे सर्वं
नाम्नः स्मै इत्यादिषु सर्वनाम्नो विहितस्य ङे स्मै इत्यर्थाश्रयणे नाति सर्वादौ दोषाभावाद् उपसर्जनप्रतिषेधो न कार्य इति भाष्ये सूचितं विरुध्येतेति चेन्न प्रयोजनं सर्वनामाव्यय
संज्ञायामिति तदंतविधि सूत्रस्य वार्त्तिकभाष्यविरोधेनास्य भाष्यस्यैकदेश्युक्तित्वात् इतरथा रुचे भाष्यपक्षांतरोपादाने न च अकच्छ्रुक्त पक्षेषु नारुचिरिति भ्रमितव्यं वृद्दिसं
ज्ञासूत्रेऽपरितुष्यन्नखल्वपि भवान्नाकृतिलिंगेनवेत्याहेति वार्त्तिककारं प्रति भाष्योक्तेः अकच्चेति कुत्सित इति सूत्रोक्तभाष्यरीत्या संख्याकारकाभ्यां पूर्णार्थस्येत रा
न्वयेर्थे सुबंतादेव तद्धितोत्पत्तेः प्रत्यासत्त्या सर्वनामप्रकृति . कसुबंतात्तदर्थगत कुत्साविवक्षायां सर्वनामावयवटेः प्रागकजित्यर्थात्तदंतसंज्ञाभावेन तदसिद्धिरिति भा
वः एकमेवात्रत्वाच्चसिद्धिर्बोध्या एजेनावयवनिष्ठसर्वनामत्वेन तत्सिद्धिरित्यपास्तं जसः शीदीर्घोच्चारणमुत्तरार्थं वारिणीति अदंतादिति परस्येत्यनेनान्वेति अतइत्यस्यां
गविशेषणतयाऽदंतादंगादित्यर्थः सर्वनाम्न इति तु विहितविशेषणं तस्य तु नांगं विशेष्यमास्तौमानाभावात् तेन वर्णाश्च मेतराः समासपूर्वाइत्यत्र न अतएव विभाषाजे
सीति चरितार्थे अंगसंज्ञानिमित्तस्यादंतात्सर्वनाम्नो विहितस्येत्यर्थस्तु न तेषामित्याद्यसिद्धेः अत्वविधौ विषयसप्तमीति तु न तस्मिन्निति परिभाषाबाधे मानाभावात्

स्वशे॰ प्रागितसंज्ञायाइति प्रत्ययादित्वज्ञानाभावात्तज्ज्ञानाभावइतिभावः परेतु अनुबंधत्वयोग्यतयात्रापितन्निषेधप्रवृत्त्याशित्वादेवसर्वादेशः इत्संज्ञायोग्यशकारवत्त्वमेवतत्सूत्रे
शे॰सु शित्वं अतएवकाणोर्विषयेनानुबंधकृतमसारूप्यमितिविकल्पाभावः अन्यथाकादीनांकादेर्वाकर्वाधोत्तरप्रत्ययत्वज्ञानेइत्संज्ञादेः प्रवृत्त्यावाक्यार्थबोधरूपतत्प्रवृत्तिका
३८ लेऽनुबंधज्ञानाभावेनविकल्पोदुर्वारः पश्चादनुबंधज्ञानेपिजाततन्निवृत्त्ययोगात् यदितत्रपश्चात्तज्ज्ञानेतन्निवृत्तिस्तर्ह्यत्रापिपश्चात्तज्ज्ञानेसर्वादेशत्वस्यापिनिवृत्त्यापत्तिः
ध्वनितंचैतद्लुटः प्रथमस्यानेकाल्शित्वादित्यादिसूत्रेषुइतिप्राहुः अतःसर्वनाम्नइति अदंतादंगात्परस्य सर्वनाम्नोविहितस्येत्यर्थः तेनमामपूर्वायेत्यत्रस्मैन ङसि
ङ्योःस्मात्स्मिनौ।हलंत्यमितिन नविभक्ताविति निषेधात् यद्यपिइत्वप्रवृत्तिकालेनविभ क्तत्वज्ञानंतथापिविभक्तावित्यस्यविभक्तित्वयोग्येइत्यर्थान्नदोषः अ
नएवनविभक्ताविति सूत्रेतुग्रहणंचरितार्थं आमिस आज्जसेरसुगित्यतआदित्यनुवर्त्तते पंचत्रिंशदिति तेनसर्वार्थप्रतिपादकत्वेपिकृत्स्नसकलादिशब्दानांनेति।
भावः सर्वविश्वौवुद्धिस्थानेकसंख्याकावयवात्मसमुदायेशक्तौतस्यसमुदायस्यानुद्भूतावयवभेदत्वेएकवचनंयथासर्वोलोकइतितादृक्समुदायद्वयादिविवक्षा
यांद्विवचनादिसर्वौव्यूहौसर्वेव्यूहाइति यदात्पुद्भूतावयव भेदसमुदायविवक्षातदापिवहुवचनंसर्वेघटाइति पूर्वापरावर व्यवस्थासंज्ञावर्त्तिनएवेमेसर्वादयइत्यर्थः
एवमुत्तरसूत्रद्वयेपि नित्यंद्विवचनांताइति द्विवचनांतएवेत्यर्थः अकजर्थइति ननुकाकचोःकोविशेषःप्रत्ययस्वरचित्स्वराभ्यामंतोदात्तत्वस्यैवसत्वात् नच
सुवंतात्तद्धितोत्पत्त्याचित्वप्रयुक्तमंतोदात्तत्वमुभकाभ्यामित्यादौसुवंतस्यकेतुप्रकृतेरितिविशेषइतिवाच्यं तद्धितविधौप्रातिपदिकादित्यधिकारेणप्राति पदि
कस्यैवप्रकृतित्वात् स्वजायमानोत्याद्यात्सुवंतात्परइत्यन्यत् युष्मदस्मद्विषयेतुवचनात्सुवंतस्यैवप्रकृतित्वंतस्येवटेःप्रागकजितिबोध्यं नचाकचितन्मध्य
पतितन्यायेनतस्याभग्रहणेनग्रहणेउभकावयवोयस्येत्यर्थेउभकशब्दादय च्युभकयइतिरूपंकेतुनेतिविशेषः कश्चेदानीकाकचोर्विशेषइतिभाष्यप्रामाण्येन
तेषामकजभिधानादितिशंकते नचेति द्विवचनपरत्वाभावेनेति अकचितन्मध्यपतितन्यायेनोभशब्दस्यद्विवचनपरत्वेकेतुतेनतस्यव्यवधानान्नतत्वमित्यर्थः
उभादुदात्तइतिसूत्रेभाष्यकृताअयचः प्रत्ययांतरत्वेन व्याख्यानात्महाविभाषासंबंधस्यावश्यकत्वेननित्यग्रहणमयोग्यसत्योगविभागेनोभशब्दाद्वृत्तिवि एम॰
षयेऽयंतस्वार्थिकायज्विधानार्थंअयंचतद्विषयेसुवुत्पत्तेःपूर्वमेवस्वार्थिकत्वेनांतरंगत्वात् अतएवायं ज्विशिष्टस्योभयस्यसर्वनामत्वात्सर्वनामप्रकृति ३८

कसमभ्यामयंतत्वेनत्रलाद्युत्पत्तिः अत्रनित्यशब्दस्यवाच्यार्थविरोधान्महाविभाषापात्रसंबंधः अयमप्याद्युदात्तएवाद्युदात्तग्रहणानुवृत्तेः अयंचवार्तिकप्रामाण्यात्रोभश्च
ब्दस्योभयशब्दस्यवाद्विवचनविषयत्वाभावसंभावनातत्रैव अतएवोभयोर्वासइत्यादौशयवासेत्यलुकिनायचूतइध्वनयन्वार्त्तिकमाह उभयोन्यत्रेति द्विवचनपरत्वाभावेइति
नपरत्वविषयत्वाभावेइत्यर्थः उभयोमणिरित्यादौतुनलिद्भ्यासभ्योभयेषामितिनिर्देशेनयोगविभागस्येष्टसिध्यर्थत्वेनचतस्यक्वचिदप्रवृत्तेः अतोभयशब्देतेना
प्यचरूपावादेरेसादनभिधानमेववाअपविअकचतनवाच्यः उपजीव्यत्वेनकस्येवप्राप्तेः अपवादस्त्वन्यत्रचरितार्थः अत्रेदंचिंत्यंअकचविधावेवोभयग्रहणेन
सिद्धेसंज्ञाप्रणयनंकिमर्थंअनभिव्यक्तपदार्थकत्वात्संज्ञाव्यावृत्तिःसर्वनामसाहचर्याच्चअतएवोपसर्जनव्यावृत्तिरिति उभयोन्यत्रेतिवार्त्तिके तयपसमाद्रीर्थिकोप्ययचग्र
ह्यते उभयोमणिरुभयेदेवमनुष्याइतिभाष्यतदुदाहरणात्स्वार्थिकस्यचग्रहणं तदुपक्रमणावार्तिकप्रवृत्तेः एवंचावयवद्वयारब्धमणिद्वयविवक्षयोद्भूतावयवभे
दविवक्षयावाद्विवचनमस्त्यसाध्वेव एतन्मूलकमेवोभयस्यसर्वविभक्तित्वंतद्धितश्चेतिसूत्रेकैयटेनोक्तंतदाहकैयटइति हरदत्तइति अत्रारुचिवीजंतुप्रागुक्त
भाष्यविरोधः भाष्येतूभशब्दपाठःप्रत्याख्यातःकप्रत्ययस्याज्ञानाद्यर्थविशिष्टस्वार्थेविधानेनद्वित्वसंख्याप्रकारकसंख्येयविशेष्यकबोधविषयार्थानुवादकत्वरूपद्वि
वचनत्वेनवार्त्तिकेद्विवचनशब्देनतस्यापिग्रहणमुभशब्दग्रहणवत् अतएवोभयोरुभावुभौभावित्यादौनायचतदुक्तंभाष्येकेप्यंतरेणवचनंद्विवचनपरोभवि
ष्यतिकथंस्वार्थिकाःप्रत्ययाःप्रकृतितोविशिष्टाभवंतीतिप्रकृतिग्रहणेनस्वार्थिकानामपिग्रहणंभवतीति इतिहेतोःप्रकृतेःकादिप्रकृतेरुभशब्दस्यग्राहकेण
द्विवचनशब्देनस्वार्थिकस्यापिग्रहणमितितदर्थः जसिसौतुविभक्त्यंतस्यस्वार्थेविहितावितितत्कारकशक्तिप्रधानावेवेतिनतयोरुक्तद्विवचनत्वमिति ता
स्मात् उभयशब्दात्जसीति अवयवद्वयारब्धसमुदायबहुत्वविवक्षायामित्यर्थः अंतरंगत्वादिति सर्वार्थबोधकत्वरूपार्थस्योभयत्रापिनिमित्तत्वेननतत्कृत
नित्यसंज्ञायाबहिरंगत्वं अतएव संज्ञोपसर्जनप्रथमादिशब्देनविकल्पः अर्थकृतबहिरंगत्वस्यानाश्रयणाच्चेतिभावः इदमर्वाचानुसारेणपरत्वस्यपक्षेःभावबोध
कतयानिषेधाच्चवलीयांसइत्यनेनास्यप्रवृत्तिः किंच नांतरंगवलीयइत्यस्यात्रविषयोयुगपत्प्राप्त्यभावात्संज्ञानांवाध्यवाधकाभावेनप्रातिपदिकसंज्ञासमकाल
मेवसर्वनामसंज्ञाप्रवृत्तेः अतएवोभयेइत्यत्रसर्वनाम्नोविहितत्वेनशीभावसिद्धिः पूर्वपरत्वादितुपक्षेतदभावमात्रबोधकं असिद्धंबहिरंगमित्यपिनांतरंगेणांतरंगत्व

ल·श· हिरंगप्राप्ते; अंतरंगेकर्त्तव्ये बहिरंगासिद्धत्वेपि तत्प्रवृत्त्युत्तरं बहिरंगप्रवृत्तेरनया बारयितुमशक्यत्वात् बहुशस्तस्या दृष्टत्वात् तदुत्तरमेतत्प्रवृत्त्यापूर्वादिष्विव पक्षेतद्भा
शे·सु· वविशिष्टेबाधुत्वं बाधनस्यशक्यत्वात् जसीति विषयसप्तमीपक्षेपि प्रातिपदिकसंज्ञोत्तरमेवास्याः प्रवृत्तिस्तदुत्तरमेव तद्विषया तस्यानिवदतिदेशप्रापितायानिरवकाश
३९ त्वा च अपकर्षस्यस्थानिवद्भावस्यानुमानिकत्वानयाबाधायोगाच्च सर्वनामसंज्ञायामुक्तयुक्त्या यथोद्देशपक्षस्यैवौचित्यात् अतएवतयादेशेउभयप्रतिषेधःतयपोग्रहणे
नग्रहणात् जसिविभाषाप्राप्नोतीति स्थानिवत्सूत्रस्थंवार्त्तिकमयच्प्रत्ययांतरमितिसूत्राशयप्रदर्शनेन भाष्यप्रत्याख्यातंनत्वंतरंगत्वापवलेन उभयोत्पत्त्रङ्गोपूर्णुर्हि इति।
सूत्रेमात्रशब्दादारभ्यायचश्चकारात्मन्याहाराश्रयणेनसिद्धः अतइत्यनुवृत्त्याचकत्तीत्यादौनातिप्रसंगः तयपूर्ग्रहणंतुसूत्रेऽवयुत्यानुवादः द्वित्रिशब्दप्रकृतिकायंजंतः
स्यजसःश्रीविषयेऽनभिधानमेव पुंस्येव वानभिधानमितितदाशयंवदंति तथापीहेति प्रत्ययग्रहणेतदंतग्रहणमितिप्रयोजनंसर्वनामाव्ययसंज्ञायामितिचतदं
तविधिद्वयेनडतरांतांतेत्याद्यर्थेपरमकतरस्य सप्तपदेषिवद्भावेनकतरस्यचसंज्ञासिद्धेरितिभावः तत्रमानमाहकेवलयोरिति प्रयोजनाभावात्फलाभावादित्यर्थः अदं
तादंगात्परस्यसर्वनाम्नोविहितस्येत्येवजसश्शीत्यादेरर्थादितिभावः ननुडतरग्रहणेनैवसिद्धेऽन्यतरशब्दपाठोव्यर्थोऽत आह अन्यतरेतिकिंयत्तद्भ्यएवतयोर्विधा
नादितिभावः अपुरीति पूःशब्दस्यविशेष्यत्वेनेत्यर्थः तद्ध्वनयन्स्त्रियामुदाहरति अंतरायामिति एकोन्यार्थेप्रधानेचप्रथमेकेवलेतथा साधारणेसमानेल्पेसं
ख्यायांचप्रयुज्यतइतिकेचित्केवलेऽसहायेतत्रसंख्यान्यार्थयोःसहायवाचीष्णांतापद्बहुषुबहुवचनमेकादाकिनिश्चेत्यादिसूत्रेषुभाष्यस्यष्ठमुक्तःएकोगोत्रइ
तिसूत्रशेषभाष्येप्रथमार्थोप्युक्तःसाधारणसमानार्थयोःसंख्यावाचिनएवार्थतःपर्यवसानं यथात्तेनैकदिक्चैत्रमैत्रयोरेकामातेत्यादौसर्वेसहैकइतिसूत्रेणएकैक
शइतिभाष्यउपादायकेचिदाहुरल्पार्थोप्येकशब्दोस्तीतिवदन्नाकैयटेनकेचिदित्युक्त्वातदर्थकाभावोध्वनितएव एवंचप्रधानार्थेनदृढमाने स्वाभिधेयापेक्षा
वधीति समस्तःपाठःनियमेनावधिसापेक्षेर्थेवर्त्तमानपूर्वादीनामित्यर्थःदक्षिणागाथकाइति उत्कर्षस्यावधिसापेक्षत्वादत्रव्यवस्थास्तीत्याशङ्कैतुउत्तरेप्रत्यु
त्तरेचशकाइतिप्रत्युदाहरणंबोध्यं उत्तराःकुरवइति सुमेर्वेवधिकपरदेशत्वरूपोपाधिविशिष्टकुरुषूत्तरशब्दःशब्दप्रवृत्तिनिमित्तीकृत्यवर्त्ततइतिव्यव एम
स्थाविषयत्वंबोध्यं दिग्वाचकपूर्वादिशब्दानांमध्यान्हसूर्यसंयोगिदेशावधिकोदयाचलास्ताचलसंनिहितदेशतत्कालिकसूर्यसंमुखयावद्देशलोका ३९

लिकन्तत्पुरुषस्य यावद्देशरूपोपाधिविशिष्टदिशितत्त्वं प्रवृत्तिनिमित्तीकृत्य प्रवृत्तिरित्युपाध्यंतर्गततया व स्यात्त्वेवमध्याह्ने सूर्यस्योदङ्मुखत्वात् तद्देशवृत्तीनां
नानदवधिकोदयाचलसन्निहितत्वादिप्रवृत्तिनिमित्तमित्यन्यत्र विस्तरः अंतरमवकाशावधिपरिधानांतर्हि भेदनादर्थं च्छिद्रात्मीयविनावहिरवमरमध्ये ।
नत्वं मनिश्चितिकोशो तत्पर्यांतरव्युदासार्थमाह अंतरं बहिर्योगेति अयं त्रिसूत्र्याक्रियमाणाः संज्ञाविकल्पो जसाधारे शीभावस्य वनत्वकजाद्युदन्तत्वाद्वा विति वा
ध्यं न बहुव्रीहौ चिकीर्षितइत्यध्याहारलभ्यं प्राचीनवृत्तिकृद्रीत्येदं व्याख्यानं नेदं सूत्रं बहुव्रीहेस्तत्त्वनिषेधकं उपसर्जनप्रतिषेधेन सिद्धेः प्रक्रियावाक्येति अलौकिके
इत्यर्थः न चालौकिके समासप्रवृत्त्यैकार्थ्यीभावस्यापि तत्रैव कल्पनादुपसर्जनत्वादेव समासइव तत्रापि निषेधः सिद्ध इति वाच्यं तत्रैकार्थ्यभावस्यारोपेपि स्वा
र्थविशिष्टार्थांतरबोधकत्वरूपोपसर्जनत्वाभावेनातिभवकानित्यत्रेव प्राप्तस्याऽकचोऽभावार्थं संज्ञानिषेध इत्यत्र तात्पर्यात् लौकिके तु नास्य प्रवृत्तिस्तत्र समासस्य
चिकीर्षितत्वाभावात् अतिक्रांतइत्यादिना पूर्वोक्तस्य लौकिकवाक्यस्य समासस्य च दृष्टांतद्वयमुच्यते अकृतव्यूहपरिभाषा तु नास्त्येवेति भावः भाष्यकारस्त्विति अ
कच्स्वरौ तु कर्तव्यौ प्रत्यंगं मुक्तसंशयमिति भा भाष्योक्तेरिति कृद्रीत्येदं व्याख्यानमयुक्तमिति भावः ननु स्मृतिद्वयप्रामाण्याद्विकल्पोऽस्तु कथं प्रत्याख्यानमत आह यथोत्तरमिति
एतच्च धिन्विकृण्व्योरच्चेति सूत्रे भाष्ये ध्वनितं एवं च वृत्तिकृदुक्तार्थकं नेदं तस्मादुपसर्जनप्रतिषेधानुवादकं यद्वा वार्तिककृता तस्य कृतत्वात् सूत्रकृते इमारच्यं संज्ञायामन्व
त्वमपि भाष्यकृद्दूषितमेव न सूत्रकृदृहितमिति विभाषादिगिति सूत्रेके यटस्य इष्टस्त्रे सप्तमीनिर्देशः प्रथमार्थ एव अतएव वृत्तिकृदुक्तः प्रक्रियावाक्ये निषेध इत्यर्थो भाष्यकृता बहुव्री
हिप्रत्ययस्य तदर्थवाक्यस्य पदलक्षणायाः साधितः अन्यथा मूलोक्तरीत्या सिद्धे तादृशलक्षणाप्रयासो व्यर्थः स्यादिति तत्त्वं तदनुगुणानाम वेति प्राधान्येनोपस्थितिविषयप्रसिद्धस्योप
सर्वार्थवाचकत्वसमानाधिकरणसर्वनामपदवत्त्विनबोधकमहासंज्ञया सर्वार्थोपस्थापकसर्वादीनामनुकरणावश्यकत्वेनेतरेषामनुकरणे मानाभावः नामपदस्वारस्यन प्रा
धान्येनेत्यस्य लाभः उपसर्जनेहीतरविशेषणतयैवोपस्थापकमिति तेन न तद्व्यावृत्तिः पूर्वादिसंग्रहाय स्वोपसर्वार्थेति संज्ञाव्यावृत्तये अभिव्यक्तेति न्यायमूलकं प्रसिद्धेनो
ति भावः सर्वादिसूत्रस्य चायमर्थः सर्वादीनितं दतानि चोक्त सर्वार्थवाचकत्वसमानाधिकरणसर्वनामपदवंतीति तत्र प्राप्ताप्राप्तविवेकन्यायेन सर्वनामपदवत्त्वांश एव विधिः स
र्वार्थवाचकत्वस्य लोकत सिद्धेः एतेनान्वर्थसंज्ञोपस्थितसर्वार्थवाचकस्य विशेष्यतया सर्वादीनीत्यस्य न द्विशेषणत्वात्तदंतविधिरित्यपास्तं एकपदोपस्थाप्ययोरर्थयोः

स॰ रो॰ परस्परमुद्देश्यविधेयभावेनान्वयस्याव्युत्पन्नत्वात् रूढ्यर्थयोगार्थयोरन्यतरवियोगेनान्यत्रान्वययोगाच्च तदंतेसर्वार्थवाचकत्वंत्ववयवद्वाराबोध्यं एतेनतदाक्षिप्तस्य
श॰ सु॰ विशेष्यतेसोपात्तंतद्विनानुपपत्त्यभावेनाक्षेपायोगादाक्षिप्तस्यशाब्देन्वयेमानाभावाच्च केचित्तु आकृत्यासकस्योद्देश्यताऽपन्नस्यविधेयत्वेनिवदंति पर्यंत्वाद्यः पक्षइतोल
४० घुरितिबोध्यं संनिवेशादितितदनुमानादित्यर्थः अत्रोपसर्जनत्वमितरविशेषणत्वेनार्थोपस्थापकत्वं तदोःसइतिसूत्रेत्यदसएवदस्यसत्वंनान्यस्येतिनियमेद्रोप
नि(प्रत्ययेद्व इतिप्राप्नोतिस्वइतिचेष्यतेयथालक्षणमप्रयुक्तेइतिभाष्यंतुप्रकृतसूत्रनभूस्त्रस्यानेकभाष्यविरोधादेकदेश्युक्तिरितिनतद्विरोधः तृतीयासमासे द्वंद्वेचेति
सूत्रस्याकसेरुकरीत्यान बहुव्रीहाविति सूत्रस्याकसीत्याच प्रथमार्थेसप्तम्यप्रत्ययमपि समासस्यैवनिषेधोनत्ववयवानां समुदायस्येति अकच्स्वरौतुकर्त्तव्यौप्रत्यंगंमुक्तसंश।
यमितिभाष्योक्तंयाप्रकरणविषयस्मृत्याएतत्प्रकरणस्थसप्तमीनिर्देशानांप्रथमार्थकत्वमितितस्यावयवसंज्ञानिषेधकत्वाभावउचितः किंचावयवमात्रस्यनिषेधे
वर्णाश्रमेतराणामित्यत्रसर्वार्थवाचकसर्वशब्दांत्वेनसमुदायसंज्ञायासुडापत्तिः नेस्यसंज्ञानिषेधेपिसर्वार्थवाचकसर्वादित्वानपायात् अवयवस्यव्यपदेशिव
द्भावेनसमुदायस्यचद्वंद्वेविद्यमानत्वेननिषेधेतुअवयवस्यनिषेधेफलाभावः नचत्वच्छब्दस्यतांतत्वेकाकचोर्विशेषणफलं द्वंद्वावयवमात्रेसुंदरादिविशेषणान्व
याभाववत्कुत्सादिविवक्षायाअभावात् समुदायेतद्विवक्षायांसमुदायोत्तरप्रत्ययेनावयवगतकुत्सादेरपिबोधेनोक्तार्थत्वादवयवेभ्यःपृथक्तदनुत्पत्तेः अन्यथात
वप्रत्येकप्रत्ययोत्पत्त्यापत्तिः अतएवोक्तंभाष्येःकश्चिन्नभवतीतिविभाषाजसीतिसूत्रेसमुदायेकुत्साविवक्षायामित्यर्थः कृताकचासमासस्तुभवत्येव तत्रसर्वा
र्थघंतत्वादनेनविकल्पोभवत्येव त्वदधरमधुरमधूनिपिबंतमितिजयदेवप्रयोगबलेनान्यार्थकत्वच्छब्दस्यसत्वेपितस्यसर्वनामत्वेमानाभावाच्चबहुसंमतत्वाच्च
एतेनबहुव्रीहावितिवदस्यापिद्वंद्वेत्विकोषितइत्यपास्तं फलाभावात् जसाधारेशीभावएवविकल्पविधायकस्यविभाषाजसीत्यस्यासंगतेश्चेतिभावः द्वंद्वेनावयवभे
दस्समूहस्यद्वंद्वेविशेष्यतयोपसर्जनेनसंज्ञायाअप्राप्त्याद्वंद्वेचेत्यपिनबहुव्रीहाविति वदितितत्वं अतएवगोस्त्रियोरितिसूत्रेकुक्कुरमयूर्योवित्यादौह्रस्ववारणायद्वंद्वे।
नेतिवचनमारब्धमितिदिक् नाकजितिसमुदायनिष्ठकुत्साबोधकोकजित्यर्थः प्रथमचरम अत्रसूत्रेनेतिनसंबध्यतेप्रथमादिष्वसंभवात् जसीत्यनुवृत्तेरर्थोधिकारात्स्यमं रम॰
पिशीभावेएवविकल्पस्तदाहजसःकार्यंप्रतीति तयःसंख्यायाअवयवेतयपिति तदंताइत्यत्रहेतुरुक्तः द्वितीयतृतीयौद्वेत्तीयस्येःसंप्रसारणंचेतिसाधु अर्थ ४०

वदिति प्रतिपदोक्तस्येत्यपि बोध्यं तेनानंते आद्युदात्तस्य द्वितीयाय भागायेत्येवा नभावे तु स्मि भवत्येव जरया अष्टन इत्यतो विभक्तावित्यचिर इत्यतो वेति अनुवर्तते।
तदादिविधिश्चेत्याह अजादाविति जरसावित्यादौ तु स्यपदे शिद्धावेन विभक्तौ किं जरयाइदं जारं प्रतिपत्तिलाघवाय जरया असुङ् कृतः पदांगाधिकारे इति परम
गं च विशेष्यं विशेषणेन तदंतविधिरिति भावः पदशब्देनात्र पदाधिकारः केवलपदाधिकारश्च गृह्यत इति येन विधिरित्यत्राकारेणैव निर्दिश्यमानस्येति. षष्ठी स्थाने
योगेति सूत्रमावर्तते आद्यत्तस्यायमर्थः षष्ठ्यंतमुच्चार्यमाणमेव स्थानेन युज्यते न प्रतीयमानमिति तेनेदं सिद्धमिति भावः नन्वयं जरशब्दो न जराशब्देन आह स
कदेशेति स्थानि कल्पनेनेति भावः जराङ्स्त्वकृतपरिमाणस्य ग्रहात् अनेन स्थानिवुद्ध्यैव कार्यप्रवृत्त्या निर्दिश्यमानपरिभाषाबाधाभावो बोध्यः येनविधिस्तदंतस्येत्यस्य तु सं
ज्ञासूत्रत्वात् तत्रस्थजराशब्दो जराशब्दांतपर इति तदंते आदेशप्रवृत्तौ परिभाषाविरोधः स्पष्ट एवेति दिक् निर्जरसेति अत्र स्वादिष्विति पदत्वेन रुत्वं न भत्वेन पदत्व
बाधात् सूत्रेषु उत्तरसूत्रस्थस्य पूर्वे त्रापकर्षवदपेलेखावैचित्र्यायेति बोध्यं पक्षे इति जरसादेशाभावपक्षे इति भावः इदमर्वाचामनुरोधेन परे तु विभक्त्यादे
शेभ्यः परत्वाज्जरसित्यसंगतं विभक्त्यादेशानामेवं पूर्वविप्रतिषेधेनेष्टत्वात् अत एव जराया इति सूत्रे जरामीत्यत्र नुम्जरसोः प्राप्तयोर्विप्रतिषेधेन जरसि निभाष्योक्तं
संगच्छते अन्यथा त्वद्रीत्या शीभावात् पूर्वमेव जरसः प्रवृत्तौ तदा सर्वनामस्थानत्वाभावात् नुमो विप्रतिषेधविचारासंगतिः स्पष्टैव ममतु पूर्वविप्रतिषेधेन जरसः
पूर्वं शीभावे प्रवृत्ते न तदसंगतिः स्पष्टैव अत एव टाङसीति सूत्रे कैयटेनोक्तं भाष्यकारः संनिपातपरिभाषया जरसादेशमनभ्युपयन्नतिजरेणातिजरादिति भाव्यं न।
त्वतिजरसिनातिजरसादिति गौरवमुद्भावितवानिति भवद्रीत्या पूर्वं जरसादेशे इनाद्यप्राप्त्या तदभावपक्षे च नस्याप्राप्त्या संनिपातपरिभाषया जरसादेशमनभ्यु
पयन्निरस्यासंगतिः स्पष्टैव वृत्तिकारोप्याह अतिजरसिनातिजरसादिति केचिदिच्छंति यथा तु भाष्ये तथा नेतदिष्यते लुप्त इति नपुंसकद्वितीयैकवचनेपि लुकु वा
धेनातो मित्यमि संनिपातपरिभाषया जरस्भावः न च तत्र नाकारांतसंनिपातकृत एवाजादिः किंतु तदभावेपि एषां तु संनिपातलक्षणाविधिविनान्यस्य प्रवृत्ति यो
ग्यतामत्रैवेति अत्र भवत्येव जरसि निवाच्यमानाभावात् टाङसीति सूत्रस्थनातिजरेणेत्येतद्विषयकैयटेन विरोधाच्च ध्वनितं चेदं जराया इति सूत्रे भाष्ये तत्र हि
पूर्वपक्षिणा अतिजरसं पश्येत्यत्र लुक्कस्मान्नेति पृष्टे परेण प्रथमैकवचने प्यतिजरसं निष्ठतीत्यत्रापि कुतो लुङ् शंक्यते इति पृष्टे पूर्वपक्षिणा प्रथमैकवचने अ

म्भावेऽजरमेवजरस्तत्रकृतेजरसिसंनिपातपरिभाषयानलुगितिविशेषउक्तः यद्वाम्भावेकृतेसंनिपातपरिभाषयानजरसितिपाठभेदेनविशेषउक्तः ततःपरेणायचो
वमतिजरसमतिजरसैरितिनप्राप्नोतिअतिजरमितिद्वितीयैकवचनादेशंकितेसिद्धांतिनाइष्टमेवैतदतिजरमतिजरैरितिभवितव्यमिति अत्रविशेषोपपादनेऽन्यपाठ
एवंयुक्तः अन्यथालुकःप्रथमैकवचनेतेनाभावेउपपादितेद्वितीयैकवचनेपितेनन्यायेनलुकोप्राप्तोविशेषोक्तिरसंगतेतिबोध्यं एवंस्त्रियांजरसादेशेकृतेयाडा
पइत्यादीनामाकारप्रश्लेषेणवारणंविफलमेवतेषांपरत्वात् अतिखट्वशब्देतेषांवारणायतुप्रश्लेषआवश्यकइत्याहुः परेतुजरसादेशाद्विभक्तिसंबंधिकार्यमात्रं
पूर्वविप्रतिषेधेनतेनजराणामित्यादावामिपूर्वंनुटिजरसोऽभावएव एवंचह्रस्वनद्यापइत्यत्राकारप्रश्लेष— नफलंनापिमानं अतएवड्यांपग्रहणेऽदीर्घइतिव
तजरसादेशस्यस्यानिवत्वप्रतिषेधोवार्तिककृतानारब्धइत्याहुः परिभाषाया अनित्यत्वमिति इनातोरिकारदीर्घोच्चारणमेसिकर्तव्ये एस्करणंचतदनित्यत्वेमूलमितितद
भिमानः षष्ठ्येकवचनेइति एकसूत्रोपात्तत्वात्स्यादेशविषयेपिपूर्वविप्रतिषेधइतिभावः एतच्चभाष्ये— ति इनातोरिकारदीर्घोच्चारणप्रत्याख्यानपरभाष्येत्यर्थः
इष्टमेवैतत्संगृहीतमतिजरमतिजरैरितिभवितव्यमितिजरायाइतिसूत्रस्यभाष्येइतिवार्थइत्यन्यत्रविस्तरः पद्दन्नो आदेशे ःस्वानुरूपाःस्थानिनआक्षिप्यंतेइत्या
ह पादर्दतेति अनुदात्तस्यचर्दुपधस्येत्यतोन्यतरस्यामित्यनुवर्तते अतएवतुल्यास्यसूत्रादिभाष्येआस्येतुल्यंःपादेभोपहतंमासेनपूर्वोयेत्यादिप्रयोगाः हृद
यस्यप्रियइतिसोत्रप्रयोगश्चोपपन्नाभवंतियेचतद्धितिसूत्रस्यवाकेशेष्वितिवार्तिकेवाग्रहणंतुतत्र— वाग्रहणासंबंधबोधकं यद्यपिनिशाशब्दस्यनिशश
ब्दप्रकृतिकत्वेनभागुरिमतसिद्धटापावैकल्पिकत्वेनचवाक्वाचेत्युभयवत् निशनिशयोःसूत्रेनिशग्रहणंविनापिसिद्धिस्तथापिसुटिहलंतस्यासाधुत्वबोध
नायात्रग्रहणमितिहस्त्यनुसारिणः परेतुअनुदात्तस्येतिसूत्रेन्यतरस्यामित्यस्यस्वरितत्वंनास्ति अतएवशीर्षंछंदसीतिसूत्रेशीर्षन्नितिप्रकृत्यंतरंद्रष्टव्यं आदे
शत्वेहिछंदसिशिरसःशब्दस्यप्रयोगोनस्यादित्युक्तंभाष्ये अन्यथाविकल्पानुवृत्त्यादेशत्वेपिदोषाभावेनतदसंगतिःस्पष्टैव येचतद्धितइत्यत्रचादेशत्वंयशिर।
सोग्रहणंकर्तव्यमित्युक्तंवाकेशेष्वितिचवक्तव्यमित्युक्तंतस्माच्छसादिविषयाणिप्रकृत्यंतराण्येवपद्दादयः एवंमांसपृतनासानोपि अतएवनसृष्टताःस्थानिवद्भा
वादावतत्त्वमादायनसांप्रतामित्यादीननुडादि नासिकायानस्यतत्सक्षुद्रेष्वितिवार्तिकेआदेशत्वमेवनासिकायाइत्यनुवृत्तेः अतएवतद्विषयेनासिकासु

इत्यादिन अतएव पदादिषु मांसपृत्न्सूनामुपसंख्यानमिति वार्तिके स्थानिनिर्देशो न कृत इत्याहुः प्रत्याहार इति व्याख्यानादौटष्टकारेणेति भावः अक्लीबस्येति पूर्वेदा सपरत्वेयाप्यस्य भाष्ये व्याख्यानाल्लघुत्वाच्चेति भावः प्रसज्यप्रतिषेधेन व्याख्याने ऽतएव ज्ञापकात्केषांचिदसमर्थसमासानां साधुत्वं बोध्यं स्वादिषु सुरत्रप्रथमैकवच नं स्वादिग्रहणेनैकवचनानां ग्रहणं व्याख्यानात्तदाह कप्रत्ययावधीति तदंतेष्वित्यर्थः यच्चिभं समाहारद्वंद्वे सौत्रत्वान्नटच् यचीत्यनेन स्वादिविशेषणत्वादाविधिः असर्वनामस्थाने इति तेन सुपादौ वित्यादौ पादः पन्नभसंज्ञापदत्वकार्यप्रतिबंधरूपे ऽशास्त्रीयेपि कार्ये भवति न पदांतसूत्रस्य भाष्यप्रामाण्यात् आकडारात् प्राक्कडारा दिति नावधिः तत्पुरुषो द्विगुश्चेति लिंगात्समावेशार्थं हि तदित्याह कडारा इत्यादि व्याप्त्यर्थकाङ आचार्यादिति वक्तुं युक्तं एकैवेति संख्यावाच्येकशब्दोपादा नात्ववधारणं संपद्यत इति भावः यापरेति द्वयोः सावकाशयोः परानिरवकाशत्वे तु सैवेत्यर्थः आभ्यामेव बाधसिद्धिस्तु न अन्यत्र तव्यदादौ कृत्कृत्यप्रत्ययसंज्ञा दीनां समावेशदर्शनेन विरोधाभावात् विप्रतिषेधाप्रवृत्तेः लौकिकस्य तक्रकौंडिन्यन्यायस्यापि लोके संज्ञाविषये ऽदर्शनेन शास्त्रेपि संज्ञाविषये ऽप्रवृत्तेश्चेति ते ति अनवकाशत्वेनेत्यर्थः परोदाहरणं तु अपादानमुत्तराणि बाधंत इत्याकरे स्पष्टं विरोधा भावेन विप्रतिषेधसूत्राप्रवृत्तावपि परत्वादेरन्यत्र बलवत्त्वेन ह ष्टतयात्रापि तेन व्यवस्था अपादानादिसंज्ञानां समावेशे तु तत्कार्ययोः पर्यायापत्तिर्दोषः भपदसंज्ञयोः समावेशे तु राज्ञ इत्यादौ नलोपस्यापत्तिर्बाध्या न च राजन्य इत्यादौ सुप्तिङंतमिति पदत्वं दुर्वारं परया भसंज्ञयां तु न बाधः तस्या अंतरंगत्वादिति वाच्यं समानावधिकाया अंतरंगाया अप्यनया बाध्यसामान्यचिंतया अप्रवृ दत्वेनैव बाधादित्याहुः आकडारस्थसंज्ञासु च यथोद्देशपक्षस्यैवेत्यपदश्चाङ्गशब्दे निरूपयिष्यते भपदसंज्ञाविधावंगप्रकरणे भस्येत्यस्य पाठेनांगमित्यनुवर्त्या गं सत्यपदं भवति भं भवतीत्यर्थेन ताभ्यां तस्याः समावेश एव न पर्याय इति बोध्यं पुरुषसंज्ञापरस्मैपदसंज्ञयोरपि णलुत्तमो वेति ज्ञापकात्समावेशः गुरुलघुसंज्ञे वर्णस्य नदीघिसंज्ञे तदंतस्येति भिन्नावधिकत्वात्समाविशतः उभे अपि वर्णस्येति पक्षस्त्वाकर उपलभ्यमानो ऽप्येकदेशिन एव समावेशानुपपादनादिति दिक् यलो प इति हलि सर्वेषामित्यनेनेत्यर्थः अल्लोपोनः तपरकरणं किं अनितेः क्विपि अन इत्यादौ लोपाभावायान्त्वं तत्वत्रैकदेशविकृतन्यायेनेत्यन्यत्र विस्तरः पूर्वे। स्मादिति अचः परस्मिन्नित्यत्र पूर्वविधावि त्यस्याहत्या पंचमीसमासाश्रयणाद्यमर्थो लभ्यत इति भावः तेन प्रत्येषिषन्नित्यादिसिद्धिः अन्यथा ज्ञुसस्यात्

ल॰श॰ ॥ अत एवाभेऽभ्यस्तमिति सूत्रे उभेग्रहणं यत्रोभे श्रूयेते तत्रैवाभ्यस्तसंज्ञार्थं एतेन्नित्यत्राभ्यस्तलक्षणो जुस्माभूदिति उक्तेः शपि कदि शस्य पूर्वं विधावितिपंचमीसमासेन
शे॰सु॰ स्थानिवत्वात् जुसोऽप्राप्तिरसतिप्रयोजने उभेग्रहणं सहार्थमित्युक्तं तेनोभे यत्र श्रूयेते इत्यर्थेपि प्रत्येपि षिषन्निति सिद्धये आवश्यके न पंचमीसमासेन तत्सिद्धावुभे
४२ ग्रहणं सहार्थमिति तद्भावः इति पक्षेत्विति तुना स्यानित्यत्वं सूचितं प्रविगणय्येति भाष्योदाहरणमपि तदनित्यत्वेएवसंगच्छते अत एव हे गौरित्यत्र वृद्धेः स्थानि
वत्वान्न संबुद्धिलोपः पूर्वस्मान्निमित्तत्वेनाश्रितादिति व्याख्याने तु नमानं पूर्वत्रासिद्धेनेति अतिदेशाद्दृश्यात्रिपाद्यामसिद्धत्वे नन्याप सिद्धानुवादोयं तत्फलं।
त्वतिदेशान्तराणांवति घटितानां प्रवृत्तिबोधने अतस्वामीस्त्रीरपरो त्यादौ मीत्वणत्वे भवतः अत्रे कारस्याद संवं धित्वंपेइत्यस्यैकाजुत्तरपदत्वं चांतवद्भावाधी
नं तस्यदोषइति इदंवाचनिकमेव नमुनेइतिसूत्रेनेतियोगविभागस्तु भाष्येनदृश्यते अत एव सिद्धकांडं वार्तिककृता रअंनलोपः सुवितिसूत्रं चसूत्रकृताकृतं।
प्रकारार्थमिति प्रकारः सादृश्यं तच्च सुत्वेन मांस्य पनीत्यादावपि नलुमतेति निषेधानित्यत्वाच्छ्रसादिपरत्वं बोध्यं शब्दत्वेन सादृश्यमित्यन्ये तन्न वाशोकष्य
ञ्रोगेष्वित्यस्यदेयर्थ्यापत्तेः नासिकायायत्तसक्षुद्रेषु नसितिभाष्यपठितवार्तिकस्य वैयर्थ्यापत्तेश्च आसन्यं प्राणमूचुरित्यत्रापि तद्देवशसादिपरत्वं अत्रसु
प्रभृतिष्विति वाच्ये शस्प्रभृतिष्वित्युक्त्याऽन्यत्र क्वचिदेव प्रवृत्तिर्बोध्यते अत एव पद्दन्निशां ग्रहणं चरितार्थं तेषां हि विधानामपि कोश सिद्धतयात त्रव्य
वस्थाया एव वक्तव्यतया सुप्रत्ययमात्रे प्रवृत्तौ तस्याऽसंभवेन तद्वैयर्थ्यं स्पष्टमेव प्रकारार्थत्वे प्रमाणमाह भाष्येइति तत्र हि शस्प्रभृतिष्वित्युच्यते अशस्प्र
भृतिष्वपि दृश्यते शलादोषणी ककुदोषणीयाच्चते महादेवइत्युक्तं आद्यस्याधिगुप्तेषिपद्यमानस्य शलाकाकारे दोषणीत्यर्थः छांदसः कादिलोपः एतेनदो
षइत्यकारांतस्य दूषणवाचिनो दोषन्नादेशइत्यपास्तं तेन पदंघ्रिरिति नच कोशस्य पदादीनां पादाद्यादेशत्वे पादादिभ्यः पृथक् पदादिकंचनं तत्रव्यर्थं
नहि स्थानादेशयोः पृथक् उपादाने प्रयोजनमस्ति स्थान्युपादानेनैव तदर्थाभिधान ———— समर्थादेशस्याप्यर्थबोधनात् अत एव न आद्यादे
शादौ कोशः न्यासइति वाच्यं पदादीनां भाष्यरीत्यानादेशत्वात् तत्वेपि नज्वल्को ष्टुरिति कद्व्यवस्थार्थमस्यावश्यकत्वेन सोपरतोन्दादीनां ... राम
ये प्रकारार्थत्वस्यावश्यकत्वात् स्पष्टं चेदं वाशोकेति सूत्रे मूले कोशशब्दा अर्थपरा एवं शक्तिग्रहस्तु पदत्वहेतुकानुमानेन सामान्यत एव सर्वेष्वपि। ४२

स्तुर्नारायणइत्यादौ विष्णुपदार्थाभिन्नो नारायणपदार्थ इति क्रमेण बोध इत्यादि मञ्जूषायां नामार्थवादे विस्तरेण निरूपितं एतत्पदममुकवाचकमिति शक्तिग्रहस्तु स्वस्वासि
द्धिमात्रं तत्तत्स्वरूपस्यानियतः पश्चान्न सैवं अस्मद्देवि सरस्वतीति देवकाव्ये विहयेत एतानि ते घ्नेनामानीत्यादौ यत एतानि त्वन्नामानि अतस्त्वदभिन्ना एषामर्था इति बोधः अ
त एव नोऽन्तिसमानाधिकरणे इति सूत्रभाष्ये सामान्यवचनमित्येतदेव प्रत्युदाहरणं दत्तं अन्यथा एकार्थबोधकत्वरूपसामानाधिकरण्यस्याप्यभावात्तदसंगतिः स्पष्टैव
वस्तुन तथा सति तत्तच्छब्दस्वरूपमात्रस्य बोधापत्तेः अनेकशब्दानां स्वरूपबोधनपूर्वमेकार्थबोधने कौशलतात्पर्यात् अत एव यत्तदेतेभ्य इत्यादौ पाणिनिनैकशेषो न कृतः एते
न कोशेषु शब्दानां शब्दपरता अत एवैकशेषानर्थपरत्वं तु न संभवति इतः पूर्वं शक्तिग्रहाभावात् एते शब्दा एकार्था इति बोधः एवं चात्र प्रकारार्थत्वाभावेऽपि न क्षतिरित्य
पास्तमिति दिक् । सस्थाविसापेभ्य इति वक्तव्ये पूर्वग्रहणमुत्तरपद इत्यधिकृतस्यैवं तत्त्वलाभाय एतेन बहुप्रिय इत्येवेन्नुदाहरणमित्यपास्तं विश्वपा इति विश्वं पा
तीति विग्रहे आतोऽनुपसर्गे इति प्राप्ते वासरूपन्यायेनातो मनिन्क्वनिब्वनिपश्चेति चेन विच् स चादन्तेभ्यो लोकेऽपि कीलालपः आगतमिति विभाषापूर्वाह्णेति सूत्रे भाष्य।
प्रयोगात् क्विप् स्त्वादन्तेभ्यो भाष्याद्युक्त क्विब्भ्यो नभिधानमेव अत एव यूस्त्र्याख्यौ नदीति सूत्रे स्त्र्याख्यावित्यत्र विजुक्तो भाष्येनानुक्षिप्य अत एव शंस्था इत्यादिप्रयो।
गे भाष्यकृता ईत्वं न कृतमिति केचित् अन्ये क्विपमेवाहुः दीर्घाज्जसि चेति चीत्यस्यानुकर्षः दीर्घाच्छसीत्येव तसूत्रितं दीर्घादेव शसीति विपरीतनियमापत्तेः
मत्याह एषु जातिपक्षाश्रयणादत्र प्राप्तिः न्याय्यत्वादिति जसि पूर्वसवर्णदीर्घनिषेधस्य न्याय्यत्वादित्यर्थः आतोः किं हाहानिति अव्युत्पन्नमिदं अस्य क्रियाशब्दत्वे
तु हानिति प्रत्युदाहरणं परे तु न्कः श इत्यादिसिद्ध्यर्थमातो नाप इति वक्तव्यमित्युक्ते आत इति योगविभागेन तत्संसाध्यं तस्मात्प्रत्याख्यातं भाष्ये एवं च सा शब्दादेर्यदभि।
धानं तत्र योगविभागेन लोप इष्ट एव सूत्रे धातुग्रहणमावंतनिवृत्त्यर्थमेव भाष्यवार्तिककृत्तो रज्ञानकल्पनापेक्षया दृशार्थकल्पने स्येवोचितत्वात् आवंतादाचार।
क्विबेवन्नात्य क्विवंताहाकर्तरि क्विपूनानभिधानादिति न तत्र सूत्रवार्तिकयोर्विरोधः अत एव प्रथमयोरिति सूत्रभाष्ये परसूपं बाध्यसामान्यचिंतयादीर्घमात्रस्य बा
धकमिति पस्पेरामानित्यादिसिद्ध्यर्थमनादीर्घ इति सुपि चेति चानुवर्तमाने बहुवचने झल्येदिति सूत्रे बहुवचन इति योगविभागेन परसूपबाधकं दीर्घविधायणमा।
नामित्यादावनेन दीर्घे परत्वात्कृतेऽमीनामित्यादौ सावकाशस्य नुटो प्राप्तिमाशंका ह्रस्वनद्याप इति सूत्रे आजसेरित्यत आङ्ग्रहणानुकृष्टस्यासमाधायकोलालपामि

ल॰शे॰ येमितितदाशयः अधात्ववपवाकारांतानांलोपाभावेनुतदसगतिःस्पष्टैवेत्याहः त्क॰श्नइतित्काप्रत्ययसंडिस्याद्यर्थकंत्कइश्नःशसे
शे॰सु॰ त्वमित्यादिप्रयोगस्यमत्रोदाहरणं एतेनाचारक्विंतात्कर्त्तरिक्विपैतेप्रयोगानिर्वीत्याद्दत्यपास्तं आचारक्विंतप्रकृतिककर्त्तरिक्विंतस्यभाष्येकाप्यनुपन्यासेननै
४३ भ्यः कर्त्तरिक्विपोनभिधानस्यैवलाभाच्चइत्यादंताःजसिचह्रस्वस्यगुणइतिवर्त्तते ह्रस्वस्यसंबुद्धौचेत्यतःसंबुद्धाविनिवर्त्तते शेषोघ्य पूर्व्वस्मात्स्याविस्यतोपृइतिडिःति
ह्रस्वश्चेत्यतोह्रस्व इतिवर्त्तते शेषपदार्थमाह अनदीत्यादि तदंतमिति अनुवृत्तपूर्व्वाशेषपदार्थस्यविशेषणात्तदंतलाभइतिभावः ननुमस्येइत्यत्रानव
काशत्वान्नदीसंज्ञैवभविष्यतीतिशेषग्रहणंव्यर्थमतआह एकसंज्ञेति अधिकारादिति कडाराःकर्मधारयेइत्येतस्यर्येतंतस्यवुद्धिस्थत्वादित्यर्थः ।
स्पष्टार्थमिति स्पष्टतयातदंतविधिलाभार्थमितिभावः मात्रेइति ऋतोङीतितुपूइत्यनुवृत्तावेवतात्पर्यग्राहकमितिभावः आङोना पुंसीतितुनोक्तं अमुनाकु
लेनेत्यत्रमुत्वस्यासिद्धत्वान्नुमनापत्तौपुंस्त्वाभावेननाभावस्याप्यनापत्तौरूपासिद्धेः नमुनेइतिनिषेधस्तुनुमिनमुटादेशइतिवार्त्तिकविरोधात् अतएवसूत्रकृ।
तान्कोतिवन्नोतिनोक्तंतथासतितंत्रेणानकारनिर्देशेपिसंभाव्येत आमंतुनाकारेणतस्यापिनेइतिनिर्देशनतंत्रस्वीकारेत्वत्यंतंज्ञानगौरवमितिनकिंचिद्बाधवमिति
स्पष्टंभाष्ये आङितीति ङकारविशिष्टासंज्ञानत्वस्यङस्येत्वं अतएवहरिणामत्येत्यादौनगुणः एवमोङ आपइत्यत्रापि अतएवासंभवेएवापवादत्वमितिवार्त्ति
कमतेपिरमेइत्यादेनयाह घेर्ङिति सुपिचेत्यतःसुपीतिवर्त्तते तेनपद्धतिसिद्धंनचघेर्ङीतिसूत्रंकार्यङकारादावित्यर्थः प्रवाहवेत्यत्राङयाजयारामुपसंख्यान
मितिआङादेशस्तुङीइत्येवकुर्ंशकाइतिवाच्यं मत्यामित्यादावाम्याप्यनद्याइत्यस्यानापत्तेःअल्विधित्वेनस्थानिवत्त्वाभावात् इतग्रहणंत्वमुंवधकार्यत्वात्स्थानि
वत्वस्पष्टमितिदिक् ङसिङसोड एङोह्रिवेपि अस्वरितत्वाच्चयासंख्यंनङितश्चेतितुनाःसुशिकृतउदित्यत्रकृदंतान्ङिन्नोतिपरपूर्वेपरयोरत्वमित्यर्थः गतोत्या
दोशेषापत्तेः ङसोरप्येवसिद्धेङसिग्रहणंस्पष्टार्थमिति अच्चघेः इदुद्भ्यामितिकिंघेःपरस्यङेरौदच्च
तिङिप्रकृतेघेरौरच्चेतिवाच्येमाभूदिति अदोनोत्स्यपरत्वंसुखमुखार्थेइत्संज्ञायांचनस्यलोपइतितयोर्लोपः नचौतोविभक्तित्वान्नविभक्ताविति निषेधात् के शेष॰
एामित्संज्ञेतिवाच्यंमुखसुखार्थमित्यस्यतदेवप्रयोजनंननुकार्यांतरंनापिप्रयोगेश्रवणमित्यर्थान्नत्वप्रतिज्ञैवनविभक्तावित्यस्यंतत्राप्रवृत्तेः अतएवेहह्वोपस्या ४३

वैस्वोपेइत्याद्दिनिर्देशाः संगच्छन्ते यदितूच्चारणार्थानांविनैव शास्त्रमपगमः स्यात्तदेतत्संज्ञकानामपिनहूदेवनिवृत्तिरस्तु किंतस्यलोपइत्यनेनस्वभाववादस्तोभिय
त्रापिसत्वात् ध्वनितंचेदं तस्यलोपइत्यत्रभाष्येद्दृनिदिवोत्तत्रैनिरूपयिष्यामः नचैवमग्नावित्यत्रौतः स्वरितत्वापत्तिः नचप्रत्ययाप्रत्यययोरित्येव सिद्धेत्वम
त्तितिप्रत्ययग्रहणंकर्तव्यमितिवार्त्तिकादौपदेशिकप्रत्ययत्ववत्यवतत्त्वदृत्तिरितिकच्च तस्याः परिभाषायालक्ष्यसिद्धये भाष्यकृताकाप्यनाश्रयणात् स्पष्टंचेदं
त्रित्स्वरितमित्यत्रकैयटे अंगस्ये : तिसूत्रेभाष्येतुतत्समाख्यानायैकदेशिनोक्ता ननुसिद्धंतिनेतिस्पष्टं तदिदं आन्नलोपइतिसूत्रेभाष्येपिध्वनितंतत्तद्भा
वइतिचेन्नप्रत्ययग्रहणमित्यस्यविधानकालिकप्रत्ययवद्ग्रहणमित्यर्थात् अतएवादेशोगुदित्वमाश्रित्यतत्प्रत्याख्याने फलभेदोनेतिदिक् अनङ्सौ
साविति प्रथमैकवचनमसंबुद्धाविति पर्युदासात् नकाराकारस्तु उच्चारणार्थइत्संज्ञकः अलोन्त्यात् अवध्यवधिमतोःसाजात्यादाह पूर्वोवर्णइति अतएव
शिष्टइत्यादौ शाइतिसमुदायस्यशासइदीतीत्वन पंचम्यंतालग्रहणाच्च शास्यन सर्वनामस्थाने नोपधायाइतिद्वलोपइत्यनोदीर्घइतिचानुवर्तते अप्तृन् अप्
तृइतिपुंस्त्वमविवक्षितं अतएवाप्तृन्तंहलितिसंगच्छते अप्तृन्प्रदेशेषुहलग्रहणेनैवसिद्धेसंज्ञाविधानमदृष्टार्थं हल्ङ्याप् सुतिसीति पृथक्पदं हसंतादि
ति सुतिसीनांप्रत्ययत्वेनोपस्थितस्ययस्मात्सविहितस्तदादेरित्यस्यविशेष्यत्वेननतदंतत्लाभइतिभावः एवंङ्यावंशेद्वेधातदुपस्थितत्वाङ्यावंतांतादित्यर्थोद्रष्ट
व्यः हल्ङ्याब्भ्यः किमितिराम इत्यादौदीर्घानत्वाभावान्नदोषइतिप्रश्नः दीर्घात्किंनिष्कौशांबिरतिखट्वइत्यारभ्यसंयोगांतलोपस्यासिद्धत्वादिसंतोपपाठः
मनोरमायांदर्शनात् सखेति यद्यप्यत्रैवसख्युरसंबुद्धाविति लेख उचित स्तथापिनांतलक्षणादीर्घेणैवसिद्धेरत उपधायाइत्यपेक्षयानित्यत्वेनतस्यैवोचित्या
च्चात्रनोक्तं अचोञ्णितिमृजेर्वृद्धिरित्यतोवृद्धिरित्यनुवर्ततेंऽगस्येतिचाधिकृतंतदाह अंगस्यवृद्धिरिति रूपसिध्यादिति उच्चारणार्थोकारेणकृतयणः प्रयोगस्थस्यानुकरणाद
विशेषणाभयोर्ग्रहणमित्याह सखीन्त्यादि ङसादिपरस्तादृशः सखिसखीप्रतीतोशब्दप्रकृतिकएवसंभवतीतिभावः सुसखेति नपूजनादितिनिषेधाद्राजाहः सखि
पइतिटच्न समुदायस्येति असखीत्यस्यसखिभिन्नावयवावितिवर्णसंज्ञापक्षेर्थः अत्रपक्षेपर्युदासेनतद्भिन्नप्रातिपदिकांत्यवर्णादेरेवग्रहणात्कृतंसख्येति
वाक्येनदोषः सिद्धांतिसंमतेतत्दंतसंज्ञापक्षेसखिभिन्नावित्यर्थः पर्युदस्यमानसमर्पकसखिशब्दे अस्यतदंतग्रहणंतुनविशेष्यासन्निधानादितिभावः एतत्सर्वेहद

स.श.
शे.सु.
४४

चानुरोधेन यस्येति चेति सूत्रभाष्यात् सखिशब्दस्य तदवयवे लक्षणया सख्यवयवभिन्नयोरिदुतोरित्यर्थः यथा आत्वसंतस्येति सूत्रे धातोरित्यत्र इकः धातुपदस्यापि ग्रह णादिति सिध्यर्थं धात्ववयवे लक्षणा क्रियते तद्वत् संज्ञापक्षेप्यसखीति योरेव विशेषणं न तु तदन्तविधिः उतश्च प्रत्ययादिति वत्तत्र च सख्यवयवभिन्ने वर्णौ यंतमि त्यर्थः अदन्तविधिश्च शेषपदार्थविशेषणतयाप्येवं च सकृते नैव घिसंज्ञेति लभ्यते तत्र हि भाष्ये इवर्णस्य किमुदाहरणमतिसखेरागच्छतीति यद्यत्र लोपो न स्यात्तदा क ण्दीर्घः स्यात् पूर्वोत्तवद्भावेन सखिशब्दत्वात् अतिदेशविषये प्रतिपदोक्तपरिभाषाया अप्रवृत्त्या उपसर्जनह्रस्वत्वे कृतेपि घिसंज्ञा न स्यात् लोपे तु लक्षणप्रतिपदोक्तपरिभाषया न दोष इत्युक्तं भवतीत्याहि विशिष्टस्य सखिभिन्नत्वेन घिसंज्ञानिर्बाधैवेति तदसंगतिः स्पष्टैव न च लोपेपि लिंगविशिष्टपरिभाषया दोषः सखिशब्दस्य तदवयवपरत्वे न प्रातिपदिकग्रहणाभावात् प्रातिपदिकत्ववदुपस्थापकपदोपादानं हि प्रातिपदिकग्रहणं ख्यत्यात्सूत्रे किमर्थं विकृतनिर्देशो न सखिपतिभ्यामित्येवोच्येत। अतिसखेरित्यत्र माभूदिति भाष्येपि ङ्यन्तप्रकृतिक एवायं विहितविशेषणाश्रयणेनैव प्रतिपदोक्तपरिभाषानाश्रयणेनैवैतत् भाष्यं प्रवृत्तमिति न तद्विरोधः इ त्यलं पतिः समास एवकार इष्टतोवधारणार्थः स्मृतिपुराणेषु पतये सखिनेत्यादि व्याकरणानिष्पन्नत्वेनासाध्वेव त्रिशंकोश्चयाज्ययाजनादाविव तपोमाहात्म्या नासाधुप्रयोगेपि ऋषीणां दोषाभावात् याज्ञिकंमन्येवासाधुप्रयोगे दोषाच्च अस्माकमपि स्मृतिपुराणाध्ययनविधिबलात्तेषां तपोबलाच्च यज्ञमध्येपि तदंतर्गत तत्पाठे दोषाभावः स्वातन्त्र्येणेदृशं प्रयुंजाना अस्मदादयः प्रत्यवयंत्येव अत एव नदीसंज्ञासूत्रे भाष्ये छंदोवत्कवयः कुर्वन्तीत्युक्त्वा न त्वेषेष्टिरस्तीत्युक्तं यूस्त्र्या ख्याविति सूत्रे हरदत्तग्रंथे स्पष्टतरं चैतत् समास इत्युक्तेर्बहुच्पूर्वेण घित्वं अत एव पतिर्वृत्तावेवेति नासूत्रि वर्णसंज्ञापक्षे पत्यवयवेकार इत्यर्थः तदंतसंज्ञापक्षे पत्य वयवेकारांत इत्यर्थः सूत्रे पतिशब्दश्च तदवयवेकारे लाक्षणिकः एतेन शेषो घ्यसखितो पतिः समास एवेति सूत्र्यतामित्यपास्तं यस्येति चेति सूत्रस्थभाष्यरीत्या सुपतिना सुसख्या इत्यादीष्टसिध्या तथा न्यासस्य कर्तुमशक्यत्वादिति स्पष्टमेवेति दिक् नित्यं बहुवचनांत इति किमः संख्यापरिमाणे इत्यनेन किंशब्दाद्डतौ संख्या वक्ति कः संख्याविषयप्रश्ने डतिरिति भाष्ये स्पष्टत्वादिति भावः बहुगणसंख्याप्रदेशेषु एतत्संज्ञाकरणाज्ञानरूपप्रकरणासत्वेपि न त्वकृत्रिमाकृत्रिमन्यायं स्म स्यन्ते कृत्रिमः कर्तरि कर्मेत्यादाविव अत एव संख्याया अतिशदंताया इति शदंतपर्युदासः संगच्छते न हि शदंता कृत्रिमा संख्यास्ति न स्मात्संज्ञाप्रदेशेषु अभ्युपग। ४४

तिः किंच लोकप्रसिद्धमहासंज्ञाकरणेन प्रदेशेषु लोकप्रसिद्धार्थस्यावगतिरिति स्पष्टं भाष्ये अत एव पंचकत्वादिरूपादिसिद्धिः एतन्न्यायोपयोगस्त्वभ्यासाम्रेडितादिसंज्ञा
विषये बहुवचने सूत्रे बहुगणग्रहणं तु तयोर्नियतविषयपरिच्छेदहेतुत्वाभावेनासंख्यात्वात् बहुत्वादि द्वित्र्यादिसंख्याव्यापको धर्मविशेषः अत एव भाष्ये एतत्सूत्रं प्रति दृष्टा
र्थेयदयमेतत्संख्यासंज्ञास्य त्याहेत्युक्तं यत्तु भाष्ये एकादिकया चापि संख्यायत इत्युक्तं तस्यायमर्थः बह्वादिकयापि स्वव्याप्यत्रित्वादिसंख्यया संख्याय ते बहुगणशब्दौ
पि संख्यानकरणीभूतार्थविषयप्रश्नार्थकतया संख्यानकरणं एवं वत्वंतेष्पूह्य यद्वा चापि शब्दो वाक्यालंकारे एकादिकया संख्यायते सापि प्रदेशेषु उपयोगः स्यादित्येतत्।
इति लोकप्रसिद्धमहासंज्ञाकरणमिति तदर्थः एतेनार्थात्संख्यावृत्वे सति बहुत्ववाचिनश्चैत्संख्याकार्ये तर्हि बहुगणयोरेवेति नियमार्थेन तु तेन भूर्यादीनां न तेषां वैपुल्या
विशालता विशेष्यविशेषणत्वाभ्यां अबहुत्ववाचिन एकशब्दस्य बहुर्थमात्रवाचिनां भूर्यादीनां च न स्याद्वृत्तिः यद्वा नियतसंख्यावाचिनां चेत् बहुगणयोरेवेति घर्थांतस्य चित्याद्वैपुल्य
नियमः अनंतशब्दवत् अनंतवाचिशतशब्दस्य संख्याकार्याभाव इष्ट एव तत्पूपास्त संघवैपुल्यवाचकयोर्नेह ग्रहणं परस्परसाहचर्यात्त्र्यादिसंख्याव्यापकधे
मेवाचिनोरेव ग्रहणात् वतु इति सानुबंधनिर्देशो ब्राह्मणवदित्यादिव्यावृत्त्यर्थः डतिस्तद्धितस्य वतुसाहचर्याद्दित्यलं स्नांतेत्यतः षडिति वर्त्तते संख्येति च प्रकृतं
तदाह उत्पंतेति अत एव षट्कतीतिइडनुवादेन शस्विहितः अत एव संज्ञाविधावपि प्रत्ययग्रहणे तदंतग्रहणं संख्येतिकिं पतयः प्रत्ययस्य अनेकसंज्ञाकरणा दा
वृत्त्या विभक्तिविपरिणामेन च नेद्धावितसंज्ञाश्रयणमतो न संकरः तेन हंतीत्यादौ श्नावितिन द्वित्वं तदाह लुक् श्लु लुप् शब्दैरिति अदर्शनं लोप इत्यतो दर्शनमित्य।
नुवर्त्तते प्रदेशेषु भाविसंज्ञाविज्ञानात् नान्योन्याश्रयः एकसंज्ञाप्रकरणादन्यदेशस्यत्वेन लोपसंज्ञया आसांसमावेशः तेन प्रत्ययलक्षणसिद्धिः षड्भ्यो जश्श
सोः शिरित्यतो जश्शसोरिति वर्त्तते षड्भ्य इति विहितविशेषणं तेन गौणे न परमपंचेत्यादौ तु विशिष्टस्यापि संख्याप्रकारकसंख्येयविशेष्यकबोधजनकत्वेन सं
ख्यावाचित्वात्षट्त्वमस्त्येवेति न दोषः स्पष्टं चेदं षट्प्रधान एष समास इत्यादिना सर्वादिसूत्रे भाष्ये कैयटस्य तु प्रमाद इत्यन्यत्र निरूपितं प्रत्ययलोपे प्रत्ययस्येत्यनुवृत्त्या
सिद्ध आद्यं प्रत्ययग्रहणं अवयवलोपे माभूत् तेनाघ्नीयेत्यादौ नानुनासिकलोप इति स्पष्टं भाष्ये इदमेव प्रत्ययग्रहणं ज्ञापकमवयवेपि प्रत्ययत्वव्यवहारस्य एवं।
कृते संप्रत्ययपयोरिद्धृपधस्येत्यनयोर्लक्षणादिनाश्रयणीयं सात्पदाद्योरितिचचरितार्थं स्थानिवत्त्वेनासिद्धइदंवचनं नियमार्थमिति भाष्यं प्रत्ययस्यासाधारणं

ल॰ शा॰ अथ त्रायीयतेतत्रैवेति नचैवंदाधर्मेइतिसूत्रे तेतिके इतिकिंनिपात्यते आत्मनेपदं नैतदस्ति अनुदात्तङित इत्येव सिद्धं नियमार्थं तर्हि भविष्यति अत्रैव यङ्लुगन्तस्य ना।
श॰ शे॰ यत्रैवमिति दितिस्तुक्तं अस्यनियमत्वे तेनात्मनेपदं दुर्लभं ङित्त्वस्य प्रत्ययाप्रत्ययसाधारणत्वादिति वाच्यं आत्मनेपदमित्यस्यैव सिद्धान्तमुक्तित्वात् ततो विध्यर्थमिदमिति
४५ वार्त्तिकानुसारिणा अनुदात्तङित इत्येव सिद्धमिति शंकितेतदनुसार्येकदेशिन एतत्समाधानमित्यदोषादित्यन्यत्रवि स्तरः प्रत्ययलोपे प्रत्ययवदित्येव सिद्धे लक्षणग्रह।
णं प्रत्ययनिमित्तकमेव न तु प्रत्ययस्थानिकमित्यर्थलाभार्थं तेन नरवमिच्छ इत्यादावेसादिकं नेत्येके अतिदेशनाहार्यतद्बुद्धिसंपादनेपुच्चारणप्रसंगमूलपषष्ठ्य
र्थाभावान्नैसादीति तदर्थमित्यपरे कार्यमिति प्राधान्यात्कार्यातिदेशोयमिति भावः इहापि परिवीरिति शास्त्रपरविप्रतिषेधेन परत्वाद्दीर्घत्वं भविष्यती
ति भाष्येण तृज्वत्सूत्रे शास्त्रकार्यातिदेशयोरैक्यकथनेन चातिदिश्यमानकार्याणामुत्पत्तिदेश एवदेशइत्यंगीकारात्परिवीरित्यत्र तु दीर्घापर्यायेण न किंतु पर।
त्वात् दीर्घ एव अन्यथा नेनैवोभयोर्विधानात्परत्वाभावे पर्यायो दुर्वार इति बोध्यं तदेतद् जसि च तिसृणो ग्रान्न इति जसि चेति विहितेन गुणेनेन प्राप्नोदित्यर्थः नलुमतालुप्तप्रत्ययकालुमंत
तस्य दाहल्लुगित्यादि अंगकार्यमिति लुप्तप्रत्यये परतो यत्पूर्वं तत्प्रकृति भूतोलुप्त्यांगसंज्ञकमुद्दिश्यकं यत्कार्यं आगमनांगवेत्यर्थः तेन पंचेत्यादौ पदसंज्ञा भव
ति राजपुरुषादौ भसंज्ञा च न अंगसंज्ञा तु यथोद्देशत्वात्प्रत्ययसत्ताकाले जातातिष्ठत्येव तत्काले कार्याभावात् अप्रवृत्तावपि प्रत्ययलक्षणेन सा तस्याः लब्धाम
संज्ञककार्यत्वाभावेन निषेधाप्रवृत्तेः स्पष्टं चेदं युवोरनाकावितिसूत्रे कैयटे न लुमतेत्यस्यानित्यत्वादंगसंज्ञाया मप्रवृत्तिरितितत्त्वमिति कश्चित् अत एव पंचभिः
क्रोष्टीभिः क्रीतं कुलमिति तद्धितार्थेति समासे क्रोष्ट्रय इति लुकि सुक्तद्धितेति सौ प्रत्ययलुकि पंचक्रोष्टु इत्यत्र तृज्वत्वं न इत्युक्तं भाष्ये तृज्वदिति सूत्रे न चापरं निमित्तमा
श्रीयते किं तर्ह्यंगस्य क्रोष्टुस्तृज्वदिति अंगसंज्ञा च भवति प्रत्ययलक्षणेनेति न चोरस्त्ववत्तृज्वत्वेपि परनिमित्ताश्रयणमिति पंचक्रोष्टु इत्यस्यासिद्धिरिति वाच्यं उर
दित्यत्र शश्वत्पुनः परस्य निमित्तत्वानाश्रयणेप्यंगसंज्ञाद्वारो रत्वस्यापि परनिमित्तत्वेन स्थानिवत्त्वप्रवृत्तिरित्येव लिङ्ग्यभ्यासस्येति सूत्रस्थभाष्याशयात् नियमेन प
रत्वेन [illegible] परनिमित्तत्वात् अत एव चर्करीत्यजघोड इत्यादावलप्रवृत्तिः अचिक्षणु इत्यादावजादिप्रत्यय इत्यर्थस्तु अंगस्येतिषष्ठ्या निमित्त इत्यध्याहारेण सम॰
प्रत्यादे अतोपाय कथंचिदुपपाद्यः [illegible]धिकारस्थेषु कार्यकालस्याभावाच्च वस्तुतस्तु कार्यकालपक्षेपि क्रोष्टुशब्दः प्रत्ययेंगसंज्ञो भवति अंगसंज्ञक ४५

स्यात्तस्यातृज्वत्वं स्त्रियामित्येतदर्थं इति तृज्वत्त्वमनैमित्तिकमेव अदित्याद्योगतिरू तेव पदैकवाक्यतयान्वयस्तु संज्ञासूत्राणां दुर्लभ इत्यन्यत्र निरूपितं अतेन ऊरदित्यादौ आ
द्धत्येव [illegible] सिद्धतापि वक्तव्यमिति तस्यानुरोधान्नतथा प्रकृते तस्यानुरोधादेवेति तदाशयः चर्करीत्यं ज घोइत्यादौ तु न लुमतेति निषेधान्नित्यत्वादत्व प्रवृत्तिः त्रपो
इत्यादौ [illegible] संगाक्षिप्तप्रत्ययनिमित्तलुकि भवत्येवेति तु श्रुवेहितमित्यादौ उवङा पृत्या चिंत्यमित्यपास्तं त्रिप्रभृतय इति ङेप्रथमयोरिति सूत्रे युष्मानिःसा
द्दीनस्माच्छेसो न इति उपन्यासपरेण भाष्येणास्वमोर्नपुंसकादिति सूत्रे शिशीलुगादिभिर्युष्मदाद्यादेशानां विप्रतिषेधपरेण वार्तिके न तद्भाष्येण च न षष्ठीति निषेधे
न च लिंगसत्तावोधनेऽपि लिंगबोधकप्रत्ययानुत्पत्त्या रूपेन विशेषइत्यर्थः सामान्याकमिति सूत्रस्यस्यालिंगे युष्मदस्मदी इत्य स्यपदांतरसंनिधाने विना लिंगवि
शेषायुष्मदस्मच्छब्दमात्रान्नप्रतीयत इत्यर्थ इति दिक् त्रेस्त्रयः अयंनसांतो निर्जात्रयाणामिति निर्देशात् त्रेरयङ् तु न कृतः अयङ्यो त्पादाविव उच्चारणार्थश्च
शंकानिरासाय केचिदिति आमि सर्वनाम्न इति साहचर्यादिति भावः वस्त्विति साहचर्य स्यासार्वत्रिकत्वात् सूत्रांतरस्य तदाश्रयणे हजरमानाभावाच्चेति भा
वः न च गौणमुख्यन्यायेनात्रेति वाच्यं अप्रसिद्धत्वे गौणलाक्षणिकत्वान्यतररूपगौणत्वाभावात् अत एवोपसर्जनानां सर्वनामत्वप्रतिषेधश्चारब्धो वार्तिककृता
इतरविशेषणतामात्रेण तत्त्वाभावात् पदकार्य एव तत्प्रसक्तोऽस्त्वित्यन्यत्र विस्तरः द्विशब्देन नित्यं द्विवचनात इति संख्यापरत्वेऽपीत्यर्थः अत एव कस्य द्वित्वे इत्यर्थे
कस्य द्वयोरिति भाष्ये वहुष्विति सूत्रे प्रयुक्तं त्यदादौ अष्टन आ विभक्ताविर्त्यतो विभक्तावित्यनुवर्तते तत्फलं तत्तुल्यं सो लुकृत्स्न द्वित्विरिति भाष्यकारस्येति भा
वः द्विपर्यंतानां किमिति युष्मदस्मदोरन्त्यस्य त्वलोपे वाधात् किमः कादेशविधानाच्चेति प्रश्नः भवान्भवंतावित्यप्युक्त्व य: औतु सवर्णादीर्घ इति इदं संभावनामा
त्रेणा एषांङौ ई द्वितीयाचसप्तम्यर्थे इति भाष्यप्रामाण्येनानभिधानात् क्विबंतवातेति इत्वमवकारादावितिवार्तिकस्यापावान इत्यादौ नावनिपासाधनरूपस्पृतत्वात्
स्यानभोग्यस्य च फलैक्यायेह शेभ्यः क्विपोनभिधानमावश्यकमिति धीवरी पीवरीत्यादि ध्याप्योः संप्रसारणं च क्विप् कृतनिपातनेनार्थकाङ्क्षनस्तनस्त्वनांस्थूलेऽपि भाष्यभागेपि
इति सूत्रे भाष्यपर्यालोचनया सिद्धा द्वार्तिकान्सिद्ध धीध्याय तेर्दे धातवे इति क्विब्वचीति वार्तिकस्य भाष्ये धातवेत्युक्तिरेकदेशिनः शंस्याइत्यत्र क्विजेवेति न दोषः मी
ङेमानि स्त्रीकारांतात्क्विबित्येके वातप्रमीर्निर्देशो मगाक्ततिर्ज्ञुविशेषः तद्द्भ्रयसीति इयसो बहुव्रीहेर्नेति निषेधान्नोपसर्जनह्रस्वः यूस्त्माः दीर्घयोरेवग्रहणम्वा

ल॰ श॰ ख्यातौ न वा छन्दसीति पूर्वसवर्णे सिद्धिः पूर्किंमात्रे आण्नद्या इति न स्त्रियमाच स्यातेस्याख्यौ मूलविभुजादित्वात्कः स्याख्यावित्युपस्थितस्त्रीवाचकशब्दस्य विशे
शे॰ सु॰ षणत्वात्तदन्तविधिरित्याह ईदूदन्ताविति आच्छीनद्योरित्यादौ नदीशब्देस्तदवयवे लक्षणा बोध्या आख्याग्रहणान्नित्यत्वलाभस्तदाह नित्यस्त्रीलिंगाविति तत्फ
४६ लन्तु ग्रामण्यादेर्व्यावृत्तिः नित्यस्त्रीत्वं च प्रवृत्तिनिमित्ते कस्य लिंगान्तरविशिष्टार्थानभिधायकत्वं ड्यन्तकुमार्यादीनां क्वचिन्निवृत्ते न त्रिलिंगे न समानाकृत्या नित्य।
स्त्रीत्वाभाववारणाय प्रवृत्तिनिमित्ते कस्य इति नन्वेवं बहुश्रेयसीशब्दस्य नदीत्वं न स्यादत आह प्रथमेति अर्थान्तरसंक्रमात्पूर्वं विद्यमानं नित्यस्त्रीत्वमादाय तस्यार्थान्तर
संक्रमेपि नदीत्वं वक्तव्यमित्यर्थः यथोद्देशे पूर्वं प्रवृत्तसंज्ञामादायैव कार्यं कार्यकालपक्षेपि कुमारीत्यादौ प्रकृतिभूतकुमारीशब्दस्य नित्यस्त्रीत्वेन वृत्तावपि विशेष।
णतया नित्यस्त्रीलिंगरूपार्थबोधकत्वेन न नदीसंज्ञा समासे तु स्पष्टैव तदवयवस्य प्रा॰ प्तिः तन्मात्रबोधकत्वनिवेशे प्राधान्येन तद्बोधकत्वनिवेशावानमानं तदुक्तं भा।
ष्ये एवं स्त्रीविषयत्वात्सिद्धं अवयवोत्र स्त्रीविषयस्तदाश्रया नदीसंज्ञा भविष्यतीति आकडारस्थसंज्ञानां कार्यकालत्वाभावात् अन्यथा तत्तद्विध्येकवाक्य
तापन्नयोः कथं बाध्यबाधकभावः स्यादिति बोध्यमिति केचित् हे बहुश्रेयसीति ह्रस्वस्य तेगुणस्तु न प्रक्रियालाघवाय यांवार्थानेह्रस्वः ह्रस्वं न द्योर्गुण इत्येव वाच्ये ह्र
स्वविधानसामर्थ्यात् जसि चेत्यत्रैकदेशस्वरितत्वप्रतिज्ञया ह्रस्वपदस्यैवानुवृत्तिरिति भाष्ये स्पष्टं अंबार्थानामपि गुणस्तु वक्तुमशक्यः अनः क्लीवं जले शोके
मातृसंबन्धयोरपीति भसाघु कानः शब्दस्यांवार्थत्वेन गुणापत्तेः ह्रस्वग्रहणे त्वचइत्युपस्थित्या जंतांवार्थग्रहणान्न दोषः तस्य नपुंसकत्वेपि हे वारे इतिवत्प्रसं
गुणः स्यादेव गुणाश्रुत्येकपरिभाषोपस्थितौ त्वंवेत्यादावप्यनापत्तिः अयं च ह्रस्वो नेत्रस्येति न्यायात् ह्रस्वस्य गुण इत्यस्यैव बाधकः तेन मातस्त्रियत्रच्छेनो ओति
गुणो भवत्येवेति दिक् आटश्च नमाड्योग इति सूत्रे भाष्योक्ते आटश्चेति न्यासे तु वृद्धिरेचीति बोध्यं अत्राड्जुवक्तुमशक्यः अस्वपोहसन्नित्यत्र वृद्धिर्याणाया
टश्चेत्यत्र यान्तावित्यपकर्षेण वृध्यनापत्तेः वृद्धिरेचीत्यस्य नुपररूपं बाधकमिति बोध्यं ङेरिति सप्तम्येकवचनं व्याख्यानात् इह परत्वादिति सकृद्गतिन्यायाश्र
यणादिति भावः स्पष्टं चेदं ह्रस्व न द्यापइत्यत्र भाष्ये यद्यपीहाड्पवादो नद्यामपूर्वं यानवकाशत्वात् अपवादो नुकृदीर्घत्वस्येति दीर्घो कित इति सूत्रभाष्येउक्तत्वे राम॰
मादेशयोरपि तत्त्वसत्त्वात्तथापि अनकाशत्वेन बाधे अपवादप्रवृत्त्येनान्तमुत्सर्गप्रवृत्तेर्न दोषः अत एव न गणोरीत्वमपवादत्वाद्धलादिः शेषं बाधते किं न त्वेन व॥ ४६

काशात्वादित्ति गुणोपइ लुकोरितिसूत्रभाष्ये उक्तं पादः पदितिसूत्रस्थे शब्दांतरश्च स्याः नित्ययो राडामोः परत्वादामिति भाष्यं त्वेकदेश्युक्तिरिति बोध्यं अड्यंतत्वादि
तिलसेऽध्रुवे त्यौणादिके प्रत्ययांतत्वादिति भावः कुमारीति ह्रस्वविधायके शास्त्रेऽप्युपसर्जनग्रहणाज्ञो स्त्रियोरिति ह्रस्वो न अचिश्नुधातुभ्रूशब्दोऽव्युत्पन्नं प्रातिपदिकं अ
मेइनस्य यांजोवा इहप्वोरिति धातोः समानाधिकरणं विशेषणं तदा हइवर्णो वर्णो तद्धातोरिति इत्यस्यैति इत्यंतस्येत्यर्थः तेन सुभ्रुवाविति सिद्धं अंतरेति स्थानेतद्धिभा
वः प्वोरिति किं वव्रे अविविकं युयात् इतोयङीति सुधीशब्दे यणो निषेधारंभेणात्र प्रकरणे धातोः स्वरूपग्रहणे इति परिभाषाया अप्रवृत्तिरिति भावः एरनेकाचो
धात्ववयवसंयोगपूर्वो न भवतीति धात्ववयवसंयोगभिन्नपूर्व इत्यर्थः तद्भिन्नश्च धात्ववयवपूर्वस्यैवेति उद्दियावित्यादौ न दोषः असंयोगादित्येव धात्ववयवसंयोग
भिन्नात्परस्येत्यर्थेन सिद्धे पूर्वग्रहणंस्पष्टार्थं एः किं असंयोगपूर्वग्रहणमिवर्णस्य विशेषणं यथास्यादंगस्य विशेषणं माभूदिति तेन पपक्रियावित्यादौ नातिप्रसंगः
लुलवतुरित्यादौ तु नातिप्रसंगः ओः सुपीति नियमात् विपरीतनियमस्तु न सुधीशब्दे ऽचि सुपि यणो निषेधारंभात् कुमार्यावित्ति अंतर्वर्तिविभक्त्यापदत्वा।
द्वाकलं तु अत्र न न ओ इति निषेधात् प्रधीरिति प्रकृष्टं ध्यायतीति विग्रहे नित्यस्त्रीत्वाभावान्न नदीत्वं प्रकृष्टधीर्यस्येति विग्रहे तु नदीत्वं ग्रामण्यीरिति अग्रग्रामाभ्यां नयते
रितिणत्वं गतिकारकपूर्वस्यैवेति भाष्ये पठ्यते सत्तु नियमः तेन गतिकारकभिन्नपूर्वस्य नेति फलितं तद्भिन्नं च तत्सदृशं सपूर्वपदमेव तेन निन्यतुरित्यादौ यणत
दाहगतिकारकेतिपदत्वत्र मतिसमासे नित्याधिकारस्य एवं प्रतिपदोक्तत्वाद्ग्रहणं तद्धितेन भाष्ये पूर्वपदग्रहणाभावेन समासोपस्थितेरभावेन विशिष्टरूपोपादान
विषयप्रतिपदोक्तपरिभाषाया अप्रवृत्तेः अत एव नदीसंज्ञासूत्रस्थः प्रकृष्टाधीर्यस्येति विग्रहाभिप्रायेण प्रवृत्तः प्रध्यै ब्राह्मण्यै इति भाष्यप्रयोगः संगच्छते शुद्धधियाविति शु
द्धाधीर्यस्येति विग्रहः शुद्धं ध्यायतीति विग्रहे यणेव आद्ये सूत्वभूतार्थक धीशब्दार्थविशेषणत्वात् शुद्धत्वस्य कथमपि न कारकत्वमिति भावः कथंतर्हीति दुर्ध्या
यतीति तु दुष्टा धीर्ध्यानं येषामिति वृश्चिकाद्वेरिति विग्रहाभिप्रायेण प्रश्नः दुःस्थितेति दुःशब्दोपात्तदुष्टत्वस्य स्थितिक्रियाविशेषणत्वमिति भावः प्रकृष्टाधी
ः प्रादौ प्रकर्षः प्रशब्दार्थो धीशब्दोपात्तधात्वर्थविशेषणमिति यणा भवत्येव यत्क्रियेति या चासौ क्रिया चेति विग्रहः तं प्रति तद्वाचकं प्रति यद्वा यस्य धातोर्वाच्या।
पा क्रिया समाख्याता इत्यर्थः नेहेति ततश्च संबंधसामान्यषष्ठ्येव समासः मीत्रार्थानामिति तु हेतुत्वप्रकारकबोधजनकोपयावाधनार्थं विभक्तिप्रकरणे तु न्यस्तं तं कारकत्वप्र

ल॰ श॰ कृत्कार्यानापत्तेरितिभावः किंच हेतुत्वाविवक्षायांसंबंधत्वेनविवक्षयाषष्टीसत्वारंभेपीत्यपिवोध्यंत्रमुच्चयेनाह दृष्टिकसंबधिनीति अत्रपूर्वपदमंगेतोत्तरपद ।

शे॰ सु॰ लोपःशाकपार्थिवादित्वात् नभूः अनंतरस्येतिन्यायेनैरनेकाचश्चःसुपीत्यनयोरेवनिषेधः सुपीतिचानुवर्त्ततेतदाह सुपीति लोपाविति अतोलोपःलोपोव्योरित्या

४० पोमितिभावः यलोपेनिषेधात्लोपोनस्थानिवत् वेरपृक्तलोपाद्धलिलोपःपूर्वमिष्यते स्थानिवत्त्वादिति एवंचयणादेशेयलोपेसत्स्वइतिस्यादितिभावः अंतरंगतिविभ

क्तपरत्वान्नपदांतेतिनिषेधस्तुन स्थानिवत्त्वस्यनःकोइतिसामान्यापेक्षनियमेनादत्वान्तपरपदस्याजादेशस्येवतेनस्थानिवत्त्वनिषेधाच्चकिंबपेसक्यसंबंधियलोपस्य

यणिवहिरंगासिद्धत्वंतुन अनित्यत्वात् कोलुभमितिभावेकः लोपइत्यर्थः गोमत्यतेरप्रत्ययेगोमानितिभाष्योक्तेरस्याप्यर्थस्यक्वचिद्‌गीकारः कौविधिमतिनेत्येवत्तु

सार्वत्रिकमित्यन्यत्रविस्तरः अनडिति अभिव्यक्तपदार्थायेइतिन्यायस्तुगौणमुख्यन्यायवत्पदकार्यविषयएवेतिभावः दीर्घस्यापीति प्रयोगस्थपकारांतानुक

रणसूत्रेऽकारश्चोच्चारणार्थइतिभावः तुनीरित्या द्विवादिभ्यःस्वायोमःमत्वोन्यनस्यामितिनित्वमत्वेशुषःकःपचोवइतिकत्वक्त्वे व्याख्यानात्साधान्याच्चरू

पातिदेशोयमित्याह क्रोष्टुशब्दइति नचोदात्तकरकारविशिष्टमतिदिश्यतेतज्वदितिचकारोच्चारणात् तेनक्रोष्ट्रेत्यादावुदात्तयणाइतिस्वरसिद्धिर्वोध्या पक्षांतरे

स्तुनातिदेशः अर्थतत्र्यातंर्याभावात् इदंसूत्रंस्त्रियांचेतिचप्रयोगनियमफलकमितिवोध्यं अपव्रन् नतुव्युत्पत्तिपक्षेतृन्नंतत्वात्तजंतत्वाद्वादीर्घोसिद्धेनत्रारिपदरण

व्यर्थमतआह नियमार्थमिति अन्येषामुणादिव्युत्पन्नानांसंज्ञाशब्दानांनेतिनेष्ट्रादयोप्युणादयएवेतिभावः तेषांतृन्निति सूत्रस्यवार्तिकेनव्युत्पादनान्नप्रा

दीत्यादिग्रहणेनप्रशास्तृशब्दस्यैवग्रहणमित्यन्ये अव्युत्पत्तिपक्षेतुविध्यर्थमेवेतिवोध्य भाष्यप्रयोगादिति एवंचोणादिष्वस्यव्युत्पादनमप्रामाणिकमिति ।

भावः पंकजादिवद्योगरूढोयं यत्वोणादिकत्वमेवास्यस्वीकृत्यभाष्यप्रयोगादेवदीर्घत्वमित्युक्तंतितेमान्याःभाष्यकृतान्यप्रयोगस्योदाहरणत्वेनदातृप्यस्यभाष्य

प्रयोगत्वाभावात् एवुल्तृचाविविभाष्येतुतृचश्चकारोव्यर्थःनचात्रन्तृजित्याद्यौविशेषणार्थःतृइत्येवसिद्धेःनचतृइत्युच्यमानेमातरौपितरौवित्यादौअप्राप्तो

ति तत्राहितप्रत्ययोनिरनुबंधकइतिवाच्यं नप्तृग्रहणस्ययोनिसंबंधवाचिनांचेदस्येवनान्येषांयोनिसंबंधवाचिनामितिनियमादित्युक्तं नेष्टत्व ष्टृहोतृपोतृ राम॰

णांतृन्नंतत्वस्यप्रशास्तुस्तृजंतत्वस्यतृन्निति सूत्रेभाष्यवार्तिकयोरुक्तत्वेनतेषांग्रहणंप्रपंचार्थं एवंचयथान्यासेनियमफलंचिंत्यं क्रोष्टेति अनडिसंवेना ४०

मस्थाने चेति दीर्घः प्रथमोपस्थितत्वात् क्रोष्टुशब्दस्यायमर्थे तु तल्लेखः यद्वा विशेषविहितत्वात् शीघ्रोपस्थितिकत्वेन स एव न्याय्यः विभाषात् अयमपि नियम
मस्त्वतृतीयादावन्ये वोभयमिति नेन न्यामादोषासिक्रोष्टुपत्रइत्यादौ च न दोषः सर्वत्र विशिष्टाभावस्य सुलभत्वात् तृज्वत्क्रोष्टुः स्त्रियां च त्याभ्यां सर्वनामस्थाने ।
स्त्रियां च तृजंतरूपविधानेन तयोः प्रयोगनियमार्थत्वं फलति एतेन तृज्वत् सर्वनामस्थान एवेति नियमादिदं विध्यर्थमित्यपरास्तम् न चैवमपि क्रोष्टूनित्याद्य
संगतमन्यत्र तृजंतस्यैव प्रयोगेणाप्युक्तनियमस्य चारितार्थ्यादिति वाच्यं तृज्वत्क्रोष्टुरिति योगविभागस्यैवं सति वैयर्थ्यापत्तेः न च तद्धितेष्वचामादेरिति क्रोष्टु ।
लाटृहीति सूत्रयोः क्रौष्टुः क्रौष्ट्रीया इति भाष्यप्रयोगासंगतिरिति वाच्यं अकारांतस्यैव ऋषिवाचकत्वेनादोषात् इदं सूत्रत्रयं शृगालवाचिक्रोष्टुक्रोष्टुशब्द ।
याद्येवस्यार्थमित्यवधेयं तदुक्तं भाष्ये तृज्वद्भावविषये तृजंते मृगवाचीति तत्तृतीयाद्यजादिविभक्तिषु तृजंतं तुन्नंतं च मृगवाचीति च अनेन तुन्यन्यत्र तुन्नंत
मेवेत्यपि सूचितमिति दिक् ऋत उत् तपरत्वं भाव्यमानस्यापि क्वचित्सवर्णग्राहकताज्ञापनद्वारा नर्थतो द्विमात्रनिवृत्त्यर्थं तेनामू इत्यादि सिद्धिरिति ह्रस्वरिति
सूत्रे कैयटः यत्तु तपरत्वं ढ्रलोप इति दीर्घबाधनार्थमिति तन्न सुपत्रवाजिता वाणा ज्वलिता इव पन्नगाः नैकेनोरस्य भासंतस्सवितू रश्मयो यस्यर्थेति तिरामा
यणप्रयोगविरोधात् उरण् रपर इति सूत्रे अणग्रहणाभावे उरपर इति भाष्यप्रयोगविरोधाच्च सख्यैवेति संयोगांतलोपेन सिद्धे नियमार्थतेनोर्गित्यादौ नेति भावः विपरीत
नियमस्तु न पुमान् स्त्रियेति निर्देशात् एरनेकाच इति सूत्रे सुधीरिति पदरहितसानुवृत्तात् ततिविशेषणसवार्णिकं चानुवर्तते इत्याह धात्ववयवेत्यादि गतिनिव स
क्तलस्वावित्यत्र क्रियाविशेषणत्वेन कर्मत्वाद्यण् न भूसुधियोरिति निषेधे प्राप्ते आह वर्षाभ्वश्चेति वर्षाभूर्ददुरे पुमान् स्वार्थिक इति स्वस्याः प्रकृतेरर्थः स्वार्थः
तस्मिन् वद्धत्यर्थे अध्यात्मादित्वाट्ठञ् द्वारादिषु स्वग्रामस्वाध्याययोः पाठेन स्वशब्दादिकेदंतये रिवेति नियमार्थके नैजागमे न पुनर्भूशब्दस्य ह्रस्यानित्यत्वोत्वा
दाहैयाभिक इति ह्रस्वदंताः वर्णैकदेशानां वर्णग्रहणेनाग्रहणे रेफाभावादाह अवर्णादिति व्युत्पत्तिपक्ष इति अव्युत्पत्तिपक्षेऽवादिष्वपाठाद्दीर्घशंकैव नेति भावः व्यु
त्पत्तिपक्षे निरनुबंधक तृप्रत्ययांता एवेति ण्वुल्तृचाविति सूत्रस्य भाष्ये स्वरस इत्यदंताः वैकल्पिकेति पत्तदे तेम्प इत्यत्र त्यदाद्यत्वकरणादतिदेशस्य स्त्रिय इत्यादौ धा
त्वर्थकरणे विभक्तिकरणेन वैकल्पिकत्वस्य च ज्ञापनादिति भावः अनुकरणस्यानुकार्यशब्दस्वरूपमात्रेमर्थ इति प्रातिपदिकत्वं अनुकार्यमनुकरणाद्भिन्नं

सु॰ श॰ मेवेत्यन्तमतो ह्रस्व इति सूत्रे भाष्ये स्पष्टं ईषदानुपूर्व्यां व्यत्यये पि वाचकत्वादृश्यादर्थोपस्थापकत्वमिति अत्र कैयटे प्राग्दीव्यतोऽणिति सूत्रे भाष्ये स्पष्टं अत एव किरत्यादि
श॰ सु॰ निबाधः भूम्नामित्यादौ त्विनस्य वनिर्देशात् कदाचिदनुकरणाद्धि भक्त्यभावोपि स च सूत्रेष्वेवेति प्राञ्चः णिकाः गवित्ययमाहेति वा तस्यैवानुकरणमनुकार्यस्वरू
४८ पग्रहणमित्याचनवलोपः झलां जशित्यादौ जश्त्वाभाववदित्याहुः इत्वेइति किरश्चपचम्यइत्यादनिर्देशाद्धातुप्रत्ययेपि न सहतिरिति भावः कीरिति कृधातुस्यार्थः।
सुकोत्वेति अत उदित्यत्र लमप्यतएव न अत एव ग्रोयङीतिनिर्देशः संगच्छते इत्यूदंता अनङिति ऋल्कृणोयोः सावर्ण्यादिति भावः गम्हनिति लृवर्णस्य दीर्घाभावादृवर्णा एवे
तिभावः ननु तुल्यास्यसूत्रभाष्यकृता ऋति ऋ वेत्यादिविधेययोरेफद्वयगर्भलद्वयगर्भयोरस्त्वदीर्घत्वांगीकारेणात्र ह्लिकारकई षत्स्पृष्टो दुर्वारः आमि च तथा
धातूणामित्यत्र रेफद्वयगर्भोपीति चेन्न अकः सवर्णे इति सूत्रे उक्तोत्तरत्वात् गम्लेति पञ्चुलणसूत्रे उरण्रपर इत्यत्राजिनिवर्तक्येऽण्ग्रहणसामर्थ्येनाणपूर्वे।
वेत्युक्तं भाष्ये लृकारस्य परिणिहितत्र लपरत्वार्थं परेणाणग्रहणं स्यादिति सामर्थ्योक्तिरसंगता ऋकारस्य यणि तु रोरीति लोपेन विशेष इति तन्न ऋकारांशे ह
ल्रूपाणि रोरीतिलोपप्रवृत्त्याफलाभावेनाप्रवृत्त्या तत्वान्न च यो ल्लकारांशेपि हल्रूपाण्यप्रवृत्तिरित्याशयात् वस्तुत ईदृशानामभिधाने प्रमाणाद्दृष्टचिंत्यमेवेति
ज्ञाहेत्यर्थः लोपसञ्जेनस्येति सत्व एकादेशस्य पूर्वान्तत्वेपि लिंगाद्यन्वय्यर्थप्रतिपादकत्वाद्व्ययमिति महासंज्ञया स्यानव्यपत्वान्न विभक्तिलुक् सादेशात्पूर्वे
माङ्गुणस्तु न नेङ्स्येति ज्ञापकेन पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमेकादेशाप्रवृत्तेः न चन्नांतः पादमिति सूत्रस्थेन न चेङः पदान्तात्परो हरस्तीति भाष्येण सह विरोधा
न्तसावीदृशानां प्रयोगाः नु चित्तः सावपि पदत्वसत्वादिति वाच्यं योगविभागसिद्धस्य सोपदत्वस्य क्वाचित्कत्वेनादोषात् साव प्रयोग एवेत्यन्ये स य इति न चास्यां
नर्वर्तिविभक्त्यापदत्वादेङः पदांतादतीत्यादि दुर्वारमिति वाच्यं भाष्ये स्वादिष्विति योगं विभज्य स्वादिषु पूर्वं पदमित्यर्थः नतोऽसर्वनामस्थाने यचि सुबंतमित्यनु।
वर्तते अयचीति प्रसज्य प्रतिषेधः तेन यजादौ सर्वनामस्थाने पूर्वं पदं न मध्ये चेत्सुबंतं तदपि पदं नेति व्याख्यानेनादोषात् आतिदेशिकस्याप्ययं निषेध इति स्पष्टमेव उ
त्तरपदत्वे चापदादिविधाविति प्रतिषेधाच्च उत्तरपदस्य तद्घटितस्य वा पदत्वे कर्तव्ये अंतर्वर्तिविभक्तेः प्रत्ययलक्षणं नेति तदर्थः अतो न योगविभागमूलकप्रत्याख्यानं। राम॰
न फलभेद इति केचित् इतो दित्यतोनुवृत्तं सर्वनामस्थाने इति प्रथमया विपरिणम्यते णिदित्यनेन सामानाधिकरण्यादित्याह सर्वनामस्थानमिति तत्र णितः ४८

कार्यस्यासंभवान्नणितियत्कार्यंतद्वतिदिश्यते शसेति अचोत्पधिकारात्तङ्ङितशसोनग्रहणमितिभावः गामिति परत्वाद्वृद्धिस्तुन अनवकाशत्वेनात्वस्यापवादत्वा
दतआह ओतोणिदिति सूत्रेपतरकरणेनगस्याविवक्षितत्वमितिभावः तेनचित्रगुरित्यादौनदोषः अन्यथंयाधिकारेतदंतविधेःसत्वेस्थानिवत्वेनगोंतत्वाद्दोषःस्यादेवं म
त्वोकारांताभावाद्लिविधौस्थानिवत्वाभावाच्चनदोषः परेतुगोतोणिदितिसूत्रेभाष्यतपरत्वप्रत्याख्यातं चित्रगुरित्यादौतुनदोषःगोःपूर्वत्व गोत्वात्वस्वरे
षुस्थानिवत्त्वप्रतिषेधात्तदेह चित्रगोइत्यादौतुलाक्षणिकत्वान्नदोषइत्यत्रैवसूत्रेभाष्येस्पष्टंद्योः सर्वनामस्थानेणित्स्वंवक्तव्यमित्योतोमित्यत्रभाष्ये उक्तमित्याहुः सु
द्योरितिकेवलद्योशब्दस्यस्त्रीत्वाद्दहुव्रीहिःदत्तः विहितमिति यदितुवर्णग्रहणेपिप्रतिपदोक्तपरिभाषाप्रवर्त्ततेतदाव्यर्थोयंयत्नः ऋतोरिति ऋतः उ
र्यनेत्यर्थः यूत्वयवायावादिष्वेकादेशउदात्तेनोदात्तइत्यस्यसिद्धत्वंवक्तव्यंतत्स्थानिकार्यादौनामस्वरितत्वायेतिवार्त्तिकव्याख्यावसरेऽवादेशनात्सुदाहर
णमितिस्वरितेवतिसूत्रस्थभाष्यविरोधःप्रकृतेपूर्वपदप्रकृतिस्वरेणस्मृतस्यांतत्वेविशेषनिघातेनउशब्दस्यानुदात्तत्वादेकादेशस्यएकादेशउदात्तेनेत्युदात्तत्वे
स्मृतत्वेपादौतदुदाहरणासंभवादिति तन्न तृतीयपादस्थत्वाभिधानेपि अन्यत्रतत्सत्वेवाधकाभावात् नचगोतइतिसूत्रेद्योश्वद्विवेक्तव्येतिवार्तिकेद्योशब्दस्ये
वोपादानात्न्यैकारांताभावइतिवाच्यं उपलक्षणत्वाद्याख्यानेनादोषात् परेत्वोदशानामनभिधानेपिनक्षतिरित्याहुः रायोहलि अष्टनआइत्यतआविभक्ता
विपिनुवर्त्तते ॐ इतिअजंताःपुल्लिंगाः ॐ रमेति रमयतेःपचाद्यच्टाप् एकादेशस्यपूर्वांतत्वेनप्रातिपदिकत्वात्त्वाद्यः वाचेत्यादौतुलिंगविशिष्टपरि
भाषयाप्रात्वात्ते आपइतिप्रथमंत्यतेनसामानाधिकरण्याद्गस्यतिपंचम्याविपरिणम्यतेनविशेषणेनतदंतविधिरित्याह आवंतादिति जसःशीत्यतःशीतिवर्त
ते संबुद्धि यस्येतिलोपस्तुन अभत्वात् संवुद्धौच वहुवचनेझल्यत्परत्वादिति आङिचापइत्यतआपइतिचानुवर्त्तते एङ्ह्रस्वादिति संबुद्धौप्रतिपदोक्तत्वे
नरोप्राप्नुस्यतिकनयाहल्ड्यादिलोपात्प्रथममेव ऽनेनसंवुद्धिलोपइतिभावःसंनिपातपरिभाषात्वनित्यत्वान्नात्रप्रवर्ततेआङिचापः चेनप्रकृतमोसिवेति
परामृश्यते घेर्ङितीत्यतोनुवृत्तङितीतिआपइतिपंचम्याषष्ठ्याविपरिणम्यतेइत्याशयेनाह ङिद्वचनस्येति सर्वनाम्नःस्या आवंतात्परस्यसर्वनाम्नोविहितस्य
स्येत्यर्थः तेनमासपूर्वायैइतिसिद्धं अत्रहस्वोनस्यात्तस्यविधेपत्वेनोद्देश्यासंभवात् नापिङिद्वचनस्यव्याख्यानादतआपोह्रस्वइत्याह आपश्चेति अत्र

ल॰ श॰ स्यमुंपाठाभावेन सर्वनामत्वाभावात् तत्राह एकादेशस्येति ग्रहणादिति सर्वनामशब्देनेत्यर्थः नचैवमप्यात्वं तत्वाभावः एकादेशनिष्पन्नस्यात्वाभावात् अंत
शे॰ सु॰ सकृद्बुद्ध्यादेः परादिवद्भावेनात्वमाश्रित्यावर्तनादिति सोलोप उक्तः परादिवद्भावेन तत्वं तु न लभ्यमुभयतआश्रयणे नादिवत्वाभावादिति वाच्यं उभयतआश्रयणे न
४९ त्वाभावस्य भाष्य एव देशुक्तित्वेपि सिद्धांतिसंमतत्वाभावात् तच्चातिङ नेड्राधातौ वक्ष्यामः परे तु लिंगविशिष्टपरिभाषया नावं तस्य सर्वनामत्वं आवितत्वमुपरा
दिवद्भावेनेत्याहुः सर्वस्यामिति इहपरत्वात्स्याट्किते सक्क्यानिति न्यायात्सुब्प्रतिपदोक्तस्येति दिक्शब्दमुच्चार्य विहितत्वादस्य नत्वं योत्तरेति अनेकमन्यपदार्थे
इति बहुव्रीहिः सर्वनाम्नोवृत्तिमात्रे इति मात्रग्रहणात्सं प्रत्सर्वनामत्वेपि पुंवत्वं योत्तरेतिपत्तव्द्धुव्दाभ्यामुद्देश्यविधेयत्वप्रतीत्यायोत्तरात्वप्रकारकज्ञानवि
शिष्यास्य प्रसिद्धपूर्वोयस्याऽस्त्यर्थे नोत्तरापदस्यगुणवाचकत्वात्पूर्वनिपात इत्यन्यत्र विस्तरः स्पष्टार्थमिति दिङ्नामान्यंतराले इत्यस्य बहुव्रीह्यधिकारेसत्वा
दितिभावः अंतरार्यनगर्येइति अपुरीत्यस्य पू शब्दार्थस्यविशेष्यत्वे इतिभावः अन्नमानोमन्वेष्यं हेअंबेति ह्रस्वकृतेसंबुद्धौचेत्यत्वं न आम्नावितिप्रश्ले
षात् द्व्यक्षरं यदीति पठित्वा द्व्यक्षरांवार्थस्यैव ह्रस्व इति नियममाश्रित्य डलकवतां ह्रस्वोनेत्यस्य भाष्ये प्रत्याख्यानात् फलाभेदाय सामान्यतो वार्त्तिकमसंयुक्त
विषयमित्याह असंयुक्ता इति द्व्यक्षरं यदीत्यस्यागत्या द्व्यक्षरांवार्थकां तस्यैव ह्रस्व इति नियमशरीरज्जगदंबेत्यादौ ह्रस्वोभवत्येव यद्यपि जरसादेशस्येति ए
वंचैत्वशोनुइयाडामां नित्यत्वात्पूर्वमेषु कृतेषु क्वचिदजादित्वाभावात्क्वचित्संनिपातपरिभाषया जरसोनापत्तिरितिभावः यद्यपि याडामोर्जरसपेक्षयापरत्वा
त्तयोः कृतयोरचोः जादित्वविघातात्संनिपातपरिभाषया न जरसः प्राप्तिरेवमेत्वेपि तथापि तत्रप्रश्लेषफलं दर्शयितुमाह एवमिति अत्रयद्वक्तव्यं तन्निर्जर
शब्देउक्तं स्वाश्रयमिति स्वंश्रूयमाणआकारः स्थानिवद्भावेनात्वमिति नचड्यापूग्रहणोः दीर्घेआदेशोनस्थानिवदिति ह्रस्वआत्वस्यविरुद्धात्कथंदीर्घस्थानिव
त्वेनतल्लाभः ड्यापूस्थानिकोदीर्घभिन्नआदेशोनस्थानिवदितितदर्थं इतिवाच्यं याडापश्रोडापआङिचापोडेरामन्द्याम्ह्रस्यावितितेषुआकारप्रश्लेषमाश्रि
त्यस्यामिन्त्वनिषेधप्रत्याख्यानभाष्यनयेशंकासत्वेनादोषात् अत्रयत्रोदाहरणेसूत्रभाष्यवार्त्तिकानांफलभेदआपततितेषामनभिधानं यथाअतिखट्वस्य रम
अः अतिखट्वाइत्यादेः वक्ष्यमाणरीत्या दीर्घात्पूर्वं फलाभावेनस्थानिवत्वाप्रक्लौफसभेदस्यैवाभावाच्चयत्वाकारांतरंप्रश्लिष्याकाररूपएवयोनकदाचिद्रूपांतरं ४९

आप्नश्रत्यर्थ इति तन्न मानाभावात् भाष्ये तस्यानुक्तेश्च आवन्तं यदंगमिति प्रत्ययग्रहणपरिभाषया तिखट्वस्य नावन्तत्वं यच्चावन्तं खट्वेति न तदंगमिति भावः नन्वा
न्यायं [illegible] ग्रहणे तेनांगविशेषणादावन्तात् यदंगमित्यर्थादति खट्वायेत्यादौ दोषस्तदवस्थ इति वाच्यं अंगस्य विशेषणत्वात् ॥ एतेन श्रुतमाकारमात्रस्य
स्मृतमनुबंधमादाय आच्छ्वानसंधावव्यादेवयाडित्यपास्तं तस्य लाक्षणिकत्वाच्च ननु स्त्रीप्रत्ययेवाचनिकत्वदादि [illegible] विधिनिषेधो भाष्ये पठितस्तत्कथमस्य त
त्रप्राप्तिरत आह उपसर्जनेति स्त्रीप्रत्यये चानुपसर्जनेनेति वचनस्येव भाष्ये पाठादिति भावः अत्रोपसर्जनत्वं लौकिकमेव स्त्रीप्रत्यये शास्त्रीयोपसर्जनत्वासंभ
वात् यद्यपि स्त्रीप्र त्ययांते शास्त्रीयोपसर्जनत्वमस्ति तथापि न तेन प्रत्ययग्रहणे इति तदादिनियमप्रसक्तिः एतत्सर्वं व्याख्यावसरे [illegible] नुरोधेन परत्वस्याका
रस्य लाक्षणिकत्वान्न याडू वर्णग्रहणे तत्प्रत्यये रोदित्यादौ भाष्ये स्पष्टत्वात् न च खट्वा थि इत्यत्र याडनापत्तिः सूत्रं जनिशायेदत्यादौ चरितार्थमिति वाच्यं परस्य
लक्षणप्रवृत्तिं विना न संभवस्तस्यैव लाक्षणिकस्य तत्परिभाषाविषयत्वात् न चेह तथा एकादेशतः प्रागपि तद्रूपसत्वात् पेदांगाधिकारे इति वार्तिके नागस्य
विशेष्यताया एवोचित्यबोधनाच्च अत एवावर्तं यदंगमित्यर्थाभिप्रायेणाति खट्वाये त्यनत्सिद्धये ति खट्व ए इति स्थिते प्रवृत्तं ड्याप्ग्रहणे अदीर्घ इति वार्ति
के व्याख्याय श्रुताकारस्मृतानुबंधाभ्यामाध्वेन शंकां कृत्वा लाक्षणिकत्वेन समाधायाकारप्रश्लेषेण तत्प्रत्याख्याने एतत्परित्यागो पापांतराकृथनं भाष्ये
किं चास्य विशेषणत्वे वार्तिकस्य तत्प्रत्याख्यानापाकारप्रश्लेषस्य च वैयर्थ्यं स्पष्टमेव किं च खट्वाया अर्द्दूः अदेखट्वायामित्यादौ याडनापत्तिः किं वाकारप्रश्ले
षपक्षेपि दीर्घोत्तरस्याश्रयाकारत्वस्यानिवद्भावेनात्वमिति शंकाया एवं दीर्घात् पूर्वे स्थानिवत्त्वस्य फलाभावादप्रवृत्तौ स्थानिन्याखट्वदेरभावात्तदादेशे दीर्घेत
दाश्रयस्य दुर्लभत्वात् परंपरया कार्यमादाय स्थानिवत्वप्रवृत्तौ मानाभावात् याडापइति सूत्रे भाष्येपि अतिखट्वायेत्यत्र स्थानिवत्वात्प्राप्तस्य याटः प्रतिषेधो
वक्तव्यः न वक्तव्यः ड्याप्ग्रहणे दीर्घ इति स्थानिवत्त्वनिषेधात् न च दीर्घत्वे आवसीभूत पूर्व इति याट् प्राप्नोति लाक्षणिकत्वान्न स्थानिवत्त्वे तु न तस्य सामर्थ्या
दित्युक्तपरिभाषा प्रवृत्तिरित्युक्तं यद्यपि स्थानिवत्सूत्र याडापइति सूत्रस्य भाष्याभ्यां हल्ड्याप्सूत्र याडापइति सूत्रयोरेव प्रश्लेषा लभ्यते तथापि भाष्ये [illegible] उपलक्ष
णमेतत् सूत्र विषयोदाहरणानभिधानं वेत्यनयोर्युक्तं सुधीभिर्विचार्यमित्याहुः व्रश्च अत्र राजिसाहचर्याद्राजिः फणादिरेव तेनान्यस्य विभागितले [illegible]

ल॰ श॰ कृशोवृणींत्वम्यांशाश्छ्रहणं विशेष्यमादायतदंतग्रहणमित्याह छशांतयोरिति छशयोरित्युक्तेपि न स्नातिरिति चिंत्यं पदस्येति नुस्सृष्टमित्यादिसिद्धयेपृथिकरणमेकृ
शे॰ सु॰ नोदेशई इति अलोंत्यस्यांतवचनात् अत्रझलोझलीत्यतोझलीतिपदस्येति स्कोरित्यतोनइतिचानुवर्तते ढ्रोः श्ड्त्यित्रकि।नीत्यनुवृत्तेः प्रवृत्तपादोशादेशाभावादषणा
५० प्रत्वेषत्वप्राप्तोक्तग्रहणं अत्रापि सतुक्तनिर्देशोवाध्यः नुस्यासिद्धत्वादिति वयोद्वितीययाऽत्यन्यनारिम्येतिसूत्रे भाष्यपाठादितिभावः घोषारिति धुडभावेटस्य धुरित
स्येतर्थः नेनवतीति जश्त्वात्प्राकृषस्यनेत्यर्थः जश्त्वनुमानिरवनेतिवाध्य तेषिदिसितिएकाचइत्युत्तरसूत्रे अनुवृत्त्यामध्येपिसंबंधएवोचितइतिभावः जश्त्वेनेति प
नुगमस्युक्तोतिनिर्देशान्नशस्यनजश्त्वमिति तन्न अविकृतस्वरूपप्रतिपादनतात्पर्यादस्यसमपादित्वेऽभत्वाच्च तत्रनदप्राप्तौन्यायसिद्धायांज्ञापकत्वायोगात् उपदि
शजित्यादिनिर्देशैः कृत्वाद्यन्नपत्तेश्च अत्रमतेभाष्यानुग्रहोविचार्यः मांस एतनेत्यस्यपदन्नइतिसूत्रेउपसंख्यानत्वादाह शसादौवेति स्त्रीत्वादिति पुंस्त्वाभ
भावादित्यर्थः नात्वंनेति स्त्रीत्वादित्यनुकृष्यते अतएवपुंस्त्वाभावान्नत्वाभावइतिनोक्तं नहिपुंस्त्वाभावेनाभावेप्रतिबंधकः नपुंसकेपितदंगोकारात् ङितिह्रस्व
श्च अत्रवाक्यद्वयमाद्येयूइतिस्त्र्याख्यावित्यस्त्रीतिइयुङुवङ्स्थानावितिवेति चानुवर्तते अंत्येयूइतिवेति स्त्रीवाचकावित्यतन्मात्रार्थकंस्त्र्याख्याविति च तत्रा
ह्रस्वयोरप्राप्ते दीर्घयोस्तुनेयङिति निषेधादप्राप्तेविभाषाइयादिष्वप्राप्तिमाशंक्यङिति ह्रस्वश्चेत्यत्रनित्यस्त्रीलिंगावित्येवंविधोनियमोनाश्रीयतेइति कैयट
स्तुह्रस्वाश्रमात्रविषयइत्याशयेनाह नित्यस्त्रीलिंगाविति अतएवास्यदीर्घाशेनिषेधविकल्पकत्वंभाष्येउक्तंयूस्त्र्याख्याविति सूत्रे तत्फलंकटप्रुवेब्राह्मण्ये
इतिलिंगांतरविशिष्टार्थाभिधायकत्वेनतत्त्वाभावात् परेत्वत्रविकल्पोभवत्येव आख्याग्रहणरहितस्यैवात्रसंबंधात् यद्वास्त्र्याख्यावित्यतदेवस्त्रीवाचका
वित्येतन्मात्रार्थकमन्यशब्दाधिकारात्ततश्चङिदाशिनागस्यविशेषणं अतएवप्रथमलिंगग्रहणंचेत्यस्यात्राप्रवृत्त्यन्वाख्यायकेह्रस्वोचेयङुवङ्स्थानोचप्रवृत्ता
स्त्रीवचनावेवनदीसंज्ञौभवतेनतुपुंवाचकाविति वक्तव्यमिति वार्तिकेइतिशकस्येब्राह्मण्येकमाभूत् यतिग्रकटपेब्राह्मणायभ्यातिश्रियेब्राह्मण्येश्रियेब्राह्मण्य
कमाभूत् अतिश्रियेब्राह्मणायश्रियेब्राह्मणायेतिस्त्र्याख्याविति सूत्रशेषेभाष्येउक्तं एवंचास्यनिषेधविकल्पत्वमसंभवि समुदायस्यकेनापिप्राप्त्यभावात् अवध राम
वस्यप्राप्तावपितस्यानेनविकल्पाभावात् ङिदाशिनागस्यैवानेनविकल्पात् एतच्चप्रवृत्तौस्त्रीवचनावित्यनेनसूचितं अतएवात्रकाकाद्वेपिविधिविकल्पएवद ५०

शितः एकैवात्र नियमो नाश्रौ । यत इति कैयटो वाक्यद्वयपर एवोचितः उपक्रमे निषेधपरतया व्याख्यानं तु स्त्र्याख्यावित्यस्य नित्यस्त्रीत्वार्थकत्वमजानतो एकदेशिनो
यू स्त्र्याख्यौ नदीत्यत्र स्त्र्याख्यमिति पक्षोपपादने उक्तिभूतमिति तन्नादरणीयं यत्तु दीर्घवाक्ये स्त्र्याख्यावित्येतत् दूतान्तस्य वा विशेषणं पुनः प्रसंगेन तदन्तविधिः अंगस्य चकेवलं स्त्री
त्वविशेषणामेवं हृस्वघटितवाक्येऽपि स्त्रियामित्येतन्मात्रमुभयोर्विशेषणमिति तत्तु चिन्त्यं भाष्यात्तदलाभात् नेयङुवङ्स्थानावित्यत्र तु नेयङ्वाचिनांगविशेषणं स्त्रीत्वं तस्मात्
स्येयङादिविशेषणताया एवौचित्यात् यस्यां गस्येयङुवाविति भाष्यात् केः स्त्र्याख्यावित्यस्य नित्यस्त्रीलिंगावित्यर्थकस्य यू इत्यनेनैव संबन्धत्वाच्च अत एवाति
श्रिये ब्राह्मणायेत्यत्र तेन निषेधाद्वक्ष्यमाणनदीत्वप्रयुक्तमपि न दीकार्यं न ननु यथा खरकुट्यै ब्राह्मणायेत्यादौ लुवं तस्य त्रिलिंगत्वेऽपि प्रथमलिंगग्रहणान्नित्यनदी
त्वं भवतीति भाष्य उक्तं च ब्राह्मण्यै इत्यादौ युक्तवद्भावेन स्वलिंगप्रयुक्तकार्याभावस्याप्यतिदेशान्न नत्वं स्पष्टं चेदं तस्मात्कुस इति सूत्रे भाष्यकैयटयोः यत्र
ः तिदेशो न प्रकृतिलिंगप्रयुक्तकार्यातिदेशो न तद्विरुद्धस्वाश्रयकार्याप्रवृत्तिः स्पष्टं चेदं स्त्रियामिति सूत्रे भाष्ये युक्तवद्भावादिप्रत्याख्यानेऽपि यथा दारादिशब्दैः पुं
स्त्वेन स्त्रीरूपार्थस्याभानं तथा प्रकृते स्त्रीत्वेन पुंसो भानमिति जेनननत्वं पुंस्त्ववाच्येनत्वमित्यर्थात् न चैवं खरकुट्यै इत्यत्रापि पुंवद्भावेन नित्यस्त्रीत्वात् सूत्रेण प्राप्ति
मिति वाच्यं स्त्र्याख्यावित्यस्य स्त्रीत्वविशिष्टमेव यत्स्त्र्याहेत्यर्थात् न चायं तथा स्त्रीत्वेन रूपेण वस्तुतः पुंस्त्वविशिष्टस्याभिधानात् यद्यपि पदार्थमात्रे शास्त्रीयं लिंगत्र
यमस्ति तथापि व्यक्तिवस्तुपद्धत्यादिबोध्यत्वकाले तल्लिंगोपसर्जनेऽपि स्त्रीपदादिबोध्यत्वदशायां तत्सत्त्वे मानाभावात् प्रकृते तु ब्राह्मणायेत्यादिविशेष्यदर्शनेन तत्स
त्त्वानुमानात् स्पष्टं चेदं भाष्यकैयटयोः एवं श्रीशब्दात्कब्लुकि श्रिये ब्राह्मणायेत्यादौ विकल्पापत्तिः युक्तवद्भावेन स्त्रियामनस्य वर्जनात् अत्र सूत्रे नित्यस्त्रीत्वा
निवेशाभावानि चेन्न सत्येऽभिधाने इष्टापत्तेः भाष्ये दृश्यमान श्रिये ब्राह्मणायेत्यादि तु कचं तात्विकपि बोध्यं विपरीतं नित्यस्त्रीत्वनिवेशवादिनो लुवं तेऽश्रिये ब्राह्मणाय
त्यादौ नदीत्वापत्तिदोष इत्याहुः यू किमात्रे यद्यपि पूर्वत्र दीर्घपरं तथापि विभक्तिविपरिणामेन दीर्घहृस्वावित्यन्वयो बोध्यः एतत्सर्वं वामीत्यत्रापि बोध्यं इदुद्भ्यामौदच्च
घेरिति सूत्रे योगविभागेन व्याचष्टे इदुद्भ्यां अनदीसंज्ञकेभ्यश्च घेरौदित्याभ्यां बाधात् ङेराम्नित्यादि सूत्रान्नदीग्रहणानुवृत्तेः आह नदीसंज्ञकाभ्यामिति मत्यामिति
सन्निपातेन परिभाषाया अनित्यत्वाद्यण् त्रिचतुरोः अष्टन आ इत्यत्र विभक्ताविति वर्तनेन तत्फलं त्रि भार्यः तृतीयान्तेन समासः भार्यो मरणीयः अचिर अरलोऽल्प प्रति

ला. सु.
५१
भावपैवसिद्धेऋ तइतिअनुवर्तमानेतिसृचत मइत्यस्य षष्ठ्यंतत्वकल्पनाय अन्यथा त्रिचतुरोरित्यस्यैवानुवृत्त्यापत्तौ रादेशेनतिसृचतस्रोर्बाधापत्तिरितिदिक् नुमवि
रोति अत्रेति विरोधे नतिसृतिनिषेधोमूलं एतेन स्त्रीत्वरूपार्थविशेषविभक्तिसंज्ञानिमित्ततित्रपेक्षयानुडंतरंगइत्यपास्तं अतोनिषेधादेवार्थसंज्ञोक्तजवहिरंगत्वाना
श्रयणात् अनेयथा मितिप्रत्ययविशेषापेक्षत्वेपिसंज्ञार्थविशेषानपेक्षत्वेनांतरंगत्वाच्च यादेशेतदसंगतिः स्पष्टैव. वस्तुतः स्वरूपेणोपादानेनवहिरंगत्वंकिंतुके
न [illegible] धर्मेणोपादानेएवेति विशेषापेक्षस्य वहिरंगत्वमेवनेतिसृदधातौ निरूपयिष्यामः तृज्वत्सूत्रेभाष्येतुनतिसृतिज्ञापकाद्रादेशोनुड्विषयेनपूर्वविप्रतिषेधे
[illegible] अपवादविषयेविप्रतिषेधाप्रवृत्तेः रादेःशास्त्रस्यअपवादत्वादित्युक्तं त्रिचतुरोर्विशेषणादिति स्त्रीनिष्ठसंख्यायांवर्त्तमानयोरित्यर्थइतिभावः नेहे
ति त्रिशब्दस्यपुन पुंमूकवृत्तित्वेपिसमुदायस्यास्त्रियांवृत्तेरंगविशेषणत्वे आदेशःस्यादितिभावः आमित्विति तत्रामषष्ठीवहुवचनमेवार्थाधिकारात् अतोनङे
[illegible] इति वाच्यंप्रियतिसेतिअंगविशेषणत्वेत्राप्याप्तिः स्यादितिभावः प्रियाजसत्रिजस् इतिस्थितेअंतरंगानपीतिन्यायेनविभक्तिलुकिपुनःसुपितर्द
तविधिनानिर्दिश्यमानपरिभाषयात्रिशब्दस्यादेशाः नतोनच्युतश्चेतिकपृतुनंसमासार्थोलौकिकवाक्येऋकारांतोत्तरपदत्वाभावात् ऋइशनेत्यनङ्प्रियतिसृ
णीत्यादि अत्रनुमः परत्वात्तिस्रादेशपुनःप्रसंगविज्ञानेननुम् नतिसृतिज्ञापकेनसामान्यतआगमविषयेरादेशोनेतिज्ञाप्यतेप्रत्ययोत्तरेतिसूत्रेचोभौभ
भाष्यप्रयोगौ [illegible] इति वहिरंगासिद्धत्वंतुनयासयोरितिनिर्देशेनानित्यत्वान्नप्रवर्त्तते विभक्ताविति युवारनाकावित्यत्रभाष्येपाठात् [illegible] भाष्या
षेवपाठाच्च सख्वीति [illegible] इति चेतीकारलोपः लक्ष्मीरिति कृदिकारादिति ङीषि लक्ष्मीत्यपि स्त्रीति स्त्यायतेस्त्याशुक्रशो [illegible] इति स्त्री ।
स्त्यायते ड्रट् [illegible] पयलोपोरित्यान्ङीप् इयङिति स्त्रीशब्दस्यअकारांतत्वादियङेवानुवर्ततइतिभावः गुणोनेति जसि चेति गुणः [illegible]
स्येतैरित्यर्थः [illegible] इतिस्त्रीशब्दस्य यङि [illegible] नुमिकोचेति पूर्वकारिकोक्तेर्वाधेसतियत्फलितंतदाह ओस्यादिति [illegible]
[illegible] विद्यमानस्त्रियाः स्त्रिशब्दस्योमादिषुचतुर्ष्वेवनत्वमत्र गुणादिभिर्बाधादितिभावः पुंवद्भावादिति तृतीयादिषुभाषितपुंस्कमनेनेति मा शम
वः [illegible] उपसर्जनीभूतस्यस्त्रीशब्दावयवभिन्नहृस्वेरप्रांतदिसर्थेनकथमत्रप्राप्तिरतआह अस्त्रीति तत्रवीजमाह गसोवडस्येवेति प्रसज्यप्रतिषेध ५१

तु न [illegible] मे व्याख्यायेते: न विषये बहु स्यात् नाविति ने यमपि हृस्वस्य निषेध: किं त्वन आकृ दीर्घस्यायमिति न त्र हृस्व पर भा वादिति भाव: अयं भि नामिति श्री [illegible] च वीत्या दिना [illegible]
भि [illegible] मलिङ्ग पूर्वी अत्यंतत्वान्न सुलोप: नेयङ् वङ् स्थ्या रु चार [illegible] पष्ठार्थ स्थ्या न शब्दो भावत्युइंत: इयङ् वङ: स्थानास्ति तुर्ययोरिति वहु ब्रीहि: [illegible]
प विषये एव ते न प्र कृष्टा धी: प्रधी: प्रध्ये इत्यादौ न निषेध: [illegible] पक्षस्य लं व्याख्यानात् तेन हे श्री रित्यादौ निषेध सिद्धि: श्रियावित्यादौ तत्त्वं निस [illegible] न् पञ्च मी [illegible]
ये गे वा ध [illegible] वुते य अदिस्थिति: क्वचित् दृष्टान्त स्य तदन्य वस्य च निषेध इति फलितं अत एव प्रकृष्टा धीर्यस्या यस्य वा प्रधी रित्यत्रा वे पद धी शब्दस्य नदी [illegible] व
[illegible] तु तं भाष्ये अवयव [illegible] विषयत्वात् सिद्धमिति वेरियङ् वङ् स्थान प्रति षेध पर [illegible] न [illegible] पि वा प्रतिषेध: प्राप्नोति अवयवस्येयङ् वङ् स्थानत्वात् आध्ये प्र ध्ये सिद्धं [illegible]
ह [illegible] स्य गस्य पुंसो भवत तस्य सदं प्रहणं न चेतस्य गस्य पुंसो भवन त इति श्रियै इति श्रियै इति ङिति हृस्वश्चेति विकल्प: वामि अश्रीति [illegible] प्रधी शब्दस्येति प्र [illegible]
[illegible] तीर्थ कस्य त्यर्थ: [illegible] दीनामिति अयं भाव: भाष्ये [illegible] ध्ये प्रध्ये [illegible] विषय [illegible] स्थान त्वान्निषेध माशंक्य यत्र नदी का यं श्रयेय [illegible] स्या स [illegible] हृले न [illegible]
तु ब्रीहि: [illegible] किं तु प्र कृष्ट ध्यायती त्या च यंत तत्र [illegible] त्वो ना धा वेन न दीसं [illegible] भाष्या संज्ञा: स्त्री विषय [illegible] वि [illegible] त्य त्र [illegible]
कर्मि [illegible] म: [illegible] नित्य मेव [illegible] विषया वि त्यर्थ: नित्यमेवेत्यस्य [illegible] सूक्ष्म [illegible] नांकि [illegible] शब्द [illegible] स्या वृत्ति: [illegible]
[illegible] त्व [illegible] अ [illegible] नपरां [illegible] ना [illegible] रिति [illegible] स साधारणमिति अत्रा [illegible] वीजं [illegible] मा [illegible] इत्यनि
[illegible] भा [illegible] हत्ले बहुब्रीहि [illegible] वक्तु [illegible] पस्य [illegible] मात्र नदीत्वं [illegible] एव न [illegible] प्र वृत्ते [illegible] इति
[illegible] मा गुणपि सुलभ: आध्ये रीति [illegible] भाव [illegible] प [illegible] इति [illegible] मिति [illegible] पं व [illegible] क
[illegible] भावस्त्री वलिया मध्य नदीत्वादिति भाव: [illegible] वि [illegible] इति [illegible] घटिता [illegible] त्यर्थ: तेन [illegible] धारये वहु ब्रीहि [illegible] मत हृ [illegible]
[illegible] प्रथम लिङ्ग ग्रहणं चेत्यवयवधी शब्दस्य नदीत्वा [illegible] निषेध [illegible] रित्या [illegible] भावादिति भाव: [illegible] इति लक्ष्मी [illegible] त्यर्थ: श्री [illegible] स्त्रियामिति

स॰श॰
शे॰ऽ
५७

मोर्दिकः स्यान्यत्रनिषेधस्यचप्राप्तेरितिभावः पुंसित्वोदृशवहुव्रीहावपिननदीत्वं नेयङुवङ्स्थानावयवस्यनिषेधात्समुदायस्याप्राप्तेश्च पुंवदिति सुभ्रुध्यामतोतिवि
विग्रहे इतिशेषः तस्यनित्यस्त्रीत्वाभावेनपुंसीवस्त्रियामप्यनदीत्वादितिभावः इतिविग्रहेत्विति ईदृशपदघटितविग्रहकेस्त्रीलिंगवहुव्रीहौकर्मधारयेच।
नेर्थः अत्रवहुव्रीहावस्यैव स्थानेयङुवङितिनिषेधः ङितितुसमुदायस्यविकल्पइतिबोध्यं स्त्रियोच अत्रासंबुद्धौसर्वनामस्थानेइतिनसंबध्यते आरंभसामर्थ्या
त् सइति तदंतशब्दानांवहुत्वाद्वहुवचनं प्रातिपदिकविशेषणत्वात्तदंतविधिः स्त्रियामितिचाधिकारः कासिहेसुभ्रुइति एवंरीत्यानसीतापहारोत्त
रेणमविसंधिर्यविधिःप्रकृत्यापिहापितस्पर्शोजितः सहेसुभ्रुकासीत्येवंवहुविलसापेत्यर्थः नेयङुवङित्यनेनावयवस्यसमुदायस्यचनदीत्वनिषेधात्प्रश्नः प्रमा
दादितिविग्रहयोङितत्वेनानुवधानलक्षणोत्रप्रमादः सचविरहपोषकत्वात्काव्यगुणः एकात्तु एकोचयस्मिन्नादृशमुत्तरपदंयस्येतिसूत्रेवहुव्रीहिगर्भोव
वहुव्रीहिः उत्तरपदेणइत्यनेन समासपदघटितवाक्यैकदेशानुमानात्समासोविशेष्यइत्याह तस्मिन्समासेइति आरंभेति प्रातिपदिकान्तेत्यने
नविकल्पेमणत्वेसिद्धेइत्यर्थः पुनरिति णग्रहणोत्तरं मानइत्यर्थः यणामिति हन्करेतियणामित्यर्थः भेकजानाविति णिलींगडूपदीभेकीवर्षाभ्वीकमठी
ङलिरित्यमरादस्यवहुदित्वेनवाङीषितिभावः अन्येत्वस्यगौरादिपाठान्नित्यमेवङीषुभेकापुनर्नवायांस्त्रीतियादव्यमुनः पुत्रः स्त्रियांत्वमी आहुर्दु
हितरमितिवन्नित्यस्यंतत्वेष्पुपद्योरित्याहुः गौरादित्वादिकल्पनेमानाभावात् अमरेवर्षाभूः कमठीडुलिरित्येवपाठइतिसुवोधिनीकारइतिमाधवसंद
तुसारेणमूलंवोध्यंङीपटापीनस्तइति स्त्रियांयत्प्राप्नोतितन्नेतिव्याख्यानादितिभावः स्वस्रादिषुमातृशब्दस्यननांदादिसाहचर्यात्प्र सिद्धत्वाचसंवं
धिकजननीवाचकस्यैवग्रहणं संनिपातपरिभाषयैवतिसृचतसृर्ङीवभावेसिद्धेतदनित्यताज्ञापनार्थंतयोर्ग्रहणमितिकेचित् स्वस्रादिषुतिसृचतस्रौः
पाठेअनार्षइतिकन्नेजंतसूत्रस्थभाष्यस्वरसः ॥ इतिऋजंताःस्त्रीलिंगाः ॥ अतोम् अतइत्येतदधिकृतस्यांगस्यविशेषणंतस्मान्नेपुंसकादिति चोक्त
नेतेअमितुरवाधकोयेननाप्राप्तइतिन्यायात् अमितिछेदोनतुमितिज्ञानमित्यादौसुपिचेतिदीर्घापत्तेः संनिपातपरिभाषयादीर्घवारणंतुहेज्ञानेत्यादौस्म राम
संवुद्धिलोपस्यानापत्तिः मनिमित्तस्यप्रकृतिप्रत्ययसंनिपातस्यप्रत्ययलोपेनविनाशात् अनएवेङ्ह्रस्वादितिसूत्रेज्ञानेत्यादौमलोपायकतरादित्यादौला ५८

पाभावाच्चांगाक्षेपव्यधिकरणान्वयहल्यदानुवृत्तयस्त्रास्थिनाभाष्येनतुमितिछेद उक्तइत्यलंभाष्यविरुद्धकल्पनयेतिदिक् जसःशी औङ आपइत्याभ्यांषष्ठी औ॥
ङ इतिचानुवर्ततेतदाह क्लीबादित्यादि यस्येतिच इस्याश्वयंतस्येत्यर्थः व्याख्यानाद्भस्येत्यधिकारस्त्वेननस्माद्विनइत्यतस्माद्धितोनुष्पक्रतेतदाह भस्येत्यादि भस्यफिंः
मगेहत्यं औङःश्यामिति इतएवनिर्देशादस्यनित्यस्त्रीत्वंबोध्यं औङ इतिस्वरूपकथनेसर्वेइत्यस्यभाधिकारेणसिद्धेः जे ... सतत्रसुवेवआख्यानात्स्मिंसु
स्कस्यइदितोनुमित्यतोनुमितिसर्वनामस्थानइतिचानुवर्ततेअंगस्येतिचप्रकृतं नच्च झलजभ्यांविशेष्यते नपुंसकस्येतिगृह्यमाणस्याभावात् अंगस्यैवविशेषणं
अस्थिद धोत्यादौनुगृह्यमाणस्यैवप्रकरणात् श्रुतेर्बलवत्वात् अतएवत्रिचतुरोस्त्रियामितितयोरेवविशेषणमित्याकरः उपधादीर्घइति सर्व
नामस्थानेचासंबुद्धावित्यनेनेतिभावः शेषमितिकर्मणिघञ् यत्नजपाःपुंसीतिजुप्राप्योवादः अहृइत्यादि अहडेतिपाठः दस्यहलंङस्यसंयोगांतलोपश्वादेशस्वरू
पमंगमियानकृतइतिकैयटः पंचभ्यइति अधिकव्यवच्छेदायास्यसर्वाद्यंतर्गणकार्यत्वात् परैतुंडतरादिभ्यइतिविरुद्धविभक्तिपंचभ्यंतत्वादंगस्येत्यने
नान्वयानर्हमितिडतरादिभ्योविहितयोःस्वमोरंगसंज्ञानिमित्तयोरित्यर्थइतिभाष्येसर्वादिसूत्रे स्पष्टंएवंचपरमकतरंकुलमित्यादौनादड्यत्तुकैयटेनार्थ
द्वारकविधानमाश्रयितव्यंतेनपरमकतरदित्युक्तं तन्न तस्यपरदिडतरार्थगतसंख्याभिधायिनइत्यर्थेस्तदापंचम्यंतात्ताद्दशार्थप्रतीत्यसंभवः यदिषष्ठ्यर्थेपंच
मीतरायिद्रविभक्तित्वादितिभाष्यासंगतिर्विधानस्यसर्वथानाश्रयणेनार्थद्वारकंविधानमितितद्व्यासंगतिश्च नचैतदर्थमुपसर्जनप्रतिषेधारंभोव्यर्थःस्यादितिवा
च्यं तन्मतोपाख्यानायैवैतद्वाध्यप्रवृत्तेः परमकतरादिव्यावृत्तये वश्याश्रयणीयविहितविशेषणेनैवातिकतरादिव्यावृत्तासव्यर्थइतितदाशयः स्यदादीनामद्दत्यत्र
षष्ठ्यंतत्यदादीनामित्यर्थद्वारकविभक्तिविशेषणमस्थिदधीत्यादावंगंतथातद्विशेषणंव्याख्यानादित्यपितत्रैवभाष्येस्पष्टमित्याहुः ङित्त्वफलमाह टेः तिविं
शतेर्डितीतिनिवर्ततेभस्येतिचाधिकृतं पंचमइति डटोमृटिभत्वाभावइतिभावः अन्यतमस्येति डतरादिष्वपाठादितिभावः एकतरमिति एकाचप्राचा
मितिडतरच् एकतमस्यत्वेकतमदित्येव परत्वादिति नुमपेक्षयेतिशेषः शब्दोनरमास्याझलंताजंतलक्षणभेदाच्चनुमप्यनित्यइतिभावः केचित्तुशिभावात्पर
त्वाजरशिगतःशौझलंतत्वान्नुमित्यर्थमाहुः अत्रायंतवक्तव्यंतन्निर्जरशब्देउक्तमस्तांतमहतःसांतेतिलुप्तषष्ठीकंपृथक्पदंसंयोगस्येत्यनेनसमानाधिकरणनोपधायाः

ल॰ श॰ शे॰ सु॰ ५५ त्यनुवर्त्ततेतदाह सांतसंयोगस्येत्यादि उपधाग्रहणंचपूर्वत्वमात्रोपलक्षणं पारिभाषिकार्थस्येहासंभवात् सर्वनामस्थानइतिचसांतसंयोगविशेषणं अतएवहंसा
विति सीत्यादौ नदोषः यद्वानंत्यविकारेंत्यसदेशस्येतिनदोषः मांस्पचन्याइति मांसस्यपचनीत्यर्थः मांसस्यपचिल्युड्घञोरितिलोपस्तस्मिन्नित्यर्थानुवादः एवंशास्त्रत्वेनचसा
त्वेपि नलुमतेत्यस्य चनित्यत्वमित्यभिमानः वृत्ताविति भाष्यस्वरसत्वननुवृत्ताविति भावः मासम्छंदसीति मासस्तकारस्याद्धादौप्रत्ययेपरे छंदसीत्यर्थः माड्भिःशरद्भिरि
ति उदाहरणं ह्रस्वोनपुंसके क्लीववदर्थेवर्तमानस्याजंतस्येत्येवसामर्थ्याल्लाभात्प्रातिपदिकलाभेप्रातिपदिकस्येत्येतत्त्वप्रधानस्येत्यर्थलाभार्थंकं तेनकांडे इत्यादौ नतव
ज्ञावेव प्रातिपदिकेत्वेपिनह्रस्वः विभक्त्यर्थस्यसंसर्गत्वेपि प्रवृत्त्यर्थापेक्षया प्राधान्यमस्त्येव प्रथमायाः अपिप्रत्याभिहितशक्तिरर्थ इतितत्रापितत्संसर्गकोवो
ध इतितस्याः प्राधान्य कांडेतिष्ठतइत्यादौ आख्यातार्थकर्तुः कर्तृक्रियाभावेनक्रियायामन्वये तदभिन्नप्रथमार्थस्यापितेनसंबंधेनान्वयात्तस्यप्राधान्यं स्या
दिति चेदं भाष्ये ज्ञानवदिति दीर्घोतत्वमप्युक्तोनकश्चिद्विशेषइतिभावः श्रीपाणीत्यादाविकारोत्तरपदेणत्वंभवत्येवेति बोध्यं इकोचि सुपीति वक्तव्ये वि
भक्ताविति चिंत्यप्रयोजनं विभक्तौकिं मधुनइदंमाधवं हैवारेहैवारीति अतएवेकोचीतिसूत्रस्थमिह किंचित्रपोइति एङइत्यादिति हल्लन्यत्रपदइतिचभा
ष्ये संगच्छते तद्धयोत्वेति तृध्यादीनां क्रमेण गौवाहरौ श्रौदोहरये इत्यवकाशः नुमोवारिणीइति तृतीयादिषु भाषितःपुमान्येनशब्देनेत्यर्थेपीलुशब्देतिप्रसंगः
तस्माद्भाषितःपुमान्यस्मिन्प्रवृत्तिनिमित्तरूपेर्थेइतिबहुव्रीहिः भाषणक्रिययास्वकरणतयाक्षिप्तशब्दश्चक्लीवेनसमानोनुपूर्वेरकः समानार्थश्चयद्वातेप्र
त्यासत्तेःतनोऽर्थआद्यस्तत्फलितमाह प्रवृत्तिनिमित्तैक्यइति इकोचीतिनपुंसकस्येतिचानुवर्त्ततेतेचतत्रषष्ठ्यंतेनार्थात्सप्तम्यंते इकइतिकिं श्रीपेण रारेकिं
अनादिनी अयंचह्रस्वनुमोरभावातिदेशः क्लीवत्वविशिष्टार्थवाचकस्यपुंविशिष्टार्थवाचकत्वरूपातिदेशेक्लीवत्वरूपार्थेअप्रवृत्तेस्तत्प्रयुक्तसर्वकार्याप्रवृत्तेरित्यन्यत्र
विस्तरः अस्थिदधि नकारादकारउच्चारणार्थः अनङ्उदात्तस्योच्चारणे नसिद्धावुदात्तग्रहणं असतियत्नेउदात्तादिशब्दैरनुपात्तोगुणोविवक्षितइतिज्ञापनार्थं
त्रिचतुर्भ्यइतिसूत्रेतिसृचतसृलित्यत्रैकदेशप्रयुक्तेनोदात्तेति कर्तव्येआद्युदात्तनिपातनंविवक्षार्थंनिपातनंनामान्याद्देशप्रयोगप्राप्तिःसोद्देशप्रयोगकरणं बंधाद्यिष्टं एम॰
पि ह्रस्वनुरूपेतोदात्तेनुदात्तेवोच्चारणेपेन्माद्युदात्तोच्चारणंविवक्षार्थं तदुक्तमसतिप्रयत्नेति परमास्थिशब्दादावंतोदात्तेउदात्तगुणस्यापिस्थानित्वेनात्रनद्विवक्षार्था ५५

नमानभिति भाष्ये स्पष्टं उदात्तत्वफलं दध्रेत्यादावल्लोपे सतित न निवृत्तिस्वरेण विभक्त्युदात्तत्वं दधनीत्यादौ श्रवणं च ज्ञापनफलं तु तृन्न् जातानामिन्न स्वरकांनानां ऋद्ध
शमेत्यनेन तत्स्वरकानङ् सिद्धिरिति दिक् तदंतेति आगत्वादिति भावः अत्रापि नपुंसकस्येति संबध्यते तन्न धाग्न आदागमहनेति क्विप्रत्यये दधिनेत्यादौ न तत्वगं
द्यमाणस्यैव तन्न शोषणं तेनातिदध्ना ब्राह्मणेनेत्यादि सिद्धं सुधियेति शोभनज्ञानवत्वरूपैकप्रवृत्तिनिमित्तत्वात्पुंवत्त्व धीशब्दे प्रकृष्टज्ञानवत्त्वमेकं तत्र मध्विति
मकरंदमद्यमाक्षिकवाचिनः पुंनपुंसकयोः सत्वात्पुंवत्त्वं मृद्वीकाविकारवाचिनो नित्यनपुंसकस्य तु न सच माद्वीकं मधुनद्वयोस्त्विमरेणोक्तः भाष्ये मधोर्नपुंसकत्वे
स्पष्टलिंगव्युत्पत्त्योदाहरणं तु माध्वीर्गावो भवंतु नद्यति लिंगसिद्धस्त्रीत्ववाचिन पुंसकमधुशब्दाभिप्रायेणेति दिक् स्तुवेति मासपुरुत्वक्षणां पदादिषूपसंख्यानमिति वार्त्ति
कोक्तेरिति भावः पूर्वविप्रतिषेधेनेति न च नित्यत्वादेव नुम् सिद्धः किं पूर्वविप्रतिषेधेनेति वाच्यं तदंतेनुमिकृते अंगाधिकारे तदंतविधेः सत्वेन पद्दागमाद् इति ।
न्यायेन नुम्विशिष्टस्य तद्ग्रहणेन ग्रहणात्सूत्रे षष्ठीनिर्देशाभावान्निर्दिश्यमानस्य नुमा व्यवधानमित्यस्याभावे नत्त्वत्वप्राप्तेः सकृद्गतिन्यायान्नपुनस्त्व
त्वं नन्वयं कृशाक्रोष्टुनइत्यस्यैव भाष्ये उदाहरणंनीपदिश्वचीत्यत इत्थमय करणवान्यथा प्रथमोपस्थितसर्वनामस्थानोदाहरणत्यागे बीजानापत्तिरिति चेन्न ।
उदाहरणस्य संकोचकत्वे मानाभावात् नद्युक्तं न चोदाहरणमादरणीयमिति उदात्तातिरिक्तोदाहरणाभाव इत्येवं परतयानादरणीयमिति तदर्थ इत्याहुः सु
त्वेति अत्र शोभनलवनकर्तृत्वं प्रवृत्तिनिमित्तं पुंवत्त्वे ह्रस्वाभावेनाघित्वान्नाभावे न नुमभावाच्च यण् धातुः इति अनङ् नलुम् तेति निषेधात् धारणादिकी
र्तृत्वं चास्यैकं प्रवृत्तिनिमित्तं हे धातरिति ह्रस्वस्य गुण इति गुणः एच इक् आदेश इति कर्मणि घञ् ह्रस्वपदेन कर्मधारयो निर्धारणे सप्तमी सौत्रमेकवचनं त
दाह आदिश्यत्यादि मध्ये इत्येप पाठः तद्योरैच् इत्यात एवं पूर्वभागो वर्णसदृश उत्तरस्तु इवर्णो वर्णसदृशस्तत्रो भयांतरतमह्रस्वाभावात्पर्यायेणावर्णादिः प्राप्नोत्यव
र्णाभावादिदंतदाह इगेवेति यथाप्राप्तमेव नियम्यत इति न यथासंख्यं ह्रस्वएचनास्त्येव एओ ङिस्यादौ दीर्घनिर्देशादिति स्पष्टं भाष्ये न चार्द्धमात्रावर्णस्याध्यर्द्धमात्रैव ।
र्णो वर्णयोरित्युत्तरभूयस्त्वात्तत्सदृश इगेव भविष्यतीति नार्थः सूत्रेणेति वाच्यं अध्यर्द्धमात्रावर्णस्यार्द्धमात्रेवर्णो वर्णयोरित्यस्यापि पक्षस्य सत्तावेच इति सूत्रे विनिगमना
भाविरहात् श्रेयेणं भाष्ये उक्ततया समप्रविभागपक्षस्यैव भाष्यकृत्संमतत्वादित्याहुः प्रैणामिति न चरणयोहलीति विषयसप्तमीति प्रागेवात्वमिति वाच्यं निर्दिष्टपरि

ल॰ श॰ षावाधे संज्ञाभावात् आन्वेक्षात्तेनुडनापत्त्याहलादिविषयाभावेन सूत्रमात्त्वाप्रवृत्तेश्च केचित्तु नुडनिमित्तस्य संनिपातस्य दीर्घत्वाविनाशावश्यकत्वेन तद्विषये संनिपातपरि
शे॰ सु॰ भाषाया अप्रवृत्त्या एवं नामीति दीर्घस्तु सुपि चेति दीर्घवन्नित्यत्वाद्बाधक इति माधवाशयमित्याहुः ग्रामणिकुलमित्यादौ नपुंसकह्रस्वस्यापि नीति नुम् समुदितप्रातिपदिका
५५ पेक्षह्रस्वस्य बहिरंगत्वेन वर्णमात्राश्रये नङ्गे तु किञ्च सिद्धत्वात्येतु षत्वतुकोर् सिद्ध इति वचनान्नलोप इति सूत्रे कृतितु ग्रहणाच्च ह्रस्वस्यापि नीति सूत्रेन रंगपरिभाषाया
अप्रवृत्तिं वदंति तेषामुपजीव्यविरोधान्न तुक् अजंतत्वमुपजीव्य ह्रस्वप्रवृत्तेः न चैवं संनिपातपरिभाषा व्यर्था तस्या अप्युपजीव्यविरोधमूलकत्वात् किं च तस्या अ
पि स एवार्थः अत एव संनिपातपरिभाषादोषत्विस्यणावसरे व्यर्थो श्रयः प्रत्ययोवर्णविधावलस्यानिमित्तं स्यादित्युक्तं न च न प्रत्ययः संनिपातलक्षणः अंगसंज्ञानं तद्यनि
मित्तं स्यादित्यग्रिमभाष्यविरोध इति वाच्यं तस्यैकदेश्युक्तित्वात् अन्यथाशी वर्णत्वादावपि सा लोपनिमित्तं न स्यादित्यन्यत्र निरूपितं ग्रामणिपुत्रो ग्रामणीकुलमित्या
दौ पूर्वोत्तरपदनिमित्ते ह्रस्वे बहिरंगपरिभाषयापि सिध्यतीत्याशयेनोक्तं अजंत इति सूत्रे ह्रस्वस्यपितीत्यादौ तद्रूपन्यासएकदेशिन इति न तद्विरोध इत्यलं ॥
इत्यजंतान् नपुंसकलिंगाः ॥ हो ढः झलोज्झलीत्यतो झलीति पदस्य स्कोरित्यतो न्त इत्यनुवर्तते झलि परे पूर्वस्य पदान्ते विद्यमानस्य च हस्येत्यर्थः ढलुनविहितः धुडित्याद्या
सिद्धेः दादेर्धातोरिति ग्रहणमौपदेशिकदादित्ववल्लक्षकं व्याख्यानादित्यभिप्रेत्य फलितार्थमाह उपदेश इति एतच्च प्रकृतसूत्रे भाष्ये ध्वनितं तत्र हि घत्वस्यासि
द्धत्वाड्ढत्वं प्राप्नोतीत्याशंक्यापवादत्वेन समाधायाथ वैवं वक्ष्यामि हो ढः अदादेरितितो धातोरिति दादेरिति वर्ततेनेति निरुक्तमित्युक्तं द्रुहे स्नुहाद्दुह इत्यनेन ढत्वस्यापि वि
धानात्तत्र न दोष इति तदाशयः तत्र धातोरिति सूत्रे भाष्यकृत्कृतदादेरित्यनुवृत्तेः फलांतराभावेन तद्रूपदेशवद्दादिलक्षकं सामर्थ्यात् अर्थाधिकारानुरोधाच्च पू
र्वत्र निषेध्यसमर्पके प्येवं अत एव नामधातुविषये दामलिडित्यादौ ढत्वघत्वाभावौ सिद्धौ एवं च तदेकवाक्यतयापवादत्वपक्षे पि दादिपदस्योपदेशकालिकत्वा
दित्वघल्लक्षकता विना तदनंतरं दादेरिति वर्तत इति भाष्यस्योक्ताशयमजानतो घोदादेरित्युच्यमाने कथम घोगिति शंकायामेकाच इति सूत्रार्थमपि प्रसंगान्नि
र्णीतं तु धातोरवयवो यो दादिरित्यर्थमुक्त्वा गर्दभयतेरप्रत्यये गर्धबित्यादौ भष्भावायोत्तरसूत्रे आवश्यकं वैयधिकरण्यमुक्त्वा रोग्धेति तु व्यपदेशिवद्भावात्सिद्धमि सम॰
तिभाष्ये उक्तं तत्रोत्तरार्थं वैयधिकरण्यमावश्यकमिति वदतात स्येहानावश्यकत्वं सूचितं तेन च दादेरित्यस्योक्तार्थकत्वं सूचितमित्यन्यत्र विस्तरः धुगित्यादि सिद्ध ५४

योगेनोक्तः औपदेशिकप्रायोगिकयोरौपदेशिकस्य ग्रहणमिति परिभाषा तु तत्र तत्रोपदेशग्रहणं कुर्वतस्तत्रविरोधेन तत्र प्रमपो घोत्वसंतस्येत्यादिसूत्रस्थभाष्यविरोधेन चाप्रामा
णिकी तत्र हि भाष्ये इदमुक्तं इह हि व्याकरणे सर्वेष्वेव सानुबंधकग्रहणेषु रूपमाश्रीयते यत्रास्यैतद्रूपमिति रूपनिर्ग्रहश्च शब्दस्य नांतरेण लौकिकं प्रयोगमिति तस्मिं
श्च लौकिके प्रयोगे सानुबंधकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग उपास्यते कोसावुपदेशो नामेति अनुबंधप्रसंगाभावात् सानुबंधके त्वुक्तन्यायस्यान्यत्रापि
तुल्यत्वादिति बोध्यं एकाचो बश इत्यसूत्रे झषंतस्येति वक्तुं युक्तं भषूपदार्शनिकस्यानेन लाघवात् निवृत्तमिति धुग्भ्यामित्यादौ पदांतत्वादेव सिद्धिरिति भावः ॥
सामर्थ्यादिति सध्वोर्ग्रहणस्येतरव्यावृत्त्यर्थत्वे तु तदनुवृत्तौ फलाभाव इति भावः धातोः किं गर्द्धबित्यादि ननु दुहे र्घत्वे धात्वयवमेकाज्रूपं दुह इति उ
षितिश्च तत्राद्यो न झषंतो ऽंत्ये न बश इ घितितु नावयव इति कथं भष्भावो त आह व्यपदेशिवदिति विशिष्टोपदेशो मुख्यो व्यवहारः सोऽस्यास्तीति व्यपदेशी
तिन्न तुल्यमित्यर्थः इदमाद्यंतवत्सूत्रे भाष्ये स्पष्टं एकाचः किं दामलिट् बशः किं क्रोत्स्यति झषंतस्य किं दास्यति धुगिति अत्वसंतस्येति सूत्रे ऽधातोरिति निषे
धेन कारकं प्रत्ययप्रधानो भूतक्रियावाचकस्यापि धातुत्वादिति भावः नच धातोरुच्यमानं कार्यं तत्प्रत्यये भवतीति परिभाषया कथमत्र घत्वादि तत्प्रत्ययो धातु
संशब्देन न विहितः प्रत्यय इति वाच्यं अस्य पदांतनिमित्तत्वेन प्रत्ययनिमित्तत्वाभावात् अत एवाप्रयाणानिति चरितार्थं अन्यथामो नो धातोरित्यस्यापि
तत्प्रवृत्तौ नत्वानापत्यात तदसंगतिः स्पष्टैव वाङ्ग्रह इत्युहेः प्राप्तेरन्येषामप्राप्ते उभयत्र विभाषेयं इग्यणः यणः स्थाने इति नन्वेवमुदूहितणमित्यादौ लस्यात्मे
कवचने इटि तस्य संप्रसारणत्वाड्ढल इति दीर्घापत्तिः नच यथासंख्यं संवंधात् दोषः ऋलृक्सूत्रे लृकारोपदेशः किमर्थ इत्यादिभाष्यविरोधादिति चेन्न प्र
देशे पुपणाद्यिगित्येव सिद्धे संज्ञाविधानसामर्थ्येन तद्भावितपक्षाश्रयणान्न दोषः वाक्यस्य संज्ञेति पक्षे भाष्ये संप्रसारणस्येत्यादौ संप्रसारणजातस्य
संप्रसारणग्रहणे न ग्रहणमित्युक्तं तथा नदेकवाक्यतयात्र पक्षे तद्भावितस्य संज्ञेति भाष्ये सूचितं तेन उद्भ्यामित्यादावपि न दीर्घप्राप्तिः अत एवा
स्थूलसामान्यग्रहणं आसज्यसमाध्यस्यादौ पूर्वरूपं न समानांगग्रहणं तु भाष्ये प्रत्याख्यातं तथा च भाष्यं शकहूर्यमित्यादौ पूर्वरूपाभावाय समानांगग्रहणं कार्यं न कार्ये मसंप्रसा
रणत्वादन्यायं संप्रसारणसंप्रसारणयोः स्थाने एक आदिश्यते यदि नेदं संप्रसारणं हूतः इत्यत्र हलः इति दीर्घत्वं न प्राप्नोति वचनप्रामाण्याद्भविष्यतीति न संप्रसारणमिति निषि

ल.शे. ऐषिवचनमामर्थ्यात्पूर्वरूपेणोत्तरं नचयुउ अन इति स्थिते तरंगत्वाद्दीर्घपूर्वरूपं नस्यादितिवाच्यं अंतरंगपरिभाषाया अनित्यत्वेनाप्रवृत्तेः नचैवं तत्रासवर्णेदीर्घोत्त
शे.शु. रेणसंप्रसारणोऽइति निषेधो नस्यादितिवाच्यं अचः परस्मिन्निति स्थानिवत्त्वादितिदिक् वाहऊ भस्येत्यधिकारः वसोः संप्रसारणमित्यतः संप्रसारणमित्यनुवर्तते तेन वाह
५५ विशेषणं तेनाल्लोत्पत्त्यस्येति नत्तदाह भस्येत्यादि ह्रस्वऊह्नकृतः वृध्यनापत्तेः एदिविधावपि ह्रस्वग्रहणाज्जनोऽइम्मायसिद्धिः ऊः शूङित्य त्रापि ह्रस्वकरणात् स्व चूरित्य
प्रसिद्धिः अतड्डावितत्वेन तस्या संप्रसारणत्वाद्धलइतिदीर्घप्राप्तेः अमि पूर्व इत्यतः पूर्व इति इको यणचीत्यतोऽचीति एकः पूर्वपरयोरिति चानुवर्तते
तेन तदाह संप्रसारणाद्वीत्यादि ऊ ष्टित्वेत्यधतीत्यत्र विशेषणार्थं छंदस्येवेति छंदसीत्यनुवर्तमाने वहश्चेत्यनेनेतिभावः णिजंतादिजिति अनेन लोके
विश्ववाहशब्दस्य साधुत्वमात्रमुच्यते नत्वसौ णिलोपस्य स्थानिवत्त्वात् अगभसंज्ञास्विन्प्रत्ययेन वाहो विशेषणात् विजग्रहणां क्विपोऽप्युपलक्षणं क्वाद
भ्यो विहितं किंतीति व्याख्यानस्याचः परस्मिन्नित्यत्र काम्यसूत्रे भाष्ये उक्तत्वेन ण्यंतात्क्वौ संप्रसारणाप्राप्तेः प्रतिपदोक्ततया क्विशब्दमुच्चार्य विहितविधेरेव क्वौ।
विधिं प्रति नस्थानिवद्वित्स्य ग्रहणे न णिलोपस्य स्थानिवत्त्वाच्च तेन काम्यसूत्रोक्तविहितविशेषणपक्षं तदितरपक्षयोर्न फलभेदः वस्तुतो विभाषा पूर्वाण्हापे
राण्हाभ्यामिति सूत्रे प्रष्ठोह आगतं प्रष्ठवाहरूप्यमिति भाष्ये लौकिकविग्रहवाक्ये प्रष्ठोह इति प्रयोगादन्यत्रापि ण्विस्लदुकं इति पष्ठ इति चतुरनडुह इतोऽस्य वे
नामस्थान इत्यतः सर्वनामस्थान इतिवर्तते सा च आङ्गीनद्योरित्यतो नुमनुवर्तते आदिति च तदाह आदित्यधीति विशेषविहितेनेति यासुट्सीयुडिवेत्यर्थः
न बाध्यते इति उपजीव्यत्वादिति भावः अमाचेति अम्संबुद्धाविति विशेषविहितेनामेत्यर्थः नुम उपजीवकत्वेन विरोधाभावात्ततः प्राप्तस्याप्राप्तत्वेनिभावः क
किंतु आमा च नुम्न बाध्यत इतिपाठः तत्रायमर्थः वहुनड्वाहीत्यादौ नपुंसकस्येति नुम्परत्वादामा बाध्येत पुनः प्रसंगविज्ञानात्तु न बाध्यत इति दत्तनेति अतड्वाह
क्तेऽपीति घातितेऽपीत्यर्थः । द्विर्बद्धं सुबद्धं भवतीति न्यायेन क्वचित्समुच्चयस्य दृष्टत्वात् षित्त्वमपि तदाश्रयणे ज्ञापकम् सर्वत्र सर्वेषाम्मते इत्यर्थस्तदाह नित्य
मिति प्राचामित्यस्यानिवृत्त्यानित्यत्वे सिद्धेऽपि प्राचांष्फ इत्यस्य सर्वत्रग्रहणापकर्षणाबाधकविषयेऽपि प्रवृत्त्यर्थन्तत् तेनावमायनीत्यत्रावट्याश्चेति चायं वा
धित्वा प्राचाम्मते ष्फ एव अवटो गर्गादिः । चाप् उदीचाम्मते प्राप्तङीपृबाधनेन चरितार्थः । सर्वत्रग्रहणात्तद्बाधकत्वमेवचापोनत्वनन्तरष्फबाधकत्वम् चापि
कृते तु न ष्फप्राप्तिरतोऽन्यत्र इत्यधिकारात् लोहितादिर्गर्गाद्यन्तर्गणः । यद्यपि तत्र कतशकलकण्वेति पाठात् शकलस्य लोहितादिकण्वादिबहिर्भूतत्वात्ष्फपरेन
तत्र प्राप्नुतस्तथापि कतन्तेभ्यः कण्वादिभ्य इत्युभयत्रापि षष्ठीतत्पुरुषबहुव्रीह्योरेकशेषेणनदोषः कतन्तशब्देशकन्ध्वादित्वात्पररूपम् तेन शाकल्यायनी
शाकल्यस्य छात्राः शाकलाइति च सिद्धम् टापृङीषोरिति कौरव्यशब्दे योपधप्रतिषेधात्टाप् माण्डूकशब्देजातित्वान्ङीषितिभावः । टाप् ङीपोरपवाद इति
पाठस्तु प्रामादिकः वयसि प्राणिनाङ्कालकृतावस्थाविशेषो वयः । वयसीत्यस्य वयोस्त्येप्रवृत्तिनिमित्ते इत्यर्थस्तदाह प्रथमवयोवाचिन इति तेनोत्तानशय्ये ।
त्यादौन प्रकरणादिना वयः प्रतीतावपि नायं तद्वाचकः । यापिव्याख्यादिवशादुत्तानाशेनेतस्या अपि प्रतीतेः । द्विवर्षेत्यादिरपि नवयोवाचीशालादावपिप्रयोगा
त् कौमारयौवनवृद्धत्वभेदात्त्रीणिवयांसि आयुषश्चतुर्भागिश्चत्वारिवा त्र्यनीका समाहारे तद्धितार्थेति द्विगुः । अकारान्तोत्तरपदत्वात्स्त्रीत्वम् अपरिमाण अत्र राम
परिमाणशब्देन परिमाणन्तु सर्वत इति पारिभाषिकमेव गृह्यते सुवर्णविस्तौ हेमोक्षेकम्बल्यमूल्यं पलशतमिति कोशवलेनोन्मानभूतविस्तकम्बल्यग्रह । ५
णन्तु उन्मानस्य चेद्विस्तकम्बल्ययोरेवेति नियमार्थम् तेन द्विनिष्का सिद्धा द्वेवर्षेभूताद्वभ्यांशताभ्यांक्रीतेत्यर्थे द्विवर्षाद्विशताति यर्दूमानेद्विकाण्डी स्वनुधिय
मन धौ विस्तौपचतीति पचेर्द्रवीभावानुकूलोव्यापारोऽर्थः । अस्त्रोन्मानत्वाद्वकोलुक् । आचितः शाकटो भार इत्युक्तेराचितः परिमाणमित्येके आचितोदशा ।

भाराः स्युरित्युक्तेरुन्मानमेतदिति एतदपि नियमार्थमित्यन्ये प्रमाणे इति· षोडशहस्तप्रमाणाद्दण्डवाचककाण्डशब्दस्यायाममात्रपरिच्छेदकत्वेन प्रमाणत्व
मिति भावः। पुरुषात्प्रमाणे· पुरुषस्योर्ध्वाधरदिगवस्थितवस्तुमात्रपरिच्छेदकत्वेनोन्मानत्वादुन्मानस्य च द्विस्तादेरेवेति नियमान्निषेधाप्राप्त्या नित्यङीप्प्राप्तेर्वि
कल्पार्थमिदम्· अत्र प्रमाणशब्दः परिच्छेदकमात्रपरो न त्वायामपरिच्छेदकवाची· अत एव तस्य पुरुषविशेषणतानासङ्गता· जातिवचनस्यापि पुरुषशब्दस्य पश्वा
रत्निः पुरुष इति शुल्बसूत्रादत्र प्रमाणमिति विशेषणाल्लोकव्यवहाराच्च परिच्छेदकवाचित्वमपि· द्विपुरुषीति· द्वौ पुरुषौ प्रमाणमस्या इत्यर्थे तदस्य परिमाणमि
ति प्रत्ययस्याध्यर्द्धेति लुकि उदाहरणम्· न त्र हि परिमाणशब्देनोत्तरसूत्रानुसेधात्परिच्छेदकमात्रस्य ग्रहणमिति सिद्धान्तः। ऊधसो· समासान्तोयम् तत्र स्त्रियामि
त्युपसङ्ख्यानादाह· स्त्रियामिति· बहुव्रीहेः सक्थ्यक्ष्णोरित्यतो बहुव्रीहावित्यनुवर्तते· ङित्वाद्वास्यादेशत्वम्· उपङीप्निषेधेष्विति· समासान्तानाम लौकिके वा
क्य एव प्रवृत्त्या पूर्वमनञ्ञेषाम्प्राप्तिः। अन उपधालोपिन इत्यत्रास्यानुवृत्त्या ङीपोपि बाधः। एतेन मध्येऽपवादन्यायात् ङीम्निषेधयोरिदम्बाधकमित्यपास्तमिति भावः। ङी
षिति· ङीपि तु कुण्डोध्नशब्दे पूर्वपदप्रकृतिस्वरेणाधकाराकारस्यानुदात्तत्वादुदात्तनिवृत्तिस्वराप्राप्त्यान्तोदात्तत्वं न सिध्येत्· कुण्डमिवोधो यस्या इति विग्रहः। बहु
व्रीहेः किम्· ऊधः प्राप्ता प्राप्तोधः प्राप्तापन्ने चेति समासः अव्ययग्रहणाननुवृत्तेरिति· स्वरितत्वादिति भावः। निषेधावपीति· अपिना न उपधेति ङीप्· अनव्य
हणोऽनर्थकस्यापि ग्रहणात्· द्विहायनी बालेति· द्विहायनी द्विवर्षा गौरिति प्रायो वाद इत्येके· बालेत्यस्य गौरित्यर्थ इत्यन्ये· नित्यं सञ्ज्ञा· ननु सञ्ज्ञाशब्दानियतानु
पूर्वीका अनादयश्छन्दसि च दृष्टस्यैव विधानमिति ङीष्भावविशिष्टस्य तत्र प्रयोगासम्भवादन उपधेत्येव सिद्धे इदम्व्यर्थमिति चेदुत्तरार्थत्वात् योगविभा
गस्तु व्यर्थ एव न ह्यनयन लक्षणानन्तरसिद्धमुदाहरन्ति वेदे पञ्चदाम्नीति· क्वचित्तु शतमूर्ध्नीति पाठः। केवलमामक· अस्मच्छब्दादणि तवकममकावेकवच
न इति मम कादेशः। भागशब्दस्य पुंलिङ्गत्वात् स्वार्थेऽणि येस्वार्थिके पुलिङ्गातिवृत्तेरपि सत्त्वात् स्त्रीत्वम्· पापशब्दोऽर्शआद्यजन्त इति वर्त्तमानः स्त्रियामाप्प
रः पवर्गमध्यो घृतादित्वादन्तोदात्तः उतापरस्य क्षि देवानित्यादौ उतापरीभ्यो मघवेत्यादौ वान्तोदात्तपाठात्· पूर्वमनपन्नापरमित्यादौ पच्यमानमाद्युदात्त
त्वमपि वृषादित्वाद् अपराः पूर्वामभ्येतीत्यादावजादिपाठादावपि· आर्येणाकृतेति प्राकसप्रत्ययान्तः समासेऽदन्तत्वम्· भेषजशब्दोऽप्युत्पन्न ओषधेरूढः।

सी॰ भिषजइदमित्यर्थः।णिभैषजशब्दोपि·तत्रसुमङ्गलीरियम्वधूरितितुमत्वर्थीयेईप्रत्ययेवोध्यम्·प्रकृतिभागाविति·नुकसन्नियोगेनेतिभावः।मतुविति·वत्वा।
ए॰टी॰ नुमादुपधायाइतिसिद्धम्·यज्ञेनसम्बन्धेइति·स्त्रियाइत्यर्थः।संयोगपदंसम्बन्धोपलक्षणम्।सम्बन्धश्चयज्ञफलप्रतियोगिकैश्वर्यवत्वम्·तदाह·तत्कर्तृकेति·वि
६ भाषा·सपूर्वस्य·शब्दोविद्यमानवाची·पूर्वशब्दोऽवयववाचीव्याख्यानात्तत्रकेवलपतिशब्दस्यविद्यमानपूर्वावयवकत्वासम्भवादव्यभिचाराच्चपतिशब्देनतदन्तं
गृह्यतेइत्याह·पतिशब्दान्तस्येत्यादि·नपत्युरिति·सपूर्वस्येत्यनेनपत्यन्तस्यगृह्यमाणत्वादितिभावः।वहवोवृषलपतयोयस्याइतिकर्मधारयोत्तरपदबहुव्रीहेः
वारणायेहार्थोप्यनुपसर्जनपदसम्बन्धइत्यन्येबहुव्रीहावित्युपसर्जनोपलक्षणम्·तेनपतिमतिक्रान्ताअतिपत्नीत्यपिव्यक्तेइति·विभाषासपूर्वस्येत्यत्रयज्ञ
संयोगइतिनसम्बध्यतेभाष्येकथमनुषजकस्यपत्नीतिव्यक्तेएवप्रश्नात्·वृषलत्वेनयज्ञसंयोगाभावात्पूर्वेणाप्राप्तेःसपूर्वत्वाभावाच्चैतदप्राप्तेरितिभावः।उपचा
रादिति·पाणिग्रहणाश्रयादितिभावः यद्वेति·इदमप्यौत्सर्गिकप्रकृतिककर्तृक्विपिदृढमानाभावात्·पूर्वसूत्रेयज्ञसंयोगइतितुवृषलस्यपतिःस्त्रीतिप्रयोगसाधना
र्थम्·सपूर्वस्यकिमिति·अवयववाचीपूर्वशब्दःकिमर्थइतिप्रश्नः।गवाम्पतिरिति·स्वामिनीत्यर्थः।निपातनइति·तेनचोदात्तसादेशस्यैवप्रवृत्त्यासपत्नीशब्द।
स्याद्युदात्तत्वमपिसिद्धम्।किञ्चसमानस्वामिकस्त्रीविशेषस्यैवरूढ्यावोधनार्थंङीपूनकारविशिष्टोच्चारणम्·अतएवसमानस्वामिकदासीभूम्यादौसपतिरि
त्येव·समानत्वञ्चैककस्यैकत्वन्तत्पत्नीसम्बन्धेनभेदमारोप्यवोध्यम्·मुख्यसादृश्यवत्यतिकासुतुनतथाप्रयोगइष्यते·त्रिसूत्रीति·व्याख्यानादितिभावः।सन्नियो।
गशिष्टइति·तेननदभावेङीवपिनेतिभावः।निनान्त्रानामित्यत्राकारउच्चारणार्थः।निननानामितिपाठेजश्त्वाभावःसौत्रः।त्रीण्येतानीति·अन्तेतशब्दस्योपसर्ज
नत्वेपितदन्तमनुपसर्जनमेवानुपसर्जनादितिचात्रतदन्तविशेषणम्।अतएवगृह्यवृत्तिकृतानारायणेनात्रबहुव्रीहिंकृत्वानेनङीवित्युक्तन्तदनुसारेणावे एम
दम्·परन्तुउपमानानीतिसूत्रस्थभाष्यस्वरसात्दिक्कृणजित्यादौगृह्यमाणविशेषणत्वस्यक्लृप्तत्वाच्चात्रापितथैवोचितम्·तत्रहिशस्त्रीश्यामेत्यादौश्यामाशब्दः ६
शस्त्रामेवोपमेयत्तुसमासवाच्यमितिपक्षेशस्त्रीश्यामोदेवदत्तइत्यत्रह्रस्वत्वन्नसिध्यति·यस्तुपसर्जनस्येतिह्रस्वत्वन्तदाकुम्भकपाललोहिनीत्यत्रानुपसर्ज
नलक्षणाईकारोनप्राप्नोतीत्यन्तम्·त्र्येण्येत्यस्यत्रिवस्थानेएन्येत्यर्थोवोध्यइत्याह।आर्षमत्रणत्वम्· वर्णात्किम्।प्रकृता।गतिरइत्याद्युदात्तः अन्तोदात्तइति।

श्वेतोवाजीजायतेइत्यादौतथापाठादितिभावः।छन्दसिक्रमिति·नादेशापवादस्तेनोत्सर्गसमानदेशाअपवादाइतिन्यायात्तस्यानिकत्वंङीप्सन्नियोगशिष्टत्वस्या
स्वबोध्यम्·विशुद्धिवाचीतिपाठेतत्प्रवृत्तिनिमित्तकइत्यर्थः।अन्यत्वेसन्निधानाद्यास्यानाच्चतोपधस्यैवप्रतियोगित्वेनान्वयइत्याह·तोपधभिन्नादिति·वर्णात्किम्स्वद्वा
स्वबोध्यम्·विशुद्धिवाचीतिपाठेतत्प्रवृत्तिनिमित्तकइत्यर्थः।
आद्युदात्तः नर्तकीति·शिल्पिनिष्वुन्।गौरशब्दोवर्णवाच्यप्यन्तोदात्तइतीहपाठः।अनडुहीति·आमनडुहः स्त्रियांवेतिवचनात्पक्षेआम्·सूर्येति·सचेषइति·सूर्यादा।
नामङ्गानामुपधायाइतिव्याख्यानेतुसौरीवलाकेतिनसिद्ध्येत्·सूर्यमीकादिगित्यणानान्ङीपिअणानमङ्गन्तसूर्यशब्दइतितदसिद्धिः।वचननुसूरीकुन्तीत्यत्रचरि
तार्थम्·अणोलोपेप्याभीयत्वेनसोऽसिद्धोऽणनिमित्तकात्तोपस्तुव्याश्रयत्वान्नासिद्धइतियस्योपधात्वमुपधाग्रहणादेवभाधिकारमभिव्याप्याभीयासिद्धत्वमि
तिबोध्यम्·यग्रहणानन्तरार्थम्·ङ्यामितिनिर्देशात्सप्तम्येकवचनाग्रहणम्·नक्षत्राणीति·नक्षत्रवाचकाद्योऽणातत्रेत्यर्थस्तेनतिष्येणयुक्तेनैषमहस्तिष्येभव
तीषइत्यादिसिद्धम्·मातरिषिच्चेति·पितामहीसिद्ध्यर्थमिदम्·दंष्ट्रेति·दंशेर्दन्नीशसेतिकरणेष्ट्रन्।अयमजादिषुपठ्यतेगौरादिषुमातामहीशब्दपाठोऽनार्षइत्य
न्ये जानपदीति·जनपदेभवेत्यर्थः।उत्सादित्वादञ्·ङीष्याद्युदात्तत्वेप्राप्तेऽन्तोदात्तार्थवचनम्·वृत्तिरनुच्छेद्याजीविका·अप्रत्ययइति·तथाचक्रियाशब्दोयमितिभावः
अमत्रे·कमण्डलुरूपे·कुण्डीकमण्डलौजात्यन्तिवनीसुतेयुमानितिमेदिनीकोशात्सनत्रनित्यस्त्रीलिङ्गइतिभावः।यदितुपिठरेतुननाकुण्डमितिविश्वकोशेतस्यन
पुंसकत्वमप्युक्तंपिठरामत्रशब्दौचपर्यायौपिठरंस्यात्खुसाकुण्डमित्यमरेनपुंसकत्वमात्रोक्तिरवयुत्यानुवादइत्युच्यतेतदानेकविधसंस्थानेषुअमत्रेषुकुण्ड।
व्यवहारेणकुण्डत्वेजातित्वाभावादप्राप्तोङीषितिबोध्यम्·स्त्रीविषयत्वादित्युपलक्षणमितिबहवः·कमण्डलुसंस्थानस्यानुगतत्वात्तद्रूपामत्रवाचिनोजातित्वम।
प्यस्तिसूत्रंतुनियमार्थमेव·अमृतेजारजायाङ्कुण्डेत्येवेत्यपरे·आवपनेचनित्यस्त्रीत्वादप्राप्तस्यङीषोविधिः।आवपनमितिसामान्येनपुंसकम्·गुणयोगा
दिति·गौणत्वेप्यप्रदकार्यत्वात्प्रवृत्तिरितिभावः विधित्वानुरोधाद्गौणएवास्यप्रवृत्तिः।वर्णाश्चेदिति· तद्धिशिष्टश्चेदित्यर्थः ।अन्यथागुणेशुक्लादयःपुंसीत्युक्तत्वात्स
द्वृत्तिःस्यादितिबोध्यम्·सूत्रेवर्णशब्दोऽशेआद्यन्तः।कालान्येति·कौर्यगुणयुक्तेत्यर्थः।नील्याअनिति·वृत्त्यनुसारेणेदम्·प्रतिपदोक्तत्वादत्प्रकृतिङीषन्तप्रवि
वृनीलशब्दस्यैवाग्रहणात्तत्वस्यलाक्षणिकत्वात्·अनाच्छादनेइतिनीलवर्णवतीशाटीत्यर्थेनीलीतिवारणायचरितार्थम्·नील्यारक्तागौरित्यर्थेनीलेवोच्चि।

स्त्री॰ तमित्यपरे॰ मैथुनेच्छाशब्द अर्श आद्यजन्तस्तदन्तीत्यर्थः अन्येति॰ मैथुनादन्यदिच्छति॰ कमेर्लेषपतेत्युकञ्॰ शोणशब्दो वर्णवाची वर्णानान्तणोत्याद्युदात्तः। अ

श॰ श॰ न्यतद्दतिसिद्धे विकल्पार्थमिदम्॰ वोतो॰ अत्र गुणवचनशब्देन समस्तकृदन्ततद्धितान्तसर्वनामजातिसङ्ख्यासञ्ज्ञाशब्दातिरिक्तशब्दो गृह्यते॰ आकडारसूत्र

७ भाष्यपर्यालोचनया तादृशानामेव तत्सञ्ज्ञालाभात्॰ तत्र हि प्रातिपदिकमात्रस्य गुणवचनसञ्ज्ञामुक्त्वाऽग्रे तद्बाधकत्वेनैताः क्रमेण पठिताः गुणवचनेत्यन्वर्थसञ्ज्ञया गु

णोपसर्जनगुणिवाचकानामेव तादृशानां सञ्ज्ञेति न रूपादीनां ग्रहणम्॰ जातिपदेनाकृतिग्रहणाद्द्रव्यवृत्तिजातिवाचकानामेव तत्र ग्रहणात्। कठादिशाखानद्ध्ये

तॄणां च तद्धितान्तत्वादेव व्यावृत्तिः। एतच्च सूत्रभाष्योक्तं सत्त्वे निविशतेऽपैति पृथक् जातिषु दृश्यते आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः इति गुणलक्षणा

न्नैकदेशस्तुक्तिर्वैतु विशेषणानां वैयर्थ्यात् भाष्यकृताऽव्याख्यानाच्च॰ तस्मादाकडारसूत्रोक्तमेव भाष्यसम्मतमिति भाष्यप्रदीपोद्योते निरूपितम्॰ गुर्विरिति॰

गुर्वी रोगादिकः। किदिन् उत इत्यस्याभावेऽपि खरुसंयोगोपधान्नेत्येतत्सामर्थ्येनात इत्यस्यात्रासम्बन्धः। उणादीनामव्युत्पन्नत्वात्कृदिकारादित्यस्याप्राप्तिरि

त्यभिमानः। गुर्वीति तु प्रत्युदाहरणमुचितम्॰ न परः॰ किम्॰ कामूः॰ वधूः॰ वधूः स्नुषा नवोढा स्त्री॰ कामूः विकलवाविस्यादिति कोशवलेन नवोढात्वस्य विकलत्वात्प

स्य च प्रवृत्तिनिमित्तत्वेन खरुशब्दवद्गुणवचनत्वात्॰ पतिम्वरेति॰ पतिलाभोत्कण्ठावतीत्यर्थः। बह्वादि॰ बहुशब्दस्योक्तरीत्या गुणवचनत्वाभावेन ग्रहणम्॰ कृदि

कारादिति। सर्वतइतिचगणसूत्रे॰ अकृतोऽपीत्यर्थः। व्यवस्थितविभाषाश्रयणात्क्वचिन्न॰ सुगन्धिः प्रियकतिर्वेश्येत्यादीति वृत्तिः पुराणशब्दोऽत्र पमते सयत्स्वपि

अयं पन्था अनुचितः। पुराण इत्यादाववनोदात्तदर्शनेन घृतादिपाठादन्तोदात्त इत्युदात्तनिवृत्तिस्वरेणान्तोदात्ते ङीपृङीषोः स्वरे विशेषाभावस्तथाप्यत्र पाठसामर्थ्या

त्पक्षे यवे वेति बोध्यम्॰ अजननिरिति॰ आक्रोशेनञ्यनिरितिजनेरनिः॥ अहन्शब्दोऽत्र पमते सामर्थ्यादनुपसर्जनाधिकारबाधः। दीर्घान्हीप्रावृडितिङीष्य राम

न्तोदात्तम्॰ बह्वादिराकृतिगण इति गणरत्नकृत्॰ पुंयोगादा॰ हेतौ पञ्चमी॰ आख्यायामिति पञ्चम्यर्थे सप्तमी॰ आख्याशब्दो बोधकपरः। आख्या चोपस्थित ७

त्वात्पुंस एव न स्त्रियाः स्त्रियां वर्तमानस्य स्थाख्यत्वाव्यभिचारादाख्यापदवैयर्थ्यापत्तेः। पुंस्येव यः प्रसिद्धः शब्द इत्यर्थः॰ पुंयोगाद्धेतोः प्रवृत्तिनिमित्तस्येषेण

स्त्रियां वर्तमानात्पुम्बोधकाच्छब्दान्ङीषित्यर्थः। योगः सम्बन्धः। पुंयोगात्किम्॰ देवदत्ता॰ आख्यायाङ्किम्॰ प्रसूता। तदभावे हि स्त्रियां वर्तमानेऽयत्याति पेदि

कंपुंयोगहेतुकप्रवृत्तिनिमित्तकमित्यर्थोपिसम्भाव्येत·अस्तिहितत्प्रवृत्तिनिमित्तेप्रसवेपुंयोगहेतुकत्वम्·उक्तपुमाख्यातुनैषेतिभावः।पुंयोगोत्रदाम्पत्यरू
पएवेतिभाष्यस्वरसः।यथेयंभर्तृपापकृतान्वन्धादीन्लभते·एवंतच्छब्दमपीतिभाष्योक्तेः।देवकीत्यादिनुगौरादिषुवोध्यमितिकेचित्·गोपालिकेति·
गाःपालयतीतिगोपालःसएवगोपालकस्तस्यस्त्रीत्यर्थः।ण्वुलन्तस्यकारकषष्ठ्यासमासनिषेधाच्छेषषष्ठ्यासमासेआपःसुपःपरत्वादित्वन्दुर्लभम्·वस्तुतः
शेषषष्ठ्याअप्यत्रकारकत्वात्सुबुत्पत्तेःपूर्वमेवतत्रापिसमासः।यथाकथञ्चित्कारकत्वमादायगतिकारकोपपदानामित्यस्यप्रवृत्तेरत्रत्यभाष्यादुपपदम
तिङिति·सूत्रभाष्याच्चलाभात्·यद्वातन्निषेधस्यानित्यत्वादप्रवृत्तौकारकषष्ठ्यासुबुत्पत्तेःपूर्वंसमासेनतत्रापीत्वंसुलभम्·सूर्येति·सर्तेःक्यप्याद्युदात्तसू।
र्यशब्दस्याप्यन्तोदात्तमिदम्·एतेनङीष्निषेधेनटापेवसिद्धिरित्यपास्तम्·सूरीति·सूर्यस्यस्त्रीयाकुन्तीयंमानुषीनदेवतेत्यर्थः।महत्वेइति·तद्योगएवै।
षांस्त्रीत्वमितिभावः·यवनाल्लिप्यामिति·लिप्यर्थकोत्रङीष्तस्येदमित्यण्वाधकइतिवहवः·लिपिरक्षरविन्यासः·मातुलेति मातुलानित्येप्राप्तेउपाध्यायाद
प्राप्तेविभाषेयम्·यातुस्वयमेवेति·अपादानेस्त्रियांघञुपसङ्ख्यानन्तदन्ताच्चवाङीषितितृतीयेइङश्चेतिसूत्रेवार्त्तिकादितिभावः।उपेत्याधीयतेयस्माद्
तिविग्रहः।अर्येतिहृस्वादिस्तदाह·स्वामिनीति·अर्यःस्वामिवैश्ययोरित्युक्तेः।आर्येतिपाठस्तुकैयटादसम्मतः।स्वार्थेइति·अतएवभाष्येऽर्याणीअर्येत्ये
क्तम्·पुंयोगएवप्रवृत्तौतुउपाध्यायीतिवदर्यीतिपक्षेङीषमेवोदाहरेत्·कर्मण्यणिति·सूत्रत्विन्द्रीत्यादिव्याहत्यर्थमितिभावः।क्रीतात्·करणादितिवक्त
व्येपूर्वग्रहणादनुवृत्तप्रातिपदिकरूपान्यपदार्थेऽवयववाचिपूर्वशब्देनवहुव्रीहिःतिनवस्त्रेणक्रीतेतिवाक्येन·अतइतिचानुवर्त्तते·करणेकिम्·सुक्री
ता·धनक्रीतेति·कर्तृकरणेइत्यत्रवहुलग्रहणेनगतिकारकोपपदानामित्यस्यानित्यत्वादत्रसुबुत्पत्त्यनन्तरमेवसमासइतिभावः·इदमुपपदमितिसूत्रे
कैयटेस्पष्टम्·अयमजादिष्वित्यन्ये·एवञ्चगनीत्यादेरनित्यत्वेनमानमितिनदाशयः।अतएवैतत्कर्तृकरणेइतिसूत्रेवहुलग्रहणफलत्वेनभाष्येनो।
क्तम्·अस्वाङ्गेतिसूत्रेगवादिग्रहणानुनियमार्थनेनहदिस्यइत्यादौषत्वन्नेतिरिक्·अभ्रलिप्तीति·क्तग्रहणेगतिकारकपूर्वस्यापीतिविशिष्टस्यक्ता।
नत्वम्।अल्पाख्यायामितिसमुदायोपाधिः।अल्पत्वङ्करणगतंक्रियागतंवा·क्तान्तादिति·प्रत्ययग्रहणपरिभाषालब्धक्तान्तेनप्रातिपदिकविशेष।

स्त्री· णातक्तान्तान्तादित्यर्थः। ऊरूभिन्नीति· जातिकालसुखादिभ्यः परा निष्ठेति भिन्नशब्दस्य परनिपातः पाणिगृहीतीति· अग्निसाक्षिकतया गृहीतपाणिकेत्यर्थः। भा।
श· शे· ष्येतु पाणिगृहीतीत्यादीनां विशे इत्युक्तम्· अस्वाङ्गपूर्वं· नस्वाङ्गमस्वाङ्गम्· पूर्वञ्चतत्पदम्पूर्वपदम्पुनः कर्मधारयः। अस्वाङ्गभूतात्पूर्वपदात्परं यत्क्तान्तन्तादन्तवहु
८ व्रीहेरित्यर्थः। उत्तरसूत्रे भाष्ये कल्याणपाणिपादेत्यादौ तत्प्रवृत्तिवारणाय तत्रैतदनुवर्त्यं कर्मधारयस्याश्रयणेनात्रायितथैवौचित्यात्· तत्र यदुपसर्जनम्पाणिपाद
मिति समुदायो न स्वाङ्गं स्वाङ्गसमुदायश्च न स्वाङ्गशब्देन गृह्यते यत्र स्वाङ्गं स्यादेतन्न तदस्वाङ्गरूपपूर्वपदात्परमित्युक्तम्· एवञ्चकरमुखीत्याद्यसाध्वेव जातिपूर्वादि।
तीहापि सम्बध्यते· ऽन्यथा बहुनञ्ञादीनामस्वाङ्गत्वेन विकल्पस्य तत्पूर्वके दुर्वारत्वात्तदाह· नित्ये प्राप्त इति बस्त्रञ्छन्नेति· बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरे शेषनि
घातेचानुदात्तान्तोयम्· पुत्रादिनीत्यादौ सुप्यजाताविति णिनिदर्शनेनाकृतिग्रहणत्वाद्यभावेन च पुत्रशब्दस्य जातिवचनत्वाभावे पि पुत्रहतीत्यादौ गौरादित्वात्
ङीषिति बोध्यम्· अस्वाङ्गादित्येव सिद्धे पूर्वग्रहणं स्पष्टार्थम्· किञ्च तदभावेऽस्वाङ्गादिति प्राधान्याद्बहुव्रीहिविशेषणं स्यादिति· स्वाङ्गाच्चोप· नदन्तादित्युपा।
सर्जनग्रहणं लब्धम्· बहुव्रीहेरित्यनुवर्तमाने उपसर्जनग्रहणफलमाह· अतिकेशीति· एकविभक्तीति केशानामुपसर्जनत्वमप्रधानत्वञ्च· शिखेति· इदमे
व प्रत्युदाहरणं शोभनेत्यादि सुशिखान्नम्· अक्षिप्तं विशि ष्टे ऽदन्तत्वाभावेनाप्राप्तेः। यद्यपि भाष्ये ऽशिखेति प्रत्युदाहृतं न तस्याप्येकदेशएवतात्पर्यम्· नञ्पूर्वं स
हनञिति निषेधेन प्राप्त्यभावात्· एतेन क्रोडादिषु शिखाशब्दपाठ इत्यपास्तम्· ननु स्वमङ्गं स्वाङ्गं च सुमुखाशालेत्यत्रापि स्यात्· मुखस्यापि शालाङ्गत्वात्· सु
केशी रथ्येत्यत्र च न स्यात् केशानां तदङ्गत्वाभावादत आह· अद्रवदिति· स्पर्शवद्द्रव्यपरिमाणा मूर्त्तिः रथ्येति· इदानीम्प्राणिस्थत्वाभावात्पूर्वलक्षणेनासिद्धिः
एवञ्चेदम्पूर्वलक्षणे प्राणिस्थत्वमुपलक्षणमित्यत्र तात्पर्यग्राहकमिति भावः। प्रतिमादिगतस्तनस्य प्राणिनिकदाप्यदृष्टत्वादाह· तेन चेदिति· अप्राणिनो राम
पि स्वाङ्गं यदि तेन तज्जातीयेन वस्तुना प्राणिर्यथा स   म्बद्धस्तथा ऽप्राणिः सम्बद्धश्चेदित्यर्थः। अतएव तस्य चेतन्त्रयायुतमित्यस्याप्राणिनोपिस्वाङ्गमिति शेषो ८
भाष्ये दर्शितः। पुरस्तादिति· सद्यननन्तरस्यैव बाधकः। मध्ये इति· स हि पूर्वस्यैव बाधकः। प्रामाणिका इति· एवञ्च सुगात्रीत्यादयो ऽपप्रयोगा एवेति भावः। उरः क्रो
डेति· दावन्तोयं स्वभावतो विशेषविष   पूर्यणखेति· पूर्वपदात्संज्ञायामिति णत्वम्। केवलयौगिकत्वे तु सूर्पणखीत्येव· नङीविति· अस्वरितत्वादिति भावः।

इतिशब्द इति· एवञ्च भाषायामिति व्यर्थं छन्दसीत्यस्य दिक्पूर्वपदादित्यत्रासम्बन्धेनास्वरितत्वादसम्बन्धसिद्धेः। परे तु दिगिति सूत्रे वा ह इत्यत्र च छन्दसीति वर्त्त
ते। लोके त्वन्तोदात्तमेव प्राप्नुवीति एवञ्च तन्निवृत्तिबोधनाय भाषाग्रहणम् इत्यस्यार्थः तेन छन्दस्यपि अत एव ङे राम् इति सूत्रे कैयटे सख्यशिश्वीति भाषायामि
ति पाठे दृश्यत इत्याहुः। क्वचिदिति· सर्वविधीनां छन्दसि वैकल्पिकत्वेन सख्यसप्तपदीभवेति सिद्धम्· न विद्यते शिशुरस्या इत्यशिश्वी क्वचिदस्याद्युदात्तत्वमुच्या
न्तरसत्वात्· जातिशब्देनार्थे कार्यासम्भवात्तद्वाचकग्रहणमित्याह· जातिवाचीति· अनन्यभावे विषयशब्द इत्याह· न च स्त्रियान्नियतमिति· भिन्नेष्वभिन्नाभिधान
प्रत्ययनिमित्तं जातिर्नित्यमेक मनेकानुगतं सामान्यमित्यस्य च शुक्लादिगुणस्यैकत्वनित्यत्वपक्षे तत्रातिव्याप्तिर्जनेनेन प्राप्यते सा जातिरिति च युवत्वादवस्था
प्रमतश्चाह· आकृतीति· ग्रहणमिति करणे ल्युट् सामान्ये नपुंसकम्। आकृतिरवयवसन्निवेशः। आकृतिर्ग्रहणं यस्या इति विग्रहस्तदाह· अनुगतेति· ईदृशाका
रेणोरित्याकृत्युपदेशव्यङ्ग्येत्यर्थः। न च बाल्याद्यवस्थादेरभिन्नानेकदेहवृत्तिदेवदत्तत्वादेराकृतिव्यङ्ग्यत्वेन तत्रातिव्याप्तमिति वाच्यम्· समानकालिकाने
कव्यक्तिवृत्त्यनुगतसंस्थानव्यङ्ग्येत्यर्थात्· अवस्थाभेदेऽपि तद्भेदाप्रतीतेश्च· स एवायमिति प्रतीतेश्च तज्जातीयोऽयमित्यप्रतीतेश्च· अत एवेन्द्रत्वादिकं न जातिः
पञ्चेन्द्रोपाख्यानादिभिरनेकेषां समकालिकत्वेऽपि सर्वेषां संस्थानस्यैकत्वे मानाभावात्· दुर्गापर्णेत्यादेः स्त्रीविषयत्वादपि न ङीष्· तटीति· अनुगतसंस्थानव्य
ङ्ग्यं तटत्वं समीपदेशविशेषो हि तटम्। नन्वेवं वृषलत्वादीनां जातित्वं न स्यात्। अवयवसंस्थानस्य ब्राह्मणासाधारण्येन तस्या आकृतिग्रहणाभावात्
किन्तु साक्षादुपदेशगम्या सेत्यत आह· लिङ्गानामिति· इयमपि जातिरित्यर्थः। लिङ्गानामिति कर्मणि षष्ठी सर्वाणि लिङ्गानि न भजतीति सर्वशब्दस्य लिङ्गापेक्षत्वेऽपि
भाष्यप्रामाण्याद्गजोऽपि· समासश्च आख्यानमाख्यातमुपदेशः कथनादुपदेशात् एकत्रेन्द्र इत्युपदिष्टेऽन्यत्र तद्ग्रहणे मानाभावान्नेन्द्रत्वादि तथा· ब्राह्मणत्वं तु एक
त्रोपदिष्टं तत्पित्रादिषु सुग्रहम्· वृषलत्वं न दपत्यन्तस्त्रोदरादौ सुग्रहम्· अत्राकृतिग्रहणेति नित्यानित्यसाधारणमिति युवत्यादिकमपि जातिरेतन्मते च
परश्चाहेत्यादिना यावद्द्रव्यभावित्वमित्यनित्यव्यावृत्तं लक्षणान्तरं भाष्ये दर्शितम्· एवञ्च भिन्नऋषिकर्तृकलक्षणद्वयप्रामाण्येन कुमारादिशब्दे जातिका
र्यविकल्पः· अत एव युवजातिरित्यत्र पुंवत्त्वं युवतितरेत्यत्र तदभावश्च भाष्ये उदाहृतः। नन्वेताभ्यामप्यौपगवी कठीत्यादेरसङ्ग्रहोऽनुगतसंस्थानव्यङ्ग्यत्वाभा

स्त्री॰ वात्सर्वलिङ्गत्वाच्चेत्यत आह। गोत्रञ्चेति। शास्त्रीयमत्र गोत्रम् अत एव गोत्राद्यूनि प्रत्ययो भवति स्त्रियां लुगिति न्यासे औपगवी माणविकेत्यत्राणयोऽनुपसर्जन
अ॰ मित्यनुपसर्जनलक्षणा ईकारो न प्राप्नोति मा भूदेवमणन्तादनुपसर्जनादित्येवम्भविष्यतीति प्रौढ्या पूर्वपक्षिणोक्तं तदङ्गीकृत्यैवं। इह तर्ह्यौपगवी भार्यः जातिलक्ष
९ णपुंवत्प्रतिषेधो न प्राप्नोति मा भूदेवं वृद्धिनिमित्तस्येत्येवम्भविष्यति। एवन्तर्हि ग्लुचुकायनीभार्य इदोष इत्येको गोत्र इति सूत्रस्थभाष्ये युवापत्यस्य जातित्वाभावक
थनं सङ्गच्छते। अन्यथा जातिलक्षणङीष एव परत्वाद्युक्तं युक्ते पुंवत्प्रतिषेधो न प्राप्नोतीत्यसङ्गतिः स्यात्। ग्लुचुकायनीभार्य इदोषस्तु ङीष्पुंवत्प्रतिषेधयोरसिद्धिः स्
योवोध्यस्सर्वतोक्तिन्नर्थादिति ङीषि तु पुंवत्प्रतिषेधासिद्धिरेव दोषः अत एव ब्राह्मो जाताविति सूत्रेऽपत्ये जातौ नेत्यर्थः सङ्गच्छते तत्त्वपत्यस्य जातित्वाव्यभिचारान्नद
सङ्गतिः गोनार्दं इत्यसिद्धिरतः सामर्थ्येनात्र शास्त्रीयगोत्रस्यैव गृहीतुमौचित्यम् अनन्तरापत्यप्रत्ययान्ते वृनीत्यत्र जातिप्रयुक्तो ङीषित्यनुपसर्जनादिति सूत्र
स्थभाष्ये नन्वेनं नरेरेषत्यासिद्धो गौणायनिवज्जात्राबारोप इत्यभिप्रायेणायूनि तु न शास्त्रीयगोत्रत्वारोपस्तत्र युवैव न गोत्रमिति नियमेन तत्सञ्ज्ञानिषेधात् तदाह।
अपत्यप्रत्ययान्त इति। अपत्यस्यौत्रप्रभृतीनि परिभाषित इति शेषः। शाखाध्येत्रिति। षष्ठीतत्पुरुषः। शाखायामस्त्रीविषयत्वाभावात् जातिकार्यं लभत इति। अ
नेनास्या निर्देशत्वम्बोधयति। कठेन प्रोक्तमधीत इति वैशम्पायनान्तेवासित्वात् प्रोक्तार्थे णिनेः कठचरकादिलुक्। अध्येतृणां प्रोक्ताल्लुक्। वृत्त्यो ऋचोऽध्येतव्याय
स्यादिति विग्रहे ऋक्पूरित्यसमासान्तः स्त्रिया अध्ययनाभावेऽपि तद्योग्यत्वात्राव्यस्थम्। अथानधीयाने माणवके ब्राह्मणीत्यत्रापत्येऽसि ब्राह्मो जाताविति तु क्वचि
लोपाभावः परे तु आकृतिग्रहणेत्येव लक्षणमाकृतिपदमुपदेशोपलक्षणमाकृतिद्वारा साक्षाद्वोपदेशेन ग्राह्या जातिरित्यर्थः। तत्रेदाकारो गौरित्यत्राकृत्युपदे
शग्राह्या गोत्वादिर्जातिः। अयं ब्राह्मण इति साक्षादुपदेशग्राह्या ब्राह्मणत्वादिर्जातिः। यद्वा आकृतिग्रहणाज्जातिमाह कोपदेशस्याप्युपलक्षणम्। लिङ्गाना
ञ्च न सर्वभागिति तत्स्वरूपानुवादः। तेन शुक्लादिगुणानामेकत्वेऽपि जातित्वाभावो बोधितः। अत एव विशेषणानाञ्चेति सूत्रे जातेरविष्टलिङ्गत्वम्भाष्येऽउक्त एम॰
म्। आविष्टलिङ्गत्वं नियतलिङ्गत्वमिति कैयटः। नच प्रायिकमिति केचित्। भाष्यप्रामाण्याज्जातेरेकशब्दवाच्याया न त्रिलिङ्गता नट स्त्रिष्विन्यादिकोशस्तत्र मा ९
द इत्यन्ये। सकृदाख्यातनिर्ग्राह्येत्यनेनैकत्वमनेकानुगतत्वञ्च बोधितम्। सकृदेकवारं क्वचिद्व्यक्तौ साक्षादाकृतिद्वारा वोपदिष्टा व्यक्त्यन्तरे गृहीतुं शक्येति

तदर्थः गोत्रञ्चेत्यादि प्राग्वदेव। अतएव प्रादुर्भावविनाशाभ्यां सत्वस्य युगपद्गुणैः। असर्वलिङ्गां बह्वर्थां नाम जातिं कवयो विदुरिति लक्षणान्तरं भाष्ये उक्तम्। सत्वस्य द्रव्य
स्य प्रादुर्भावविनाशाभ्यां या तो प्राप्नोति सा जातिरिति लक्षणं यावद्द्रव्यभाविनीति तदर्थः। अनेन गोत्वब्राह्मणत्वयोरुभयोरपि सङ्ग्रहः। गुणैर्युगपद्द्रव्येण सम्बध्यते यथा
निर्गुणस्य द्रव्यस्य नोपलम्भस्तथा जातिरहितस्यापीत्यर्थ इति कैयटः इति। इदं स्वरूपकथनमेव। अत्र लक्षणे असर्वलिङ्गामित्येतन्मदुक्तार्थकमेव न तु लक्षणान्त
रेऽनुपयोगात्। बह्वर्थां सर्वव्यक्तिव्यापिनीमित्यर्थः। एतदेकवाक्यतया पूर्वलक्षणेऽपि मदुक्तव्याख्यैवोचिता। अतएव कः पुनरेतयोर्विशेषः यथा पूर्वलक्षणे तथा
कुमारीभार्य इति भवितव्यम्। यथोत्तरं तथा कुमारभार्य इति भाष्ये लक्षणमित्येकवचनमेव प्रयुक्तम्। अतएवाकडारसूत्रशेषे आकृतिग्रहणा जातीत्येवोक्तम्भा
ष्य इत्याहुः। बलाकेति। अयं च विसकण्ठिकापदवाच्यजातिविशेषवाची स च वक्कान्तव्याप्योऽन्यो वा इत्यन्यत्। अस्त्रीविषयादित्यस्य प्रवृत्तिनिमित्तैकलिङ्गान्त
रहितजातिभिन्नादित्यर्थः। एतेन बलां कायतीति यौगिकस्य सर्वलिङ्गत्वाद् बलाका बकपंक्तिः स्याद् बलाका विसकण्ठिका बलाका कामुकी प्रोक्ता बलाकश्च बको मत इति
कोशे पुंलिङ्गस्याप्यभिधानाच्च नेदं युक्तमित्यपास्तम्। अतएव पाककर्णेति सूत्रं च रितार्थम्। तद्धि स्त्रीविषयार्थम्। अन्यथा तेषामपि यौगिकेऽर्थे लिङ्गान्तरस
म्भवेन पूर्वेणासिद्धेः तद्वैयर्थ्यं स्पष्टमेव। पाककर्ण जातिवाचिनः किम्। बहुपुष्पा शाखा। स्त्रीविषयादपीति। अजात्यर्थं तु न। प्राक्पुष्प्यादिषु जातित्ववर्णनं तु नित्य
[illegible] सदृक्काण्डेत्यादिनिषेधात्। योपधादपीति। पुनर्जातिग्रहणादिति भावः। अस्त्रीविषयादिति पूर्वसूत्रेण विच्छिन्नम्। नित्रिरिरिति। स्त्रीपुंसयोरपत्या
न्ताद् [illegible]। षट्पदी रगा इत्यमरादयं स्त्रियामपीति भावः। इतः किम्। दरतघ्नगघेत्यणोऽतश्चेति लुक्। ऊङुतः। ङकारो नोङ्धात्वोरिति विशेषणार्थः। अ
न्यथा यवागूरित्यादावपि निषेधः स्यात्। दीर्घोच्चारणं प्रश्लेषेणोकारद्वयविधानद्वारा ब्रह्मबन्धूरित्यादिवद् बह्वीहो परकप्निवृत्त्यर्थम्। रूपाणां सवर्णदी
र्घेणासिद्धेरिति भाष्ये स्पष्टम्। श्वश्रूरिति तु श्वशुरः श्वश्र्वेति निर्देशात्सिद्धम्। कुरुरिति। एकादेशस्य पूर्वान्तवत्त्वात् स्वादयः। अध्वर्युरिति। अध्वर्युशाखाध्यायि
वंश्याङ्गवेत्यर्थः। रज्ज्वादीति। उत इति तु नेह सम्बध्यते अलाबूरिति भाष्योदाहरणादिति भावः। कृकवाकुरित्यत्र मनुष्यजातित्वाभावात्पूर्वेणापि न। पंगोश्च प
ङ्गुशब्दो गुणवाचीति पूर्वेणाप्राप्तिः। श्वशुरस्येति। श्वश्र्वेति निर्देशादन्त्याकारस्य लोपः तन्निर्देशसिद्धमेवैतत् भाष्ये तु विदेन्न दृश्यते। ऊङाविति भाष्यस्वरस

सी· त्वयमनड्वाहो ऽव्युत्पन्नप्रातिपदिकमिति· ऊरूत्त· उपमीयते ऽनयेत्युपमा उपमानलक्षणाव औपम्यमुपमानत्वमेव च तद्योगो कोरूत्तरपदादित्यर्थः। उत्त
प्रा·शे· रपदस्थमिति तत्पूर्वपदमत्यासत्त्योपमानवाच्येव अतः करभोपमोरूरित्यत्र न तदाह· उपमानवाचीति· करभेति· मणिबन्धादाकनिष्ठं करस्य बहिर्भागः करभ
१० स्तद्वदूरू यस्याः इत्यर्थः। उपचारादिति· शफशब्दप्रवृत्तिनिमित्तस्य रूपदार्थे आरोपादित्यर्थः। एवञ्चोपमानस्योपमानोपमेयभावावबोधकत्वेन न पूर्व।
सूत्रप्राप्तिस्तु दारोपे च सनिमित्तमित्यन्यदिति भावः। ननु सहशब्दग्रहणं व्यर्थं सर्वस्योरूमत्वेन सहशब्दप्रयोगस्य तत्समभिव्याहारे व्यर्थत्वेन सहोरूरिति प्रयो
गस्यैवाभावादत आह· सहेत इति· रतिश्रममिति शेषः। सह विद्यमानावूरू यस्याः इत्यर्थ इति कैयटः। अतिरमणीयावित्यर्थ इति तदाशयः। कमलानि कम
लानिव यस्याः कद्रूरिति· नागमातुः संज्ञा· अब्लन्तोर्थमिति· छन्दसि तु कद्रुकमण्डल्वोश्छन्दसीत्यनेनैव सिद्धिरिति भावः। अमोय इति· शार्ङ्गरवाद्यीति लुप्तप
ञ्चम्यन्तं ङीनिति च षष्ठी· अनुपसर्जनादिति विभक्तिविपरिणामेनास्य विशेषणमेवं टिड्ढेत्यत्रापि सुवचम्· तदत्र पञ्चम्यन्तत्वमपि सुवचम्· अञ्चो ऽकारह
स्तिपिपाठः क्वचित्। शार्ङ्गरव्यां जातिलक्षणो ङीषि प्राप्ते वचनम्· अरण्यादिवृद्धिगुणौ। पुत्रशब्दो ऽत्र पठ्यते तेनास्य पाठसामर्थ्याज्जातित्वाभावेपि ङीन्· नृनरयो
रिति· किंस्वपि नारीति नृशब्देन सिद्धं नारीति पुंयोगङीषा दुर्वारम्· जातिग्रहणानुवृत्त्या तत्रास्या ऽप्रवृत्तेरिति नरग्रहणं व्यर्थम्· तथापि नरत्वजातिमा
श्रयन्तीपि पादयिषायां नारीति व्यावृत्त्यर्थं नरग्रहणम्। अत्राधाकारस्यैव वृद्धिर्लक्ष्यानुसारिव्याख्यानात्· वस्तुतस्तु ङीणसूत्रमनार्षम्। नुर्नरस्य च ध।
र्मो नारीति· अतो ऽत्रिति सूत्रेण नरस्य चेति वक्तव्यमिति वार्तिकेन वावृद्धा नार्यां सिद्धेः। रूढ्या योग्यतया च तद्धर्मो नरत्वजातिविशिष्टे व बुध्यते· अत
एव सेलव्यलन्तेरिणि चेति वचनं वास्तु निभवो वास्तव्य इति दिगादित्वात्संसाध्य प्रत्याख्यातम्भाष्ये नित्यानां शब्दानां यथा कथञ्चिदन्वाख्यानं कार्य
मिति कैयटः। रूढ्या सर्वदोषपरिहार इति तदाशयः· यङश्चाप्· पकारो याडाप इति सामान्यग्रहणार्थः। चकारस्य अनुबन्धत्वसम्पादनद्वारा सामान्य राम
ग्रहणविघातकत्वेन चारितार्थ्ये पित्करणं व्यर्थं आवट्येयादौ परत्वाच्चित्स्वरः पित्स्वरम्बाधत इति बोध्यम्· षाद्यन्त इति· एवञ्च गौकारस्य शब्दस्य गर्गादियञ् १०
न्तस्यौङी वा म्न तेनैव चापः सिद्धेः सङ्को ऽप्यादिषु न पाठः। सम्प्रसारणं तु तस्य नेष्टमिति स्पष्टं भाष्ये· यूनस्तिः। अनेभ्य इति ङीपो ऽपवादः। उत्तरार्थ इति।

इहकारणान्नदनित्यत्वज्ञापनार्थमितिकेचित्॥ ॐ ॥ इतिस्त्रीप्रत्ययाः॥ स्वौजसमौडितिविहितस्वादीनामर्थविशेषव्यवस्थान्दर्शयितुमाह· प्रातिपदिकार्थे
ति· इदमपिसूत्रक्रियायोगएवप्रवर्त्तते· ननोऽस्तिक्रियायाःसर्वत्रसत्त्वात्· आख्यातार्थकर्त्रादिनाऽभेदान्वयेनतद्द्वारकः क्रियायोगोबोध्यः। प्रथमान्तार्थ।
स्यापिक्रियाजनकत्वादस्याःकारकविभक्तित्वेनभाष्येव्यवहारः। ननूच्चैरादिशब्देलिङ्गस्यापिप्रातिपदिकार्थत्वाल्लिङ्गग्रहणमनर्थकमतआह· नियतेति·।
यस्मिन्प्रातिपदिकेउच्चारितेयस्यार्थस्यनियमेनोपस्थितिः सतदर्थइत्यर्थः। अन्वयानुपपत्तिपूर्विकालक्षणापदेएव प्रत्ययोत्पत्तिःसर्वत्रशक्यार्थएवशक्यता
वच्छेदकारोपएवचलक्षणेतिनलक्ष्यासङ्ग्रहोदोषः। तटादिशब्दानान्तत्तत्प्रत्ययसमभिव्याहारेसकललिङ्गबोधकतयानकिमपिलिङ्गंनतोनियतोप।
स्थितिकमितिनतद्बोध्यंलिङ्गमत्रप्रातिपदिकार्थशब्देनग्रहणमितिलिङ्गग्रहणमितिभावः। लिङ्गमात्रेति· लिङ्गस्यैवाधिकोऽतिक्रमेणार्थः। यद्यपिविशि
ष्टे[illegible]षणाभावोऽप्यधिकोभासते तथापितस्यवाक्यार्थत्वेनबहिरङ्गतयानस्वार्थमात्रनिमित्तकप्रथमप्रवृत्तसंस्कारबाधकत्वमितिबोध्यम्· अभेदेनसंसर्गे
णेति· इतरसम्बन्धानवच्छिन्नविशेषणविशेष्यभावसंसर्गेणेत्यर्थः। अभेदस्तुनसंसर्गइत्यन्यत्रप्रपञ्चितम्· इहोक्तार्थत्वादिति· उक्तार्थानामप्रयोगात्· प्रा
तिपदिकप्रतिपादितसङ्ख्याविशिष्टसङ्ख्यान्तराभावाच्चतदप्राप्तिः अनन्विनार्थकविभक्त्यपेक्षयानुवादकविभक्तेरेवन्याय्यत्वाच्चद्व्यादिभिःसर्वविभक्त्या
प्रतीति[illegible]वः लिङ्गविशिष्टपरिभाषयेन्द्राणीत्यादौप्रथमासिद्धिः परिमाणशब्दश्चपरिच्छेदकपरइत्युन्मानादिष्वपिप्रथमासिद्धिरितिबोध्यम्· परेतत्रसू
त्रेप्रा[illegible]दिकार्थशब्देनप्रवृत्तिनिमित्तंतदाश्रयश्चसत्त्वमुख्यइवारोपिततदाश्रयोऽपि· अतएवगोपोत्यादौस्वादिप्रकृतेर्लाक्षणिकत्वेऽपिनदोषः· अतएवलि
ङ्गग्रहणं[illegible]सार्थकम्। अन्यथास्वमोर्नपुंसकादित्यादिशास्त्रमामाण्येनलिङ्गस्यापिप्रातिपदिकार्थत्वात्तद्वैयर्थ्यंस्पष्टमेव· अतएवस्त्रियामितिसूत्रेस्त्रीत्वेद्यो
त्ये[illegible]र्थइतिभाष्येसिद्धान्तितम्· तस्माच्चसइत्यत्रपुंसीत्यस्यपुंशब्दस्यप्रकृतित्वेइत्येवार्थः। अभिहितेप्रथमेतिवार्त्तिकस्यतत्रप्रातिपदिकार्थगतका
[illegible]रकत्वेनाभिहितायांस्वार्थेप्रातिपदिकात्प्रथमेत्यर्थइतिनतद्विरोधः एतेनतन्न्येकारकेऽप्रत्ययार्थतातवतुन[illegible]स्यपास्तम्· तटादि
शब्दानामपिलिङ्गंवाच्यमेवद्योतकास्तुविसर्गादयःपूर्वंनान्तलिङ्गमुद्दिश्यस्वीकृत्यैवतस्यविसर्गादेःसाधुत्वान्वाख्यान[illegible]नियमांशनिवेशेतुनमानम्॥

का· इदमेवाभिप्रेत्यवृत्तौप्रातिपदिकार्थःसत्तेत्युक्तं सत्तेतिप्रवृत्तिनिमित्तोपलक्षणम्।आश्रयस्तुनक्षिप्तत्वान्नपृथगुक्तः एवञ्चप्रातिपदिकार्थइत्यस्या
श·शे· लिङ्गालिङ्गप्रवृत्तिनिमित्तकाश्चाव्ययपुमादयउदाहरणम्।लिङ्गविशिष्टपरिभाषयास्त्रीशब्दोऽप्यस्यैवोदाहरणम्।अन्येसर्वेलिङ्गाधिक्येइत्यस्यक्षेणत्वा
११ दिप्रवृत्तिनिमित्तकानांद्रोणादिशब्दानांपरिमाणत्वेनपरिमाणमपिलिङ्गवद्विशेष्यान्वय्यर्थः।एवञ्चतस्यलिङ्गवत्प्रातिपदिकार्थत्वाभावात्परिमाणग्रहणम्।न
द्रोणःपरिमाणमित्येषतुद्वौब्राह्मणावितिवत्प्रयोगः द्रोणशब्दस्यानेकार्थत्वाद्यामूलोक्तन्तुनयुक्तम् द्रोणोव्रीहिमानयेत्यस्यापत्तेः।किञ्चतिङ्समानाधिकरणे
प्रथमेत्यत्रानिर्णीतैकवाक्यतयाभेदान्वयेद्रोणोव्रीहिरित्यनिष्टम्।नचयदापरिमेयेद्रोणादीनांवृत्तिस्तदातस्यानेकत्वेनपरिमाणमात्रपरत्वेनदवोक्तव्यभिचारान्मे
यत्वविशिष्टोपस्थितिकत्वाभावेनाप्रातिपदिकार्थत्वादसिद्धौकर्मव्युत्पत्त्याप्रमेयार्थकम्परिमाणग्रहणमितिकैयटोक्तंयुक्तमितिवाच्यम्।सिंहोमाणवकइत्यस्या
सिद्ध्यापत्तेःलक्षणयापिसिद्धेश्च नियमांशनिवेशेमानाभावाच्च।एकोद्वावित्यादिसिद्धयेतुवचनग्रहणम्। अन्यथैतत्सूत्रोपस्थितानभिहितइत्यस्याप्रफलाभावा
दिनदेकवाक्यतापन्नसङ्ख्यायाःकान्वयित्वेनतदप्राप्तेः।रामावित्या —— दौसङ्ख्याधिक्येप्रथमातुद्व्येकयोरित्याद्येकवाक्यतयेति बोध्यम्।मात्रग्रहणाभावेतुय।
थार्थम्पिणिद्वितीयेतिनियमेनकर्मत्वाद्यानसमानकालिकार्थान्तरस्यैवव्यावृत्तिर्नतुतज्ज्ञानसमानकालिकार्थान्तरस्यातएवगान्दोग्धिपयइत्यादावपादानत्वा
दिविवक्षायांपिद्वितीया एवञ्चकर्मणिसत्यवद्वितीयानतुतदसत्त्वेइतिनियमाकारस्तथानेनापिप्रातिपदिकार्थसत्त्वेएवप्रथमानतुतदसत्त्वेइत्येवनियमःस्यात्
एवञ्चानर्थकनिपातेभ्यःप्रथमानैवस्यात् एवञ्चनत्समभिव्याहारेसपूर्वायाःप्रथमेत्यादिशास्त्रप्रवृत्तिर्नस्यात् तत्तत्वेकर्मादियोग्यार्थकप्रातिपदिकाच्चेन्न
व्रीहिनस्वार्थइत्यर्थोवक्ष्येषः इदमेवमात्रग्रहणात्कर्मणिद्वितीयेत्यादेरेवंदुक्ताकारनियमेमानम्।मात्रग्रहणाच्चसूत्रकारस्यप्रत्ययनियमपक्षएवाभिमतइतिगम्य। राम
ते तदकरणलाघवेनतुकर्मणिद्वितीयैवेत्यर्थनियमउक्तोभाष्यादौ स्पष्टञ्चेदंसर्वम्भाष्येइतिभाष्यप्रदीपोद्योतेनिरूपितमित्याहुः।सम्बोधनेच।तत्र ११
वर्तमानादित्यर्थः।सम्बोधनमभिमुखीकरणम् तत्फलम्प्रवृत्तिनिवृत्तीसम्बोध्यतावच्छेदकरूपेणसम्बोध्यस्यसिद्धिंविनातत्त्वासम्भवादनुवाद्ये एवैषावि
भक्तिः।अतएवविधेयभूतक्रियायामेवैतदर्थान्वयउद्देश्यतया अतएवराजाभवराजन्युध्यस्वेत्यनयोर्व्यवस्थयैवप्रयोगः।रामपाहीत्यादौवाभिमुखी

भवद्रामाद्युद्देश्यकप्रवर्त्तनाविषयारक्षणा॥मा॥नेवोधः।अजानिदेवदत्तेत्यादावपिजानीहीत्यादिःशेषोवोध्यस्तत्राजनस्यकर्मत्वाद्देवदत्तस्योद्देश्यत्वादुभयोः
समानवाक्यस्थत्वम् एकतिङ्वाक्यमितस्यचश्रूयमाणैकतिङित्यर्थइतिनदोषः उद्देश्यविधेयभावोवाक्यार्थः अभिमुखीभवनानुकूलव्यापारश्चसम्बोधन
विभक्त्यर्थशब्दप्रयोगरूपः।अजानीतिप्राप्तकालेलोट् अतएवगच्छेत्याद्यध्याहारेपिङ्मूर्खेत्यादिप्रथमा·अनध्याहारेतुद्वितीयैवेतिविक्॥ इतिप्रथमा ॥
कारके·कारकत्वङ्क्रियाजनकत्वम्·भाष्येकरोतिक्रियान्निर्वर्त्तयतीतिव्युत्पत्तिप्रदर्शनात्·ब्राह्मणस्यपुत्रम्पन्थानम्पृच्छतीत्यादौब्राह्मणस्यनकारकत्वम्पुत्रे
णान्यथासिद्धत्वाभावात् अतएवैषाङ्क्रियायामेवान्वयः।क्रियाजनकमितिज्ञानेकासांक्रियेत्याकाङ्क्षोदयेनक्रियायाजनकाकाङ्क्षयाचतत्रैवान्वयः।
द्यौचित्यात् सर्वेषाञ्चकारकाणांस्वस्वावान्तरक्रियाद्वाराप्रधानक्रियानिष्पादकत्वम्बोध्यम् असन्निहितसम्प्रदानस्यापिदातृबुद्धिस्थत्वावश्यकत्वेन
स्वत्वानस्यपूर्वकालत्वेनैवजनकत्वम्।एवंस्तोकम्पचतीत्यादौफलस्यापि·घटङ्करोतिस्मरतीत्यादौवीजघटादेःपूर्वकालत्वेनस्मृत्यादिनिष्पादकत्वम्बोध्य
म्·कर्तुरीप्सितशब्दोऽत्रक्रियापरोनाभिप्रेतपरोरूढःस्पष्टञ्चेदंवारणार्थानामित्यत्रभाष्यकैयटयोः।कर्तुरितिक्तस्यचवर्त्तमानइतिकर्त्तरिषष्ठी·
आप्नोतेःसन्नन्तान्मतिबुद्धीतिवर्त्तमानेकर्मणिक्तः मतिरिच्छेतितन्त्राकरः।एवञ्चकर्त्राप्तुमिष्यमाणङ्कर्मेत्यर्थः।आप्तिश्चात्रसम्बन्धः।सचकर्तृपदार्थो
[illegible]भूतव्यापारद्वारकएव·उपस्थितपरित्यागेनानुपस्थितकल्पनेमानाभावात्·एवञ्चकर्त्रास्वनिष्ठव्यापारप्रयोज्यफलेनसम्बद्धुमिष्यमाणमित्यर्थः
॥यथा[illegible]लम्पचतीत्यादौफलस्यापिव्यपदेशिवद्भावेनफलसम्बन्धित्वात्कर्मत्वम्·अतएवतत्समानाधिकरणेस्तोकम्पचतीत्यादौकर्मत्वसिद्धिः·प्रत्ययो
पात्त[illegible]नत्वनुनविवक्षितम्·तेनकटङ्कृतवान्करिष्यतीत्यादिसिद्धिः।कारकङ्कर्मसञ्ज्ञंस्यादिति·कारकेइतिप्रथमार्थेसप्तमीतेनकारकंसत्कर्मस
ञ्ज्ञमित्यर्थः।सञ्ज्ञिनःक्रियाजनकत्वन्तुम हासञ्ज्ञयाक्षिप्तम्·यद्वासप्तमीयथाश्रुतैवकारकपदञ्चक्रियापरम्·करोतिकर्तृकर्मादिव्यपदेशानितिव्युत्पत्तेः।
जनकमित्यध्याहारः।विषयत्वंसप्तम्यर्थः।कारकग्रहणेचस्वरितत्वप्रतिज्ञयेनदधिकारोक्तकर्त्रादिषट्कमेव·तेननटस्य[illegible]दीनाम्[illegible]उत्तरपदप्रकृति
स्वरःयामेवासइत्यादौचतत्स्वरसिद्धिरित्यन्यत्रविस्तरः।कर्तुःकिमिति·तदभावेपिकेनाप्तुमित्याकाङ्क्षायाङ्कारकाधिकारात्[illegible]पारलाभइतिप्रश्नः।माषे

का· वेति·माषेषु प्रसक्तमश्वस्माषनाशो मा भूदित्यन्यत्र बध्नातीत्यर्थः। तदाह·कर्मण इति·तमप्यग्रहणाद्धि मिति· अ वपवद्दारा समुदायस्य प्रश्नः कर्तुरीप्सिततमं कर्म।
१।४। ...ति भावः। पयसौदनमिति यदा कृतभोजनोऽपि पयोलाभेनौदनभोजने प्रवर्त्तते तदेदमप्युदाहरणम्·तत्क्रियायाः प्रकृष्टोपकारकत्वादीप्सिततमत्वमोदनस्य तु
१२ क्रियाजन्यफलाश्रयत्वेनाविवक्षणान्न दोष इति भावः। तमस्य फलन्त्वग्ने माणवकं वारयतीति। तदभावे हि वारणार्थानामिति सूत्रेण मस्यापषा
दः स्यात्... माणवकस्य कर्मत्वन्न स्यात्। न चाग्नेस्तच्चरितार्थम्·तस्यापि तद्रूपस्याप्यसंयोगरूपफलाश्रयत्वात्·वारयतेश्च संयोगाद्यनुकूलव्या
पाराभावानुकूलव्यापारोऽर्थः एष एव प्रवृत्तिविघातः। ईप्सितशब्द उभयत्रापि क्रियाशब्द एव· न च संयोगो न तत्कर्तृव्यापारजन्य इति तत्र कर्मत्वाप्राप्तिरि
ति... कर्तृव्यापारवाचकधातूपात्तफलाश्रयत्वमित्यर्थस्यैव तेन लाभात्·तमप्यग्रहणेऽपीप्सितमात्रे सावकाशस्य परत्वादीप्सिततमेऽनेन बाधः। ई
प्सिततमत्वञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वं न च नाम्यादौ·फलव्यापारयोः प्रकृते धात्वर्थत्वं तु प्रत्या
सत्तिलभ्यम्। तेन यदा पुष्ट्यर्थं माषभक्षणाय माषक्षेत्रे एवाश्वं बध्नन्तदा माषेष्वश्वं बध्नातीत्यादौ माषाणान्न कर्मत्वम्। बन्धनप्रयोज्यभक्षणफलाश्रय
त्वेऽपि भक्षणस्य बध्नात्यर्थत्वाभावात्·प्रयोज्यत्वनिवेशाद्गां दोग्धीत्यादौ विभागानुकूलव्यापारानुकूलव्यापारार्थकदुहियोगे पयसः कर्मत्वसिद्धिरिति स्या।
...भाष्ये·कर्मेत्यनुवृत्ताविति·अधिशीङ्स्थासामिति सूत्रात्·आधार इति कर्तृकर्मद्वारा क्रियाश्रयो हि स इत्याह·गेहमित्यादि·अनुक्ते कर्मणीति·कर्मप
देनैतच्छास्त्रबोधितकर्मसंज्ञकं कर्मत्वशक्तिमद्गृह्यते· सर्वकर्मविहितद्वितीयादीनां कर्मत्वशक्तिमानर्थः क्रियाकारकभावसम्बन्धश्च तदर्थः। राज्ञः पु राम
रुष इत्यत्र राजपुरुषयोः सम्बन्धस्य षष्ठीवाचिकत्वं स्थितमिति क्रियाकारकयोः सम्बन्धस्य द्वितीयावाचित्वे केति समर्थसूत्रस्य भाष्यात्·एवञ्च हरिं भज १२
तीत्यादौ हरिकर्मकं भजनमिति बोधः। अभिहिते त्विति·अनभिहिताधिकारादिति भावः। पञ्चकं प्रातिपदिकार्थ इति पक्षे कर्मणि द्वितीयेत्यादेर्द्वैक
योरित्यादेश्च नियमत्वमेतदभावेऽपि स्वादिसूत्रेणानिर्दिष्टार्थाः प्रत्ययाः स्वार्थे इति कर्मादौ सङ्ख्यायाञ्च स्वादीनां सिद्धेः। तत्र यदा कर्मणीत्यादेर्द्वैकयो
रित्यादेश्चैकवाक्यतायामेकस्मिन्कर्मणीत्यन्वयेन सूत्रजबोधे कर्माद्यर्थस्य प्राधान्यं तदा नार्थोऽनेन सूत्रजबोधविषयप्रधानविषयेणोक्तार्थानामि-

तिन्यायेन सिद्धेः। यद्यपि द्विर्बद्धं सुबद्धमिति न्यायेन द्वौ ब्राह्मणौ व्यतिलुनीत इत्यादौ द्योतकवाचकयोर्द्योतकयोश्च समुच्चयो दृष्टस्तथापि प्रकृते लभ्यानु
सारादुक्तार्थानामिति न्यायानुसरणस्यैव वक्तुं शक्यत्वात्· एवञ्च कर्मादीनां द्योत्यत्वमेव· यदा तु कर्मगतएकत्वद्वित्वान्वयेन संख्यायास्तत्वं तदा सूत्रमास्थे
यम्· भाष्ये एवं सुविभक्त्यर्थत्वव्यवहारो यो यत्तयैवनत्वेनावगतात्त्वकत्वमेषामिति विभावितव्यम्· नियमत्वानुपपत्तेरिति स्पष्टं बहुष्विति सूत्रे भाष्यादिषु द्यो
तकविषये प्युक्तार्थानामिति न्यायो ऽधिपरीति सूत्रे भाष्ये दृश्यते· तत्र ह्यध्यागच्छतीत्यादौ वाऽऽगच्छतीत्यतो नधिकार्थयोरध्यपर्योः प्रयोगस्योक्ता
र्थानामिति न्यायेनाभावमाशङ्क्य पूर्वोद्धावित्याद्यनुक्तार्थानां प्रयोगदर्शनेन समाधानं कृतम्· तत्र हि शब्दापूपशब्दयोर्वाचकयोः प्रकृतिप्रत्यययोर्वाच
कद्योतकयोर्द्वावित्यत्र तयोर्वाचकानुवादकयोश्च समुच्चयः अत एव हि दशाद्यादौ स मासेन सुजर्थस्योक्तत्वान्न सुजिति भाष्ये उक्तम्· तत्र हि समासः।
सुचैत्तुभयमपि द्योतकं सुजर्थस्य क्रियाजन्मेति तत्रैव वक्ष्यते तथा तद्धितद्विर्वचनयोर्द्योतकयोस्तद्धितेनोक्तत्वादीप्सायां न द्विर्वचनं माषशः इत्यादाविति सर्वे
ष्यदेरिति सूत्रभाष्ये उक्तम्· एवञ्च धातोरपि क्रियात्वक्रियाकालकारकसंख्यारूपमप्यनेकमर्थः अत एव तद्विषये पिद्धो कथोरित्यादेर्भावकर्मणोरित्या
देश्च नियमत्वं भाष्यसम्मतं सङ्गच्छते· अत एव दधिश्रजर्घाश्रवेदित्यादौ प्रातिपदिकधातुभ्यामेव सर्वबोधः। अत एव भावकर्मणोरिति यस्य तद्धृत्ता
[illegible]र्थे· स्तुक्रमोरिति सूत्रे भाष्ये दर्शितः। द्योत्यत्वादेवोभयत्रापि प्रत्ययार्थस्य विशेषणत्वमेवेत्यन्यत्र विस्तरः। प्रथमैवेति· सा द्वितीयातिपदिकार्थे
ष्यते [illegible]पि भवत्येवेति भावः· अत एवाभिहिते प्रथमेति वार्तिकं सङ्गच्छते· तिङ्कृदित्यादि परिगणनादेव कटम्भीष्मकुर्वित्यादौ विशेष्याद्युत्पन्न द्वि
तीयार्थता र्थत्वे पि विशेषणात्ता· यदा तु प्रक्रियादशायाङ्कटोपिकर्मभीष्मादयोपीत्याश्रयणात्कटत्वविशिष्टकटनिष्ठ कर्मत्वोक्तावपि भीष्मत्वादि
गुणविशिष्टनिष्ठस्य बोधार्थन्नमो पि सा बोधस्तु परस्परं तयोर्विशेष्यविशेषणभावे नैष· कारकाणाम्भावनान्वयव्युत्पत्तिः साक्षात्स्वाश्रयद्वारा वा
त्वविषये ति तत्परिगणनम्भाष्ये प्रत्याख्यातम्· तिङ्कृतोस्त्वप्रकृत्यर्थप्रतियस्य कर्मता तस्य सर्वस्यापिकर्मत्वमाह [illegible] निरूढतः कटः भीष्मः इत्या
दौ न क्वापि द्वितीयेति दिक्· शत्य इति· अन्नवदनिकर्मादिपदे इवात्रापि न विभक्तिवाच्यतावच्छेदकरूपेण कर्मादेर्भानमेव [illegible]पि गवश्चित्रगुरिति युक्तम्

का० न्तुदाहर्तुम्। तत्रच सम्बन्धस्ययेन रूपेणाषष्ठ्याभानंतेनैवतद्धितादिभिः समुदायशक्त्या। एतदधिकाराभावेचघटइत्यादौषष्ठ्यर्थकर्मत्वेनदृष्टानामेवप्रातिपदि
श० शे० कार्थपदेनग्रहणंस्यात्तद्भिन्नस्यैवषष्ठीविधायकेशेषपदेनग्रहणंस्यादित्यत्रान्यसम्बन्धस्यषष्ठीवाच्यत्वेनदृष्टत्वयाप्राप्ताषष्ठीवारयितुं सःवक्तुनसुकरम्मी।
१३ प्रातिपदिकपरिगणनफलमुक्त्वानत्वन्यास्यानायाशेषत्वान्नात्रशेषलक्षणाषष्ठी। अन्यानभिहितकर्मादीनामभावाच्चनान्याइत्याशङ्क्यनकेवलाप्रकृतिरि
तिसमासःकृतोनवान्योन्स्यमानाएतमभिसम्बन्धमुक्त्वाहनेवकुमितिकृत्वाद्वितीयेत्युक्तंभाष्ये तेनौपगवादावपिषष्ठीवारितैवेतितयोरप्यप्रत्युदाहरण
त्वमेव। तदुक्तमनेकमित्यत्रभावेपिचित्रगुरित्यत्रषष्ठ्यर्थस्यनियमेनभानात्षष्ठीप्राप्नोतीत्याशङ्क्याभिहितःसोर्थोन्तर्भूतःप्रातिपदिकार्थःसम्पन्नइतिप्रथ
मेनसूक्तम्। अनेनाशेषत्वरूपंषष्ठ्यप्राप्तिवीजमुक्तमन्तर्भूतइत्यनेनचित्रग्वादौसम्बन्धस्यैवप्रवृत्तिनिमित्तत्वेनप्रातिपदिकार्थपदेनग्रहणयोग्यतेतिबोध्यम्। परेतु
शतयइत्यादौकारकान्वययोग्यतावच्छेदकसाध्यत्वेननक्रियादेर्भानम्। अतएवनतत्रेतरकारकाणामन्वयः। इदञ्चकर्तृकर्मणोरित्यत्रनिरूपयिष्यते। एवंप्राप्तान
न्दइत्यादौयत्कर्मकप्राप्तिकर्तानन्दइतिविग्रहतोबोधेसमासतश्चानन्दकर्तृकप्राप्तिकर्मेतिबोधेविशेष्यविशेषणभावव्यत्यासेनैकार्थीभावःकल्प्यःस्यात्।इत्ति
विग्रहयोःसमानार्थत्वभङ्गश्च। किञ्चतथासतिवहुव्रीह्युपजीव्यस्यैकधर्मिबोधकत्वस्यसामानाधिकरण्यस्यहानिः। किञ्चैवम्प्राप्ताभार्यायंसप्राप्तभार्यइत्यादौपु
वत्त्वानापत्तिः। पूर्वोत्तरपदयोरेकविशेष्यकप्रतीतिजनकत्वरूपस्यवक्ष्यमाणस्यसामानाधिकरण्यस्याभावात्। तस्मात्कालाःपरिमाणिनेत्यादिसूत्रभाष्या।
क्तस्यवृत्तिविग्रहयोःसमानार्थत्वस्यनिर्वाहार्थमितिविग्रहयोःप्राप्तिकर्त्रानन्दकर्मेत्येवबोधः। विशेष्यतन्निरूपकत्वबाधेन विशेषणभूतप्राप्तितत्स्वर्थव
सानं स्वर्गोध्वस्तइतिवत्। शाब्दबोधस्तुविशिष्टेतदारोपेणोपपाद्यः। एवञ्चात्रशब्दात्कर्मादेःक्रियाजनकत्वेनविभक्तिवाच्यतावच्छेदकीभूतशक्तिमत्त्वेनच राम
नभानमतोनविभक्तिप्रसक्तिरतएवगतिकारकोपपदादितिसूत्रेगतिकारकोपपदादितिकिमर्थम्परमङ्कारकम्परमकारकमितिप्रतीकमुपादायपयास १३
म्प्रदानादयःशब्दानकारकरूपताम्प्रतिपादयंतितथाकारकशब्दोपीति। कृदन्ताद्धिक्रियायोग्यताविशिष्टद्रव्यवाचिनोनतदङ्गनाङ्कारकशक्तिम्प्रतिपादयन्ती
तिकैयटेनोक्तम्। अतएवतस्यकर्मत्वस्यनक्रियान्वयनियमः। अन्यथाकारकशक्तेःक्रियाविशेषणत्वनियमेनकर्मादिप्राधान्यानापत्तिः। एवङ्कर्मादिपदे

२ रिति·एवन्तिङभिधाने प्रातिपदिकात्प्रातिपदिकार्थस्य न तच्छक्तयाविशिष्टत्वेन भानमिति न ततो विभक्ति
रिवपक्वादिपदैरपि न विभक्तिप्रयोजकरूपेण कर्मादीनाम्भानम्· तिङ्कृत्तद्धितसमासैरभिधाने इत्यस्यायमर्थः एतैरभिधाने तत्तच्छक्त्यावेशेन न भानमिति
विभक्त्यप्रसक्तिरत्रैवानभिहित इति तात्पर्यग्राहकम् ध्वनितञ्चेदं सुप आत्मन इति सूत्रे भाष्ये तत्र हि इष्टः पुत्र इष्यते पुत्र इत्यर्थे क्यचमाशङ्क्य स्वशब्देनोक्तत्वा
त्वेति समाहितम्· इष्टशब्दसामानाधिकरण्यात्पुत्रार्थे कर्मत्वावगतावपि पुत्र इति सुबन्तञ्च कर्मवाचीति न ततः क्यजिति तद्भावः स्वकर्मत्वन्तद्वाचकशब्देन पुत्र
गतङ्कर्मत्वमुक्तन्तु पुत्रशब्दस्य तत्र वृत्तिरित्यक्षरार्थः। सुप आत्मन इति सूत्रस्य कर्मत्वविशिष्टबोधकसुबन्तादित्यर्थ इति तदाशयः। वस्तुतः कर्मत्वविशिष्टबोधे
र्थस्तद्बोधकादित्यर्थे इह भवन इत्यादिना समासान्तरमुक्तं वाक्ये फलं विशेष्यं वृत्तौ व्यापार इति समानार्थत्वाभावात्तत्रार्थे वृत्तिर्नेतीत्याहुः। प्राचा नुसारेणोक्तम्।
सुपायेणोत्यस्य फलमाह· क्वचिदिति· परे तु अत्र तु पुनः साधुत्वायेष्यते इत्यध्याहार आवश्यकः अन्यथा क्रियार्थक्रियोपपदत्वाभावात् ण्वुलकादियोगाभावाच्च स
दुर्लभं स्यात्· अध्याहारे तु विच्छार्थे तुमुन्निति सुलभः। विषयत्वेऽपि सम्बन्धस्य यज्ञे तुमिष्यत इति यत्तदसाम्प्रतमन्याय्यमित्यर्थः। एवञ्चाध्याहृततिङभि
धानान्न द्वितीया· तादृशे च्छायां अन्यत्प्यतञ्च तद्विषयस्यान्याय्यत्वेन· एवममुना रद इत्यवोधि स इत्यादौ नारद इति निश्चीकञ्जीय ज्ञानाकारानुकरणम्·ना
रद इत्येतच्छब्दाभिलप्यमानाकारो बोध इत्यर्थ इति प्रथमान्तस्य प्रातिपदिकत्वान्नात्र द्वितीया· अत एवावधिहरीत्यादौ समासः। तद्वचनसामर्थ्येन तस्य परि
गणनं न बकल्पनैव युक्ता· अत एवाभक्ष्यो अपइत्यादौ सप्तमी किञ्च निपातेनाभिधानेऽपि प्रातिपदिकादुद्भूततत्तच्छक्तिमत्त्वेनैव भानमिति तत्र विभक्तिः सुप्
लभा शब्दशक्तिस्वभावाद्व्येवार्थस्य द्योतकोऽपि निपातः। अत एव परिगणनप्रत्याख्यानेऽपि न दोष इत्याहुः न थायुक्तं· तत्त्वञ्च समभिव्याहृतधात्वर्थप्रधानव्या
पारप्रयोज्यतद्धात्वर्थफलाश्रयत्वरूपम्· पर धीनतया विषं भुञ्जानेऽपि भुजिक्रियाफलाश्रयत्वेनोद्देश्यत्वात्पूर्वसूत्रेणैव सिद्धमानतुक्तम्भाष्ये· आर्त्तश्च विष
मीप्सितं यत्तद्भक्षयतीति तस्माच्चौरान्पश्यतीति द्वेष्योदाहरणं विषयेन्द्रियसम्बन्धाद्दृश्यमाना अपि तेन दर्शनोद्देश्या अपि त्वनिष्टदर्शना एवेति स्पष्टम्भाष्ये कैय
टयोः। एवञ्च तत्र पूर्वेण प्राप्तौ वचनम्· अनीप्सितमनुद्देश्यन्तच्च द्वेष्यमुदासीनञ्च· तृणमिति· यथा अस्पृश्यमानस्य गङ्गादेः स्पर्शो द्विजन्यसंयोगादिफलाधा
रत्वन्तथैव तृणादेरपीति भावः। अनीप्सितपदाभावे ईप्सितस्य प्रकर्षहीनस्याप्यनेन संज्ञाप्राप्तौ वारणार्थानामित्यनवकाशं स्यात्· तथायुक्तमिति किम्

का· विषेणौदनम्भुङ्क्ते इत्यादौ करणत्वमात्रविवक्षायां विषस्य माभूत्। प्रयागात्काशीं गच्छतीत्यत्र प्रयागस्य च माभूत्तत्त्वे तु प्रकृतधात्वर्थफलाश्रयत्वरूपं तत्त्वभावा
मु·शे· न्तरेणापादानादिविशेषैरिति। तद्रूपेणाभासमानमित्यर्थः। अकथितशब्दोऽसंकीर्तितपरो नाप्रधानपर इति भावः। एवञ्चापूर्वविधिविषयप्रसक्तिपूर्वकत्वस्य वि
१४ वक्षायां सर्वथापूर्वविधेरप्रसक्तौ चैतत्प्रवृत्तिरिति बोध्यम्। अपादानत्वादिविवक्षायामप्यस्याप्येवं केनरूपेण तर्हि विवक्षेति चेत्कर्मत्वेनेति गृह्यताम् कारक।
न्त्वाप्यसञ्ज्ञानां स्वबोध्येऽर्थे कर्मत्वादिशक्तिमत्त्वबोधकत्वाद्दोषोपि तथैव। तत्र ष्ठश सत्त्वाभावे सर्वत्र षष्ठी प्राप्ता सर्वासां तदपवादत्वेन तदपवादत्वमा
त्रेण सम्बन्धार्थकत्वन्नयुक्तम्। अत एव कर्मणि द्वितीयेत्यस्य न वैरूप्यम्। अत एवैतत्सूत्रशेषभाष्येऽनेनैव सिद्धे आद्यसूत्रद्वयवैयर्थ्यमाशङ्क्येप्सित
मात्रस्याप्यनेन संज्ञायां वारणार्थानामिति सूत्रस्यानवकाशत्वे माणवकादपि पञ्चमी स्यादितीप्सिततममित्याद्यारब्धव्यमित्युत्तरितम्। एतेन दुहादी
नाम्व्यापारद्वयार्थकत्वे कर्तुरितिकर्मत्वे तत्त्वेनाविवक्षायामप्यनेन कर्मत्वमिति परास्तम्। वदतो व्याघातात्। अत एव कर्तुरित्यनेनासिद्धिमभिप्रेत्यास्यैवै
यर्थ्यमाशङ्क्य नाशङ्कितं तत्। कारकमिति क्रियाजनकमित्यर्थः। नन्वेवं नटस्य शृणोतीत्यादावतिप्रसङ्ग। सर्वथा तत्र तदप्राप्तेः गीतद्वारा च तस्य क्रियाजनक
त्वञ्च तस्य कर्मयुक्तत्वाभावस्तद्देशस्यापि परिगणने लभ्यत्वात्। नटस्यापादानत्वविवक्षा तु न कदापि आख्यातेति सूत्रे उपयोगग्रहणेनानुपयोगेऽप्य
स्यात्तु रपादानत्वाविवक्षायां बोधनादतः परिगणनमाह। दुह्याचिति। कर्मयुगिति। कर्मयुक्तत्वञ्च धात्वर्थव्यापारात्मकदनन्तरं वा तत्सम्बद्धत्वम्। तदत्र तु
विशास्यनिरिक्ते धात्वर्थव्यापारात्प्रागेव तत्सम्बद्धत्वं तद्विषये तु न तदनन्तरं तत्सम्बद्धत्वं बोध्यम्। तत्र सति सम्भवे प्राक्तत्सम्बद्धत्वमेव ग्राह्यम्। एतेन स्थाल्यादे राम
रपि तद्व्यापारादनन्तरम्पयस्सम्बद्धत्वेन कर्मत्वन्तेषान्दुर्वारमित्यपास्तम्। तेन गाम्पयो दोग्धि स्थाल्यामित्यादौ स्थाल्यादेरधिकरणत्वाविवक्षायामपि नाने १४
न कर्मत्वम्। एवञ्चापादानादीत्यादिशब्देनापादानसम्प्रदानाधिकरणान्येव। करणन्तु न गृह्यते हलादेः करणस्य पयआदियुक्तत्वाभावात्। यद्यपि गान्दोग्धी
त्यादौ गोः पयस्त्यजति गवा पयस्त्याजयतीत्याद्यर्थप्रतीत्या कर्तुरीप्सिततममित्येव सिद्धम्। प्रधानकर्मत्वञ्च गवादीनामिति तत्रैव लादिसिद्धिः। प्रधाना
कर्मत्वञ्च कर्तृप्रत्ययसमभिव्याहारे कर्तृनिष्ठप्रधानव्यापारविशेषणफलाश्रयत्वम्। ण्यन्तविषये ईदृशप्राधान्यस्यैवाग्रहात्। प्रकृते च पयोनिष्ठविभा

गानुकूलोयोगोनिष्ठोव्यापारस्तदनुकूलव्यापारस्यशब्दतःप्राधान्यात्·गर्गाःशतन्दण्ड्यन्तामित्यादौगर्गाणामेवनत्वमुद्देश्यत्वरूपमार्थम्प्राधान्यन्नुशतसूत्र
नुद्देश्यत्वेनाप्रधानगर्गानुरोधान्नशतावृत्तिरितिनवृद्धिसूत्रस्थभाष्यविरोधः।एवमेवशकारमसिचोदितइत्याद्युपपत्तिः अतएवप्रधानेकर्मण्याख्या
येत्वादीनान्दुहादिकर्मणाम्।अप्रधानेदुहादीनांप्यनेकर्तुश्चकर्मणाइत्युक्त्वाउत्तरार्द्धोपात्तातिरिक्ताद्विकर्मकाःकेइतिप्रश्नेनीवह्योर्हरतेश्चापिगत्यर्थानान्
ञ्चैवच द्विकर्मकेषुग्रहणन्द्रष्टव्यमितिनिश्चयइत्युक्तन्तत्रन्यादिग्रहणानवकाशिवन्ममव्यापारद्वयार्थकधातूपलक्षणम्·एवञ्चेदंसूत्रम्यर्थन्नेवापिय
दापयोनिष्ठविभागानुकूलव्यापारादिरेवधात्वर्थस्तदापादानत्वाद्यविवक्षायामन्येनासिद्धकर्मत्वार्थमिदमावश्यकन्तदाचाप्रधानेदुहादीनामित्युक्तेरप
धात्तेमयादावेवत्वादयः।अप्रधानकर्मत्वञ्चोक्तप्रधानभिन्नकर्मत्वन्तच्चोक्तार्थेगवादीनामस्त्येवफलानाश्रयत्वात्·मान्दोग्धीति·अन्तःस्थितद्रवद्रव्यनि
ष्ठविभागानुकूलव्यापारोदुहेरर्थः।तत्रगोरपादानत्वाविवक्षायामनेनकर्मत्वम्।तद्विवक्षायामपञ्चमी·गोःपयस्यन्वयेषष्ठी द्विकर्मकेषुगवादीनाङ्कृ
र्मत्वाविवक्षयाक्रियान्वयेषष्ठीन अनभिधानात्· षष्ठ्यन्तस्यनान्वययोग्यनाममसमभिव्याहारेतत्रैवान्वयस्योत्सर्गतोव्युत्पन्नत्वेस्च अतएवतण्डुलानामोदन
म्पचतीत्यत्रद्व्यर्थश्चैवपचिर्विकारयोगेषष्ठीत्येवकर्तुरितिसूत्रभाष्येउक्तमितिदिक्· बलिंयाचतइति·पदापरस्त्वनिर्वृत्तिस्वस्वत्वोत्पत्त्युभयानुकूलोव्या
पारोयाचेरर्थः स्वत्वोच फलेनिरूपकतयान्वयस्तदनेनकर्मत्वम् पूर्वविषयस्यकस्याप्यभावात्·नचात्रापादानत्वप्रसक्तिः।विभागस्यधात्वर्थत्वाभावात्
नहियाचनादेवापायोभवतियाचितोयद्यददातितदापायेनयुज्यतइतिभाष्योक्तेः।असंङ्गीतिपर्यायाकथितग्रहणेगान्दोग्धिगोर्दोग्धीतिचयाविष्ठिः।
भिक्षियोगेकर्मसंज्ञैवेत्येषाव्यवस्थेतिचसिद्धान्तेकैयटोक्तेश्चव्यापारद्वयार्थत्वेतुकर्तुरितिकर्मत्वम्बोध्यम्·वसुधयास्वामित्वसम्बन्धात्कर्मयुक्तम् अविनी
तमिति·याचिःस्वीकारानुकूलव्यापारोऽर्थः।स्वीकारश्चेदमवश्यङ्करिष्यामीतिशब्दप्रयोगजनकोज्ञानविशेषः।विनयेनचतद्विषयकज्ञानवत्वंसम्बन्धः·तण्डुला
न्नीति·तण्डुलान्विक्लेदयन्नोदनन्निर्वर्त्तयतीत्यर्थस्यकर्तुरितिसूत्रस्थभाष्यकैयटसम्मतत्वेनकर्तुरित्येवकर्मत्वसिद्धेरस्यैतदुदाहरणत्वञ्चिन्त्यम्·एवंस्वा
म्यदामकदानानुकूलव्यापारानुकूलशासनरूपव्यापारार्थकदण्ड्यादियोगे पितेनैवसिद्धम्।एवम्व्यापारद्वयार्थत्वेनसतिप्रयोगेबहूनान्धातूनान्द्विक

का· र्मकत्वम्बोध्यम्· अजमिति· निर्गमप्रतिबन्धपूर्वकयत्किञ्चिदधिकरणकचिरस्थित्यनुकूलव्यापारो रुधेरर्थः। अजो गोष्ठे तिष्ठति तत्र तान्निर्गमप्रतिबन्ध
प्रा·शे· पूर्वकं चिरं स्थापयतीति सम्प्रत्ययात्· अधिकरणत्वाविवक्षायामनेन कर्मत्वम्· व्यापारद्वयार्थत्वे कर्तुरिति कर्मत्वम्। पन्थानमिति जिज्ञासाविषयार्थज्ञाना
१५ नुकूलः केन पथा मन्तव्यमित्यभिलापादिरूपो व्यापारः पृच्छेरर्थः। ज्ञानविषयत्वेन पथः कर्मत्वम्· माणवकेन च तज्ज्ञानाश्रयत्वसम्बन्धः। अपादानत्वन्तु ना
त्र न हि प्रश्नादपायो भवति पृष्टोसौ यथा चष्टे ततोपायेन युज्यत इति भाष्योक्तेः सम्प्रदानत्वमपि न· कर्मसम्बन्धवत्त्वेनेच्छाविषयत्वाभावात्· व्यापारद्वया
र्थत्वे तु कर्तुरिति कर्मत्वम्· वृक्षमिति· विभागपूर्वकादाने चिञ्· वृक्षात्फलान्यादत्त इत्यर्थात्· अपादानत्वाविवक्षायामनेन कर्मत्वम्· धर्मं ब्रूत इत्यादि· ज्ञाना
नुकूलः शब्दप्रयोगरूपो व्यापारो ब्रूञर्थः। प्रवृत्तिपर्यवसायी स शासेः स च धर्मं कुर्वित्यादिविधिघटितोपदेशरूपः। विषयता च फलतावच्छेदकः सम्बन्धः
।वचनादिकर्मणा धर्मेण माणवकस्याभिप्रेयमाणत्वात्तस्य सम्प्रदानत्वम्· तदविवक्षायाञ्चानेन कर्मत्वम्· अत्र कर्तृव्यापारानन्तरं तज्ज्ञानाश्रयत्वरूपो मा
णवकस्य धर्मेण सम्बन्धः· नयतेः संयोगानुकूलव्यापारानुकूलो व्यापारोऽर्थः। स एव स्कन्धग्रहणादिपूर्वो वहेरर्थः। गत्यनुकूलव्यापारविशेषः कृषेः। बलाद्ग्रह
णपूर्वकदेशान्तरप्रापणं हरतेः। एषु कर्तुरिति कर्मत्वम्बोध्यम्· । एवञ्च भाष्यानुक्तानामत्र ग्रहणम्प्राचामनुरोधेनेति नत्वम्· भाष्योक्ता हि दुहियाचिरुधि
प्रच्छिभिक्षिचिञ्ब्रुविशासयः। अर्थनिबन्धनेयमिति इदमपि कैयटानुरोधेन· वस्तुतस्तु येषामेतदर्थानां द्विकर्मकत्वमिष्टं तेषां व्यापारद्वयार्थत्वेन क
र्तुरित्येव सिद्धम्· अन्यथाऽऽख्यातोपयोग इति सूत्रभाष्योक्तपरिगणनत्वभङ्गापत्तिः। किञ्च भाष्ये भिक्षिग्रहणवैयर्थ्यापत्तिः। उभयार्थकतया चिग्रहणेने
व सिद्धेरित्यन्ये· अकर्मकधातुभिरिति· तेषां स्वकरणकव्यापनवृत्त्या व्याप्तिरूपफलाश्रयत्वेन कर्तुरिति कर्मत्वं मासमास्त इत्यादौ मासमासनेन व्याप्नोतीत्यादि क्रमेण। राम
र्थ इति भावः। यत्त्विदमेव कर्मसंज्ञाविधायकमिति तन्न· भाष्ये तादृशवच नानुपलम्भात्· अकथितञ्चेति सूत्रे ऽकर्मकप्रकृतिकण्यन्तानाङ्कथन्द्विकर्मक १५
त्वमिति शङ्कायां। कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मकाणान्देशश्चेति भाष्ये उक्तम्· तच्च न विधायकं हि शब्दघटितत्वात्· किञ्च कालाध्वनोरिति सूत्रे
कालाध्वानौ कर्मवदिति वक्तव्यमिति वार्तिकप्रत्याख्याने प्राकृतमेवैतत्कर्म यथा कटं करोतीत्युक्तम्· अस्य वचनत्वे उक्तं वा प्रकृतं वेति वदेत् तस्मादुक्तरीत्या

कालादीनान्तद्योगे कर्मत्वात् द्विकर्मकत्वमित्येवैतत्तात्पर्यम्· अतएव समां समां विजायत इति सूत्रे समायां समायां विजायत इति विग्रहकथनपरं भाष्यं सङ्ग
च्छते· अन्यथानेन द्वितीयाया एवतत्र साधुत्वेन तदसङ्गतिः स्पष्टैव अतएवोक्तभाष्यार्थानुवादिका हरेः कारिका कालभावाध्वदेशानामन्तर्भूतक्रिया
न्तरैः सर्वैरकर्मकैर्योगे कर्मत्वमुपजायत इति सकर्मकविषयेप्यनेन प्रकारेण कालादिकर्मणां सकर्मत्वं तुल्यन्यायात् तेन मासमोदनम्पचतीति भव
तितत्र कालादिकर्माप्रधानं द्रव्यकर्म तु प्रधानं कालस्याधारत्वेन द्रव्यद्वारैव क्रियासम्बन्धात् किञ्च कठिनपाकस्य सहापरिमाणस्य वक्तुं सङ्कल्पे एव वि
शेषपाकोन्यस्याविरोधित्वद्रव्यधर्मस्य व्याप्तेर्व्याप्तियास्तु कालयोग इति सच वहिरङ्गः। अपि च साधनसम्बन्धेनाते क्रियायाः परिच्छेदकत्वात्कालाकाङ्क्षेति
स्त्वन्तरङ्गः अकर्मकव्यवहारस्तु धात्वन्तर्भूतकर्माभावनिमित्तएव अत्रबीजं वक्ष्यते· तदुक्तम् अतस्तैः कर्मभिर्युक्तो धातुर्द्वयैरकर्मकः। लस्य कर्मणि भावे
च निमित्तत्वाय कल्प्यत इति· गतिबुद्धि· शब्दः कर्मकारकं येषामित्यर्थः व्याख्यानात् तेन ह्लापयति क्रन्दयत्योर्न। अणौ विनिणिच्यमुत्पन्न इत्यर्थः। अत्रापि
च हेतुमण्णिजेव सत्ता वित्यत्रापि सएव व्याख्यानात्· अतएव भक्षेर्णिचि अध्वरितार्थः। सहिंसार्थ एव नत्वं भुगादिरिति बोध्यम् अन्यानधीनत्वलक्षणा
र्थप्राधान्यशब्दप्राधान्ययोः प्रयोजकव्यापारे सत्त्वेन तस्य गुणोषिकर्मत्वस्यान्तरङ्गादपि कर्तृत्वाद्बलवत्त्वेन कर्तुरित्येव सिद्धे णिजर्थेनाप्यमानस्य चेत्त्रा
न्यथादीनामेवेति नियमार्थमिदम् तेन पाचयत्यादियोगेनेति हेतुमति चेति सूत्रे भाष्यकृतः प्रधानकार्यं सर्वतो बलवदित्याकडारसूत्रे कैयटे स्पष्टम्
तेन गत्यादियोगे मध्यो न्यस्य कर्मत्वशक्तिमत्त्वम् पाचयत्यादियोगे कर्तृत्वशक्तिमत्त्वमेवेति बोध्यम्· गमयति देवदत्तेनेति· यज्ञदत्तकर्मकगमनानुकू
लदेवदत्तकर्तृकव्यापारानुकूलो विष्णुमित्रकर्तृको व्यापार इति बोधः। अत्र देवदत्तस्य न कर्मत्वम्· नियन्त्रणि· नियन्तृकर्तृक एव नतु प्रकृतिभूतस्यैव
र्थः प्रापणार्थवहेर्णिज्यर्थप्राप्तावपि ग्राममजापयतीत्यादौ तत्प्राप्तेर्गतिं विना सम्भवादासिद्धगत्यापि गत्यर्थत्वमिति भ्रमेण वार्तिकारम्भः। सुखमप्रा
प्त इत्यादौ न तत्क्षेपः। तत्र कर्तेरिक्त आदिकर्मणि बोध्यः। अतएव ग्रामम्प्रापयति देवदत्तेनेत्येवेति ध्वनितं गतीति सूत्रे नवेति सूत्रे भाष्ये चैनय
नेतृयाप्रापणात्यादेरिव गत्युपसर्जनप्रापणं वाच्यमिति तस्य गत्यर्थत्वमेवेति बोध्यम्· आदिखाद्योरिति प्रत्यवसानार्थत्वात्प्राप्तिः। प्रत्यवसान

का· श·रो· १६ नितन्त्वार्मिनोत्र हिंसादृष्ट्या जल्पयतीति· अन्वय तूदन्तमितिशेषः लाडनपूर्वकशब्दोच्चारणे जल्पत्यादेर्वृत्तिः तेन जल्पयति पुत्रं देवदत्त इत्यादौ पुत्रस्य कर्मत्वं पुत्रो धर्मं
जल्पति तद्बोधकवाक्यानि कथयति देवदत्तो जल्पयति धर्मं पुत्रमित्यर्थः। शब्दाययतीति· शब्दङ्करोतीत्यर्थे शब्दवैरेत्यादिना क्यङ्नामिच्· परे तु शब्दक्रियायाम्
मित्यर्थे ह्वाययतिशब्दाययतिक्रन्दयतीनां प्रतिषेध उक्तो भाष्ये· ननु शब्दकर्मकाणामिति पक्षे एवं च तत्र पक्षे भाष्ये शब्दाययतेः प्रतिषेधानुक्त्याऽकर्मक
शब्दाययति सत्वेन मानं शब्दस्य धात्वर्थसङ्ग्रहीतत्वेपि वहिर्भूतपुत्रादिकर्मणोऽभावे मानाभावात् ह्वयतावि विवेति चिन्त्यो यन्निषेध इत्याहुः। येषामिति· अयं भावः
गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णाविति सूत्रं नियमस्य सजातीयापेक्षत्वात् सकर्मकाणां च येषामेवेति नियमपरम्। एवं सिद्धेऽकर्मकग्र
हणं सामर्थ्याद्देशकालादिभिन्नकर्माभाववतोऽकर्मकग्रहणेन ग्रहणार्थं· तच्च सामान्यापेक्षं ज्ञापकम्। शास्त्रेऽकर्मकपदेनेदृशानामेव ग्रहणमिति तेन मासमास्त
इत्यादौ भावे लो भवति· न त्विति· तदविवक्षा हि हेधातदनपयोग्यकालत्वर्थत्यागात्तत्वे वत स्मिन्नर्थे तत्र सम्बन्धित्वेनान्वयविवक्षणादिति भावः। इदङ्के पठानुरोधेन·
परेत्व विवक्षितकर्मकाणामप्यकर्मकपदेन ग्रहणम् क्वादीनामविवक्षितकर्मकेभ्यः कृतपूर्वीकटमित्यादौ भाष्यकृता कैयटेन चाङ्गीकारात्· लुनाति निर्वा
त्तप्रेषणामिति विलावयति केदारं देवदत्त इत्यादौ केदारस्य कर्मद्वितीयान स्यणोरणाविति यत्र कैयटेन प्रयोगाच्च न चात्रार्थान्तरे वृत्त्याऽकर्मकत्वं न त्वविवक्ष
यति वाच्यम्· तत्व प्रत्ययमिद्धयार्थान्तरत्वाभावात् तदुदाहरणानुस्यन्दन इत्याद्यर्थे क नदी वहतीत्याद्याकरे स्पष्टम्· अधीगर्थेति सूत्रे कर्मणः शेषत्व विवा-
क्षयाऽकर्मकत्वे मातुः स्मर्यत इत्यत्र भावे लस्य भाष्ये उदाहृतत्वाच्च· यत्तु प्रकृतसूत्रे भाष्ये कालकर्मणामुपसङ्ख्यानङ्कर्तव्यमकर्तव्यम्। न च केचित्कालभावाध्व
भिन्नकर्मकास्तत्र एवं विज्ञास्यामः कचिद्ये कर्मका इत्युक्तम्· कचिदित्यस्य कालादेः कर्मसञ्ज्ञाप्रयोजकव्यापाररहितेऽर्थे इत्यर्थः तस्यायम्भावः। उक्तप्रयोगाऽक
र्मकपदमासामर्थ्यादत्र शास्त्रेऽकर्मकपदस्यावस्थानरे कर्मरहिते इत्यर्थ इति तादृश त्वस्सर्वथा द्रव्यकर्माभावात्तदविवक्षणाद्धेतुभयविधमपि कृतम्
वीत्यादिभाष्याद्वाहं विनिगमनाविरहाच्च· अत एवाकर्मकाधिकारेऽनुद्दस्यादिभ्य आत्मनेपदविधानं सङ्गच्छते अकर्मकशब्दे च धातुरेवान्यपदार्थः अर्थभेदेन च शब्दभेदः कामतेन का
[illegible] भवति न च भवति तेनाकर्मकाणां च।

तत्तामर्य्यादाभिचारिद्व्यकर्मरहितेत्यर्थो बोधितः। एवञ्च मासादिप्रयोगेपि नदवस्थायामेवाकर्मत्वम्बोध्यम्· एतेनात्रसूत्रेन च केचिदिति प्रतीकमुपा-
दाय कालादेरविवक्षयातेरकर्मकत्वसम्भवोऽस्त्येवेत्याशङ्क्यात्वनाविद्यमानकर्मकाणामेवात्रशास्त्रेऽकर्मकपदेनग्रहणम्· अन्यथा पचादीनामविवक्षि-
तकर्मत्वेलादयः स्युरिति यत्कैयटेनोक्तन्तत्त्यक्तम्· अतिप्रसङ्गस्त्वनभिधानाद्वारणीय इति वदन्ति· हृक्रोः। तत्राभ्यवपूर्वस्यहरतेर्भक्षणार्थत्वाद्विकारा-
र्थकरोतेश्चाकर्मकत्वात्प्राप्तेऽर्थान्तरे चाप्राप्ते उभयत्र विभाषेयम्· अभिवादिदृशोः हेतुमण्यन्तस्याभिवादेर्दृशिप्रकृतिकण्यन्तस्य चेत्यर्थः। अधिशीङ्· आधा-
र इत्यनुवर्त्तते तस्यैव कर्मत्वशक्तिमत्ताऽनेनबोध्यते· अभिनि· व्याख्यानादभिनीतिद्वन्द्वेनत्पूर्वो विशिति समासः। अभिनिवेशश्चाग्रहः। सन्मार्गविषया-
काग्रहवानित्यर्थः। व्यवस्थितेति· परिक्रयणइत्यतोऽन्यतरस्याङ्ग्रहणानुवृत्तेरस्यवैकल्पिकत्वम्· अतिप्रसङ्गस्तु न भिधानाद्वारणीयः। एतच्चैवार्थेष्वभि-
निविष्टानामिति प्रतीकेसमर्थसूत्रे कैयटे· परे त्वेवञ्चाप्यप्रयोगादभिनिविशत्यानुपूर्व्याश्चाविकृतायाय नश्रवणात्रैवेतन्तु अप्रवृत्तिरन्यतरस्याङ्ग्रह-
णानुवृत्तौ व्यवस्थितविभाषाश्रयणेऽवनमानमित्याहुः। उपान्व· अलुग्विकरणत्वाङ्गादेरेवग्रहणमित्याह· वसतेरिति· भाष्ये ऽस्यार्थस्यनेत्युक्तम्। मशकार्थो-
धूम इतिवद्दशिनिवृत्त्यर्थस्येति तदर्थस्तत्फलितमाह· अभुक्त्यर्थस्येति· उपोष्य रजनीमेकामित्यादौ कालाध्वनोरिति द्वितीया ग्रामे उपवसतीत्यत्र ग्रा-
मे वसन् त्रिरात्रमुपवसतीत्यर्थ इति इदन्तु कार्यमिति भाष्यस्य स्पष्टम्· उपपदविभक्तिमाह· उभेति· उपपदविभक्तीनां सम्बन्धोऽर्थः। विशिष्यार्थानुक्तेः षष्ठ्य-
पवादत्वाच्च· उभसर्वयोस्तसाविति विग्रह· उभांश उभयशब्दनिष्ठं प्रकृतित्वमुभशब्देऽस्तीत्यतस्तत्प्रकृतिकत्वं षष्ठ्यर्थः। उभयशब्दसर्वशब्दप्रकृति-
कतसन्तयोर्ग्रहणमित्यर्थः। आम्रेडितान्तेष्विति· कृतद्विर्वचनेष्वित्यर्थः। धिक्कृत्वेति· धिगर्थो निन्दा· कृष्णाभक्तसम्बन्धिनी निन्देत्यर्थः। उपर्यादीनां
समीपोर्ध्वदेशादिवृत्तित्वमर्थः। अभितः परित इत्यत्र प र्यभिभ्याञ्चेति तसिल्· तत्राद्यस्योभयत इत्यर्थोऽन्यस्य सर्वत इत्यर्थ इति पर्यभिभ्या-
ञ्चेत्यत्र भाष्ये· अन्तरान्तरे· अन्तरेणेत्यटवन्तसाहचर्यादन्तरेत्यटावन्तम्। अन्तरेत्यत्र तृतीयान्तसा हचर्यादन्तरेणेत्यतृतीयान्तम्· साचर्यं-
साद्दश्यं न तु यथाऽस्य गोर्द्वितीयेनार्थ इति गौरेवानीयते नाश्वो न गर्दभ इति दृष्टान्तपरभाष्येण सदृशानामेव प्रयोगे सहायतेत्यर्थस्य प्रतिपाद

का० नात् तेन किमनयोरन्तरेण ज्ञातेनेति सिद्धमन्तरेण विशेषेणेत्यर्थः। एवञ्चैतयोरव्यययोरेव ग्रहणम् यद्यन्तरशब्दस्य प्रथमैकवचनान्तस्यानभिधा
प्र० शे० नादनन्तरत्वानुपूर्वीकमव्ययमेव प्रयोगेषु दृश्यत इति तत्साहचर्यादन्तरेणेत्यप्यव्ययमेव तदुक्तम्भाष्ये· अन्तराशब्दोयमदृष्टापचारो निपातए
९७ वेति तिबोध्यम्· अवधित्वरूपस्सम्बन्धो मध्यत्वान्वयी मध्यार्थान्तराशब्दयोगे द्वितीयार्थः तस्यैव सम्बन्धत्वेन बोधे षष्ठी। ह्योर्दिपद्य तुर्नद्विती
याउपपदविभक्तेरिति न्यायेन तत्र प्रथमायाएव प्राप्तेः। युक्तग्रहणानुस्पष्टार्थम्। अधिकृत्येति विभाषाकृञीत्यनमितिबोध्यम्· महासञ्ज्ञाकरणा
न्वर्थत्वाय कर्मक्रियाप्रोक्तवन्तः कर्मप्रवचनीयाः। बाहुलकात्कर्तरि भूतेऽनीयः ते न सम्प्रतिक्रियान्द्योतयन्ति किन्तु क्रियानिरूपितं सम्बन्धवि
शेषन्द्योतयन्ति। क्वचित्सम्बन्धविशेषद्योतकेपि वचनसामर्थ्यात्सञ्ज्ञा यथाधिपरी अनर्थकौ। सुः पूजायामिति च निपातसञ्ज्ञया समावेशस्तस्मात्पृथगु
क्तः। लक्षणादाविति· तत्सम्बन्धे लक्ष्यलक्षणभावरूपेऽनुनाद्योत्ये इत्यर्थः। अपवादइति· तदयोगत्वसम्बन्धस्य क्रियान्वयात्तयोः प्राप्तिः तेन प्रकृतेऽनोर्गतिगता·
विति निघातो नः। द्वितीयार्थो लक्ष्यलक्षणभावः सम्बन्धो हेतुश्चेत्यनुना द्योत्यते· लक्षणत्वञ्च ज्ञानजनकज्ञानविषयत्वम्· जपज्ञानेन हि कालविशेषवि
शिष्टा वृष्टिर्ज्ञायते· जपामिन हेतुज्ञानजन्यज्ञानविषयो वर्षणमिति बोधइत्याह· हेतुभूतेति· परापीति· कर्मप्रवचनीयसञ्ज्ञा वक्कशो हेतुत्वाविवक्षायां।
हेतुतृतीया वक्कशो धत्तेन कुलमिति प्रकृते च हेतुत्वविवक्षायाम्परत्वात्तृतीयाप्राप्तिरिति भावः। पुनस्सञ्ज्ञेति· लक्षणेत्थम्भूतेत्येव सिद्धे पुनस्सञ्ज्ञाकरणं।
बाधितपुनर्द्वितीयाविधानसामर्थ्यादित्यर्थः। एतेन सञ्ज्ञाया विजातीयत्वाद्विभक्तिबाधकः कर्तुमशक्य इति परास्तम्· स्पष्टञ्चेदम्भाष्ये· तृतीयार्थे तृतीया
शब्देन तन्निमित्तशब्दः सहयुक्त इत्यत्रोपात्तः· ननात्वात्सहशब्दो लक्ष्यते तदर्थे साहित्ये द्योत्ये इत्यर्थः साहित्यरूपस्सम्बन्धोऽनुद्योत्यो द्वितीयार्थ इत्याह· न एम
द्येति· कइति· कर्तरीति भावः। उपोधि· चाद्धीनो। सप्तमीति· यस्मादधिकमित्यनेनेति भावः। उपपरार्यान्द्रोणइति यथास्वार्यपेक्षाधिकत्वान्द्रोणइत्यर्थः। ९७
तेनोभयं मत्रीति फलति। इत्थम्भूतः कश्चित्प्रकारं प्राप्तः सस्मास्वायते नेनेति इत्थम्भूतास्यान प्रकारविशेषनिरूपकम्· भागशब्देनांशस्तत्र सन्नेनत।
स्वामीउच्यते· वीप्सायां द्विर्वचनविशिष्टवृक्षशब्दबोध्यत्वात् आह· विषयभूतेष्विति· वृक्षप्रकाशेन विद्युद्द्योतते देशज्ञाना दृक्षोलक्षणम् वृक्षम्वृक्षमिति वृक्ष

स्यव्याप्यकता सम्बन्धेनान्वयो यद्यपि द्विर्वचनबलादेव तथापि प्रत्यादिसत्वे सोपि तन्निर्णायक इति सम्बन्धपरिच्छेदकत्वम्बोध्यम्· वृक्षादीनां सेचनेकर्मत्वेपि त
त्वेनाविवक्षायामनेन द्वितीया· किञ्च परत्र कर्मणि द्वितीया सा नदा प्रतिना सामर्थ्याभावात्प्रतिवृक्षमिति समासानापत्तिः। किञ्च प्रत्यादेः क्रिया विशेषका
त्वेन्वर्थतया कर्मप्रवचनीयसञ्ज्ञायाएवानापत्तिः। अतएव भाष्ये किमर्थम्पुनरिदमुच्यते न चोपसर्गसञ्ज्ञाबाधनार्थं ङ्क्रियायोगाभावादित्युक्त्वा द्वितीया
र्थमिति सिद्धान्तितम्· अतएव प्रत्यर्थे शब्दनिवेश इत्यादावर्थस्य निवेशनक्रियानिरूपिताधिकरणात्वेप्यर्थमर्थम्प्रतीतिविग्रहो भाष्ये दर्शितः। वृत्तिविषये
प्रतिरेववीप्साया अपि द्योतक इत्यन्यदिलाक्षणाम्। फलान्तरमप्याह· अत्रेति· यदत्रेति· यदत्र तु मम भागः स्यादित्यर्थः। कुतोपीति· कुत इत्यपादाने पञ्चमी· द्वि
तीयातु न कर्मप्रवचनीयद्योत्यसम्बन्धप्रतियोगिस्वरूपस्य कर्मप्रवचनीययुक्तत्वस्याभावात्· गतिसञ्ज्ञाबाधादिति· धात्वर्थमात्रद्योतकत्वेन क्रियायोगा
त् गतित्वंप्राप्तं विशेषद्योतकत्वाभावात्तु नर्थकत्व व्यवहारोपीति भावः। सुसिक्तमिति· सेकगतपूज्यत्वद्योतकः सुः क्रियापूज्यत्वकृतेन तत्क्रियाकर्तुः
पूज्यत्वेगम्येएवैषा सञ्ज्ञा अतएव सुषिक्तं ङ्किन्तवेत्यत्र न· अतिक्रमणमुचितादधिकानुष्ठानम्। चात्पूजायामित्यनुकृष्यते अतिदेवानिति· देवेभ्योऽधि
को देवपूज्य इति वार्थः। द्वितीये कुगतीति समासस्याभावस्त्वेनभिधानात्· आद्ये तु प्राप्तिरेव न स्वतीपूजायामेवेत्युक्तेः। अपिः पदार्थे· पदस्याप्रयुज्यमानप
दान्तरस्यार्थः पदार्थः। सर्पिषोपीति· अत्र बिन्दुरित्यादेः पदस्यार्थोपि द्योत्यः। तदुक्तम्वृत्तिकृता· मात्रा बिन्दुः स्तोकमित्यस्यार्थेपि वर्तत इति· सम्भावनायाम्बि।
ङिति· उपसर्गवादाशङ्कयोश्वेति सूत्रशेषे भाष्ये पठितेनोपसर्गवादाशङ्कयोर्लिङित्यनेन· तत्रलोकवेदस्थधारणामित्यपि तत्रैव भाष्ये स्पष्टम्· तत्राशङ्कोत्प्रेक्षा सम्भावना
प्युत्कटकोटिकाशङ्कैवेति भावः। कर्मप्रवचनीयत्वात्तद्द्योत्यसम्बन्धमाह· तस्याएवेति· सम्भावनायाएवेत्यर्थः। कर्तृदौर्लभ्यमिति· षष्ठीतत्पुरुषः कर्तृपदम्प्रक।
ताभिप्रायम्। सर्पिषोपि पिबेदित्यादौ कर्मदौर्लभ्येत्यादि बोध्यम्· तत्र बिन्दोस्तद्दौर्लभ्यप्रयुक्तदौर्लभ्यसम्बन्धस्य च द्योतकोपिः सम्बध्यत इति स्यात्पदवाच्यक्रि
यायाम पिद्योत्य बिन्दोः कर्तृतया तद्वोत्योक्तसम्बन्धेन चान्वयादिति भावस्तदाह· अपिशब्दबलेनेत्यादि· एवञ्च सर्पिरवयवबिन्दुदौर्लभ्यवतीतत्कर्तृकासम्भा।
वना विषयास तेति बोधः। विशिष्टसत्तायाः सम्भावनाविषयत्वबोधे दौर्लभ्यस्यापि सम्भावना विषयत्वमनुभवसिद्धम्· नन्वेवङ्कर्मप्रवचनीयद्योत्येऽर्थे सर्पि

का॰ योऽन्वयेन तस्य कर्मप्रवचनीययुक्तत्वाद्द्वितीया स्यादत आह· द्वितीयात्विति· नत्वपिनेति· बिन्दुना योगेप्यपिद्योत्यसम्बन्धेनानन्वय इत्यर्थः। कर्मप्रवचनीययो
श॰ त्यसम्बन्धप्रतियोगित्वमेव तद्युक्तत्वम्· प्रकृते चापिद्योत्यस्योक्तसम्बन्धस्य बिन्दुः प्रतियोगी न सर्पिरिति भावः। यदा सर्पिषःप्रतिपत्तये ऽपिद्योत्यस्यापि विवक्षा प्रयोग।
९८ स्तदापि द्वितीया स्याधित्वोपपदविभक्तेरिति प्रथमैव तत्र कारकविभक्तित्वञ्च क्रियाजनकत्वार्थकविभक्तिकत्वमितिदिक्· सञ्ज्ञाफलमाह· अनुपसर्गत्वादिति·।
अपिस्तूयादिति· पूर्ववल्लिङ्। क्रियाविषयशक्त्यादिना सम्भावनमपिद्योत्यम्· प्रकृते ऽवाङ्मनसगोचरं स्विष्णुमपि स्तूयादिति शक्त्युत्कर्षाविष्करणम्· अत्यु
क्तिरसम्भाव्यार्थसम्भावनम्। सम्भावनपदस्य दृशार्थकत्वे व्याख्यानमेव शरणम्। विष्णुविषयायाः शक्त्यसम्भावने चान्यविषया निश्चयेन शक्या कर्तुमि।
तिफलति शक्त्युत्कर्षमित्यौचित्योत्कर्षादेरप्युपलक्षणम्· अपिवेदान्तपारगं हन्यादित्यादौ हननक्रियायां सम्भावनाविषयौचित्योत्कर्षद्योतनात् सम्भावि
तौचित्यस्य चानुष्ठानमयुक्तमिति अस्यस्वार्थे तात्पर्याभावो ऽयमंशाम्रोक्तः सङ्गच्छते। कामचार इच्छया प्रवृत्तिः स्तुहिमावायथेष्टं दुर्विनियावत्· प्रैषातिसर्गेति लि
ङ्· अपिस्तूयाद्वृषलमिति· उपसम्भादेति सूत्रपठितत्वान्तिकेन परस्मान्तरङ्गत्वाच्च गर्हायां लडपीतिबाधित्वा सम्भावने लिङ्क्रियागतगर्हात्वमपिद्योत्यम् वृषलपा
दसमभिव्याहारात्सन्तुते गर्हात्वं फलति नदेवधिक्रित्वादिना ऽनूद्यते अपिसिञ्चेति· अपिद्वयेन मिलितेन समुच्चयद्योतनात्प्रत्येकं सञ्ज्ञायामुभयत्रापि षत्वाभा
वः कालाध्व· अत्यन्तसंयोगो निरन्तरसम्बन्धः स च गुणक्रियाद्रव्यैरभावेन च। तेन मासम्भोजनाभाव इत्यादेः सङ्ग्रहः। गुणादिभिः कालाध्वनोरत्यन्तसंयोगे
प्रत्यासत्त्या कालाध्ववृत्तिभ्यान्द्वितीयेत्यर्थः। मासमधीत इति· गनिबुद्धिस्थंयावदवयवसम्बन्धरूपाव्याप्तिर्द्वितीयार्थः एकादश्यां रात्रौ जागृयादित्यादावधि
करणस्यत्वविवक्षणान्न द्वितीया इति द्वितीया। स्वतन्त्रः। कारकाधिकारात्क्रियाजनने स्वतन्त्र इत्यर्थं स्वाह· क्रियायामिति· स्वातन्त्र्य॥ . . ॥
न्त्र कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वम्· पक्तस्तण्डुलो देवदत्तेनेत्यत्र फलस्य प्राधान्येपि देवदत्तस्य कर्तृत्वसिद्ध्ये कर्तृप्रत्ययसमभिव्या।
हार इति णिचस्तु वाचकत्वमेवात स्तत्र ण्यन्तधातुतत्प्रकृतिधात्वेतदुभयवाच्यव्यापारयोः स्वस्वार्थम्प्रति प्राधान्येन देवदत्तेनयज्ञदत्तः पाचयतीत्यादौ प्रयोज्य
व्यापाराश्रयस्यापि कर्तृत्वसिद्धिः। द्योतकत्वे तु नैतत्सिध्येत्· कारक इतिसूत्र भाष्यात्त्वक्रियाकारकप्रवर्तकत्वं स्वातन्त्र्यमिति लभ्यते प्रकृतसूत्रभाष्ये

हासंज्ञया च साधकत्वे लब्धे साधकग्रहणमेव साधकतमार्थम्भविष्यतीति प्रश्नः। गङ्गायामिति॰ अधिकरणमित्यधिकरणे ल्युडन्तमहासंज्ञयैव सिद्धेऽ
धारग्रहणसामर्थ्यात्सर्वावयवव्याप्त्याय आधारः सोऽधिकरणमित्यर्थः स्यात् एवञ्चेदं सूत्रं तिलेषु तैलमित्यादावेव प्रवर्त्तेत नहि गङ्गानीरं वा सर्वावयवैर्व्या
प्तानीम् घोषस्य घोषाधारत्वस्यात्यन्तसामीप्यात्प्रवाहे आरोपोऽत्र बोध्यः। यदा तु व्यवहितो गङ्गातीरे घोषस्तदा गङ्गाशब्दस्य तीरे लक्षणा तमप्ग्रहणेन शब्दसाम
र्थ्यगम्यः प्रकर्षो नाश्रीयत इति ज्ञाप्यत इति गौणाधारस्याप्यधिकरणसंज्ञा सिध्यति एवङ्गङ्गायाङ्गाव इत्यप्युदाहरणं सर्वावयवव्याप्त्यभावेन मुख्याधारत्वा
भावात्॰ गौणमप्याधारत्वादि सप्तम्यादिशक्यमेवेति बोध्यम्॰ इदम्प्रकृतसूत्रे भाष्ये स्पष्टम्॰ यदि तु महासंज्ञया न दासेपकरणसमर्थम्प्रति आधारादिपद
स्वरितार्थम् साधकशब्दस्य व्यापारानन्तरमव्यवधानेन फलोत्पादकत्वशक्तिराधारशब्दस्य चाध्रियते यस्मिन्निति व्युत्पत्त्या कर्तृकर्मणोर्धारणक्रियाम्प्रति
सर्वावयवव्याप्त्याय आधारस्तत्त्वशक्तिरित्युच्यते तदोक्तप्रयोगादिसाधनाय कारकप्रकरणे उद्देश्यवाचके स्वरितत्वप्रतिज्ञया गौणाधारादेर्ग्रहणम्वाच्यम्
स्वरितेनाधिकङ्कार्यमित्यर्थात् तमपा तु प्रकृते तदभावो बोध्यते एवञ्च व्यवधानेन फलोत्पादके करणत्वोपचारेण तृतीयान प्रयोगस्यासाधुत्वबोधनन्तम
प्फलम् एतत्तमब्वशादेवान्यत्र[illegible] मिति ज्ञायत इति दिक्॰ स्पष्टञ्चेदं स्वरितेनेति सूत्रे भाष्ये॰ रामेणेति॰ कर्तृतृतीयायाः कर्तृत्वादिशक्तिमान्कर्त्ता क्रिया।
भावः सम्बन्धश्चार्थः करणतृतीयायाः करणत्वशक्तिमान् क्रियाकरणभावः सम्बन्धश्चार्थः। तच्छक्तिमत्त्वञ्च व्यापारवत्त्वेव रामकर्तृकबाण — करणकप्रा
णवियोगाश्रयो वालीति बोधः। प्रकृत्यादिभ्य इति॰ इदं यथा योगसर्वविभक्त्यपवादः। दिवः कर्म च॰ चेन संज्ञयोः समावेशः। तेन दिवः साधकतमस्य श
क्तिद्वययोगो बोध्यते॰ तेनाक्षैर्दीव्यत इत्यत्र तृतीया परत्वात्॰ कर्मत्वाच्चाकर्मकत्वप्रयुक्तपरस्मैपदाभावः। अत्र विप्रतिषेधशास्त्रबलात्तृतीयैव शक्तिद्वय
बोधिका॰ यद्वाक्षाणाम्फलाश्रयत्वसमानाधिकरणकर्मत्वविवक्षा तदाक्षान्दीव्यतीत्यादि साधु। अक्षाणान्देवितेत्यादौ तृतीयातः परत्वात्कृद्योगलक्षणा।
षष्ठी मनसा देव इत्यादौ हेतुतृतीयान्तेन पचाद्यजन्तदेवशब्दस्य समासः। न च शक्तिद्वयस्वीकारेऽत्र कर्मणि लकारे करणत्वशक्तेरनुक्तत्वेन तृतीयापत्ति
रिति वाच्यम्॰ अपादानमुत्तराणीत्यस्योदाहरणे गान्दोग्धीत्यादौ तत्र कर्मणि लकारे पञ्चम्यापत्तिवारणायैव द्रव्यगतानेकशक्तिमध्ये एकस्या अभिहि

का· तत्वेऽपरस्या अपि तदप्रकाशेनाक्षतेः। एकैव शक्तिः सम्बाह्योपयोगिनी इति तु चिन्त्यम्· कर्मादिपदसनाकुर्मत्वादिनतच्छक्तिरूपेणाबोधकतया तयोर्भेदस्यैवौ
श·शे· चित्यादिति मञ्जूषायां विस्तरः फलप्राप्तिरिति· तस्याश्च सत्याम्प्रयोजनाभावादेव न क्रियाप्रवृत्तिरिति फलप्राप्तिशब्देन तत्पूर्वकत्यागउच्यते त्यागस्यैव फलप्राप्तिर्व्या·
१९ प्योऽयमत्र विस्तरः। नायातइति· अनेन फलाप्राप्तिरेव स्फुटमुच्यते· सहयुक्ते· पृथग्विनानानाभिरिति वत्सहेनेत्येव सिद्धे युक्तग्रहणं शब्दविशेषानादरेण
अर्थयोगे भवन्तीत्यर्थमित्याह· सहार्थेनेति· अत एव क्वचिच्छब्दयोगम्विनापि भवन्ति तदाह· विनापीति· न्यायसिद्धेऽर्थे लिङ्गमप्याह· वृद्ध इति· सहार्थः सा
हित्यम् तच्च स्वसमभिव्याहृतक्रियादिसमानकालिकत्वं क्रियादिमत्वम्। क्वचित्समानदेशक्रियावत्वम्· अत एव माषवापोत्तरन्तत्रैव क्षेत्रे तिलवा·
पेतिलैः सह माषान्वपतीति भाष्यम्। यद्यपि पुत्रेण सहागत इत्यादावागमनक्रियाकर्तृत्वादेव पुत्रात्तृतीयासिद्धा तथापि पुत्रेण सह स्थूल इत्याद्यसम्भ
वव्यमुदाहरणमिति भाष्ये स्पष्टम्· अङ्गेन· अवयवेन इदं सन्निधानलब्धम्· अङ्गिनो ऽवयविनः सूत्रे अङ्गशब्दोऽर्शआद्यजन्तो व्याख्यानादिति भावः।
अक्ष्णा काण इति· यद्यप्यक्ष्येव काणन्तथाप्यवयवधर्मस्य समुदाये आरोपाच्छरीरे तदवच्छिन्ने च व्यवहारो निरूढ इति बोध्यम्· यद्यपि काणशब्दोऽसि
गत विकारवाचक एव तथापि दृष्टौ विप्रावितिवदक्ष्णेति प्रयोगस्य साधुत्वमीदृशानां साधुत्वे वेदमेव मानं षष्ठ्यपवादोऽयमित्याह· अक्षिस
म्बन्धीति· अङ्गविकारः किमिति· अङ्गग्रहणप्रयोजनप्रश्नः। अक्षिकाणमिति· प्रथमा न्याधित्वात्रैव स्यात् लेशतोऽपि दर्शनसामर्थ्यहीनत्वङ्काणत्वम्॥
इत्थंशब्दः प्रकारमात्रपरः। भाष्यर्थाद्भुवः कर्तरि क्तः कर्मविभक्त्यन्तेनेत्थंशब्देन भूतशब्दस्य समासः लक्षणशब्दः करणप्रधानः तस्य कर्मषष्ठ्यन्तेनेत्यम्भू
तशब्देन समास इत्याह· कञ्चिदित्यादि· जटाभिरिति· यद्यपि ताभिस्तापसो ज्ञात इत्यर्थे ज्ञानक्रियायाङ्करणत्वादिदं सिद्धन्तथापि करणत्वाविवक्षायां लक्ष्यलक्ष
णभावमात्रविवक्षायान्तृतीयार्थमिदम्। इत्थम्भूतस्य यत्र लक्षणवाचकात्पृथगुपस्थितिरेव तत्रैवानेन तृतीया तेन कमण्डलुपाणिञ्छात्रमद्राक्षीदित्या
दौ कमण्डलुपदान्न तृतीया न चोत्पन्नायास्तृतीयायाः सुपो धातुविति लुगिति वाच्यम्· कृते समासे तस्या उत्पत्त्या समासरूपप्रातिपदिकानवयवत्वा· दितिकै
यटे स्पष्टम् कमण्डलुः पाणौ यस्येति बहुव्रीहिः। परे तु कमण्डलुपाणिशब्दादत्र तृतीयापत्तिः कमण्डलुयुक्तपाणिरूपस्य कमण्डलुपाणित्वस्य लक्षणत्वेन तस्यैव तद्वाचकत्वात्तु कमनुले

वित्यस्यकमण्डलुपाणित्वमेव.यर्थः। कमण्डलोर्लक्षणात्वेहिसएवेतिवदेत्। किञ्चतन्मध्यपतितन्यायेनतद्विशिष्टस्यप्रातिपदिकत्वेनतस्मात्तदनवयवत्वात्केव
मोवितेनलुकोदुर्वारत्वम्। अतएवनरम्मन्यइत्यादाविजन्तस्योत्तरपदपरत्वाभायपूर्वस्सुपोलुकिउत्पन्नस्यामः सुपोधात्वितिलुक्। अम्विधिसामर्थ्येनतथामित
ह्रस्वएकाचोमितिसूत्रेभाष्येइत्याहुः। सञ्ज्ञो· दैवादिकस्यजनेर्नेहग्रहणात्साकर्मकत्वादित्याह· जानातेरिति· कर्मत्वस्यातिरेवात्रतृतीयार्थः। हेतौ· हेतुरिहका
रणावर्णशास्त्रीयः। तस्यकर्तृसञ्ज्ञायाअपित्वेनकर्तृतृतीययैवसिद्धेः। ननुलौकिकहेतुरपिकरणमित्यतआह· द्रव्यादीति· आदिनागुणक्रिये। साधारणमि
ति· नञ्जनकेपिवर्ततइत्यर्थः। करणंतुक्रियाजनकमेवेतिभावः। वैषम्यान्तरमाह·। निर्व्यापारेति· करणंतुव्यापारवदेवेतिभावः। एवञ्चकरणत्वशक्तेर्भि
न्नैवहेतुत्वशक्तिरत्रतृतीयार्थइतितात्पर्यम्· स्फुटप्रतिपत्तयेकरणवैलक्षण्यमाह· करणत्वन्त्विति· हेतुहेतुमद्भावएवतृतीयार्थः। दण्डव्यापारसत्त्वेपि
क्रियाजनकत्वाभावान्नकरणत्वम्· पुण्येक्रियाजनकत्वेपिनिर्व्यापारत्वान्नतत्वम्· फलमपीहेति· इहैमन्त्रमोचहरणोक्तचिन्त्फलमपिहेतुत्वेनविवक्ष्यतइ
त्यर्थः। तस्यापिस्वर्गानदद्वाराजनकत्वात्। एतच्चप्रत्ययइत्यादिसूत्रेषुकैयटेस्पष्टम्॥ नन्वलंश्रमेणेत्यादौक्रियावाचकपदाभावात्क्रियायाअप्रतीत्या
कथङ्करणत्वमतआह· गम्यमानापीति· अलंश्रमेणेत्यादिपदजबोधविषयापीत्यर्थः। नतूच्चार्यमाणतद्वाचकपदजबोधविषयैवेतिभावः। अलंशब्दोनिषे
धार्थकस्तत्राह· साध्यत्वमस्तीति· ननुसाध्यमित्यर्थेज्ञानेपितस्यअलंश्रमेणेतिनामार्थत्वेननक्रियात्वमतआह· इहेति· स्ववाच्यक्रियाम्प्रतिस्वस्यकरणत्वमित्य
र्थः· स्पष्टञ्चेदमिष्यणइतिसूत्रेप्रविश्यपिण्डीमितिवाकार्थेवाक्यैकदेशप्रयोगइत्यादिनाभाष्येइतिमञ्जूषायांविस्तरः। अशिष्टेति· अशिष्टानांसङ्कीर्णा
चाराणांयोव्यवहारःक्रियान्तरोपक्रमप्रयोगप्रत्यासत्त्यायत्तसम्बन्धेनव्यवहारस्यसङ्कीर्णाचारत्वन्तद्वाचकाच्चतुर्थ्यर्थेतृतीयेत्यर्थः· दास्येति· दासीसम्प्रदानक
वृत्तिफलकज्ञानमितिबोधः॥ ॐ॥ इतितृतीया॥ ॐ॥ दानस्येति· दाधात्वर्थस्येत्यर्थः। इदमुपलक्षणंक्रियामात्रस्य कर्मणेति· सम्बद्धुमितिशेषः· अभि
प्रेति· कृच्छतिकर्मणासम्बन्धस्यसत्वादिरूपःसम्प्रदानत्वशक्तिमान्सम्प्रदानचतुर्थ्यर्थः। सएवोद्देश्यइत्युच्यते· क्रियाकारकभावःसम्बन्धस्तदा
र्थः· विप्रसम्प्रदानकन्दानमितिबोधः। कर्मणेतिकिम्· तदभावेहिकर्मण्युद्देश्यतयान्तरङ्गत्वात्तस्यैवसञ्ज्ञास्यात्कर्मसञ्ज्ञायतुपर्यायोभविष्यति

व्यर्थमित्यपास्तमकिञ्च ६

का॰ पसग्रहणं किम् तदस्य वेहिकर्मणायोऽभिप्रेति ब्राह्मणादिस्तस्यैव स्यात् कर्तृसञ्ज्ञात्वकर्मकविषये सावकाशा न च कर्तुः कर्तृत्वाभावे कथङ्कोः क
श॰ शे॰ र्तृत्वमावे कर्मसञ्ज्ञायाङ्कर्तृग्रहणस्य स्वतन्त्रोपलक्षणत्वात् अत एव सार्थाद्धीयते इत्यत्र कर्तुरपादानत्वेऽपि कर्मणि लकारः सिद्धः। ननु कर्मणो युक्तावकर्मक
२० क्रियोद्देश्यस्य सम्प्रदानत्वं न स्यादत आह क्रियेति कर्मरहितक्रियये त्यर्थः। सकर्मकेषु कर्मसञ्ज्ञाया बाधिकेत्याशयेनाह पत्ये शेते इति न च दानादी
नान्तदर्थत्वात्तादर्थ्ये चतुर्थ्यैव सिद्धे किमनया सञ्ज्ञयेति वाच्यम् दाशगोघ्नौ सम्प्रदान इत्यर्थत्वात् तत्सम्प्रदानकन्दानमिति यो धात्वर्थस्तदावश्यकत्वाच्च
अत एव तादर्थ्ये चतुर्थ्यां दानकर्मणो गवादेः सम्प्रदानार्थत्वेऽपि दानक्रियायास्तदर्थत्वाभावेन च चतुर्थ्यन्तार्थस्य दानक्रियान्वयानापत्तिरिति हेलाराजः
तादर्थ्ये चतुर्थ्यैव सिद्धे चतुर्थी सम्प्रदाने इति सूत्रं व्यर्थं नामित्यादिविषये चतुर्थ्यर्थमिति भाष्ये स्पष्टम् पशुनेति कर्मत्वतृतीयार्थः सम्प्रदानं द्वितीया
र्थः। एतच्च दानार्थकयजधातुविषयम् पूजार्थत्वे पशोः करणत्वन्यायसिद्धम् इदञ्छान्दसमिति कैयटः। अन्यकर्तृक इति अभिलष्यतिक
र्त्रपेक्षयान्यदभिलष्यतिकर्म तत्कर्तृक इत्यर्थः। यत्किञ्चिद्विषयकप्रीत्यनुकूलव्यापाराश्रयो भिलष्यतिकर्ता हरिर्भक्तिमभिलष्यतीति प्रत्यया
तृप्यत्किञ्चिद्विष्ठप्रीत्यनुकूलः प्रीतिव्यधिकरणो यो व्यापारस्तदाश्रयो रोचतेः कर्त्तेति अभिलषतेरुच्यर्थत्वाभावान्न तद्योगे सम्प्रदानत्वमिति भाव
स्तदाह हरिर्निष्ठेति पद्यौति न च प्रीयमाणपदाभावे सूत्रस्य क्रियाजनकत्वमात्रविवक्षायां सञ्ज्ञान्तराप्राप्तिविषये चारितार्थ्येन परत्वादधिकर
णसञ्ज्ञाया बाधसिद्धेः कथमेतदिति वाच्यम् देवदत्तं रोचते इत्यस्याप्यापत्तेरित्याशयात् तत्सत्त्वे तु अस्य कर्मसञ्ज्ञापवादत्वान्न दोषः। गोपीस्मरा
दिति श्लाघादेः स्तुत्यादिना बोधनमर्थः स्मरादिति हेतौ पञ्चमी स्तुत्यात्मानुरागं कृष्णं बोधयतीत्यर्थः स्तुतिश्च कृष्णस्यैव एवं ह्नुत्या कृष्णं स्वानुराग पृ॰ २०
म्बोधयतीत्यर्थः। ह्नुतिः सपत्न्यादिभ्यः कृष्णस्यैव। एवं स्थित्याशपथेन च कृष्णं स्वानुरागम्बोधयतीत्यर्थः। यद्वा स्तुत्या ह्नुत्या च कृष्णं स्वसखीजनम्बोध
यति स्थित्या शपथेन च कृष्णं स्वम्बोधयतीत्यर्थः ज्ञीप्स्यमानपदे ण्यर्थकर्मणः प्रकृत्यर्थकर्मणश्च ग्रहणादित्यन्यत्र विस्तरः। स्तुत्यादिमात्रार्थत्वे कृष्ण
श्लाघते कृष्णं ह्नुते इत्येव ज्ञीप्स्यमान इति ज्ञानवचनाज्ज्ञपेः सन्नन्तात्कर्मणि शानच् धारेरु धृङ् अवस्थाने इति णिजन्तस्य ग्रहणं व्याख्यानात्। म।

कार्येति· म्रियमाणस्वरूपेणावतिष्ठमानस्मोक्षं हरिः प्रयुङ्क्ते इत्यर्थः। प्रेरणाया भक्तासत्त्वे ऽभावात्तस्यापि प्रेरणाजनकत्वेन कारकत्वं बोध्यम् अवश्यदेयत्वेन मोक्षे
ऽपि सम्प्रदानत्वं बोध्यम्· प्रकर्षविवक्षायामिति· फलाश्रयत्वेन विवक्षायामित्यर्थः· परत्वादिति· इदं सूत्रं विषयतया क्रियाजनकत्वमात्रविवक्षायां चरितार्थमिति भा
वः। पुष्पेभ्यस्त्वन्यत्र नित्येति चतुर्थीसमभिव्याहारे बोधः कुमार्य इव कान्तस्य त्रस्यन्ति स्पृहयन्ति वेत्यत्र क्रियासम्बन्धित्वमात्रविवक्षायां षष्ठी। अन्ये तु भोगायेत्याध्या
हृत्य कान्तायेति विभक्तिविपरिणामेन वाक्यान्वयमित्याहुः। स्पृहधातुरिच्छामात्रवाची फलावच्छिन्नेच्छावाची वा यः सम्प्रदानत्वमन्ये कर्मत्वम्· ईप्सितत्वाभावादर्थः।
जनकफलाश्रयत्वम्· नतु फलस्य धात्वर्थत्वपर्यन्तमाग्रहः। कर्मसंज्ञाया अनुपस्थानदोषाभावश्चोक्तम् भार्यामीर्ष्यतीति· नात्र भार्याम्प्रति कोपः किन्तु परैर्दृश्यमा
नाया असहनम् इत्येव। एवञ्चात्र न कोपजन्येर्ष्या किन्त्वन्यपुरुषदर्शनजन्येति भावः। हरेः क्रोधद्रोहाभ्यामिच्छाविषयत्वाभावात् क्रियया यमभीत्यनेन न
सिद्धिः नस्वकुपितः कुध्यतीति भाष्येण परुद्धकोप एव क्रोध इति बोधनात् कुपेस्तदर्थत्वाभावेन न तद्योगे इदं द्रुह्यति कर्मणि चिन्त्या घसाध्येव· उपसृष्टयोरि
त्यस्यार्थमाह सोपसर्गयोरिति· वैयाकरणनिकाय एव एतदर्थकत्वेन प्रसिद्धः पूर्वसूत्रापवादोऽयम् यदीयेति· यदीयशुभाशुभसम्बन्धीत्यर्थः। राधीक्ष्योः प्र
श्नविषयपर्यालोचनमर्थः। कर्मणः। प्रश्नविषयस्य धात्वर्थेनोपसङ्ग्रहादकर्मकत्वेनो· अत एव वक्ष्यते राधो ऽकर्मकाद्वृद्धावेव इत्युक्तेः कृष्णसम्प्रदानेकं शुभाशुभपर्या
लोचनमर्थः। प्रत्याङ्भ्याम्· व्याख्यानात्सत्ये कस्मिन्निमित्तत्वमित्याशयेनोदाहरति· गाम्प्रति शृणोतीति· अनयोः प्रवर्तनापूर्वको ऽभ्युपगमो ऽर्थः। तत्र विप्रस्य क
र्तृप्रयोजकत्वेन हेतुत्वे प्राप्ते वचनम्· अनुप्रतीति भिन्नम्पदं लुप्तपञ्चम्यन्तम्· गृण इति श्नानानुकरणात्षष्ठी· शंसितुः शंसनविषयहर्षानुकूलव्यापारल
क्षणम्प्रोत्साहनमनयोरर्थः· पूर्वव्यापारस्येति· शंसनस्येत्यर्थः। प्रोत्साहयतीति· आश्रावयेत्यादिशब्दैरिति शेषः। शतायेति· करणस्यैव सम्प्रदानत्वेन भा
व्यमत्र। तद्व्यापारस्य दानरूप एवेति बोध्यम्· तादर्थ्ये· तादर्थ्यमुपकार्योपकारकभावरूपः सम्बन्धः। यदा तादर्थ्यस्य सम्बन्धत्वेन भानं तदा षष्ठी। गुरोरि
दं कुण्डलमित्यत्र भाष्यस्पष्टम्· क्लृपीति सप्तमी। अर्थग्रहणञ्चात्र। सम्पत्तिरुत्पत्तिः क्लृप्यर्थकधातुयोगे उत्पद्यमानार्थे वर्तमानाच्चतुर्थीत्यर्थः। हितयोग
च· चात्तुमुरवयोगेऽपि। क्रियार्थोप· क्रियार्थः फलं यस्य तत्क्रिया। अनेन स्ववाचकं लक्ष्यं न क्रियाफलकार्थवाचकमुपपदं यस्येत्यर्थः· सोऽर्थश्च प्रत्यासत्त्या क्रियारूप एक स्थानिशब्दस्य

का॰ क्रियार्थाक्रियेति॰ फलेभ्यो यातीत्यादौ फलकर्मकाहरणफलकं यानमिति बोधः यथा वाक्यार्थे वाक्यैकदेशप्रयोगस्थले प्रविश पिण्डीमित्यादौ तस्यैव परस्य
प्र॰ शे॰ सम्पूर्णवाक्यार्थे शक्तता तथास्य समुदायस्याहरणघटितोक्तार्थे शक्तिरेतच्चास्य बलात्स्यानिन इत्युक्तेः तत्प्रयोगेनेति बोध्यम्॰ अयमेवार्थाध्याहारः। नमस्कु
२१ र्मो नृसिंहायेति॰ नमः स्वस्तीत्यनेन तु न सिद्धिः। उपपदविभक्तेरिति न्यायेन द्वितीयापत्तेः पिण्डीमित्यादावप्रयुज्यमानभक्षणक्रियाकर्मणि चतुर्थी वार
णाय क्रियार्थोपपदस्येति॰ तुमर्थात्॰ तुमशब्देन तदर्थो लक्ष्यते सोऽर्थो यस्येत्यर्थः इति सूत्रेणेति॰ भावे प्रत्यया वक्ष्यन्ते ते क्रियार्थायाः क्रियाया उपपदे
भविष्यति स्युरिति तदर्थः। यागायेति॰ यागफलकं यानमित्यर्थः। उपपदविभक्तेरिति॰ वाचनिकमेवेदं भाष्ये पठितमिति केचित्॰ क्रियाकारकयोः सम्बन्धो
ऽन्तरङ्ग उपपदसम्बन्धेन तु यत्किञ्चित्क्रियाकारकभावमूलकः सम्बन्ध इति तन्निमित्ता विभक्तिर्बहिरङ्गेति अन्तरङ्गान्तरेणेति सूत्रे कैयटः अत्राहुः। एवं सति न
मस्यति देवानित्यादौ नमः पदार्थे क्रियाकारकभावेनैवान्वये परत्वाच्चतुर्थीमाशङ्क्यानेन वारणस्य भाष्योक्तस्यासङ्गतिः। एतेन प्रधानत्वात्क्रियाया नम
स्सम्बन्धनिमित्तकत्वेन बलवत्त्वमित्यपि परास्तम्॰ कारकविभक्तित्वं च क्रियाजनकत्वसमानाधिकरणकर्त्रादिषष्ठ्यन्यतमार्थकत्वम्॰ अनभिहितानुद्भू
तकर्त्राद्यन्यतमार्थत्वम् प्रथमायामपि। अभिहिते प्रथमेति वार्तिकस्वारस्यादतः प्रथमापि कारकविभक्तिरिति बोध्यम्॰ हावित्यादौ द्वितीयेरिव देवदत्तः प
चतीत्यादावुभाभ्यामेकस्यैव कर्तृत्वस्य बोध इति न तद्बोधावृत्तिः नमस्करोति देवानिति उत्कृष्टनिष्ठो यः स्वनिष्ठापकर्षस्य बोधस्तदनुकूलव्यापाररूपनम
स्कारफलस्य तादृशबोधस्याश्रयतया देवानां कर्मत्वम्। स्वशब्देन प्रयोक्ता॰ नमः शब्दस्य साक्षात्प्रभृतिपूर्यादिषु वा पाठेन गतित्वात्तत्र मम्॰ एकस्या एवोपपदविभ
क्तित्वे कारकविभक्तित्वे चायं न्याय इति तु न युक्तम्। नमस्यति देवानित्यत्रैतत्परिभाषोपन्यासपरभाष्यविरोधात् स हयुक्ते इत्यादिषु तत्रस्थभाष्यविरोधाच्च॰ अ
लमितीति॰ अलमित्यनेन न पर्यायग्रहणेनाङ्कुरलम्बास्यानादित्यर्थः तत्र ज्ञापकमप्याह॰ तस्मै प्रेति॰ षष्ठ्याप्यपि साधुत्वे बीजम् सण्णामिति॰ आशीर्विषयस्य एम
मिति॰ आशीर्विषयत्वविवक्षायामित्यर्थः। स्वस्त्यर्थः कुशलं मङ्गलं वा। स्वस्तियोगे च चतुर्थी अवकाशः स्वस्ति जाल्मायास्तीति तत्त्वकथनम्॰ कुशलार्थैराशिषीत्य २१
स्यावकाशः स्वस्तिभिन्नाः कुशलार्थाः। स्वस्तिशब्दोऽव्ययमपि। प्रतिगृह्णामिते धेनुं दद्यार्थे विशेषतः स्वस्तिर्भवति मे नित्यं सुखं चानुत्तमं तथेति भवि

यो नरेऽप्रयोगात् । मन्यकर्मणि तिरस्कार इति । अनादरो नादराभावमात्रमपि तन्नञोऽधर्मादाविव प्रतिपक्षवाचित्वात्तिरस्कार इति भावः । तत्रानादर इति मन्य
कर्मविशेषणं न द्योतकं यत्कर्मेत्यर्थः । तेन युष्मच्छब्दाच्चतुर्थी न । तिरस्कारश्च व्याख्यानादपकृष्टनिरूपितोपमेयत्वस्याप्यभावरूप उपमेयेऽत्र गृह्यते न तव
[illegible] तौ । तिरस्कारस्य समभिव्याहार एव तृणात् तुल्यमपि न मन्ये इत्यर्थः । तृणाय मत्वा रघुनन्दनोऽपि इत्यादौ नञोऽध्याहारस्तु दाह । न त्वा तृणमिति ।
कर्मात्र चतुर्थ्यर्थः । श्वनेति । न तु यकाग्व्याख्यानादिति भावः । अनुपलक्षणेन न स्त्रिजदावपि भवति तदुक्तं न्यासे आह तानादिकयोगेनेति । नौकाकेति भाष्ये अप्रा
णिषु नेष्यते तेनावाद्यो भविष्यन्ति इति येष्विति बहुवचनेन उदाहरणान्तरेण चेष्वेवाविशिष्टनिर्णय इति भावः । गत्यर्थकर्म । कर्मात्र चतुर्थ्यर्थः । अन्यर्थेति
म् ओदनं पचति । कर्मणि विकिम् । अश्वेन गच्छति । चेष्टायामिति । धात्वर्थस्य क्रियारूपत्वात् प्रश्नः शारीरक्रियाया एव ग्रहणमित्युत्तरम् । पन्थानमिति ।
अध्वशब्दोऽर्थपरो व्याख्यानादिति भावः । अधिष्ठित इति । शब्दप्रयोगसमकालिकगन्तृव्यापारजन्यफलाश्रय इत्यर्थः । अध्वशब्देन मन्त्रप्राप्योऽर्थ उच्यते
तेन गन्तव्ये प्रयुक्त स्त्रियां स्त्रियं पतङ्गं गच्छतीत्यादौ न । स्पष्टं चेदं भाष्ये । उत्पथादिति । उत्पथं सन्त्यज्येत्यर्थः । इष्यत इति न त्वाक्रान्त इत्यर्थः । उत्पथेनेति । पान्थमशक इति
शेषः इति चतुर्थी ॥ ध्रुवम । ध्रुवं स्थिरम् । अपायो विभागजनको व्यापारस्तदनाश्रयमिति यावत् । विभागश्चात्र वास्तवसम्बन्धपूर्वको वा वास्तवस
किन्तु बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिकल्पितोऽपि । माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यादौ तु कल्पितापायाश्रयेऽणौ व भाष्ये प्रत्यमीसाधना
त् कर्तृवारणाय ध्रुवमिति । अन्यथा कर्तृसंज्ञाया इयमपवादः स्यात् । अपायविषये यत्कारकं तद्रूपक्रियाजनकं तदपादानमित्यर्थसम्भवात्कर्तृसंज्ञ
तु पक्षत्वाद्विपरीतार्थो हरिरप्याह । अपाये यदुदासीनं चलं वा यदि वाचलम् । ध्रुवमेवातदावेशादिति । स्पष्टं चेदं यदादौ । भाष्यानुसारिणस्तु ए
वं हि त्रस्ताद्भ्राम्यतितो धावतः पतित इत्यादौ ध्रुवत्वाभावादपादानत्वं न स्यादित्याशङ्क्य ध्रौव्यस्याविवक्षितत्वमत्रायतः सतोऽप्यविवक्षा भवतीति स
माहितं भाष्ये तदसङ्गतं स्यात् । तदुक्तं ध्रुवत्वं स्वपतधात्वर्थव्यापाराश्रयत्वस्यात्रासत्त्वे च सतोऽध्रौव्यस्याविवक्षेत्यस्यासङ्गतेः । सिद्धान्तेऽपि त्वदु
क्तध्रुवपदार्थकथनमेवोचितमिति तदसङ्गतिश्च लोकसिद्धातिरिक्तेऽर्थे ध्रुवशब्दस्य शक्तिकल्पने गौरवं च । अतदावेशादित्यस्य हरिकारिका

का॰ शा॰ श्री॰ पानद्वेशाविवक्षणादित्यर्थः तस्मादपायगतिविशिष्टमतियद्ध्रुवमवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रय।
न्नद् पादानमिति सूत्रार्थः ग्रामादेरवधित्वोपयोगित्वाश्रयणाशङ्काद्वृक्षात्पर्णमित्यादौ तस्यासत्त्वात्तदुपयोगित्वमस्य प्रकृते तु विद्यमानस्यापि तस्याविव
२८ क्षितत्वान्न तदुपयोगित्वमस्येत्युक्तम्। ध्रुवमपाय इति तु वृक्षस्य पर्णं स्पन्दतीत्यादौ वस्तुतस्तस्य पर्णाद्यपातजनकत्वान्नापादानत्ववारणाय। एवञ्च
पाय इति विकल्पे इदं स्वक्रियाजनकत्वेन विवक्षितमित्यर्थ इति तात्पर्यग्राहकम्बोध्यम्। ध्रुवग्रहणमनुकम्पनानन्तरगामिवापादानस्यावधिभावोपगमादिति भिक्क
व्यापाराश्रयत्वाभावबोधनार्थमित्याहुः। अपादानत्वशक्तिश्च प्रकृतधात्वर्थविभागाश्रयत्वसमानाधिकरणेति। अपादानसमभिव्याहारे विभागोऽपि धात्व
र्थ इति बोध्यम्। एवञ्च वृक्षात्पततीत्यादौ तदपादानकविभागपूर्वकः संयोगः पर्णवृत्तिरिति बोधः। वृक्षस्य पर्णं स्पन्दतीत्यादौ वृक्षापादानकविभागपूर्व
कः संयोगानुकूलो व्यापार इति बोधः परस्परस्मान्मेषावपसरत इत्यादौ मेषपदोपात्तयोरेव क्रियाश्रयत्वात्कर्तृत्वम्परस्परपदोपात्तयोरेव विभागाश्रय
त्वादपादानत्वम्। मेषपदोपात्तेत्तदविवक्षणात्संयोगानुसारित्वाद्विवक्षायाः। विभागपूर्वकसंयोगानुकूलव्यापारस्यापसरणम्। आत्मानमात्मन्येवात्मा सवनत्कर
णाद्युपाधिकृतभेदवत् शब्दरूपोपाधिकृतभेदाग्रहणमानाभावात् शब्दालिङ्गितार्थभानस्यैव सत्त्वाच्चेत्यन्यत्र विस्तरः। यत्तु अपसरत इति धातु
नागतिद्वयस्याप्युपादानादेकनिष्ठाङ्गतिम्प्रति इतरस्यापादानत्वमविरुद्धमिति। तन्न वस्तुतस्तन्निष्ठव्यापारयोर्भेदेऽपि धातुनानिरूढभेदस्यैवापाय
स्योपादानादुभयोरपि तत्क्रियाश्रयत्वेन परत्वात्कर्तृत्वापत्तेः। अत एवैकशेषसूत्रे भाष्ये उक्तमनवेवनिड नान्वेकशेषारम्भसम्प्रयोजयन्ति क्रियापाद
कत्वादिति धनुषा विध्यतीत्यत्र निःसरच्छरजन्यवेधनार्थत्वाद्यधेरपादानत्वाकरणत्वोभयप्राप्तौ परत्वात्करणत्वम्बोध्यम्। ग्रामादायातीति। आयाते
र्विभागपूर्वकोत्तरदेशसंयोगानुकूलो व्यापारोऽर्थः। वृक्षान्त्यजतीत्यादौ व्यापारव्यधिकरणविभागस्यैव धात्वर्थत्वेन कर्मसञ्ज्ञयापादानत्वस्य बाध राम
स्यन्दे तु न विभागोऽर्थ इति वृक्षः स्यन्दत इत्येव। चलतेस्त्वासनाच्चलित इति प्रयोगादस्त्येव विभागार्थत्वम्। सार्थाद्धीयते इत्यत्र सार्थस्य धात्वर्थम्प्रत्यन २२
व्यापाराश्रयत्वेनापायाश्रयत्वेनाहीयरुहोरिति ज्ञापकात्कर्मप्रत्ययान्तहीयमानधातुयोगेऽपादानत्वम्। कर्मसञ्ज्ञायाञ्च कर्तृपदं स्वतन्त्रोपलक्षणमिति कर्म

णो लकारः सार्थेन त्यज्यते देवदत्त इत्यर्थः। धावत इति· क्रियाविशिष्टस्याप्यश्वस्य प्रकृतधातूपात्तगत्यनावेशाद्धावनस्याविवक्षणाद्ध्रुवत्वम्बोध्यम्· जुगुप्से
त्यादि· जुगुप्सादीनां यद्विषयकत्वेन विवक्षा तदपादानम्· तस्यैव विषयस्य क्रियाजनकत्वरूपकारकत्वेनाविवक्षायां सम्बन्धित्वेन च विवक्षायाम्पापज्जुगुप्सते
इति षष्ठी भवत्येव सत्यभिधाने· एवमुत्तरसूत्रेष्वपि बोध्यम्· एषान्धातूनां स्वार्थपूर्वकबोद्धविश्लेषजनकनिवृत्तिलक्षणाया सूत्रेणैव सिद्धेर्वार्तिकमुत्तरसूत्राणि च।
प्रत्याख्येयानीति भाष्ये स्पष्टम्· भय भीत्राणात्रासलदाह· भयार्थानामिति· हेतुतृतीयापवादोयम्· · अरण्य इति· भयाद्यर्थानां योगे कारकमपादानमित्यर्थः। विशेषात्स
र्वसञ्ज्ञापवादोयं स्यादिति भावः। पराजेः। असोढोम्लानिविषयः एवञ्च पराजेरकर्मकत्वे उदाहरणत्वन्तदाह· ग्लायतीत्यर्थ इति· अभिभवतीति· तिरस्कारानुकूलो व्यापा
रो धात्वर्थ इति भावः। प्रसक्तिविघात इति· भक्षणसंयोगादिजनकव्यापाराभावानुकूलो व्यापार इत्यर्थः। ईप्सित इति· वारणार्थधात्वर्थफलाश्रय इत्यर्थः। उदाहरणे वत
धात्वर्थव्यापारजन्यसंयोगादिरूपफलाश्रयत्वाद्यवानामपादानत्वमीप्सित इत्यनेन प्रधानाप्रधानान्यतरव्यापाराश्रयमात्रस्याक्षेपः। कर्मलक्षणे तु तमप्ग्रहणात्प्रकृ
तधात्वर्थप्रधानभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयस्य ग्रहणमिति भावः। अन्तर्द्धौ· अन्तर्द्धिरन्यकर्तृकस्वकर्मकदर्शनाभावानुकूलो व्यवहितदेशस्थितिरूपस्तद्घ
टकं यत्कर्तृकदर्शनाभावमिच्छति तदपादानमित्यर्थस्तत्फलितमाह· व्यवधाने सतीति· येनेत्यत्र कर्तृकर्मणोरिति षष्ठी न सौत्रत्वात्· आत्मन इति· मत्यां सत्तिलभ्यम·
मातुर्निलीयत इत्यादावाक्षेपलभ्येच्छाबोध्या· चौरानिति· चौरकर्मकदर्शनेच्छाभाव इति शाब्दोऽर्थः। स च चौरकर्तृकस्वदर्शनाभावायेजि प्राप्तिः। इच्छामात्रस्याक्षेपलभ्य
त्व इव विशिष्टस्याक्षेपलभ्यत्वेऽपि स्यादिति भावः। प्रकृते नान्तर्द्धिरिति न दोषः। येनेत्यस्याभावे हि स्वकर्मकदर्शनाभावं यदिच्छतीत्यर्थे कर्तुरेव स्यादतस्तत्· इच्छतिग्रह।
णादिममिति· अन्तर्द्धौ सति यत्कर्तृकदर्शनस्याभावस्तदपादानमित्यर्थोऽस्त्विति भावः। सत्यपीति· अदर्शनेच्छायां तदनुकूलव्यापारकरणे देववस्मद्दर्शने सत्य
पीत्यर्थः। अन्यथा यत्र दर्शनाभाव एव तत्रैव स्यादिति भावः। नियमेति· उपयोगशब्दस्य तत्रैव रूढेः। नियमो ब्रह्मचर्यादिः। नटस्येति· नटजन्यं श्रवणमिति बोधात्कार
कत्वान्नियमपूर्वकविद्यावक्तृताभावान्नेत्युत्तरम्· जनिक· प्रकृतिरुपादानकारणम्· ब्रह्म च मायाशवलञ्जगदुपादानकारणम्· हेतौ हेतुपदमप्युपादानकारणप
रमेवेति बोध्यम्· विभाषैत्येव सिद्धे इदमपादानत्वेन बोधनार्थम्· तत्र हि गुणोऽस्त्रियामिति प्रायिकं बाहुलकम्प्रकृते तु दृष्टेरिति वार्तिकप्रयोगात्· भुवः प्रभवः।

का· म्रथमःप्रकाशः।प्रग्रहणात् तदधिकरणमपादानमित्यर्थः।प्रभवो जलमूलेस्याज्जन्महेतौ पराक्रमे ज्ञानस्य चादिमस्थान इति विश्वः।प्रकाशत इत्यस्य योगे तु न प्रथ।
श·शे· मप्रकाशोर्थः तत्राभावात्तदाह· तत्र प्रकाशत इत्यर्थः· इति ल्यपलोप इति· ल्यबन्तशब्दज्ञाने इत्यर्थः।कर्मणीति प्रत्यासत्त्या ल्यबन्तधात्वर्थस्येति भावः।प्रासादादिति· फले
२३ भ्यो यातीत्यत्रैवबोधप्रक्रिया आजघ्ने विषमविलोचनस्य वक्षः इत्यत्र कर्मणः शेषत्वविवक्षया षष्ठी· वक्ष इत्यस्य प्राप्येति शेषः।गम्यमानापीति विशिष्य तद्वाचकश
ब्दानुपात्तापीत्यर्थः।कस्मात्त्वमित्यादौ फलेभ्यो यातीत्यत्रैव बोधप्रक्रिया· अन्ये इत्यर्थ इति· तदर्थश्च भेदवान्।अत एव घटाद्भिन्न इत्यादिसिद्धिः·परेतु ध्रुवमिति सूत्रे ऽ
पायशब्देन भेदस्यापि ग्रहणम्· पञ्चमी विभक्ते इत्यत्र विभागार्थकविभक्तपदेन भेदस्यैव व्याख्यानात् भिदिर् विदारणे इत्यत्र भेदज्ञानविषयत्वमपि विदारणम्
एकत्वेन गृहीतस्य तथा बोधे बुद्धिविदारणस्य तत्रापि सत्त्वात्· अत एव घटाभेद इति सिद्धम्· तद्योगे ऽप्यपादानत्वेति तस्यैव सम्बन्धत्वेन विवक्षायां घटीयो भेद इत्यपि
अन्यशब्दस्याक्रियात्वात्तद्योगे एतद्विधानम्· अत एव घटः पटो नेत्यादौ न पञ्चमी· नञो भेदवदर्थकत्वेपि अक्रियात्वात्· घटादेक इत्यादि त्वसाध्वेव अत एवेतरग्र
हणञ्चरितार्थम्· अत एव भाष्ये ऽर्थग्रहणं नोक्तमित्याहुः। आराद्दूरसमीपयोः।एतद्योगे दूरान्तिकार्थैरिति प्राप्तम्· नन्वयं देशवाची न दिक्शब्दो ऽत आह· दिशि
दृष्ट इति शब्दग्रहणादिति भावः।ते च रूढ्यादिविशेषवाचकाः पूर्वादय एव गृह्यन्ते नैन्द्रीककुबादयो व्याख्यानात्· अवयववाचीति· तद्वाचिपूर्वादियोगे ऽवयवि
वाचकान्नेत्यर्थः।ज्ञापकस्य सजातीयापेक्षत्वात्· अत एवास्मादयम्पूर्वो भागः कायस्येति सिद्धम्· अवयवे पूर्वत्वन्त्ववयवान्तरापेक्षया प्रथमकालिकोत्पत्तिकत्वे
न बोध्यम्· अञ्चूत्तरपदस्येति· दिक्शब्दसाहचर्येण तस्य दिग्वाचकस्यैव ग्रहणम्· तेन सध्र्यङित्याद्यर्थेन नेति भावः।बाधितुमिति· परत्वात्प्राप्तामित्यादिः।यदि
तु षष्ठ्यतसर्थेत्यत्र प्रत्ययग्रहणं तस्य श्रूयमाणप्रत्यय एव प्रवृत्तिस्तदेदं मास्त्विति तत्त्वमिति भाष्ये स्पष्टम्· दक्षिणाग्रामादिति· दक्षिणस्यां दिशीत्यर्थे दक्षिण
दाजाहि च दूरे इत्याजाहौ।षष्ठ्यतसर्थेत्यस्यापवादः।प्रभृतियोगे इति· प्रभृत्यर्थयोगे इत्यर्थः।अपादाने पञ्चमीति सूत्रे यतश्चाध्वकालनिर्माणं तत्र पञ्चमी का राम
र्तिक्या आग्रहायणी मासे इति वार्तिकप्रत्याख्यानायेदमत्र प्रयोक्तव्यं स न प्रयुज्यते कार्त्तिक्याः प्रभृत्याग्रहायणी मास इति भाष्येण प्रभृतिशब्दाभावे ऽपि तदर्थ। २३
सत्तामात्रेण पञ्चमीत्यर्थकेन प्रभृत्यर्थयोगे पञ्चमीति वचनसत्त्वस्य भगवता बोधितत्वादन्यथा प्रभृतिशब्दाभावे पञ्चम्यर्थवचनावश्यकत्वेन तत्प्रत्याख्या।

नासङ्गतिरितिभावः। एवञ्चैतदर्थकारभ्यशब्दयोगेऽपि पञ्चमी यथाऽवीचिमारभ्य मेरुपृष्ठपर्यन्तम्भूलोको मेरुपृष्ठादारभ्य ध्रुवपर्यन्तञ्च हेनक्षत्रलोकाः
चित्रितोऽन्तरिक्षलोक इति पातञ्जलभाष्यप्रयोगे· प्रभृतीत्यस्य चावधिमादायेत्यर्थः। आरभ्येत्यस्यैतदर्थकतापि। अवधौ च पञ्चम्यन्तार्थस्याभेदेनान्वय इति वि-
शेषणत्वेऽपि न द्वितीया। प्रभृत्यर्थयोगे पञ्चमीति भाष्यकृद्घोषितवचनात्· आरभ्येत्यस्य गृहीत्वेत्यर्थेनावीचिमारभ्येत्यादौ द्वितीया· वस्तुतोऽवधित्वं न्यासस्म-
भिव्याहृतपदार्थनिरूपितङ्गम्यमानक्रियापेक्षमित्यपादानत्वादेवात्र पञ्चमी सिद्धा कार्त्तिक्या विभक्तेः अत एव कार्त्तिक्यवधिके आग्रहायणीघटिते मा-
से कार्त्तिकीमादाय गतेऽऽग्रहायणीति बोधः। भवात्प्रभृति आरभ्य वेत्यत्र भवकालाद्विभक्तेः। अत एव भवावधिके मरणान्ते काले भवकालमादाय हरिः से-
व्य इति बोधः। एवमन्यत्राप्यूह्यमित्यलं विस्तरेण· ज्ञापकादिति· पञ्चम्यन्तेन समासविधानाज्ज्ञापकादित्यर्थः। अयम्भावः परस्परसाहचर्यात्तत्रापप-
रीवर्जनार्थकर्मप्रवचनीयावेव तद्योगे पञ्चम्यपाङ्परिभिरिति वचनाल्लक्षणप्रतिपदोक्तपरिभाषयाऽपपरिनिमित्तकसुबन्तस्यैव ग्रहणाच्च पञ्च-
म्येव सिद्धः समासस्तत्साहचर्यादुक्तपरिभाषया चाञ्चूत्तरपदेनापि तन्निमित्तपञ्चम्येव सिद्धः समास इति व्यर्थं नत्वहिःशब्देन पञ्चम्यन्तेन समासविधानद्वारा त-
द्योगे पञ्चम्या अपि ज्ञापनार्थमिति। इदमपपरिबहिरिति सूत्रे भाष्ये स्पष्टम्। पञ्चमीति· सापीत्यर्थः। तेन करस्य करभो बहिरिति सिद्धम्· प्रतिनिधिप्र· यस्मा-
दिति पञ्चम्यर्थः सम्बन्धः। अस्मादेव निपातनात्षष्ठ्यर्थे पञ्चमी। प्रतिनिधिप्रतिदानशब्दौ कर्मणि भावे ल्युडन्तौ। प्रतिनिधिप्रतिदाने यत्सम्बन्धिनी ततः कर्म-
प्रवचनीययुक्तात्पञ्चमीत्यर्थः। प्रतिनिधिः सदृशः प्रतिदानन्दत्ततुल्यमूल्यस्य वस्तुनः प्रत्यर्पणम्· कर्त्रवर्जितमिति· कर्तृसंज्ञारहितमित्यर्थः। ऋणत्वंच
स्तुसम्बन्धिमित्तन्नतु तृतीयावाच्यकोटिनिविष्टम्· हेतुभूतमिति· तेन करणत्वविवक्षायान्तृतीयैवेति भावः। विभाषागुणे· योगविभागादिति· बाहुलकमप्यह-
वेत्तत्तु दृष्टेरित्युक्तवार्त्तिकप्रयोगाद्गुणेऽस्त्रियामिति प्रायिकमित्यन्ये· धूमादिति· धूमपदस्य ज्ञानेऽग्निमत्यदस्य ज्ञानविषये लाक्षणिकत्वं बोध्यम्· समुच्च-
यार्थमिति· स्पष्टञ्चेदम्भाष्ये एतेनान्यतरस्यामङ्गीकार इत्यर्थकम्पदद्वयमेतदित्यपास्तम्· विकल्पविषये पर्यायसङ्गतेश्च· परे तु द्वितीयासमुच्चयेन
फलं विना वा तं विना वर्षमित्यादावृतेशब्दयोग इव ततोऽन्यत्रापि दृश्यत इत्यनेन द्वितीयासिद्धेः। अत एव भाष्ये द्वितीयासमुच्चयो नोक्तः। पञ्चम्यास्म-

का· धिकारे द्वितीयाषष्ठ्यौ विषये प्रतिषेधो वक्तव्यः। दक्षिणेन ग्रामं दक्षिणतो ग्रामस्येति प्रकृतसूत्रस्थभाष्येणास्य पात द्वितीयेति सूत्रे षष्ठ्यतसर्थेत्यत आ
श·शे· मिति च सूचितम्। अन्यथा सौत्रक्रमत्यागेन्याय्यविपरीतपूर्वनिपातकरणे चबीजानापत्तिः अत एव करणे चेति सूत्रे द्वितीयासमुच्चये नेत्याहुः करणे च स्तो· करणे तृती
३४ यायाः सिद्धत्वेन पक्षे पञ्चम्यर्थमिदम्· चकारस्तृतीयान्यतरस्यामित्यनुकर्षणार्थः। षष्ठीतु गापोष्टगितिवत्· अद्रव्येति· द्रव्यभिन्नवचनेभ्य इत्यर्थः। द्रव्यपदेनात्र स
त्वेनामपरामर्शयोग्यं लिङ्गनिरूपितविशेष्यत्वात्स्तोकशब्दे यद्धर्मावेशाद्द्रव्ये स्तोकव्यवहारस्तद्धर्मपरः स च धर्मोऽल्पादिशब्दप्रवृत्तिनिमित्तमेव। शुक्लादिवच्चेतो।
धर्मे वचनं त्वपि। करणत्वञ्च परम्परया ईदृशार्थे एवं च साधुत्वं सूत्रबलादिति स्पष्टम् अलुगुत्तरपदे इत्यत्र कैयटे· करणे किम्· स्तोकम्पचति। असत्त्वभूतफलसमा
नाधिकरणत्वादत्र स्तोकशब्दस्यासत्त्ववचनत्वमिति दिक्· दूरान्ति· अत्र दूरान्तिकार्थैः षष्ठ्यन्यतरस्यामित्यतस्समुच्चयार्थकान्यतरस्याङ्ग्रहणानुवृत्त्यैवाथो धिकारा
त्पञ्चम्याः सिद्धौ चकारो व्यवहिततृतीयासमुच्चयार्थो व्याख्यानादित्याहुः· चादित्यादि· प्रातिपदिकार्थमात्र इति· व्याख्यानादिति भावः॥ इति पञ्चमी॥ षष्ठी शेषे·
शेष उक्तादन्यः। स च तत्तद्रूपेण स्वत्वादिः सम्बन्धत्वेन रूपेण च· कारकविभक्तीनां क्रियाजनकत्वसमानाधिकरणकर्तृत्वादिशक्तिरूपेण बोधकत्वेन तत्रापि तन्मू
लके सम्बन्धे विवक्षिते न षष्ठीत्याह· कारकेति· स्वस्वामिभावादिरिति· स्वत्वस्वामित्वसमूहः सम्बन्ध इत्यन्यत्र विस्तरः। एवं सर्वत्र बोध्यम्· षष्ठ्यर्थस्य संसर्गविध
येव भानम्· कारकविभक्तिभ्योपि क्रियाकारकभावस्य संसर्गविधया भानमित्युक्तम्· सम्बन्धमात्रविवक्षायामिति· सम्बन्धत्वेन भाने इत्यर्थः यद्वा क्रियाकार
कभावमूलकसम्बन्धस्यैव विवक्षायान्तु तद्विवक्षायामित्यर्थः॥ कर्तुरपि तथा विवक्षा क्तस्य च वर्तमाने इति सूत्रे छात्रस्य हसितमित्यादौ भाष्ये स्पष्टा· संयोग
सम्बन्धावच्छिन्नाधारस्य नतु तथा विवक्षा अत एव घटवद्भूतलमिति प्रयोगसाधकमतुप्सूत्रे अस्मिन्निति च पितार्थमिति तत्रैव भाष्ये स्पष्टम्· लोहितो गौः शाश्वतो एम
तस्य पि सम्पृक्तस्यार्थो बहुव्रीहिर्बोध्यः। एधोदकस्येति· एधः कर्तृकर्ता वा· दकस्योदकस्येत्यर्थः· एधशब्दोऽदन्तः पुंसि इङः कारक इति सूत्रे भाष्ये प्रयुक्तः। एधाः पस्या· वे
नीति। सान्तः क्लीबोपि। हेतौ योन्य इति· हेतावितिवर्तते। हेतुहेतुमद्भावेनेत रान्वये इत्यर्थः। तेनान्नं हेतुः पश्यत्यादौ न· षष्ठीति· हेतुपापकादि[illegible] निमि
नेत्यादि· निमित्तादिप्रयोगे तेभ्यस्तत्समानाधिकरणशब्देभ्यश्चेत्यर्थः। किन्निमित्तमिति प्रथमान्तन्द्वितीयान्तञ्च। प्रायग्रहणादिति· एवञ्च षष्ठी हेतुप्रयोगे।

लभ्यतेइति २

सर्वेनामद्वतीयाचेतिसूत्रेव्यर्थंइतिवोध्यम्‌·षष्ठ्यत   सर्थदिक्शब्दत्वान्पञ्चम्याम्प्राप्तायामिदम्‌। ततःपश्चादित्यत्रतुसार्वविभक्तिकःषष्ठ्यन्तात्तसिः। षष्ठ्यप्रीति स्य
पृष्ठेदस्पृष्टौ·भाष्येतुनदृश्यते। विपरीतंषष्ठ्यतसर्थेति सूत्रात्पूर्वमेनपेत्यस्यपाठइतिपृथग्विनेतिसूत्रेउक्तम्‌। दूरान्तिकार्थैः। यदपेक्षन्दूरत्वादिकन्ततःषष्ठीत्यर्थः
पञ्चमीचेति·तस्याएवसमुच्चयोनतुद्वितीयातृतीययोरपीतिभावः। ज्ञोवि·अत्रसूत्रेऽविदर्थस्येतिछेदोव्याख्यानात्‌·सर्पिषोज्ञानमिति·जानातेःप्रवृत्तिरर्थः।
सर्पिःसम्बन्धिनीप्रवृत्तिरित्यर्थः। अधीग·अधीगर्थःस्मृतिः। कर्मणिकिम्‌·मातुर्गुणस्मरणम्‌·करणेशेषत्वेनषष्ठ्यभावेसमासोभवत्येव। अतएवात्रसूत्रेभाष्ये
शेषइतिवर्ततइत्युक्तम्‌·प्रतिपदविधानाषष्ठीनसमस्यतइत्येतेःषष्ठीसमासनिषेधात्‌। एधोदकस्येति·एधइतिपृथक्पदम्‌दकशब्दउदकवाची। रुजार्थाना
म्‌·रोगार्थानान्धातूनामित्यर्थोव्याख्यानात्‌·धातोर्भाववचनत्वाव्यभिचारेणसामर्थ्याद्वचनइतिकर्त्तरिल्युट्‌। भावशब्देनसिद्धरूपोऽर्थउच्यतेल्युट्प्रकृत्यर्थोऽविव
क्षितस्तदाह·भावकर्तृकाणामिति·रोगकर्तृकमितिच। रोगोत्रक्षयादिः। भावकर्तृकाणांकिम्‌। श्लेष्मणश्चौरस्य जा श्लेष्मात्रनभावः। सर्पिषोनाथनमिति। सर्पिर्मभू
यादित्याशासनमित्यर्थः। जासिनि·जसुमोक्षणइतिदैवादिकस्यनग्रहणञ्जासीतिनिर्देशाद्धिंसायामित्युक्तेश्च·निप्रोपसृष्टोहनोनिप्रहणःशब्दपरत्वेविसीनत्वाद्धने
रितिणत्वम्‌·चुरादिरिति·घटादेस्तुनग्रहणन्दीर्घनिर्देशात्‌·क्राथनमिति·घटादेःक्रथेःक्राथेतिनिपातनाद्वृद्धिरितिवृत्तिः। परेतुएतत्सूत्रप्रामाण्याद्घटसाहचर्याच्चा
यमपिचुरादिर्वोध्यस्तस्याकृतिगणत्वात्‌·निपातनस्यशेषषष्ठीसन्नियोगशिष्टत्वे   कर्मत्वेनविवक्षायांचौरस्यक्राथनमित्यस्यानापत्तिः। सामान्येननिपातनेचित्त
मुल्विषयेक्रथङ्क्रथमित्यादेःक्राथयतीत्यादेश्चानापत्तिरित्याहुः समर्थयोरिति·समपर्यायसंशब्देनसमासःशकन्ध्वादित्वात्पररूपम्वा·ब्राह्मणपणव्यमिति·अ
प्रप्रत्यययोर्विकल्पिकत्वान्नकृतः। उदाहरणेशतावेवेतिनियमादपिन·दिवस्त·कर्मणिषष्ठीस्यादिति·शेषइतिस्वत्रनसम्बध्यते। व्याख्यानात्‌·अतएवद्वितीयाग्राह्य
णइतिसूत्रंङामस्यतदहःसभायान्दीव्येपुरित्यत्रनित्यंषष्ठीप्राप्तौद्वितीयार्थमितिभाष्येउक्तम्‌·तद्द्योतयन्नाह·उदाहरति·शतस्यदीव्यतीति·यद्यपिपूर्वसूत्रेदि
वस्तर्थत्वात्तदर्थस्येतिवक्तुंशक्यतेतथापियोगविभागउत्तरार्थः शेषइत्यस्यासम्बन्धार्थश्च· विभाषोप·अत्रापिशेषइतिनसम्बध्यते·तदर्थस्येतिचवर्त्ततेनतदा
ह·पूर्वयोगेति· अतएवोपसर्गात्सविभाषेतिनवेतिसूत्रेभाष्येस्पष्टम्‌·कृत्वोर्थशेषेकिमिति·दिवस्तदर्थस्येत्यादिनाविच्छेदादधिकरणकारकेएवषष्ठीविधानंयुक्त

का॰ मितिप्रश्नः द्विरहनीति॰ इत्यादिप्रामाण्यान्मण्डूकप्लुत्यानुवृत्तिः स्वीकार्येत्युत्तरम्॰ अधीगर्थेति सूत्रे कर्मादीनामविवक्षा शेष इति भाष्ये बहुवचनेनान्यापि शेषप
प्र॰ शे॰ दसम्बन्धबोधनाच्च॰ वस्तुतस्तु कर्माश्रयषष्ठीविषये सुप्रोपात्तसकर्मकाणामकर्मकवद्वचनमिति वार्त्तिकप्रत्याख्याना यशेष इति वर्त्तते इति भाष्यकृतोक्तेपरेण
२५ शेषग्रहणं केऽतिपृष्टे शेषे षष्ठीति सूत्रोक्तकर्मादीनामविवक्षा शेष इति सिद्धान्तिना स्मारितम्॰ नैतावता कृत्वोऽर्थे इत्यत्र सम्बन्धो लभ्यते॰ किञ्चैतद्भाष्यबलादित्र इति सू
त्रेपि शेषषष्ठीदसम्बन्धआवश्यकः। अन्यथा वार्त्तिकरीत्याशतस्य दीव्यत इति भावेऽष्टस्य प्रयोगस्यासिद्धिः। अतएव वार्त्तिकव्याख्यायामधीगर्थादयः प्रेष्यब्रूपर्यन्ताः कर्मा
श्रयपदेनोच्यन्ते इति कैयटः। एवञ्च शेष इत्यनुवृत्त्या वार्त्तिकप्रत्याख्यानं वदेत सूत्रद्वयप्रत्याख्यानेऽप्येवं भाष्यतात्पर्यम्॰ द्वितीया ब्राह्मणे इति सूत्रस्थभाष्यन्तु वार्त्तिक
रीत्येत्याहुः किञ्च यदा कर्म विवक्षितम्भवति तदा षष्ठी न भवति स्मराम्यहम्मातरमिति भाष्ये उक्तम्॰ तद्रीत्या यदा कर्मादि विवक्षितम्भवतीति वदेत्॰ एवञ्च शेषो विदर्थे स्यात्यत्रा
पितदसम्बन्ध एव॰ एवञ्च तद्योगे न कदापि तृतीया शतन्दीव्यतीत्यादिन्न सिध्यति। अधीगर्थेत्यादौ चमण्डूकानुवृत्तिरिति सुधियो विभावयन्तु॰ कर्तृकर्मणोः अत्र शेष इ
तिन सम्बध्यते सूत्रवैयर्थ्यापत्तेः कृद्योगा षष्ठी समस्यत इति वार्त्तिकेन तत्र समासस्येष्टत्वात् कृतिरिति॰ भावे क्तिन्। कृष्ण॰ कर्त्ता। जगत इति॰ कर्मेदम्॰ कर्तृसाहचर्यात्कर्मो
पिधात्वर्थभेदेनान्वय्येव गृह्यते। तेन स्तोकम्पाक इत्यादौ न क्रियाविशेषणात् षष्ठी॰ किञ्च क्रियाविशेषणेन स्तोकम्पाचक इत्यादौ न समानाधिकरणे समासेनापि सुप्सु
पेत्यादिः। सुबन्तार्थस्य विशेष्येणानन्वयेनासामर्थ्यात्॰ द्वितीयाश्रितेत्यादेस्तु सामर्थ्यादव्ययवद्वारकसामर्थ्ये प्रवृत्तिः। द्वितीया प्रकरणोक्तपरेतु मन्त्रीरीत्या वासामर्थ्यम्॰
अतएव पूजनात्पूजितमिति सूत्रे दारुणं यथा भवति तथाध्यापक इत्यर्थकस्य दारुणाध्यापक इत्यस्य सिद्ध्यर्थम्मलोपवचनमारब्धम्भाष्ये॰ अन्यथा समासेनासि
द्धेतदर्थं स्यात्। एतदेव भाष्यन्ततः षष्ठ्यभावेपि मानम्॰ अन्यथा षष्ठीसमासस्य तृजकाभ्याङ्कर्तरीत्यादिनिषेधे रुक्तसामर्थ्येपि प्रवृत्त्या तत्समासेनैव सिद्धौ मलोपवचनं
व्यर्थमेवस्यादिति बोध्यम्॰ न च भिन्नपदत्वेपि तथा प्रयोगसाधुत्वार्थम्मलोपवचनमिति वाच्यम्॰ तथासति वाकोमलोपश्चवक्तव्य इति वदेत्॰ अतएव कैयटेन क्रिया एम
विशेषणान्दारुणादयस्तत्रैवेऽधिकरण्यात्समासाभावाच्च लोपो विधीयत इत्युक्तम्॰ सुप्सुपेत्यादिसमासो न सार्वत्रिक इति तदाशय इत्यलम्॰ कृतिकिम्॰ मितिः कर्त्त १५
कर्मभ्याङ्क्रियासन्निधाप्यते तेऽद्यावीचधातुरेव॰ कारकान्वययोग्यतावच्छेदकरूपेण साध्यत्वेन धातुभिरेव तदुपस्थितेः। शत्योश्च आभिक इत्यादौ तद्धितान्तेन

रूपेणोपस्थितिरितिनन्वत्रकोऽन्वय एतद्भाष्यप्रामाण्यात्· अतएवहि रुगादियोगेनकर्मादिसंज्ञाः एतेनदेवदत्तेनशय्योऽयमित्यादौ षष्ठीनिरस्तेत्यर्थः [illegible]
त्यपास्तम्· अधिकारवारीद्भाणेनेत्यत्रहेतौतृतीयाक्रियायोगाभावात्कर्तुः कर्तृत्वाभावेजनकत्वरूपहेतुत्वसत्वात् धातोःस्वार्थेयेप्रत्ययंतिङः कृतस्तन्त्रनियोगेनलो
केतिविषयेभावकर्मणोरेवभविष्यतीतिकिंतेनन लोकेतिसूत्रेकृदव्ययस्यैवग्रहणात्तु अव्ययार्थस्यैककर्तृकर्मणीइतिव्याख्यानेनसिद्धम्॥उ भयप्राप्तावित्यत्रवहु
व्रीहिस्तुएकाथाहैत्यादाविवान्यपदार्थस्याशाब्दत्वेपिव्याख्यानाद्भविष्यति· नवभेदिकादेवदत्तस्ययज्ञदत्तस्यकाष्ठानामित्यादौगुणभूतेपिप्रकृत्यर्थेकर्तरिषष्ठी
र्थेऽद्भुतोनीति कृदिनिकर्तृपरत्वमितिवाच्यम्·तृतीयावत्तत्रषष्ठ्या अपिविनैवयत्नंसिद्धेरितिप्रश्नः। तद्धितेइति· तद्धितान्तशक्तिग्रहमात्रप्रयोज्योपस्थितिविषयक्रिया
याःकर्तरिकर्मणिचमाभूदित्यर्थः उदाहरणेसकर्मकप्रकृतिकभावक्तान्तस्येदृशहन्तिमात्रविषयतायाभाष्यसम्मतत्वेनतस्यकेवलस्यकाप्यप्रयोगेणतद्धि
तान्तसमुदायशक्त्यैवक्रियोपस्थापकत्वात्। कृद्ग्रहणात्कृदन्तशक्तिग्रहप्रयोज्योपस्थितिविषयक्रियाकर्तृकर्मणोर्ग्रहणान्नवात्रतथा। तत्तुल्यानाम्याचकृत
इत्यादौपाचकादेः पृथक्प्रयोगेणतच्छक्तिग्रहस्यापिसत्वेनकृदन्तशक्तिग्रहप्रयोज्योपस्थितिविषयत्वक्रियायाअस्त्येवेतिभवत्येवषष्ठी· अतएवतद्धितेषमा
भूदित्येवोक्तन्नतद्धिताधिकोइति।भाष्येपितद्धितस्यैककर्तृकर्मणि तत्रमाभूत्कृतोयेकर्तृकर्मणीतत्रैवयथास्यादित्येवोक्तम्·कृतपूर्वीति अत्रकर्मविशेष
स्यतत्तद्रूपेणप्रागन्वयाविवक्षयाऽकर्मकत्वाद्भावेक्तेपूर्वादिनिरितितद्धितत्वदननरन्तुविशेषरूपेणकर्मयोगोभवत्येवातत्रोक्तरीत्याषष्ठ्यभावेऽनभिहित
त्वाद्द्वितीयास्वरीत्यासाधुत्वेऽत्रत्यभाष्यमेवमानम्· वृत्तेःपूर्वङ्कर्मान्वयाभावाच्चसापेक्षत्वाद्वृत्तिर्नस्यादितिनशङ्क्यम्·एवमधीतीव्याकरणेइत्यादावपिबोध्यम्·
तदुक्तम्भाष्येयदावाक्यन्ततदाप्रत्ययः।यदाप्रत्ययःसामान्येनतदावृत्तिरिति। नतदाप्रत्ययः।नतदाभावेप्रत्ययः। धातोःसकर्मकत्वात्।यदाप्रत्ययः।सोवेइतिशे
षः। तदावृत्तिरेव। साचवृत्तिर्नकदापिकर्मक्तान्तेनेत्याह·सामान्येनेति·कर्मविशेषस्यतत्तद्रूपेणप्रागन्वयाविवक्षाविशिष्टोयोऽर्थस्तदर्थकधातुप्रकृतिकक्तान्ता।
न्तेनेत्यर्थः।इयमेवकर्मणोविवक्षानामानेनतादृशक्तान्तस्यवाक्येनप्रयोगइतिस्पष्टमेवोक्तम्।प्रयोगानुरोधिनीहिविवक्षेतिनद्भावः।नचाविवक्षितकर्म
तयाभावेक्तसार्थेनयत्नोव्यर्थः।नपुंसकेभावइत्यनेनसकर्मकेभ्योपिसिद्धेरितिवाच्यम्ः तस्याप्यकर्मकेभ्यएवेष्टेः।अत्रचेदमेवभाष्यम्मानम्· ददेर्दुःस्वा।

का· स्यमाह तस्येत्यधीयेरासौदमुत्तमम्· लिम्पेरिवं तनोर्वातेश्चेतयः सान्त्वलीनकइतिभट्टिपद्यम्· मातस्योदकं स्वन्ददद्भिरुत्तममामोदमुष्यादीनाङ्गृहीत्वामाह श्वा
शा·शे· न्दनस्यदः स्वस्यपक्षे कैर्मोहृश्यंशरीरे लिम्पद्भिरिव वातैः कौमारकविरहाग्निव्याप्तश्चेतयन् ज्वलः। ज्वलन्निव नस्यादिति तदर्थः। दाधातोः पोषणार्थाद्दात्रप्रदद दानि
२६ दधात्योश्शणोलिम्पेश्वश्वाः ज्वलेर्णइति जयमङ्गलाख्या व्याख्याप्येतज्जातीयैव तत्रेति दिक्· तत्र धार्यैरामोदमुत्तममित्यत्र गृहीत्वेत्याहृत्यत्तयोगे द्वितीयावो।
ध्या। उभयोः प्राप्तिर्यस्मिन्निति· नेनैकनिमित्तत्वलाभादोदनस्य पाको ब्राह्मणानाञ्च प्रादुर्भाव इत्यादौ विभिन्नक्रियाकर्त्तृकर्मणोः षष्ठी प्राप्तौ नायन्नियम इति भावः
प्राप्तिपक्षे तु चोभयोः प्रयोग एवायन्निषेध इति ध्वनितम्· स्त्रीप्रत्यययोरिति· स्त्रियाङ्क्तिन्नित्यधिकारविहितयोरित्यर्थः। नायन्नियम इति· तेनोभयत्रापि षष्ठी म
वत्येवेति भावः। भेदिकेति· धात्वर्थनिर्देशे ण्वुल· सञ्जनाद्भिदेरप्रत्ययादित्यप्रत्ययः। शेष इति· नियमस्यायमपि कल्पः इत्येके इत्येतल्लब्धमर्थं स्पष्टप्रतिपत्तये स्मा
ह· केचिदिति· अकाकारभिन्नेहलन्तान्ते इत्यर्थः। अनुशासनमिति· अनुशिष्यन्तेऽसाधुभ्यो विविच्य बोध्यन्तेये नेति करणे ल्युट् मतइत्यादौ मतिबुद्धीत्यवर्त्तमाने क्तः
।इदमेषामिति· कर्तरि षष्ठी। सकर्मकेभ्यस्त्वधिकरणे क्ते कर्त्तृकर्मणोर्द्वयोरपि षष्ठी। इदमेषाम्भुक्तमोदनस्य। उभयप्राप्ताविति तुमर्थे अस्यादित्यायेन कर्तृकर्म
णोरित्यस्यैव नियम इति बोध्यम्· नलोका· लादेश इति· लकारसम्बन्धिन इत्यर्थस्तेन ददिर्गा इति सिद्धम्· केवललस्य कापि प्रयोगाभावादेवं व्याख्यातम्· कुर्वन्निति·।
तृन प्रत्याहार घटकस्तु नायम्· तृशब्दस्य तद्घटकत्वे पि शतुस्तद्घटकत्वाभावात्· लिडादेशक्वसादियोगे लिट् सदृशकिकिनोर्योगे च निषेधार्थन्तस्यावश्यकत्वा
च्च· उ इति· उकारेणाव्याख्यानात्तदन्तविधिर्व्यपदेशिवद्भावेनोकारस्यापि मनोशंसेति। अलङ्कृञिति च उइत्युचौ। घातुक इति· लषपतपदेत्युकञ् त्वहितत्वम्·
कमेरिति· अकमनान्तस्येति शेषः। इदञ्च भाषायामेव। भाषायामिति भाष्योक्तेः। निष्ठेति· एतदपवादत्तया भाष्ये वार्त्तिकम्पठ्यते नपुंसके भावे क्तस्य योगे षष्ठ्या उपसं
ङ्·ख्यानम्। छात्रस्य हसितमिति। इदञ्च प्रतिपदोक्तत्वान्नपुंसके भावे क्त इति सूत्रविहितक्तान्तयोग एव भान्तन्देशमित्यादौ गत्यर्थाकर्मकेत्यनेन क्तान्तेन षष्ठी राम
नपुंसके भावे क्तस्तु नात्र तस्याप्यकर्मकेभ्य एवेष्टेः। अविवक्षितकर्मतया ऽकर्मकत्वेन क्तस्तु कृतपूर्वीत्यादि वृत्तिविषय एवेत्युक्तम्· एवञ्चेहाहेः सुप्तमित्या २६
दौ परत्वेन क्तो ऽधिकरणे च ··नम भावे क्ते शेषत्वविवक्षयैव षष्ठी साधनस्यावश्यकत्वेनेदं शेषत्वविवक्षया भाष्ये प्रत्याख्यातम्· वार्त्तिके न चानेन कारके षष्ठी

निषेधविषयेशेषत्वविवक्षायांतिङ्प्राप्यतेशेषत्वविवक्षयाभाष्योक्ततत्प्रत्याख्यानेतु।अनभिधानात्तदतिरिक्तविषयेनसा।पूरणगुणेतिसूत्रेभाष्येप्र
नितमिदम्·तत्रहिंसतिकिमुदाहरणम् ब्राह्मणस्यकुर्वन् नैतदस्तिकारकषष्ठ्यानिषेधात् शेषषष्ठ्यातुब्राह्मणस्यकर्तृमित्यर्थेनासामर्थ्यादित्याद्य
र्थकमुक्तमितिपरे·अधीयन्निति·इङ्·धात्वर्थः शत्रन्तकृद्योगेनितिशता।द्विषन्निति·द्विषोऽमित्रइतिशता·शेषषष्ठीत्विति·इदन्त्विनत्यमित्युक्तम्यरैः·अ
केनो·अत्रयथासङ्ख्यन्नेष्यते अकस्याधमर्ण्येऽसम्भवादाह भविष्यत्यकस्येति·वर्षशतस्यपूरकइत्यादौएतत्कर्मकयाजनकर्तारइत्यर्थके।
अङ्गुयजतांलप्स्यन्तेऽस्ययाजकाइत्यादौचषष्ठीभवत्येव कर्तृमात्रार्थकेण्वुलृत्वाविति ण्वुलिपदानन्तरसम्बन्धेनभविष्यत्प्रतीतावष्यकस्तत्राह नैः तुमुन्ण्वु।
लाविति ण्वुलतुभविष्यतीत्यधिकृत्यविधानाद्भविष्यदर्थकावितिभावः अजङ्गमीति·गमेरिनिरित्यौणादिकइतिः सचभविष्यति भविष्यतिगम्यादयइत्यु
क्तेः गामीनिपाठेवाडुलकाद्वृद्धिः शतन्दायीति·आवश्यकाधमर्ण्ययोरितिणिनिः आवश्यकेणिनावप्ययविशेषः सूत्रेआधमर्ण्यपदेनतन्त्रत्रोक्तार्थोपल
क्षणात्·अतएवावश्यंहारीतिनिर्देशः सङ्गच्छते तत्रत्यावश्यकेणिनिः नचात्रभविष्यदर्थकत्वेनसिद्धिभूतवर्त्तमानयोरावश्यकत्वबोधनस्यवैकल्येनमवि।
ष्यतएवनतोबोधादितिवाच्यम्·वस्तुतोभविष्यतोबोधेपितन्नेनाबोधात् णिनेस्तदर्थकत्वाभावाच्च·अतएवावश्यङ्कारीकटस्येतिदृष्टान्तुदाहृतंसङ्गच्छते।
तन्त्राहेनानेनणिनिः अवश्यपदोपादानात्· किन्तुसुप्यजातावितिनव्याः कृत्यानाङ्क र्तृकर्मणोःरितिनित्यप्राप्तेविभाषाकर्मनिदृत्यर्थङ्कृत्यग्रहणम्·अनु
वर्त्ततइति·निषेधोऽयङ्कर्तृकर्मणोश्चकर्त्तरिवेतिन्वनुभयप्राप्तिविषयमितिदृत्तिकैयटादयः अजमितिनत्रगुणाकर्मणिवेष्यतइतिविकल्पसुत्र कृत्यानतिरिक्त
चरितार्थस्तस्यदोग्धव्यागावः पयः कृष्णेनेत्यादौगुणकर्मण्युक्तत्वात्प्रधानेचरितार्थेनानेनपरत्वाद्बाधात्·
तुल्यार्थैरयोगइति·तुल्यत्वार्थैरित्यर्थः अतएवातुलोपमाभ्यामितिचरितार्थम्·अतएव पर्युदासादनव्ययोम
ावेदम्·तेनसदृशहवस्योगेन·चतुर्थीचाशिषि·आशीर्विषयक्रियान्वय्यर्थकात्प्रातिपदिकात्तत्सुरके आयुष्यादियोगेचतुर्थीषष्ठ्याविन्यर्थः अतएवैतदर्थकचतु
र्थ्यादिघर्मेनसुखहितादिभिर्नसमासः उभयोरपिक्रियान्वयेनपरस्परमसामर्थ्यात् अतएव हितेनचतुर्थीसमासविधानन्तद्योगेचतुर्थीज्ञापकमित्याकरे।

का॰ श॰ शे॰ २१ कसङ्गच्छते अनुधृतावुद्देश्यविधेयभावेनानन्वयादाशीर्विषयेच तथान्वयान्न समास इति तन्न· इत्नावपि प्राप्तत्वादि पर्यालोचनेन लोहितोष्णीषेत्यादौ तथान्वय
दर्शनात् भाष्येतथाप्यन्वयेवृत्तेरसाधुतायाअनुक्तेश्चेति समासवादे मञ्जूषायाम्विस्तरः व्याख्यानादिति· सूत्रेऽर्थशब्दः पृथक्क्रमि त्तमितिभावः भाष्येतु नैतद्दृश्य
ते ॥ ॥ इतिषष्ठी ॥ ॥ आधारो·कारकेइत्यधिकारात्क्रियाजनकेएतत्प्रवृत्त्योपस्थितत्वादाधार क्रियायाएवतत्रेप्सिततमस्वतन्त्रपदाभ्यां साक्षात्क्रि
याधारत्वेः कर्मकर्तृसञ्ज्ञाभ्यांवा आत्परम्परयातदाश्रयस्यग्रहणम् परम्पराचकर्तृकर्मद्वारकैवव्याख्यानादित्याह·कर्तृकर्मद्वारेति· यद्यपिकालस्य साक्षात्क्रि
यापरिच्छेदकत्वन्तथापिकर्तृकर्मद्वारेवतथैवानुभवात्साक्षात्तदाधारत्वेपिआधारपदेस्वरितत्वप्रतिज्ञानात्परम्पराधारस्यग्रहणम्· किञ्चसाक्षात्तदाधारत्वे
कर्तृत्वमेवतस्यस्यात्कालःपचतिभूतानीतिवत् एवञ्चक्रियान्वयोऽप्यस्यकर्त्राद्यन्वयद्वारैवयस्ययद्द्वाराकारकत्वन्तस्यतद्द्वारैवक्रियान्वयइतिव्युत्पत्तेः अतएवा।
क्षाद्योराडइत्यादौसमासः।अत्राऽऽसनादिक्रियानर्भावेणबोधानुभवात्क्रियाद्वारासामर्थ्यमितिकैयटोक्तंयुक्तम्·मूलेवृक्षःकपिसंयोगीत्यादावपित्तिक्रियाम
ध्याहृत्यतस्याःस्वकर्तृकपिसंयोगिवृक्षद्वारामूलवृत्तित्वादाधारत्वम्विशिष्टवृक्षमूलवृत्तित्वबोधनेऽन्यत्रावयवेतद्विशिष्टवृक्षाभावप्रतीतिः कपिसंयोगेतदव
च्छेदकत्वम्फलतीतिदिक्·चकारादिति·प्रातिपदिकार्थइतिशेषः त्रिधेति·तत्रसकलावयवव्याप्तौव्यापकाधारत्वम्·यथातिलेषुतैलमिदमेवमुख्यमधिकरणमि
तिस्वरितेनेत्यत्रसाधकतममित्यत्रचभाष्येस्पष्टम्·उपसमीपेश्लेषःसम्बन्धस्तत्कृतमौपश्लेषिकम्·अतएवैकोपग्रणोपत्यादावौपश्लेषिकेआधारेसप्तम्युक्तासं
हितायामितिसूत्रेभाष्ये·तत्राजादिसामीप्यमेवेगादीनांयन्मासेतिकानिर्दिश्यतेनतस्यसमासऔपश्लेषिकमधिकरणमित्युक्तम्· तत्रत्वदीयतइतिसूत्रेभाष्येतद
स्मिन्नधिकमितिसूत्रेभाष्येस्पष्टमिदम्· कटेआस्तेइतितुनौपश्लेषिकोदाहरणंयुक्तमुक्तभाष्यविरोधात्·यदेकदेशावच्छेदेनश्लेषेपिश्लेषस्यसमीपमुपश्लेषणन्त
त्कृतमितिव्युत्पत्त्यौपश्लेषिकत्वमित्यभिप्रायेणतदुदाहरणन्नत· एतत्सर्वेङ्गोणामधिकरणङ्कःङ्गायाङ्गावइत्यादिकञ्चेतिस्वरितेनेत्यादौभाष्येस्पष्टम्·गौणोव्याधा राम
सदिःसप्तम्यादिशब्दएवेतिबोध्यम्·एतदतिरिक्तंसर्वंवैषयिकम्·अधिकरणत्वशक्तिमांश्चाधिकरणविभक्त्यर्थः इन्विषयस्येति· इनोविषयस्येत्यत्रक्तेःकोलस्य २१
कर्मणीत्यर्थःतेनकृतपूर्वीकटमित्यत्रन।उदाहरणेनकर्मणिक्तः।अभितत्वेनसप्तम्यतापत्तेः किन्तुभावे· इष्टादिभ्यश्चेति· तत्रहिआक्रमनेनेत्यतोऽनेनेतिवर्तते।

अत्र कर्मशब्देन कालादिव्यतिरिक्तमेव गृह्यते व्याख्यानात् · तेन मासमधीती व्याकरणे इत्यत्र नेति कैयटः। साध्वसाधु · शेषषष्ठ्यपवादोऽयम् · साधुर्निपुणो वा।
मित्येव सिद्धे ऽनर्चार्थमत्र साधुग्रहणम् · तेन तत्त्वकथनेऽपि भवति सूत्रे ऽर्चाग्रहणन्तु निपुणार्थम् · निमित्तादिति · निमित्तवाचकात्सप्तमी भवति तस्य निमित्तं सम्ब।
न्धि सत्या स्वान्वयिनी क्रिया कर्मणा योग इत्यर्थः। निमित्तञ्चात्र क्रियाफलम्। एवञ्च फलसप्तम्यर्थः। चर्मणीति · चर्मणः फलत्वञ्च हननस्य तल्लाभेच्छाधीनत्वात् का।
र्य्यसम्बन्धश्च स्वरूपसन्नेव निमित्तम् · द्वीपि चर्मणोरण्डकोशमृगयोश्च समवायः। इतरयोस्संयोगः। मुक्ताफलाय करिणं रघुवीरेत्यादौ क्रियार्थोपपदस्येति च
तुर्थी प्राप्नोतीति शेषः। मुक्ताफलान्याहर्तुमित्यर्थः। यस्य च भा · भावः क्रिया · ततः। ज्ञापकक्रियाश्रयवाचकात्। तेन गोपददुह्यमानपदयोरुभयोरपि सप्तमी सि
द्धा · क्रियाश्रयः कर्त्ता कर्म च · तत्र ब्राह्मणेष्वधीयानेषु गत इति कर्त्तर्युदाहरणम् · कर्मण्याह · गोष्विति · तत्र काचित् क्रिया स्वाधारकालेनान्याङ्क्रियाम्परिच्छिन
त्ति · यथा प्रकृते काचित्तु स्वाधारकालाव्यवहितपूर्वकालेन यथा गोषु धोक्ष्यमाणास्वित्यादौ · काचित्स्वाधारकालानन्तरकालेन · यथा गोषु दुग्धासु गत इत्यादौ। ज्ञापकत्वं स
प्तम्यर्थं तस्य च भावलक्षणमित्युक्तेः क्रियायामेवान्वयः। लक्ष्यलक्षणभावः शब्दबोध्य एवैतच्च सप्तम्या प्रतीतो निमित्तन्तु तत्सम्भूयोदर्शनादिरूपमानान्तरेण ग्रह
णापेक्षेति बोध्यम् · अन्यथोदिते आदित्ये तमो नष्टमित्यादावेव स्यान्न तु प्रकृते। कदाचिद्धि गोषु दुह्यमानासु सो गतः इदञ्च यत्र मानान्तरेण ज्ञाते स्वरूपस्यार्थस्य
कालविशेषादिज्ञानार्थं शब्दप्रयोगस्तत्रैव प्रवर्त्तते भाष्यस्वरसात् · राहूपरागे स्नायादित्यत्र राहूपरागपदेन तदाश्रयकाल उच्यत इत्यधिकरणसप्तम्येव · विवाहे
नान्दीमुखं कुर्यादित्यत्र विवाहपदेन तत्काल उच्यते · गवान्दोहे स्वागत इत्यत्राप्यधिकरणसप्तम्येवेत्यन्यत्र विस्तरः अर्हाणाम् कर्त्तृत्वाऽर्हाणाम् तद्वैपरीत्ये ऽर्हे
णामकर्त्तृत्वे ऽनर्हाणाञ्च कर्त्तृत्वे इत्यर्थः। वाक्यचतुष्टयमेतत्। कर्तृ~ समर्पकादकर्त्तृसमर्पकाच्च सप्तमीत्यर्थः। सप्तम्याश्च नदन्त्वपि क्रियावाचकाद्धातोः प्रथमा
सामानाधिकरण्याच्छतृशानचावेव · तच्च लक्षणाभावाविवक्षार्थमिदम् · सत्स्विति · सत्सु हितरणक्रियाकर्त्तृत्वार्हाः नरणक्रियाकर्त्तृ सत्सम्बन्धि असत्कर्त्तृकमासन
मिति बोधः। स्वक्रियाधिकरणकालवृत्तित्वं सम्बन्धः। असत्स्विति · न रणक्रियाकर्त्तृत्वानर्हाणान्दकर्त्तृत्वमत्र · यद्यपि स्थितिक्रियाकर्त्तृत्वार्हत्वेनेदं सिद्धम् · तथाप्य
सतान्नरणक्रियार्हत्वादिकमपि बोधविषय इति भावः। सत्स्विति · नरणक्रिया   र्हाणान्दकर्त्तृत्वमत्र

का॰ षष्ठी च अनादर इति विषयसप्तमीयस्य च भावेनेत्याद्यनुवर्तते अनादरेण गम्यमाने सति यस्य क्रियया क्रियान्तरं लक्ष्यते ततः सप्तमीषष्ठ्याविवित्यर्थः।फलि
श॰ शे॰ तमाह। अनादराधिक्ये इति। लक्ष्यलक्षणभावः षष्ठ्यर्थः।अनादरविशिष्टप्रव्रजनन्धात्वर्थः।तत्र षष्ठी तात्पर्यग्राहिका ऽनादरश्च प्रत्यासत्त्या पुत्रादिविषयक
२८ एवेति भावः। स्वामीश्वरा। शब्दपरत्वाद्विरूपाणामपीति नैकशेषः।पर्यायान्तरसङ्ग्रहाय पत्या स्वाम्यर्थेति नोक्तम्। दीयत इति व्युत्पत्त्या दीयमानांशरूपं दायमादत्ते
इति सोपसर्गाद्ददातेर्दाद एव निपातनात्कः। गवादिकं दीयमाने ऽन्वेति नित्यसाकाङ्क्षत्वाद्वृत्तिः। दायादशब्दः स्वामिपर्याय इत्यन्ये। षष्ठ्यामेवेति। शेषषष्ठीत्यनेने
ति भावः। नैत्यर्थ इति। आसेवापदस्य तत्र रूढेरिति भावः। तात्पर्यञ्च तदेकव्यापारता। आयुक्तयोगे ऽधिकरणत्वविवक्षायां सप्तमी प्राप्तौ सम्बन्धविवक्षायां तत्रस
शलयोगे च षष्ठी प्राप्तौ वचनम्। यतश्च। जातिगुणक्रियासंज्ञाभिरिति। विशिष्टस्येत्यध्याहारः।तद्विशिष्टस्यैकदेशस्य यतः स्वघटितसमुदायात्स्वेतरसमुदायघट
कव्यावृत्तधर्मकरणकम्पृथक्करणन्तद्वाचकात्षष्ठीत्यर्थः।यतः।किम्।यस्य जात्यादिविशिष्टस्य स्वेतरव्यावृत्तधर्म वत्त्वबोधनन्तद् एवमाभूत् षष्ठ्यपवादत्ववत्प्रथमा
पवादत्वस्यापि सम्भवात्। स्वघटितसमुदायावधिकस्वेतरसमुदायघटकव्यावृत्तधर्मकरणकपृथक्करणरूपनिर्धारणविषयत्वरूपो ऽवयवावयविभावरूपश्च
सम्बन्धो विभक्त्यर्थः। नृसमुदायावधिकद्विजेतरनरव्यावृत्तश्रेष्ठत्वकरणकपृथक्करणरूपनिर्धारणविषयो नृसमुदायावयवो द्विजः श्रेष्ठ इति बोधः। संसर्गघटकक
रणत्वञ्च श्रेष्ठत्वादिरूपमेव प्रत्यासत्तेः। अत एव न निर्धारण इति सूत्रबोधितन्निर्धारणं स्वविभक्त्यर्थत्वं सङ्गच्छते। उद्भूतावयवभेदविवक्षया नृणामिति बहुवचनम्।
तिरोहितावयवभेदविवक्षया निर्धारणविषये एकवचनन्त्वसाध्विति कारके इति सूत्रे भाष्ये स्पष्टम्। तत्र हि निर्धारणे कारकेष्विति ब्रूयादित्युक्तम्। भिदचोन्यादिश्च
शेतु सौत्रो निर्देश इति तदाशयः। द्वन्द्वः सामासिकस्य चेत्यत्र समासं समूहमध्ये इत्यर्थः। समूहे ऽर्थे चितेति ठक्। पञ्चमीति। यतश्च निर्धारणमित्यनुवर्तते विभागो ऽत्र
भेदः।तत्र निर्धारणे सर्वत्र यथा कथञ्चिद्भेदस्य सत्त्वेन विभक्तग्रहणसामर्थ्याद्यत्र भेद एव न तु केनाप्युपात्तरूपेण भेदस्तत्रैव प्रवृत्तिरित्यत आह। भेद एवेति। अ राम
त्र पञ्चम्यर्थो निर्धारणविषयत्वरूप एव। पाटलिपुत्रकावधिकनिर्धारणविषया माथुरा आढ्यतरा इति बोधः। एवञ्च त्रितयोपादाने एवं निर्धारणप्रतीतिरि २८
ति पुरुषोत्तम इत्यादौ सम्बन्धसामान्ये षष्ठी उत्तमनिरूपितेति समाससिद्धिरिति तत्सूत्रे कैयटः। साधुनि। निपूर्वात्पुण कर्मणि शुभे इत्यत इगुपधलक्षणः।

अर्चतेश्च भौवादिकाद्गुरोश्च हल इत्यप्रत्ययः। अर्चा। चौरादिकात्तु ण्यासश्रन्थेति युच्‌ स्यात्‌ षष्ठ्यपवादोऽयम्‌· अप्रत्ययादिभिरिति· लक्षणेत्थमिति सू
त्रोपात्ताः प्रत्यादयः। नक्षत्रे च· लुपशब्देन लुप्संज्ञया लुप्तप्रत्ययार्थो लक्ष्यते इति बोध्यम्‌· अधिकरणे किम्‌· अद्य पुष्यः। असत्यान्तदनुवृत्तावनन्तरङ्गत्वात्प्राति
पदिकार्थे एव स्यात्‌· मूलेनेति· नक्षत्रेण युक्तः काल इत्यणो लुब्विशेष इति लुप्‌ नक्षत्रे किम्‌ पञ्चालेषु तिष्ठन्ति जनपदे लुबिति लुप्‌· सप्तमीपञ्चम्यौ· ।
कालाध्वनोरित्यतस्तदनुवर्त्तते तच्च पञ्चम्या विपरिणम्यते मध्यस्यावधिद्वयसापेक्षतया द्विवचनान्तेन समासः। बोधस्तु शक्तित्वेन शक्तिद्वयस्य न तु वि
तेनेति बोध्यम्‌· ननु कर्तृरूपस्य कारकस्यैकत्वादिदं निबन्धनमध्यव्यपदेशासम्भवोऽत आह· शक्तिद्वयमध्येयाविति· कर्तृत्वादिशक्तिरेव कारकं। स
चक्रियाभेदेन भिन्नेति भावः। यद्यप्यवध्यवधिमतोस्साजात्यनियमान्न कालाध्वानौ कारकमध्ये सम्भवतस्तथापि शक्तिशब्देन तदाधार कालादिग्रह
णान्न दोषः। षष्ठ्यपवादोयम्‌ स्वानन्तरकालवृत्तित्वादिकं विभक्त्यर्थः। शक्तिद्वयमध्यवर्त्तित्वं तु वस्तुसन्निमित्तम्‌· अधिकशब्देनेति· कर्तरि क्तप्रत्ययान्ता भ
ध्यारूढशब्दार्थकाधिकशब्दयोगे लोकशब्दात्षष्ठ्यां प्राप्तायां ज्ञापकादिमेइष्यते इत्यर्थः। तदस्मिन्नधिकमिति सूत्रे भाष्ये तु उपश्लिष्टपदाध्याहारेणोप
श्लेषिकेऽधिकरणे सप्तमीत्युक्तम्‌· कर्मणि क्तप्रत्ययान्ताध्यारूढशब्दार्थकाधिकयोगे तु अधिको लोको हरिणेति प्रथमैव· उपपराद्धे इति· उपोधिके च।
तिकर्मप्रवचनीयत्वम्‌· ननु आमुद्दिश्य विनियोज्यत इत्यर्थादत्र कर्मणि द्वितीयैवेति किङ्कर्मप्रवचनीयत्वेनेत्यत आह· अगतित्वादिति· तिङि चेति· उदात्त
वतीति तिङ्‌ न्नो गतिर्निहन्यत इत्यर्थः। अत्र तिङ्‌ तिङ इति निघातस्य निपातैर्यद्यदीत्यादिना निषेधात्‌ करिष्यतीति तिङ्‌· न्तस्योदात्तवत्त्वमिति सर्वेष्वसि
द्धिः॥ ॥ * ॥ इति विभक्त्यर्थाः अधिगच्छति शास्त्रार्थं स्मरति श्रद्दधाति च। यत्कृपावशतस्तस्मै नमोस्तु गुरवे सदा ६॥ ॥

ल॰ शे॰ श्रीगणेशाय नमः। समर्थः पदविधिः। विधिशब्दः कर्मसाधनः शेष षष्ठ्या समासस्तदाह पदसंबन्धीति। पदविधिसहचरितोऽपि पदविधिशब्देन गृह्यते अत एव।
स॰ सन्नन्तादावेकार्थीभावे पदविधिश्च समाससंज्ञादिस्तस्य च न सामर्थ्ये साक्षात् विशेषणमसंभावात् तत्राह समर्थाश्रित इति सामर्थ्यं चात्र न व्यपेक्षा व्यपेक्षा
२९ नात् समासादिवृत्तिषु तस्यासंभवाच्च किं त्वेकार्थीभावः स च विशेष्यविशेषणभावावगाह्युपस्थितिजनकत्वं संसृष्टार्थे समर्थमिति भाष्योक्तेः। अत एव राजपुरुषेक
देशे राज्ञि ऋद्धस्येत्यादि विशेषणान्वयो न देवदत्तस्य गुरुकुलमित्यादौ तु गमकत्वाद्भवत्येव वृत्तिः एवं राजपुरुष इत्यादौ विशेष णापदे संख्यानवगमोऽप्येकार्थीभाव।
कृतः संख्याविशेषप्रकारेण तत्तदर्थभाने पृथगुपस्थितेस्तन्त्रत्वात् यथा घटा इत्यादितो वहुत्वेनैव त्रिचतुरादिव्यक्तीनां भानं न तु त्रित्वचतुष्ट्वादिना तथा वृत्तौ राजत्वा।
दिनैकानेकव्यक्तिभानं तात्पर्यवशान्नत्वेकत्वबहुत्वादिना एवं तावकीनो यौष्माकीण इत्यादौ संबोध्यत्वेनैवैकानेकव्यक्तिभानं न त्वेकत्वबहुत्वादिना विग्रहवाक्ये
येकवचनत्वारोपेण शास्त्रप्रवृत्तिमात्रं न तु तद्बोधः वृत्तिस्वभावविरोधादिति मंजूषायां विस्तरः गमकत्वादेव शिवस्य भगवतो भक्त इत्यर्थे शिवभागवत इत्ययं स्व
लेति सूत्रे भाष्ये प्रयोगः प रं तु तत्र वृत्तिरेव न तु शिवस्य भागवत इति वाक्यं साधु तत्र भगवच्छब्दादण् शिवपदेन भगवच्छब्दस्य समासश्च युगपदेवेति बोध्यं तयोरुप
स्थितिश्च समुदायशक्तिसाध्या एवं च क्लृप्तशक्तित्यागे मानाभावात् प्रत्येकशक्तिसहकृतया समुदायशक्त्या तथोपस्थितिरयमेव चैकार्थीभावः जहत्स्वार्था वृत्तिः प
दानामानर्थक्यमिति तु न युक्तं महाबाहुः सुपन्था इत्यादावाकारादेरनापत्तेः अर्थवत्त्वे भूतपूर्वगत्याश्रयणं तु सत्यां गतावयुक्तमवृद्धैः जहत्स्वार्था तु तत्रैव यत्र रू
ढिविरोधिनी अवयवार्थविरुद्धो यत्र समुदायार्थस्तत्रैवसेति तदर्थः यथा गोरक्षस्कस्सर्पादौ परिभाषेयम् सा च पदविधिरिति सूत्रस्वरसात् समासे गुरुलेः सं
ग इत्यादौ समासग्रहणाच्च गतिगतौ विति सूत्रे पदस्येत्यधिकारात् समर्थपरिभाषोपस्थितिरिति कैयटस्वरसाच्च पदत्वेन श्रुतं तत्त्वेन वा यत्र साक्षादुद्देश्यता तत्रैव
प्रवर्तते तेन ग्रन्थारादित्यादौ नास्याः प्रवृत्तिः एकार्थीभावश्चालौकिकविग्रहवाक्य एव कल्प्यते यथा शत्रादौ द्वितीया सामानाधिकरण्यं दृष्ट्वा लकारेऽपि तत्क।
ल्पनात् तथा च अन्यपदार्थे समर्थे स्वार्थे इत्यनुवादबलादस्य तत्र कल्पनेति तथा च शतृविधायके भाष्यम् लस्याप्रथमासमानाधिकरणेनार्थेनायोगादादेशानु राम॰
पपत्तिस्तस्य क्वापि प्रयोगाभावादित्याशंक्यादेशसामानाधिकरण्यं दृष्ट्वानुमानात् ज्ञातव्यं प्रकृतेरपि तत् भवतीति तत्र कैयटः सिद्धानां शब्दानामन्वाख्यानमिति ॥ १

पचन्तं देवदत्तं पश्येत्यादिप्रयोगदर्शनात्तस्यानिनोपि लटः प्रक्रियार्थे विहितस्याप्रथमासामानाधिकरण्यमनुमीयत इति अत्रानुमाने सौत्रानुवाद एवानुकूल।
स्तर्कः अत्र प्रक्रियार्थे विहितस्येत्यनेनान्यस्यापि प्रक्रियार्थकल्पितस्य लोकेऽबोधकत्वं सूचितमित्यन्यत्र विस्तरः समर्थः किम् पश्य कृष्णं श्रितोऽममि
त्यत्र कृष्णं श्रितयोः परस्परं संबन्धाभावेनैकोपस्थित्यजनकत्वेनासामर्थ्यं सह सुपा सुबामन्त्रित इत्यतः सुबिति वर्त्तते सुबन्तं सहितं सुबन्तं समाससंज्ञकमित्यर्थः
समस्यत इत्युक्तिस्तु बहूनां भिन्नयोः शब्दयोरनेन संश्लेषः क्रियत इति प्रतिपत्तेस्तदनुसारेण संपूर्वकास्यतेश्च संश्लेषोर्थः प्राक्कडारादित्यत्र प्राग्ग्रहणमावर्त्त
ते तेन प्राक्समाससंज्ञका भवन्ति तत्संज्ञाः संतोऽव्ययीभावादिसंज्ञका इत्यर्थात्तयोः समावेश इति भाष्ये स्पष्टम् अन्यथा कडारत्वात्पर्यायः स्यात् इति दिक्
अत्र सुबित्येकत्वमविवक्षितं तेन महिष्या अजायाश्च क्षीरमित्यत्र सुबन्तसमुदायेन न क्षीरशब्दे न समास इति कैयटादयः। परे तु अनुवाद्यत्वादेकत्वाविवक्षैव।
किंच तद्विवक्षायामेकेनैव केनचित्सुबन्तेन किंचिदेकं सुबन्तं समस्येत न त्वन्यैरन्यानि तस्मात्सुबित्यादौ जातिविवक्षा एवं च यथा स्वाङ्गग्रहणेन स्वाङ्गसमुदायस्य
न ग्रहणं स्वाङ्गत्वस्य प्रत्येकं समाप्तत्वात् एवं सुबन्तत्वादेरपि प्रत्येकं समाप्तत्वेन सुबन्तादिग्रहणेन न सुबन्तादिसमुदायस्य ग्रहणमिति नोक्तदोषः स्पष्टं चेदं।
मनुसूत्रसमर्थसूत्रयोर्भाष्ये तत्र त्यक्तकैयटादीनां तु प्रमादः अत एव विभक्तिश्चेति सूत्रे प्रतिप्रत्ययं विभक्तिसंज्ञेति पक्षे प्रथमयोरित्यादौ विभक्तिसमुदायस्य
विभक्तिग्रहणेनाग्रहणात् प्रथमयोः प्रत्यययोरेव ग्रहणं प्राप्नोतीत्युक्तं कैयटेनेत्यन्यत्र विस्तर इत्याहुः अनुर्व्यचलदिति अनोर्व्यचलदित्यनेन युग
पत्समासः अनु इति सुबन्तेन व्यचलदिति समुदायस्यासमर्थत्वात् सुपेति इदं लक्षणमधिकारश्च अन्यथा एकस्तु देवः करोति मातुः स्मरतीत्यादौ विशेषणसम
स षष्ठीसमासयोरभावः सुपो धातु अङ्गनिमित्तस्य सुप इत्यर्थभ्रमवारणायाङ्गस्य सुप इति नोक्तं पूर्वनिपात इति भूतशब्दस्यैवेत्यर्थः अन्यथा विनिगमनावि
रहेण प्रथमानिर्दिष्टत्वाविशेषादनियमः स्यादिति भावः अत एव निर्दिष्टादौ दृशेर्विषयेऽवयवद्वारकसामर्थ्येप्यस्य प्रवृत्तिः विस्पष्टपटुरित्यादावपि विस्प
ष्टादीनि गुणवचनेष्विति गमकं बोध्यं तत्र हि विस्पष्टमित्यादि पटुत्वादिविशेषणमिति कैयटे स्पष्टं इवेनेति हरीतकीं भुंक्ष्व राजन्मातेव हितकारिणीमित्यसा
ध्वेवेति समानाधिकरणे प्रथमा अभिहिते प्रथमेति वार्त्तिकस्वारस्येन प्रथमायास्तत्र तत्र कारकविभक्तित्वोक्तिपरभाष्येण च क्रियायोग एव प्रथमायाः प्र.

प्र·शे· प्रकृत्यामातेतिप्रथमायामातत्सदृशीमित्यर्थेऽसाधुत्वादित्यन्यत्रविस्तरः एतद्योगविभागसिद्धसमासस्यविशेषसंज्ञासंत्येवतत्तदधिकारेष्वग्रहणं तञ्जीमत्तेवावेति।
स· अत्रयथार्थत्वादिप्रयुक्तोऽव्ययीभावस्तुन तत्रतस्यैवेतिनिर्देशात् अव्ययी· अनव्ययमव्ययंभवतीतिभवतेर्णस्य उपसंख्यानमितिकर्तरिणः महासंज्ञाकरणंप्रा
३० चामनुरोधात् योगोविभज्यतेइति भाष्येत्विदंनदृश्यते अपदिशमित्यादिमांतानांस्वरादिपाठदव्ययत्वम् अपदिशेनेत्यादितुचिंत्यमेवेत्यन्ये· ननुसमासगते
अन्तविभत्त्याश्रये प्रथमांतत्वेआश्रीयमाणेकष्टश्रितादौश्रितस्यपूर्वनिपातापत्तिर्निर्दिष्टपदंचव्यर्थमत आहसमासशास्त्रेइति समाससंज्ञाविधायकेशास्त्रे
इत्यर्थः नचराज्ञःकुमारीश्रितोराजकुमारीश्रितइत्यत्रद्वितीयायाः द्वितीयाश्रितेति सूत्रेप्रथमानिर्दिष्टत्वेनकुमारीशब्दस्यपूर्वनिपातापत्तिरितिवाच्यम् अप्रधानमुपस
र्जनमितिशास्त्रांतरोक्तमहासंज्ञाकरणेनास्यतदर्थकतयासमासशास्त्रेप्रथमानिर्दिष्टमप्रधानत्वसमानाधिकरणोपसर्जनपदवदितिवाच्यार्थेनिष्पन्नेऽप्र
धानत्वस्यसंबंधित्वाद्यंप्रतिपदप्रधानंतंप्रतितदुपसर्जनसंज्ञमित्यवगतेर्दोषादितिभाष्येणैवसमाधानात् प्रकृतेचनराजनिरूपितमप्राधान्यंकु
मार्याइतिनतदपेक्षास्यपूर्वनिपातः नचैवंपूर्वकायाद्यसिद्धिः कायनिरूपिताप्राधान्यस्यपूर्वपदार्थेऽभावादितिवाच्यं समासशास्त्रस्यप्रथमानिर्दिष्ट
शब्दगताप्राधान्यस्याश्रयणेनादोषात् समासशास्त्रेयंप्रतिपदप्रधानंतंप्रतितदुपसर्जनमित्यर्थात् भवतिचश्रितादौप्रतिद्वितीयांतंतथासहयुक्तत्वेनोपा
त्तार्थस्यशाब्दगुणान्वयित्वाभावरूपाप्राधान्येपितत्समभिव्याहृतप्रथमाद्यंतार्थतदधीनत्वरूपाप्राधान्यप्रतीतेः अतएवसमकक्षयोरप्येकस्यपरेणसहा
गंतव्यमित्युक्तेदुःखंदृश्यते प्रकृतेपिद्वितीयांतंश्रिताद्यधीनंतंविनासमासाघटकत्वात् श्रितादिकंतुतंविनापिसमासांतरेघटकमितिद्वितीयांतस्यश्रिताद्यधी
नत्वमेव मन्यत्राप्यूह्यम् यस्यशब्दस्यसमासविधौयत्प्रथमानिर्दिष्टंतंप्रतितदुपसर्जनमितिवक्तव्यमितिवार्त्तिकप्रत्याख्यानायतद्भाष्यप्रवृत्तेर्भाष्येपि यंशब्दं
प्रतियत्प्रथमानिर्दिष्टमप्रधानंतंशब्दंप्रतितत्प्रथमानिर्दिष्टंवाच्यंपदमुपसर्जनमित्यर्थस्यैवौचित्यात् अतएवयंयदितिभिन्नलिंगनिर्देशः बहुव्रीहौत्वेकवि
भक्तित्येवोपसर्जनत्वमिति अनुपदमेवस्फुटीभविष्यति अन्वर्थत्वविरोधान्नानेनेतिभाष्यसिद्धान्तइतिबोध्यम् यत्वर्थगताप्राधान्येनान्वर्थत्वेपिपूर्वकाया राम·
दौनदोषोऽन्वर्थसंज्ञाहियत्रसोऽर्थःसंभवतितत्रप्रवृत्तिनिमित्तापेक्षाप्रवर्त्ततेऽन्यत्रतुविधानासामर्थ्यात्तन्निरपेक्षायथास्वादीनांकर्मप्रवचनीयत्वमितिप्रथम २

निर्देश सामर्थ्यात्सर्वादीनां प्रवर्तितेऽविवक्षानिर्विभक्तिकस्योच्चारणासंभवेनतत्सामर्थ्यायोगात् प्राथम्यादन्वितार्थकत्वाल्लघुत्वाच्च प्रथमैवोच्चारितेत्यस्य वक्तुंशक्यत्वादित्यस
म् उपसर्जनंपूर्वं समासइत्यधिकृतयोग्यतावलेनसमस्यमानविपरिणम्यतेतदाह समासेइति नचराज्ञः कुमार्याइति परिनिष्ठितविभक्त्यासमासेकुमार्या अपिपूर्वनिपातापत्तिरिति वा
वाच्यम् षष्ठ्यंतयोः समासेर्थाभेदात्प्रधानस्यापूर्वनिपातइतिभाष्येणसमाधानात् अर्थाभेदात् अर्थस्यप्रधानस्याभेदात्समस्यमानराजपदार्थनिरूपितसंबंधाभावात् अ
स्यषष्ठ्यंतस्यप्रथमानिर्दिष्टत्वाभावान्नपूर्वनिपातइतितदर्थः अयंभावः षष्ठीत्यादिसूत्रेयेनसुबंतेनसमासस्तदर्थनिरूपितसंबंधाद्यर्थकमेवषष्ठ्याद्यंतंगृह्यते तदेवच
तत्रप्रथमानिर्दिष्टमिति तदुक्तंकैयटेन राज्ञः पुरुषस्येत्यत्रराजापेक्षयापुरुषः प्रधानमेवेतिनासौअभिधीयतेराजापेक्षयानव्य जिरिच्यतेइत्यप्रधानस्यैवपूर्वनिपातःइति
उक्तरीत्याःप्रधानषष्ठ्यंतमेवतत्रप्रथमानिर्दिष्टंनतुप्रधानमितितद्भावः यत्तूपसर्जनसंज्ञान्वर्थत्वादप्रधानस्यैवेत्युपसर्जनंपूर्वमित्यत्रकैयटस्तन्नेत्युक्तमेवेत्यलम् प्र
थमानिर्दिष्टमित्यतोनुवृत्तंसमासइतितदर्थविग्रह ———— परमित्याह।
विग्रहेइति नियतेति एकग्रहणादवधारणगर्भसमासलाभइतिभावः निष्कौशांबिरित्युदाहरणं परिनिष्ठितविभक्त्यापिसमासेननिष्क्रांतंनिष्क्रांतेनेत्यादिक्रमेणन
स्यानियतविभक्तिकतयाकौशाम्बीपदस्यतदपेक्षयानियत विभक्तिकत्वादनेनोपसर्जनत्वेन ह्रस्वत्वंपरिनिष्ठितविभक्त्यासमासेचेदमेवज्ञापकम् अयंपक्षस्तत्सु
रूपतुल्यार्थेतिसूत्रेभाष्ये प्रथमांतेनसमासइतिपक्षोप्यनेकमितिसूत्रेभाष्येइतिकेचित् परेतु अनेकमितिसूत्रेभाष्येसमासार्थविग्रहेप्रत्यासत्त्यासमासापेक्षयानियतवि
भक्तिकस्यानेनोपसर्जनत्वमुक्तंराज्ञःकुमारीराजकुमारीत्यत्रपरिनिष्ठितविभक्त्यापिसमासत्वान्नतदपेक्षयाकुमार्यानियतविभक्तिकत्वमितिनतस्याउपसर्जनत्वमित्यु
क्तं चित्रगुरित्यत्रचसोपदस्यानेनोपसर्जनत्वमंगीकृत्यानेकग्रहणंप्रत्याख्यातं बहूनांसमासस्तुतद्धितार्थेत्यनेनोत्तरपदेद्विगुविधानात् ज्ञापकात्सिद्धइतिचोक्तं ए
वंचोत्तरपदेनपरिमाणिनेत्यपिप्रत्याख्यातम् अतिप्रसंगस्त्वनभिधानान्नतदुक्तमनेकवचनमुपसर्जनार्थंनचैकविभक्तित्वादितिवार्तिककृतान्वर्थत्वानुक्तेस्त
द्वैत्याप्रयोजनंवार्तिकन्नैवेतितुतत्खंडनंभाष्यरीत्यात्वेतद्प्राप्तिरेवात्रेतिबोध्यं अन्यथाचित्रगुरित्यस्यविग्रहेद्वयोरपिनियतविभक्तिकतयाकिमपेक्ष्यंगोशब्दस्य
नियतविभक्तिकत्वंस्यात् एकस्यानियतविभक्तित्वेहितदपेक्षमन्यस्यतत्त्वंवाच्यम् समासापेक्षंनियतविभक्तित्वमेवयुक्तमाश्रयितुमन्यथासभार्यइत्यत्रोपसर्जन

व्य·शे·
स·
३९

ह्रस्वानापत्तिः स्वशब्दस्याव्ययतया विभक्तिमात्राभावेन लुकानुत्पत्तेस्वान्वाख्यानेन वानियतविभक्तित्वाभावात्तदपेक्षनियतविभक्तित्वस्यसभार्यादित्यत्राभावेनोपसर्जन।
त्वानापत्तिः ममतु समासस्यानियतविभक्तित्वात्तदपेक्षतान्वमस्त्येवेति न दोष इत्याहुः गोस्त्रियोः अत्र स्त्रीशब्दः स्वर्यते तेन स्त्र्यधिकारोक्तचातुर्थिकप्रत्ययलाभः।
उपसर्जनस्येति गोस्त्रियोर्विशेषणम् प्रत्ययग्रहणपरिभाषया च स्त्रीशब्देन तदंतग्रहणं ताभ्यां च प्रातिपदिकविशेषणात्तदन्तविधिरित्याहोपसर्जनं यद् इत्यादि गोस्तु
लेराजकुमारीपुत्र इत्यादौ तु न दोषः महासंज्ञाकरणोन्वयेन शब्देन समासविधौ यत्प्रथमानिर्दिष्टं तस्य तत्संबन्धिन एव ग्रहणात् अ तस्याः प्रधानत्वेनोपसर्जनत्वात् प्रत्यासत्त्या तदंतसमा
सप्रातिपदिकान्त्यस्यैव ह्रस्व इत्यदोष इति भाष्ये स्पष्टं तत्र ह्येवं भाष्यम् अप्रधानमुपसर्जनमिति संबंधिशब्दावेतौ तत्र संबंधादेतद्गंतव्यं यं प्रति यदप्रधानं तत्स्थ
वेत्सोनोभवतीति यत्प्रथमानिर्दिष्टं तस्य तद्घटितसमाससमुदायस्य सोऽप्रधानशब्दो नो भवतीति तदर्थः यद्यपि कुक्कुटमयूर्याविति द्वन्द्वबहुव्रीहाविव एकवि
भक्तौ तूपसर्जनत्वम् द्वंद्वः प्रथमांतानामेवेति चार्थे द्वन्द्व इत्यत्र वक्ष्यते एकविभक्तौ न्युपसर्जनसंज्ञाऽप्रधानार्थकस्यैवेति मतेऽपि उद्भूतावयवभेदसाहित्यं प्रति
मयूरीपदार्थस्य तत्त्वमस्ति सर्वत्र द्वंद्वे साहित्यमेवविशेष्यमिति चार्थसूत्रे भाष्ये स्पष्टम् तथापि भाष्ये द्वंद्वेनेति वचनारम्भान्न दोषः अत एव कुमारीमिच्छन् ब्राह्मणः।
कुमारीत्यत्र ह्रस्वो न प्रथमानिर्दिष्टमित्यादेः शास्त्रीयस्यैवात्रोपसर्जनस्य ग्रहणात् अत एव गोवष्कयणीत्यादौ वष्कयणीशब्दस्य गुणशब्दत्वादप्रधानत्वेऽपि तदं
तस्य ह्रस्वो न एतच्चक्षिप्पा इति सूत्रे भाष्ये स्पष्टं अतिराजकुमारिरित्यादौ स्त्रीप्रत्यये तदादिनियमनिषेधात् राजकुमारीत्यस्य स्त्रीप्रत्ययांतत्वं न च तस्यासत्यर्थे प्रत्युप
सर्जनत्वेन कथं स्त्रीप्रत्ययांतत्वमुपसर्जनस्त्रीप्रत्यये तदादिनियमादिति वाच्यम् यस्य समुदायस्य स्त्रीप्रत्ययांतत्वमानेयं तदर्थं प्रति स्त्रीप्रत्ययस्यानुपसर्जनत्वमे
वेत्यदोषात् प्रत्यासत्त्या तादृशानुपसर्जनत्वस्यैव निषेधनिमित्तत्वात् अस्य चातिक्रान्तार्थं प्रत्युपसर्जनत्वेऽपि राजकुमारीत्येतदर्थं प्रत्यनुपसर्जनत्वमेवेति दिक्
नाव्ययीभावा अपञ्चम्या इत्यमर एव विशेषणं न लुगभावस्य
तु नाव्ययीभावे ह्रस्वात् अपदिशमिति यद्यपि नपुंसकह्रस्वेनापीदं सिध्यति तथापि चित्रगुरित्याद्यर्थमावश्यकेन गोस्त्रियोरित्यनेनापीदं सिध्यतीति तदुपन्यासः। राम·
दिशशब्दस्य शरदादिषु पाठेऽपि लिंगविशिष्टपरिभाषयात्र न टच् समासांतप्रकरणे लिंगविशिष्टपरिभाषाभावस्यास्य सूत्रे भाष्ये उक्तत्वात् टावंतदिशाशब्दोऽकाः। २

रांतप्रकृतिकस्येतिमतेत्वः प्राप्तेस्याभावः अमरस्यास्यात्तदिशशब्देनविग्रहेतुनत्रस्वः प्रयोजनंइत्यादाविति आदिनैकविंशतिभारद्वाजंसप्तगंगमित्यादिसंग्र
हः विभक्तीत्यादेरितिविभक्तिशब्देनतदर्थोलक्ष्यतेवचनशब्दःकर्मसाधनः प्रत्येकंसंबध्यते विभक्त्याद्यर्थश्चश्रुतत्वादव्ययस्यैवविशेषणानिनदाह विभक्त्यर्था
दिष्विति अत्रसुबंतेनेत्यस्यसमर्थेनेतिविशेषणम् अतएवतदुत्तरविभक्त्यर्थांतर्भावेणैकार्थीभावः द्वितीयाश्रितेत्यादौसमर्थेनसुबंतेनेत्यस्यसमर्थप्रकृतिक
सुबंतेनेत्यर्थः अतएवकष्टंश्रितस्येतिपरिनिष्ठितविभक्त्यासमासेप्युत्तरपदीयविभक्त्यर्थांतर्भावेणनसः अतएवकष्टश्रितस्यधनमित्यादौषष्ठी द्वितीयां
तंसमर्थमित्यर्थात्तदर्थांतर्भावेणैकार्थीभावात्तुकार्यत्वान्नद्वितीयेत्याहुः हरिङ्गीति फलाविशेषेप्यंतरंगानपीतिन्यायप्रभृतिमुपेत्येदं — द्वयोः समाना
र्थत्वबध्वनापक्वस्तुतरमेवात्राधिशब्दप्रयोगः वचनेति प्रत्यासत्त्यायद्विभक्त्यर्थवाचकाव्ययेनसुबंतस्यसमासस्तद्विभक्त्यैवयत्सुबंतंतस्यग्रहणादितिभावः।
तिङ् ङन्तछिन्नसमासेरितिभाष्यसंमतःपरिगणनाच्च तेनाभिहितेसप्तमीत्यपिबोध्यम् अतएवग्रहस्योपरिइत्यादौनसमासः उपरीत्यस्याधिकरणशक्तिप्रधान
त्वेपियेनसुबंतेनसमासस्तद्घटकविभक्त्यर्थावाचकत्वात् अधिहरिभक्तिरित्यत्रहर्यधिकरणिकाभक्तिरितिबोधः नचप्रतेस्त्रसःसप्तमीस्यादितिसूत्रेसंमतसप्तम्य
र्थमात्रवृत्तिप्रतिरूपाव्ययेचरितार्थस्यास्याधेःशौण्डादिपठितत्वेनपरत्वात्सप्तमीशौण्डैरित्यनेनबाधःस्यादितिवाच्यं आधेयप्रधानस्यैवाधेस्तत्रपाठात् विधाना
सामर्थ्यादिति एतच्चरसिकानुसारेण वस्तुतोमध्यार्थकसमयाशब्दयोगेद्वितीयाविधानस्यदूरार्थकाराच्छब्दयोगेपंचमीविधानस्यचारितार्थ्यादिदमयुक्तम् स
मयानिकषाऽऽरांच्छब्दा अधिकरणशक्तिप्रधानाइतिसमीपमात्रवाचित्वाभावान्नैतैःसमासःसमीपेइतिहितेषामर्थः अतएवभक्ष्यन्यायेनविभक्त्यर्थसमीपादि
मात्रवृत्त्यव्ययस्यैवतेनसमासात् उपशब्दस्तुतन्मात्रवाची कृष्णसामीप्यवंतइतिबोधादितिबोध्यंसुमद्रंइति वचनग्रहणात्समृद्ध्यादिवाचकत्वेऽव्ययीभावः
सुमद्राइत्यादौतुसुशब्दोद्योतकः समृद्धामद्राइतिबोधादितिनायम् निपातानांवाचकत्वंद्योतकत्वंचेत्यत्रैवभाष्येस्पष्टम् उपदशाइत्यादावुपस्यसमीपवर्त्ति
पदार्थबोधकत्वेनसमीपमात्रबोधकत्वाभावान्नाव्ययीभावः विगतेतिऋद्धेरभावइतियावत् अर्थाभावशब्देनसमस्यमानपदार्थाभावस्यैवग्रहणादत्र तेन
नसिद्धिःलद्धूनयन्नाहमस्मिकाणामभावइत्यादिना अर्थाभावशब्देनउत्तरपदार्थाभावस्यैवग्रहणंव्याख्यानात् नञातुनायंसमासः अर्थाभावशब्देनञउपा।

ल॰ शे॰ दानेनसूत्रगृहीताव्ययेनैतत्समासप्राप्तेः तच्चनञ्सूत्रे उपपादयिष्यते नञाभावेऽप्येवसिद्धेरर्थग्रहणं व्यर्थम् प्रतियोगिभूतवहिर्विद्यमानार्थसमानाधिकरणाभाववाचकेनैव
सं॰ समासो यथा स्यादित्येतदर्थं तत्त्वात्तेनाभावार्थे निराशःशशशृङ्गादिशब्दानामयं नञ्प्र[illegible]वार्थेनञ्सूत्र अत एवात्ययग्रहणं चरितार्थं नन्दूदाहरणं निर्हिमं निःशीतमिति ह्य
३२ त्युक्तमेव युक्तम् अतिक्रान्तदर्शनत्वाभावात् अतिहिममित्युक्ते तदतिशयस्यैव प्रतीतेः अत्ययशब्देनेतेः सूत्रगृहीताव्ययत्वाच्चेति दिक् संप्रति न युज्यत इति वृत्तौ युजिक्रि
यांतर्भावेणैकार्थीभावः आतिनिद्रमासीदित्यादौ तथा व्यवहारविषयेऽतिनिद्रशब्दस्य लक्षणेति बोध्यम् शब्दप्रादुर्भावेऽन्यस्य शब्दविषयप्रकाशार्थेनाव्ययेन सम
स इत्यर्थः भाष्यप्रयोगेति अचः परस्मिन्निति सूत्रे यं प्रयोगः एतद्भाष्यप्रयोगादेतत्सूत्रेण तदर्थबोधकपदघटकतया गृहीताव्ययेन तत्तदर्थके न नायं समासः अ
न एव यथासादृश्य इति सूत्रे सादृश्यसंपत्तीति प्राप्तेतीति भाष्ये उक्तम् यथाशब्देन तु भवत्येवोत्तरसूत्रारंभादिति भावः ननु नित्यसमासत्वाद्धाकादुत्त्वे भ्रमतत्राह प्रतिशब्दस्य
नि इत्थं भाष्यामनुरोधेन वस्तुतः प्रतिस्थानमित्यादौ षत्वाभावसंपादनेन साचरितार्था तस्मादर्थमर्थं प्रतिप्रत्यर्थमिति सरूपसूत्रादिस्थभाष्यप्रयोगात्यदा द्विर्वचनं न
दा प्रतिशब्दस्य वीप्सावृत्तित्वाभावात्समासप्राप्त्या वाक्यं साध्विति तत्त्वम् कृतोद्विर्वचनं तु न समासेन वीप्साया द्योतितत्वात् इति हयवरट्सूत्रे कैयटः प्रतिनात
स्या उक्तत्वादिति तत्त्वम् शक्तिमनतिक्रम्येति परावरयोगे चेति कापरावरत्वं च बोध्यम् हरेः सादृश्यमिति हरिसादृश्यं लौकिकं वक्ष्यमाणेनेति अत्रसूत्रा।
लेखो वैविध्यार्थः यथासूत्रे पूर्वत्र क्तस्य पूर्वत्रापकर्षणे वैविध्यायातहत अनुज्येष्ठं कार्यं क्रतमनुज्येष्ठं प्रपमतीत्यादौ करणत्वेनान्वयात्परिनिष्ठितविभ
त्यासमासमभिप्रेत्याह ज्येष्ठस्यानुपूर्व्येणेति आनुपूर्व्यं क्रमः पूर्वक्रमेणेत्यनुपूर्वमिति सूत्रगृहीताव्ययेनाप्यनुनासमासः एतस्मात्सूत्रप्रयोगात् युगपच्चक्र
न्देन तु न समासः सूत्रगृहीतत्वात् उभयत्रापि स्वार्थे ष्यन्नतद्धनयन्नाह चक्रेणयुगपदिति गुणभूते इति व्याख्यानात्सादृश्य इति स्वार्थे ष्यञिति भावः सं
पत्तिसमृद्धोः पर्यायत्वमाशंक्याह ऋद्धेरिति धनधान्यादेरित्यर्थः अनुरूपो योग्य आत्मनः समस्यमानोत्तरपदस्य भावः प्रवृत्तिनिमित्तं क्षत्रत्वादिः संपत्तिरि
त्यर्थः सक्षत्रमित्यस्य क्षत्रियाणां योग्यं क्षात्रमित्यर्थः तृणमपि इति साकल्यबोधकाव्ययेन समासः समासस्यानित्यत्वादस्वपदविग्रहो दर्शितः तृणठासहे एम॰
त्यलौकिकम् अपरित्यज्येति [illegible]सयोगे चेति क्तयोगश्चबोद्धः नन्वत्रेति तृणेन सह भुंक्ते इति बोधोत्तरं यत्तृणानि भक्षयेत्स कथमन्यत्परित्यजेदिति प्रती ४

तेः सकलं भोज्यमनीत्यत्रैव तात्पर्यादिति भावः अग्नि ग्रंथपर्यंतमिति बहुव्रीहौ द्वितीयांतं ग्रन्थान्यपदार्थः अधीत इत्यस्य तु न समासेतर्भावो मानाभावात् अ
न्यत्वं साहित्यं व सहार्थः अन्यत्याग्निग्रंथसहितमिति बोधः अग्निरास्य हेत्यलौकिकं नच तदधीत इत्यण प्रसंगो वैकल्पिकत्वात् यथाऽसा. असादृश्य
इति हे दत्तत्रैव वर्तमान इत्यर्थः तथाहर इति तथाशब्दस्य सादृश्यार्थकत्वेपि न समासः सदृश इत्युक्ते नियमेन प्रतियोग्याकांक्षादर्शनात् सादृश्यप्रतियोगि वा
चकेनैव तद्बोधकाव्ययस्य समासात् द्योतयतीति सामान्यस्य भेदको यो विशेषस्तद्रूपे प्रकारे थालिति यद्विशेषवान् हरिस्तद्विशेषवद्भिन्नो हर इति बोधे यत्तच्छ
ब्दाभ्यां तयोरेकत्वावगमेऽर्थादुपमानत्वप्रतीतेरिति भावः सूत्रेपि सादृश्यशब्देनोपमानत्वमेव थाल् सूत्रे सादृश्यस्य प्रकारशब्देन ग्रहणे यत्सादृश्यवान् ह
रिस्तत्सादृश्यवान् हर इत्येव बोधः स्यात् न तु हरिसदृशो हर इति भाष्यानुसारिणस्तु यथासादृश्य इत्यस्य यथाशब्दः सुबंतेन समस्यते सादृश्ये द्योत्ये नेत्यर्थः यथाश
क्ति यथाबलमित्याद्युदाहरणम् अत एव भाष्ये असादृश्य इति किमर्थं यथा देवदत्तस्तथा यज्ञदत्त इत्युक्तं न तु सूत्रमेव किमर्थमित्युक्तं यथार्थत्वेन तु सिद्धिः सूत्रगृ
हीताव्ययेन तेनास्समासात् अत्र चेदमपि ज्ञापकं न च प्रकारवचनतया तानिष्पन्नस्य यथाशब्दस्य सर्वथा सादृश्यद्योतकत्वेन सूत्रे दाहरणासंभव इति सूत्रव्य
र्थमिति वाच्यम् अत्र सूत्रे अव्युत्पन्नस्य वीप्सायोग्यतापदार्थानतिवृत्तिबोधकस्यैव ग्रहणे नादोषात् यथाशक्ति इत्युदाहरणे तदर्थक एव सः यद्यपि यथा
शब्द उपमानत्वं द्योतयतीति सकलाभियुक्तोक्तेर्यद्विशेषवानित्यादिप्रागुक्तबोधोत्तरमुपमानदेवदत्ताभिन्न उपमेयो यज्ञदत्त इति बोधः गृहीतविशेषधर्मए
व च साधारणधर्मः लक्षणामूलव्यंजनाजन्यबोधस्थले द्वयोर्भयोः शाब्दत्वं तु वच्यम् अत एवोपमानोपमेययोः समानविभक्तिकत्वसिद्धिः एवं च पूर्वपदार्थ
प्राधान्याभावेन नात्राव्ययीभावप्रसक्तिस्तथापि प्रसिद्धत्वात्प्रकारवचनस्यैवात्र ग्रहणे न तत्सामर्थ्याद्धि मुनीत्यादाविव तदभावेपि समासः स्यादतोऽसादृश्य इ
ति सूत्रे कृतं तत्रक्रतेतु तद्भिन्नस्याव्युत्पन्नस्यैवात्र सूत्रे ग्रहणं न च यथाबलमित्याद्युदाहरणे प्रकारवाचियथालंतस्यैव ग्रहणमस्तु सादृश्यसंपत्तीत्यनेन च
समासोस्तु इदं सूत्रं च मास्तु पूर्वसूत्रे यथाग्रहणं च मास्त्विति वाच्यम् एतत्सूत्रारंभसामर्थ्येन तत्र तदप्रयोगात् तत्रार्थे साधोरन्यत्रार्थेऽसाधुत्वापत्तेश्च इद
मेव सूत्रमव्युत्पन्नस्य तदर्थकस्य यथाशब्दस्य सत्वे मानं तथा च भाष्यं असादृश्य इत्युच्यते तत्रेदं न सिध्यति यथाशक्ति यथाबलं प्रकारे यस्थालेतदं त

स॰शे॰ स॰ ३२ स्यसादृश्यएववृत्तेरित्याशंक्यवीप्सादिवाचिनोऽत्रसूत्रेयथावत्समित्युदाहरणेऽचग्रहणमित्यर्थेकोन्वनंतरमययः प्रकारवचनेथाल्तदेतस्यग्रहणंकस्मान्नभवति पूर्वे
णप्राप्नोतिसादृश्यसंपन्नोतिपूर्वपक्षिणोऽक्रप्रतिषेधवचनसामर्थ्यान्नभविष्यतीति उत्तरितम् नानेनभाष्येणप्रकृतसूत्रेप्रकारवचनथाल्तस्यग्रहणाशंक्यतइतिवक्तुंयुक्तं
असादृश्यइत्यस्यसूत्रेश्रवणात् यद्यपितद्धितस्मरणेनायंपूर्वपक्षइत्यपिवक्तुंशक्यं तथापिपूर्वेणप्राप्नोतीत्यादेरसंगतिः तस्मादुदाहरणेऽथाल्तस्यग्रहणंतत्रसाद।
श्यार्थेकेनसमासंकृत्वान्यत्रार्थेप्रयोगबाधकाभावइत्यभिमानेनार्थघटितंसाधुत्वमित्यजानतोऽव्युत्पन्नस्यत्वेमानंचापश्यतःशंकेयमितियुक्तंप्रतिषेधवचनसा
मर्थ्यादित्यस्य प्रतिषेधयुक्तेनतद्वचनसामर्थ्यादित्यर्थः एवंचाव्युत्पन्नतत्त्वेऽर्थघटितंसाधुत्वमित्यत्रचेतदेवमानमितिभावः यत्तुप्रतिषेधइतिप्रतीकमु
पादाययथार्थेयदव्ययंतेनसमस्यतइतिपूर्वेणसिद्धेसमासेसादृश्यप्रतिषेधार्थत्वादस्यारम्भस्येतिकैयटस्तन्नसूत्रगृहीताव्ययेनतेनसूत्रेणासमासात् नियमत्वा
पेक्षायेतदर्थज्ञापकत्वस्यैवोचितत्वात् नन्नसूत्रेयथार्थशब्देनसादृश्याग्रहणाच्च अतएवतत्रसूत्रेसादृश्यग्रहणंचरितार्थं अतएवभगवतासादृश्यसंपत्ती
तिप्राप्नोतीत्युक्तं नचसादृश्यग्रहणंगुणीभूतसादृश्यग्रहणार्थं लक्ष्यानुरोधेनप्रधानन्यायाप्रवृत्त्याभयत्रापितेनसिद्धेः यथायोग्यतायायथार्थत्वेपिरूपस्य
योग्यमनुरूपमित्यादेस्तदर्थकेनापिसमासस्तद्वत् पूर्वसूत्रेयथार्थग्रहणंतदर्थकान्याव्ययग्रहणार्थं एवंचयथाशक्तीतिएतदुदाहरणमेवेतिभाष्यस्पष्टं
वीप्सादावपिपथाशब्देनसामासोभवत्येव यदव्युत्पन्नेवीप्सावाचितस्येदंग्रहणमितिभाष्यात् एवंचस्पष्टमेवोपक्रमोपसंहाराभ्यामस्यसूत्रस्यविधित्वंभाष्य
लभ्यते अत्रसूत्रेयथाशब्देनयथार्थस्यनग्रहणंमानाभावात् पूर्वसूत्रेतुवचनग्रहणात्तथाविभक्तिशब्देनेवेत्याहुः यावदव संख्यादिनेयत्तापरिच्छेदो॥
वधारणम् तद्बोधकंयावदित्यव्ययंसमस्यतेइत्यर्थः अवधारणेकिम् यावद्दत्तंतावद्भुक्तंकियद्भुक्तमितिनावधारयामीत्यर्थः सुप्प्रतिना॰ मात्राशब्दोऽस्य
पर्यायः पुनःसुप्ग्रहणमव्ययनिवृत्त्यर्थम् अन्यथादोषामन्यमहरित्यादेदोषादीनांवृत्तिविषयेसत्वप्रधानतादर्शनात्तादृशाव्ययेनैवसमासःस्यात् अक्षप्र
तिइति लक्षणेप्रतिः कर्मप्रवचनीयत्वंतुप्रतेर्गतिर्गतावितिनिघाताभावायेत्याहुः अक्षशला॰ समस्यंतइतिशेषःपराजयएवेति पंचिकानामद्यूतंपंचभिः। राम॰
कपर्दैर्भवतितत्रयदिसर्वेउत्ताना अवांचोवापतंतितदापातयिताजयत्यन्यथाजीयतेविपरीतवर्तनेकार्तत्वेनाक्षादेस्तृतीया ज्ञोपरेस्तदर्थः अक्षकृतंपरी ५

त्वलौकिकम् नित्यसमासत्वादस्वपदविग्रहः वैपरीत्यंचजयापेक्षयेतिभावः अक्षेणेति अक्षाभ्यांविपरीतंवृत्तमित्याद्यर्थेनसमासोऽनभिधानात् अक्षत्वेनैकाक्षबोधएवा
स्यसाधुत्वं ननुतेनरूपेणानेकाक्षबोधे एकत्वादिनाबोधस्तुवृत्तौनास्त्येवेतिभाष्यस्पष्टं विभाषा यद्यपिएकार्थीभावेसमासस्यव्यपेक्षायांवाक्यस्यचसिद्धेरिदंव्यर्थं एका
र्थीभावएवसमासः आदिविकल्पस्तुनेष्यतेएवंसमासनिषेधस्तत्राणिनित्यंक्रीडेत्यत्रनित्यग्रहणंचव्यर्थंनिषेधविषयेएकार्थीभावाभावेनसमासाप्राप्तेः नित्याधिकार
विषयेस्याभावेनवाक्याप्राप्तेश्च तथापिलक्षणेकचक्षुष्कान्नं दात्मातिकेकार्थीभावोनित्यः कपाक्षिकः क्वनास्त्येवेत्यर्थबोधनार्थंसर्वमावश्यकंध्वनितं चेदंसमर्थो
नामितिसूत्रेभाष्ये लक्ष्येकचक्षुष्कंप्रतिसमर्थइतिसूत्रेभाष्येतत्प्रत्याख्यातम् एवंचविशेषणीभूतैकार्थीभावस्यविकल्पादिबोधकानीमानि अतएवपारेमध्ये इ
ति सूत्रेभाष्येएकयावृत्तिर्विभाषापरयावृत्तिविषयेऽनित्योपवाद इत्युक्तम् तत्रवृत्तिरेकार्थीभावः एतत्सामर्थ्यादिति अत्रैतत्करणात्प्राक्तदसंबंधेनतद्विषयेए
कार्थीभावस्यनित्यत्वमितिभावः नन्वेवंसुप्सुपेत्यस्यानित्यतापत्तिः एवंचभाष्येसुप्सुपेत्युदाहरणभूतेविस्पष्टपटुरित्यत्रविस्पष्टंपटुरितिविग्रहप्रदर्शनात्संग
तिरतआह सुप्सुपेतिन्विति एतत्समासानुवादेनैवाव्ययीभावादिसंज्ञाविधानेनसिद्धेपुनस्तैः समाससंज्ञाविधानंतदनित्यत्वज्ञापकम् उपपदमतिङ् कर्तृक
रणेकृताऽऽरम्भात मारव्यानेनेत्यादावुद्देश्याप्रसिद्ध्या अनेकमन्यपदार्थे इत्यादौ त्यादिपदघटितसमासरूपोद्देश्याप्रसिध्यातेषुसमाससंज्ञाविधानस्याव
श्यकत्वेनार्थाधिकारानुरोधात्सर्वत्रतस्यविधेयसमर्पकत्वं प्रथमानिर्दिष्टमितिसूत्रेसमासइत्यस्यसमासत्वव्याप्यसंज्ञाविधायकेलक्षणयाऽव्ययादीनामुपस
र्जनत्वंसाधयितुंशक्यमितिनतदर्थंसमाससंज्ञाविधानंचरितार्थमितिभावः विग्रहप्रदर्शनपरोक्तभाष्यादपितस्यानित्यत्वंबोध्यम् लक्षणेनाभि अभिप्रती आभि
मुख्यस्याग्नेर्ज्ञापकत्वसंबंधेनान्वयस्यचद्योतकौ अग्निज्ञाप्यशलभकर्तृकंपतनमितिबोधः उदाहरणेतथाबोधेवाभ्यभिमुखत्वंशलभपतनस्यलोकप्रसिद्ध्याम
नसागृह्यतेइत्याभिमुख्यद्योतकताभिशब्दस्य अग्निज्ञाप्यशलभकर्तृकंप्रत्यासत्त्याभ्यभिमुखंपतनमितिबोधइत्यन्ये कर्मप्रवचनीयद्योत्यसंबंधेनान्वयाद्या
केद्वितीयांतदाह अग्निमभीति लक्षणेनेतिकिम् स्रुघ्नंप्रतिगतः स्रुघ्नादागतस्तमेवप्रतिनिवृत्तइत्यर्थः आभिमुख्येकिम् वृक्षंप्रतिविद्योततेइत्यादाबाभि
मुख्यद्योतनाभावेसमासोमाभूदिति अस्यसमासस्यवैकल्पिकत्वेनपक्षेकर्मप्रवचनीयत्वंचरितार्थम् अभिप्रतीइतिकिम् अग्नेःसंमुखंशलभाःपतन्तीत्य

ल॰ श॰ र्थेसं मुख्यार्थकसंशब्देन लक्षणत्वसंबंधेनान्वये समासो मा भूदिति अनुये लक्षणेनेति वर्त्तते समयेत्यधिकरणशक्तिप्रधानम् यदिति सामान्ये नपुंसकम् द्विती-
स॰ यांतम् यं पदार्थं समयेत्यर्थे द्योतको ऽनुक्तेन लक्षणभूतेन तद्वाचकेन समस्यत इत्यर्थस्तदाह यमिति वनादर्लक्षणत्वं समीपद्वारा स्वसामीप्येन हि वनेनाशनिर्देशात्ज्ञा-
३४ प्यते लक्षणात्वं तु वस्तुसन्निमित्तं न तु तेन संबंधेनान्वयस्तदाह वनस्य समीपमिति यस्य दैर्घ्यमिति यद्दैर्घ्यं सहशदैर्घ्यमित्यर्थः अत्रापि लक्षणत्वं वस्तुस्वेव निमित्तम-
नद्द मयन्नाह गंगाया अन्विति तत्वोत्यसंबंधेनान्वयाभावान्न द्वितीया उपलक्षितेति विशिष्टेत्यर्थः दैर्घ्यविशिष्टत्वमनोरर्थः तथावोधे च गंगाया ज्ञापकत्वस्य गंगा-
समीपे गत इति बोधे गंगाया ज्ञापकत्वस्य च नियमेन मनसावोधादन्यलभ्यत्वेन नात्र तदनोद्योत्यमिति तात्पर्य्यम् तेन संबंधेनान्वये तु वनमनु गंगामन्विति द्वितीयैवेति
बोध्यम् निविश्य गंगामनु तां महानदीं चमूमिति रामायणे प्रयोगात् वाराणस्याः स्वरूपेण ज्ञातत्वेप्यायाम वैशिष्ट्येन ज्ञाप्यत्वं बोध्यम् तिष्ठद्गुप्र[illegible]वेनैषां[illegible] प्रवेशे-
न आतिष्ठद्गु जपेत्संध्यां पश्चिमामायतीगवादिति भट्टि श्लोके आतिष्ठद्गु आ आयतीगवादिति भिन्ने पदे इह उक्तोदाहरणद्वये तत्राद्यशत्रा ऽऽदेशमात्रम् प्रथ-
मा सामानाधिकरण्यात्तदप्राप्तिः यद्यपि पञ्चनद्यत्पुरुष इतिवन्निध्यति तथाप्युपयानान्तरमिदम् समासान्तश्चेति इदमन्ये चेनान्यपदार्थे ऽव्ययीभावइति बोध्यम् पक्षे
षष्ठीति अयंभावः महाविभाषैकार्थीभावस्य विकल्पबोधिका वृत्तिश्चैकार्थीभावेन नित्यैवेति येन नाप्राप्तिन्यायेनाव्ययीभावस्तत्पुरुषं वाधेत यथैकदेशिसमासः
षष्ठीतत्पुरुषमिति पक्षे तत्राभाय पुनर्वाग्रहणमिति संख्येत्यादित्रिसूत्रीस्वभावात्समानाधिकरणविषयावंशा इति एकस्वभावः संतानप्रबंधो वंशः द्वौ मुनी ॥
पाणिनिकात्यायनौ त्रिमुनि भाष्यकृत्तौ च स्वपदार्थप्राधान्य एवायं समासः नन्वेवं त्रिमुनिव्याकरणमिति सामानाधिकरण्यानुपपत्तिरत आह विद्येति अन्ये तु व-
हुव्रीहौ त्रिमुनिव्याकरणम् अव्ययीभावे व्याकरणस्येति स्वरभेदश्चेष्ट एवेत्याहुः परे तु विद्यावंशो नाम गुरुशिष्यपरंपरा न चैतस्य मुनित्रयस्य तत्वेमानमस्ति त्रिमुनिव्या-
करणस्येति पदे ऽव्ययीभावेदं तिष्ठद्गुप्रभृतिषु पाठात्साध्यमित्याहुः मूलं तु कल्प्यनुसारेण किंच नहि त्रिपुत्रो द्विपुत्र व्यपदेशं लभत इति न्यायेन नहि मुनीति व्यवहारा-
संमतिर्बोध्या जन्मनोदाहरति एकविंशतीति एकविंशतिभरद्वाजा वंश्या इति विग्रहः क्वचित्तु तीयासप्रम्यो रिति सूत्रस्य भाष्यप्रयोगात्तत्प्रामाण्ये मोपकादिष्व- एम॰
नयोः पाठात् यत्रत्रोश्चेति लुगभावो बोध्यः नदीभिश्च अत्र च बहुवचननिर्देशात्न संज्ञाया ग्रहणं नापि शब्दस्वरूपस्य शब्दसंज्ञात्वाच्च किंतु नदीत्यर्थग्रहणं ६

तेन तद्वाचके सर्वत्र प्रवृत्तिः एतच्च संख्यासंज्ञासूत्रे भाष्ये स्पष्टम् समाहारस्त्वेति तत्रैवेत्यर्थः एवं च तदविवक्षायां पूर्वकालैकेति समासे एकनदीतरः सिद्धोऽन्यथासंज्ञाना।
धिकरणतत्पुरुषं बाधित्वाव्ययीभावेन नपुंसकह्रस्वापत्तिः अच्प्रत्यन्ववेति योगविभागसिद्धोऽभियुक्तोक्तो गोदावर्यश्चनद्याश्च संख्याया उत्तरे पदीत्यत्र तु न योगवि
भागस्येष्टसिद्ध्यर्थत्वात् अव्यक्तता तदनुक्तेश्चेति भावः अन्यपदार्थसंख्येति निवृत्तं नदीग्रहणमनुवर्त्तेते संज्ञानवगमादिति संज्ञेति कर्मण्यड् तेन संज्ञिनोर्देशाविशेष
स्यानवगमादित्यर्थः नित्यसमास इति तत्सदृश इत्यर्थः तत्सादृश्यं च समाससमानार्थकवाक्याभावेन समासघटकपदानां विग्रहस्त्वस्येव महाविभाषाया अ
संबंधे मानाभावात् अत एव द्वितीयतृतीयेति सूत्रेऽन्यतरस्यांग्रहणेनोत्सर्गापवादयोर्महाविभाषाविषयत्वेऽपवादाभावे उत्सर्गप्रवृत्तिरित्यर्थे ज्ञापिते उन्मत्तगं
गमित्युदाहृतं अव्ययीभावेन मुक्ते बहुव्रीहिर्नेति चोक्तं भाष्ये अस्य नित्यत्वे तेन मुक्त इत्यसंगतिः स्पष्टैव एवमन्यत्रापि बोध्यम् समासान्ताः अत्र समासपा
दे तत्संबंध्यलौकिकविग्रहवाक्यपरमेवमव्ययीभावादिपदान्यपि तत्पराणि अत एव बहुकुमारीक इत्यादौ ह्रस्वो नगोस्त्रियोरित्यत्र भाष्ये स्पष्टमेतत् अंत इति
सूत्रे भाष्ये च एवं चालौकिकविग्रहवाक्ये समाससंज्ञासमकालमेव समासान्ता इति सिद्धान्तः न च पूर्वं समासान्ते तत्तन्नियोगनिष्ठाद्युदात्तस्य तदेकवाक्यतापन्ने
पूर्वस्य निघाते च कृते पूर्वपदस्योदात्तस्वरितयोगित्वाभावेन पूर्वपदप्रकृतिस्वराप्रवृत्तौऽचश्चित्त्वं व्यर्थमिति वाच्यम् तत्सामर्थ्येन समासान्तविधावाद्युदात्त
स्यैतस्यासंबंधज्ञापनात् तेन समृद्धापूर्यस्य समृद्धपुरो राजेत्यादौ पूर्वपदप्रकृतिस्वरसिद्धिः द्वित्रिभ्यामिति सूत्रस्थं समासे कृते समासान्ता इत्येतत्परं भाष्य
मेकदेश्युक्तिः तत्त्वे भाष्यद्वयविरोधादित्यन्यत्र प्रपंचितम् अन्तशब्दश्चरमावयववाची स च समुदायावयवः अत एवोपशरदमित्यत्र नाव्ययीभावादित्य
म् अव्ययानामिति टिलोपाभावश्च सिद्धः पूर्वभागस्याव्ययीभावत्वाभावेनानव्ययत्वात् यत्तु कैयटेन गोस्त्रियोरिति सूत्रे समासपदस्य समासार्थविग्रहवा
क्यस्योत्तरपदलक्षणयोत्तरपदावयवत्वमुक्तं तथा सरूपसूत्रे उक्तं उत्तरपदावयवत्वमित्यपि भाष्यकारस्य मतमिति तन्न फलाभावात् द्विपुरीत्यादौ स्त्री।
त्वस्य लोकतः सिद्धेः लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति भाष्येण लिंगप्रकरणस्य नियमार्थत्वाभावबोधनात् अत एव परवल्लिंगमिति सूत्रे सत्वेपि द्वि
नावमर्द्धखारमित्यादौ नपुंसकत्वसिद्धिः पंचराजमित्यादावपि तत्प्रवृत्त्यापत्ता वकारांतोत्तरपदेत्यत्रोत्तरपदग्रहणस्य व्यर्थत्वापत्तिश्च अंत इत्यादिसू

ला शे· त्रस्यभाष्यविरोद्ध चोत्तरपदावयवत्वम् एवं हि तत्र भाष्यम् समासस्यांतोदात्तत्वमुत्तरपदस्यैवेति विकल्पे आद्ये इदम् प्रथमका इत्यादौ कपो नोदात्तत्वापत्तिमुक्त्वा अंत्येकाच्

म· वइत्यत्रांतोदात्तत्वसिद्धिरित्युक्त्वा उभयोरपि प्रकरणेन लक्ष्यानुसाराच्च क्वचिदुत्तरपदांतस्य क्वचित्समासांतस्योदात्तत्वमिति सरूपसूत्रस्थभाष्यं तदनाश्रयणेपि योजा

३५ यितुं शक्यम् तथाहि कृत द्वंद्वानां विभक्तौ परत एकशेष इति पक्षे कृकच कृकच कृचौ असारूप्यादेकशेषो न प्राप्नोतीति भाष्ये समासांतानां समासावयवत्वेपि तत्प्रा

ग्भागस्य विभक्तिः परत्वाभावस्तद्विशिष्टस्य न सरूपत्व मिति तद्भावः न च तस्यानर्थक्येन तदनुक्त्या भाष्यस्य न्यूनता द्वंद्वावयवानामर्थवतामेवैकशेष इत्यर्थे प्र

मानाभावात् विशिष्टरूपोपादानाभावेन तत्परिभाषायाइहाप्रवृत्तेः भाष्यांतरं तु तादृशं नोपलभ्यत एवेति दिक् स च समासांतो वहुजसगोमत् जस्मित्यवस्थायाम

लौकिके वाक्ये सुपः परस्तादेव ततः पूर्वत्वे तु वाच्यार्थविरोधः न हि सुबहितं समासार्थं किंतु तद्विशिष्टमेव न च विशिष्टस्य सुवंतत्वाभावेन सुवन्तात्तद्धितश्रुतिसि

द्धान्तविरोधः तेषामर्थाभावेन परिपूर्णपदमिति तन्मूलभूतन्यायस्यात्र विषयाभावात् अत एव पुंयोगादिति सूत्रे स्वार्थिकानां सुवुत्पत्तेः पूर्वमेवा[?]भाष्ये उक्ता

किंच समासांतप्रकरणेड्याप्प्रातिपदिकादित्यस्याप्यसंवंधः तस्यावस्थायां वाक्यस्याप्रातिपदिकत्वात् तत्र कवुत्पत्तिकाल एव तत्पूर्वभागस्य समाससंज्ञाविरोधाभा

वात् समासांतस्य च तद्वाक्यावयवत्वेन तद्ग्रहणेन ग्रहणात् वहुकुमारीक इत्यादावुपसर्जनस्त्रीप्रत्ययांतप्रातिपदिकाभावान्न ह्रस्वः कप् ह्रस्वादन्तरंगतरः नादृष्ट्वा

त्वाच्च न्यायम् येषां पदानां समासो न तावत्तेषामन्यद्भवति कपं तावत्प्रतीक्षत इति भाष्येण स्पष्टम् तथाभिधानात् तत्राद्यस्य तावदित्यस्य कपः प्रथममित्यर्थः अन्य

समाससंज्ञारूपं कपा सह स्वभवनाय कपं पश्यतीत्यर्थः पूर्वस्य प्रवृत्तौ हि तदर्थकवाक्याभावेन कप् पश्चात्स्त्वे वैयर्थ्यमियाहितद्भवनकालप्रतीक्षा अन्यथा तदन

पेक्षत्वेन कप्प्रतीक्षोक्तिरसंगता स्यात् अत एव प्रत्ययस्थादिति सूत्रभाष्यादाहतेव वहुचर्मिकेत्यादावापः सुपः परत्वाभावादित्वसिद्धिरिति दिक् अथाव्ययीभावे

ऽसाधारण (समासान्तानाह अव्ययीभावे अव्ययीभावे उत्तरपदतया वर्तमानं यच्छरदादिप्रकृतिकसुवंतं तदंतात् टच् स च समासार्थविग्रहवाक्यस्यांतावयव

इत्यर्थः राजाह इत्यतष्टजनुवर्तते अनंतादव्ययीभावादित्यादि तु फलितार्थपरतया कथंचिन्नेयम् अत्र गणे ये झयंतास्तेषां झय इति विकल्पे प्राप्ते नित्यार्थः राम:

पाठ इति केचित् प्रत्यक्षमिति लक्षणेनाभीति समासः परोक्षमिति इन्द्रियाजन्यं ज्ञानविषयत्वं शेआद्यजंतः प्रयोगः नन्वत्राव्ययीभावाप्राप्तिरत आह संमा ७

ध्योरिति परस्योकारेति परशब्दस्य ओकारोन्तादेश इत्यर्थः एङ इति पूर्वरूपत्वं परस्योकारेति पाठे परस्याक्षिशब्दस्यादेरुकार इत्यर्थः आद्गुणः अर्शआद्यचीति धर्मे
पराद्दिति भावः अत्रगणसूत्रे परग्रहणं प्रक्षिप्तमिति परोक्षे लिडिति सूत्रस्थभाष्यकैयटस्वरसः तत्रहि समासांतोपि निपातनात्साधितः पूजार्थेमिति
वेतिवर्तते अतत्पूजार्थमपीत्यर्थः अन्यतरस्यांग्रहणस्यतुस्वरितत्वं नास्त्येव अतएव नदीपौर्णमासीतिसूत्रे नदीशब्देन विशेषाणामग्रहणे शरदादिषु विपाड्
शब्द पाठस्यज्ञापकत्वमुक्तं संख्यासंज्ञासूत्रे भाष्येन नदीत्यादेर्वैकल्पिकत्वे नित्यत्वाय पाठस्यावश्यकतया ज्ञापकत्वासंगतिस्पष्टैव तत्रज्ञ यन्तु पाठ
स्तु प्रपंचार्थस्तत्र नदीसंज्ञकस्य न ग्रहणं पौर्णमास्यादिग्रहणात् नचाशब्दसंज्ञेति निषेधात्स्वरूपस्यापि ग्रहणं नस्यादिति वाच्यम् लक्ष्यानुसारेण सामर्थ्येन चत
स्यात्रत्यागात् अतएव तत्सूत्रं भाष्ये प्रत्याख्यातमिति प्रामाणिकाः ॥ ॐ ॥ इत्यव्ययीभावः ॥ ॐ ॥ चकारबलेनेति संख्यापूर्वो द्विगुरिति योगं विभज्य पूर्वेण सं ।
ख्यापूर्वस्य तद्धितार्थेत्यत्रोक्तस्य तत्पुरुषसंज्ञाविधानसामर्थ्याद्देव पर्याये सिद्धे चकारः समावेशार्थ इति भावः श्रितेति श्रितादीनां सुबंतत्वासंभवात् श्रितादि
प्रकृतिकैरित्यर्थलाभः येनविधिरिति सूत्रस्थभाष्यप्रामाण्येन संज्ञाविधौ स्त्रीलिंगप्रथमांतभिन्नेपि प्रवृत्तेरावश्यकत्वादिति भावः समर्थविशेषणत्वाच्छ्रितादी
नां प्राप्तोपि तदंतविधिः समासप्रत्ययविधाविति निषेधान्नभवति तदंतविधौ हि श्रिताद्यंत समर्थप्रकृतिकैरित्यर्थे कष्टं परमश्रित इत्यादावपि समासापत्तिः
कष्टंश्रित इति नलोकेति षष्ठीनिषेधः पतितशब्दे तनिपतिदरिद्रातिभ्यः सनो वेट्कत्वेन यस्य विभाषेतीण्निषेधप्राप्तावपि अतएव निर्देशादिट् बोध्यः अ
योग्यत्वादिति स्वपमित्यात्मनेत्यर्थे कंकत्वे शक्तिप्रधानमित्यर्थः स्वायं कृतिरिति असमासे कार्तिरितिस्यादिति भावः ऐकस्वर्यमपि समासफलम् ख
द्वा अस्यतस्मकृतिके लक्षणया द्वितीयेत्यनेन सामानाधिकरण्यम् जाल्म इति तेन केवलरूढत्वं तस्य सूचयति एतेन प्रकरणादिसहकृतवाक्येन निंदा
प्रतीतिसंभवान्नहि निंदा इत्ययुक्तमित्यपास्तम् योगरूढ तत्संभवेपि केवलरूढे तदभावात् नहि निंदेत्यस्य च विवक्षितानिंदेत्यर्थः सामीत्यर्धे काला इति
॥ लवाचिन इत्यर्थः बहुवचनात् ननुक्तेनेत्यस्य निवृत्त्या क्तांतात् क्तांतनसाधारणोत्तरसूत्रेण सिद्धे योगविभागो व्यर्थोत आह अनत्यन्तेति परिच्छेत्तुमिति रमेर्योगे शकधृषेति तुमुन्
अत्यंत अत्यंतसंयोगात्यंतसंयोगसाधारणेन पूर्वेण सिद्धे इदं किमर्थमत आह क्तांतार्थमिति क्तेनेति अत्रनानुवर्तत इति भावः तृतीया इदं सूत्रंकृतद्धा

ल·शे· एकएवसामर्थ्येप्रवर्तितेनसा क्षात् स्वरान्वये उत्तरसूत्रेण निपुणम्रहणाभ्यांसमासविधानात् नयोगेहिहेनौनतृतीयातत्कृतेत्युक्तेश्चस्पष्टंचैतद्भाष्ये गुणेत्यस्य
स· तत्कृतेस्येतत्सापेक्षत्वेपिसौत्रत्वात्समासः खण्डशब्दश्चखण्डगुणवत्वेनशकलबोधकइतिशंकुलाखण्डइत्यत्रकृतद्वारकमेवसामर्थ्यंशंकुलाकृतखण्डगुणवानित्य
३६ र्थः वचनग्रहणंतुगुणोपसर्जनद्रव्यवचनेनैवसमासार्थम् तेनकुसुम्भेनकृतंरूपमित्यादौन घृतेनपाटवमित्यादौचनस्पष्टंचेदंभाष्ये यद्यपिजातिसंज्ञाकृदं
ततद्धितान्तसमस्तसर्वनामसंख्याशब्दभिन्नशब्दानामेवगुणवचनसंज्ञातथापिप्रकृतेव्याख्यानात्शुद्धयौगिकएवगुणवचनशब्दइतिबोध्यम् तृतीयां
तार्थेनकृतोयोगुणस्तद्वचनेनसमासइत्यर्थात् तत्कृतेत्यस्यगुणपदेनैवान्वयेनसंज्ञानुपादानाच्चगुणेनेतीयतासिद्धेवचनग्रहणात्कृतमुक्तवतेत्यर्थइतिभाष्य
च्चगुणपदेनधर्ममात्रमनेनखण्ड शब्दस्यक्रियावचनत्वेपिनदोषः धान्येनेति अर्थशब्दोधनपरोहेतुन्तृतीयेतिबोध्यम् पूर्वसदृ· यद्यपिसदृशशब्देनषष्ठी।
समासः सिद्धस्तुल्यार्थैरित्यनेनतद्योगेषष्ठ्या अपिविधानात् एतस्याश्चनप्रतिपदविधानत्वमितिवक्ष्यते अतः प्रतिपदविधानाषष्ठीनसमस्यतइतिनिषेधा
त्रन पूर्वपदप्रकृतिस्वरोपिसदृशप्रतिरूपयोरितिसिद्धः तत्रहिंदास्याः सदृशइत्यादौषष्ठ्या अलुकिपूर्वपदप्रकृतिस्वरार्थंसदृशग्रहणमावश्यकंमनसा
सदृशइतिसंज्ञानास्त्येवेतिनतदर्थमिदमावश्यकंतथापिभोजनेहेतुकसादृश्यवानित्यर्थेभोजनसदृशइत्यत्रसमासार्थमिदमावश्यकं हेतोःशेषत्ववि
वक्षयाषष्ठीसमासेतुपूर्वपदप्रकृतिस्वरासिद्धिः सादृश्यग्रहणेनसदृशप्रतिरूपयोरित्यस्योपमानबोधकपूर्वपदकेएवप्रवृत्तेरितिस्पष्टंसदृशप्रतिरूप।
योरित्यत्रभाष्ये यदितु भोजनेनकृतःसदृशइत्यर्थेपूर्वसूत्रेणसमासेनतत्पुरुषेतुल्यार्थेत्यनेनस्वरोपिसिद्धइत्युच्यतेतदासदृशग्रहणंव्यर्थमेवेतिप्रकृतसूत्र
कैयटेनध्वनितं सदृशेतिस्वरविधायकसूत्रशेषस्यभाष्यंतुएकदेश्युक्तिरितितदाशयः मिश्रंचेति पणबंधेनैकार्थ्येसंधिस्तत्रागम्यमानेमिश्रइत्युत्तरपद।
मनुपसर्गंतृतीयान्तात्परमन्तोदात्तमित्यर्थः अवरस्येति यद्यप्ययमूनार्थोपितथापिव्यवस्थाविषयावरार्थमिदं भाष्येऊनार्थेत्यर्थग्रहणस्यतृतीयेतिसूत्र
प्रत्याख्यानात्समर्थसूत्रेतृतीयातत्कृतेत्युपन्यासोपादानविकलइत्युदाहरणाच्च अत्रानर्थग्रहणंनतिवादिनांमतेसर्वथाप्यावश्यकत्वाच्चेतिदिक् कर्त्तरि श्म·
करणेचेति सूत्रेसमाहारद्वन्द्वात्सप्तम्येकवचनमितिभावः तृतीयेति तृतीयान्तमित्यर्थः कृद्ग्रहणेइति यत्रगतिकारकसमभिव्याहृतंकृदंतंतत्रकृद्धिशि ८

यिव ग्रहणं अपिशब्द्धात्तदसमभिव्याहृते केवलस्यापीत्यर्थः इत्यन्यत्र विस्तरः कृतेति किमिति सुपेत्यधिकारेण तिङं तेनाप्रसंगात् कर्त्रीयाशिप्रधानार्थे क्रियाबोधकदे
दंते नैव भविष्यतीति प्रश्नः काष्ठेरिति अन्ये तु कृदंतेनैव समासो यथा स्यान्न सुबंतेनेत्यर्थेता दुक्तोदाहरणे तु शानजंतादिभिर्व्वबहुलग्रहणेन वारयितुं शक्यः इति प्राहुः
अर्थवादः श्रावयितार्थः काकपेयेति शक्यार्थे कृत्यः पूर्णाभक्त्वेन कोमलत्वेन च स्तुतिः स्पाभ स्त्वेन दुर्बलत्वेन निंदा वा इहांतर्भूतेति तां विना दध्नः संस्कार्यत्वेनप्रतीता
न्नसंस्कारकत्वानुपपत्तेरिति भावः तदुक्तं भाष्ये युक्तार्थसंप्रत्ययाच्च सामर्थ्यमिति दध्नायुक्तो योर्थ उपसेकादिस्तत्संप्रत्ययादित्यर्थः सर्वलोकव्यवहारप्रसिद्धाच्च तद
र्थांतर्भावनिश्चय इति च अन्नशब्देनात्रौदनः भिस्सास्त्री भक्तमंधोन्नमिति कोशेन तत्र तस्य रूढेर्योगाच्च रूढिर्बलीयसीति बोध्यं मिश्रणेति। तां विना मिश्रीक
रणत्वायोगादिति भावः तच्छब्देन चतुर्थ्यंतार्थ इत्याशयेनाह चतुर्थ्यंतार्थायेति तादर्थ्ये चतुर्थी बलिरक्षितग्रहणादिति तद्योगे हितादर्थ्ये चतुर्थी हितशब्दयोगे वा समादे
व ज्ञापका चतुर्थी हितसुखाभ्यामन्यापकाराजननेन तद्योगे तादर्थ्ये चतुर्थ्या असंभवात् एतत्सर्वं भाष्ये स्पष्टं षष्ठीसमासाइति रंधनायस्थालीत्यादावभिधानस्वाभा
व्यात् तादर्थ्ये तेनैव तत्संभावनेन संबंधत्वेनेति षष्ठ्यभावान्न तत्र षष्ठीसमासः चतुर्थीसमासवारणाय तु प्रकृतिविकृतिभाव एवेत्युक्तं अश्वघासादौ उपकारकत्वेन
बाधे वाक्यमेव संबंधत्वेन बोधे षष्ठ्यंते न समासोपीति व्यवस्था रंधनार्था स्थालीति मध्यमपदलोपिसमासोपि तत्रानभिधानादिति भावः एतेन षष्ठीसमासे नरंधन
स्थाल्या अपीष्टत्वात्प्रकृतिविकृतिभाव एवेति व्यर्थं चतुर्थीसमासेपि चतुर्थी तदर्थ इति पूर्वपदप्रकृतिस्वरेण तस्य प्रकृतिविकृतिभाव एव प्रवृत्तेः अन्यथा गोर
क्षितमित्यत्राप्यनेनैव स्वरसिद्धौ क्तेनेति व्यर्थं स्यात् न च हितार्थं क्ते चेत्यत्रापि तदर्थ इत्यनुवृत्तेः अत एवास्योक्तार्थज्ञापकता परं भाष्यसंगच्छते इत्यपास्तं अर्थशब्द
स्य नित्यपुंस्त्वेन परवल्लिंगमित्यस्य बाधायाह विशेष्यलिंगतां चेति एतदेवात्र विधेयं नित्यत्वं तु चतुर्थ्यंतात्तादर्थ्ये स्योक्तत्वादर्थशब्देन विग्रहाप्रसक्तेर्न्यायसिद्धं
गुरोरिदं गुर्वर्थमित्यादौ विवयदिलिंगमपि लोकतः सिद्धं तदेदं स्पष्टार्थं भयभीतेति निर्गत जुगुप्सेये रप्युपलक्षणमिदं भोगोपरतवन्ये तरादिषु सुप्सुपेति समा
सः मयूरव्यंसकादित्वाद्वा अल्पं पंचम्यंतमिति कानिचिदेव पंचम्यंतानि समस्यंत इत्यर्थः अमंगलसंबंधाभावेप्यल्प इत्यस्मादेव निपातनात्स्तोका
निकस्तोकार्थोऽल्पशब्द एव न लेशादयो व्याख्यानात् स्तोकाल्पाभ्यां कृच्छ्रच करणे च स्तोकेति पंचमी दूरांतिकार्थेभ्यो द्वितीया चेत्यनेनते भ्यइति बोध्यं प्रतिपदोक्तपरिभा

ल॰ शे॰ त्वान्नलोपः गुणान्तरेण इदंचपूरणगुणेत्यस्यापवादइतिसर्वेगुणेतिसूत्रेभाष्ये ततःसर्वेपदानुवृत्तेः सर्वेशब्दएवेदंगुणबोधकाद्विहितोयस्तरप्तदंतेनसर्वेशब्दस्य
स॰ सेमासइतिव्याख्यार्थः गुणाद्विहिततरवंतंचगुणवाच्येवेत्याशयेनाह तरवंतंयद्गुणेत्यादिनतुयतोनिर्द्धार्यतेयश्चनिर्द्धार्यतेयश्चनिर्द्धारणहेतुस्तत्त्रितयसन्निधान
२७ एवायंनिषेधोयुक्तोनिर्द्धारणषष्ठीचयुक्ता स्पष्टंचेदंतरब्विधायकेकैयटे अतोनात्रास्य प्राप्तिःसर्वेषांश्वेततरइत्यादौतमबापत्तिश्चेत्यरुचेराह पूरणेत्यादि द्रव्या
नराधेयश्चानपेक्षयासर्वेषांपटानामधिकोयंश्वेतोगुणइत्युदाहरणार्थः एवंचतरबप्युपपन्नः कृद्योगाचेतिप्रतिपदविधानानसमस्यतइत्यस्यापवादः न
निर्द्धारणे द्विजादिशब्दैःप्राप्तस्यनिषेधोयं पुरुषोत्तमइत्यत्रत्रितयसन्निधानाभावान्ननिर्द्धारणविभक्तिः किंतुसंबंधसामान्यषष्ठीतिनयासमासः अतएव
हलादिःशेषइतिसूत्रेकिमयंहलामादिरितिषष्ठीसमासइतिभाष्येउक्तं गुणवचनेननिषेधस्त्वनित्यइतितरपूसूत्रेकैयटः उत्तमःपुरुषस्त्वन्यःपरमात्मेत्युदा
हृतइत्यादिगीतावाक्यादत्रकर्मधारयइतिलभ्यते राजदंतादित्वात्परनिपातः प्रतिपदेति ज्ञोविदर्थस्येत्यादिक्तत्वार्थइत्येतत्सूत्रविहिताप्रतिपदविधाना यत्तु
तेषुशेषपदसंबंधेनशेषएवतैः षष्ठीविधानेनतत्रचषष्ठीशेषइत्यनेनैवसिद्धेनतत्सामर्थ्यात्समासाभावःकल्प्यतेतेनप्रतिपदविधानेतिनापूर्वमितितन्न तत्त
द्धात्वनुयोगउपात्तकारकातिरिक्तकारकाणांशेषत्वविवक्षाभावज्ञापनेनापिचारितार्थ्यसंभवात् किंचक्तत्वार्थप्रयोगेज्ञोविदर्थस्येत्यादिविषयेसमासनिषेधा
नापत्तिः तत्रशेषग्रहणनिवृत्तेःसर्वसंमतत्वात्क्तत्वार्थइत्यत्रतत्संबंधेभाष्यानुग्रहाभावात् एवंज्ञोविदर्थस्येतिसूत्रेपितत्संबंधेनात्यंतभाष्यानुग्रहः अधी
गर्थेत्यादौमंडूकानुवृत्तिः एतच्चादिवइतिसूत्रेविस्तरेणोपपादितं शतस्यदेवितेत्यादौतुनयोगकर्तृकर्मणोरित्यस्यनिषेधेनानेनैवषष्ठ्यासमासनिषेधस्यभ
सवतइष्टत्वात् अतएवभाष्येनेदंप्रत्याख्यातं अतएवप्रतिपदविधानाकेतिप्रश्नेसर्वाप्रतिपदविधानाशेषलक्षणांवर्जयित्वाकर्तृकर्मणोःकृतीतिचकृ।
द्योगेतिभाष्येउक्तं तत्रशेषलक्षणामित्यस्यशेषमात्रलक्षणामित्यर्थः प्रतिपदविधानेत्यस्यकारकविशेषोपादानेनविहितेत्यर्थः तेनतुल्यार्थैरित्यादिनेनतत्व
मित्यलं पूरणेत्याद्यर्थैरिति आदिनागुणसुहितौ अत्रपूरणार्थेत्वेनपूरणात्स्वार्थेतीयादिनिति अनंतस्यापिग्रहणंव्याख्यानात् गुणार्थशब्देनकेवलगुणवाची एम॰
सन्नगुणोपसर्जनद्रव्यवाचीगुणपिबोधकप्रकृतिकभावप्रत्ययांतश्चगृह्यतेव्याख्यानात्तदाह काकस्येति आकडारसूत्रोक्तगुणवचनानांतुनेहग्रहणंवचनप २

दानुपादानात् तदेदमिति। अन्यथाब्राह्मणस्येयं दंता इत्यर्थे शुक्लपदेनासामर्थ्यात्समासप्राप्तिरेवनेतिभावः इदानींतु शुक्लशब्द एव विशेष्यसमर्पक इति नास्य
ये परंतु स्वत्वमपि सामर्थ्यं दुरुपपादं षष्ठ्यंतं समर्थप्रकृतिकेन सुबंतेन समस्यत इत्यर्थे नादोषात् अत्र हि सुबंतेन शुक्ला इति पदेन वाक्यैकदेशन्यायेन शुक्लादंता
इत्यर्थबोधः एवं च सुबुत्पत्तिः शुक्लशब्दात्स्वार्थ एवेति न समर्थप्रकृतिकता सुबंतस्य अत एव ब्राह्मणस्य ग्रामं गत इत्यर्थके ब्राह्मणस्य गत इति वाक्ये प्रक
रणादिना ग्राममित्यर्थस्योक्तन्यायेन गत इत्यनेनोक्तौ समासो न नेष्यते च तत्र समास इति कर्मणि चेति सूत्रे भाष्यकैयटयोः तस्मात्काष्ण्यादय एवात्रोदाहर
णं गुणिपरतापि शुक्लादीनां विशेष्यद्रव्योपादाने प्रकरणादिना तदवगतौ वा नान्यत्राभिधानस्वाभाव्यादित्याहुः अनित्योयं गुणेनेति पूरणार्थेनेति च बोध्यं।
इत्यादीति लोपे चेत्यादपूरणमित्यादिशब्दार्थः तेन कुंभपूरणभवउदकषष्ठ इत्यादि सिद्धं परंतु एषु कुंभसंबंधि पूरणमुच्छसंबंधी षष्ठ इति मध्यमपदलोपी
समासः तएव भाष्ये नित्यत्वेनोक्तमन्यत्रास्यानभिधानमत एव सर्वे पश्चात इत्यादौ गुणेन नेति निषेधात्कथं समास इत्याशंक्य गुणात्तरेण समासस्तर
लोपश्चेति वचनमारब्धं सर्वे गुणे जिति सूत्रे भाष्ये संख्याशब्दास्तु भावशब्दा इति योजनशतादौ क्रोशशतादौ गोविंशतिरित्यादौ च नायं निषेधः तथा च पंक्ति
विंशतीति सूत्रे भाष्यं नेते विंशत्यादयः समुदाये सतो भाववचना भवंतीति विंशत्यादिषु भाववचनेषु इति च यस्तु तत्रैषां गुणवचनत्वव्यवहारः सोपि सत्तु
तत्सादृश्यात् अन्यथा गावो धनमित्युपक्रम्य धनमेको गुणः अपत्यमेको गुण इत्यपि भाष्योक्तेश्चैत्र धनं चैत्रापत्यमित्यादि न स्यादिति वदंति सूत्रे
सुहितेति भावे क्तः तेन फलानां तृप्तिरित्यादावपि निषेधस्तदाह तृप्त्यर्था इति तृतीयेति तत्र करणत्वेन भानं षष्ठीसमासे संबंधत्वेनेति भावः श्रौत विशे
षमप्याह स्वरे विशेष इति तृतीयासमासे तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरस्यापवादः षष्ठीसमासे त्वंतोदात्तः तृप्त्यर्थानां सकर्मकत्वात्क
र्मणि क्तः द्विजस्येति कुर्वन्नित्यपेक्षया न कर्मणि षष्ठी न लोकेति निषेधात् नापि घटाद्यपेक्षया सामर्थ्यात्समासापत्तेः किंतु शेष इत्याह किंकर इत्यर्थः
सति रक्षित इति अत एव सर्वे पश्चादिति भाष्यप्रयोगः संगच्छते प्रकृतसूत्रे भाष्येपि अकृदव्ययैरुच्चैरादिभिरसामर्थ्येन समासाभावे उक्ते कृदव्ययमे
वोदाहृतं तेनान्याव्ययैः सति सामर्थ्ये समास इष्ट इति गम्यते परंतु द्विजस्य कुर्वन्कृत्वेत्यादौ कारकषष्ठ्या निषेधात् कटाद्यपेक्षया शेषषष्ठ्यां त्वसामर्थ्या

ल॰ शे॰ त्समासप्राप्तिरेवनेत्याशंकायांद्विजस्यद्विषन् पुराण्स्ये स्योदेतोरित्यादौ द्विषः शतुर्वावचनंतोसुन्कसुनोरप्रतिषेधइतिकारकषष्ठीसत्वात्तत्रोदाहृतंभाष्ये तस्मादीदृशेवि
स॰ षयेकर्मणःशेषत्वविवक्षायाःतादर्थ्यस्यसंबंधत्वविवक्षायाश्चाभावएवपाणिनितात्पर्यनिर्णयायैवभाष्यकृतःप्रवृत्तेरित्याहुः स्वकर्तव्यमिति कर्तृषष्ठ्यासमासःतस्
३८ कस्येति परिनिष्ठितविभक्त्यासमासः अत्रपरत्वात्समानाधिकरणसमासंबाधित्वाषष्ठीसमासः प्राप्तःकिंदोपिकर्मभीष्माद योपीतिपक्षेपरस्परान्वयएवेतिनासामर्थ्यं
क्रियान्वयनियमश्चनसाक्षादेवकिंतुयत्द्वाराकारकत्वंतद्द्वारकोपीत्युक्तं अतएवैतन्निषेधसामर्थ्यंतत्पक्षे नचसमानाधिकरणामसमर्थवदित्यसामर्थ्यं।
समानाधिकरणाधिकारेसमानमध्यमवीराश्चेतिपाठेनतस्यसमानाधिकरणाधिकारस्थसमासाविषयत्वेप्यन्यत्राप्रवृत्तौमानाभावादिति वाच्यं अधात्वभि
हितमित्युक्त्या धात्वुक्तप्रत्ययेनकर्माभिधानेयजुषःपीयमानस्येत्याद्यर्थमावश्यकत्वात् स्पष्टंचेदंभाष्ये समर्थसूत्रभाष्यकैः प्रकरणांतरस्थेइसुसोःशितिष
त्वेपितत्प्रवृत्तिरित्यन्यत् ननुषष्ठीसमासस्यनिषेधेपिविशेषणसमासोत्रदुर्वारइतिनिषेधफलाभावोतआह।विशेषणसमासस्त्विति विशेषणविशेष्येणेत्यु
भयोपादानेनतत्वावच्छेदकधर्मयोःपरस्परंव्यभिचारएवविशेषणसमासप्रवृत्तिरितितुनयुक्तं कैलासाद्रिरित्यादौसमासानापत्तेरतएवोभयोपादानंस्पष्टार्थ
मितिकैयटः इह नक्षकस्यसर्पस्येत्यादौ तयोःसमासयोरत्रफलेविशेषाभावादितिभावः एवंप्रथमांतेनसमासइतिपक्षेपिषष्ठ्यंततत्प्रयोगाभावएवानभिधा
नादितिबोध्यं
एतच्चभाष्यवृत्त्युदाहृतप्रयोगविषयं अतए
वान्यस्यपदस्यार्थेइत्यर्थेकोन्यपदार्थेइतिसूत्रप्रयोगःसंगच्छते एवंचनीलोत्पलस्यगंधइत्यादिसाध्वेवनिषेधसामर्थ्यादितितुनोक्तं गमनस्यश्रेयसइत्या
दौकर्मधारयेऽज्यावमकन्यायवत्सुभावेकर्मधारयइत्यनेनपूर्वपदप्रकृतिस्वरः षष्ठीसमासेत्वंतोदात्तत्वमितिभेदेनतत्सामर्थ्यक्यात् फलांतरमप्याह।
गार्धेनोरितिअत्रहिषष्ठीसमासेगुणप्रवृत्तिनिमित्तकत्वेनाप्रधानत्वात्प्रथमानिर्दिष्टत्वाच्चधेनोःपूर्वनिपातोविशेषणसमासेतुगोरितिभेदइतिभावः आदि
नाभोज्यस्पांसस्येत्यादिसंग्रहः येतूपसर्जनसंज्ञामन्वर्थेनाश्रयंतेतेषांषष्ठीसमासेपूर्वनियातानियमइतितद्वारणायनिषेधोविशेषणसमासस्तुस्यादे राम॰
वेतिकैयटः परेतुप्रथमासानिर्दिष्टमित्यादिसूत्रभाष्योक्तरीत्याषष्ठीतिसूत्रेप्रत्यासत्त्यायेनसुवंतेनसमासस्तदर्थनिरूपितसंबंधाद्यर्थकषष्ठ्याग्रहणमेवं १०

च प्रकृतेन समासप्राप्तिरिति समानाधिकरणग्रहणं व्यर्थमेव ध्वनितं चेदमत्र भाष्ये तथा च भाष्यं समानाधिकरणे किमुदाहरणं एकदेश्याह राज्ञः पाटलि।
पुत्रकस्य मृष्टाह्न नैतदस्ति। असामर्थ्यादत्र न भविष्यति उक्ताशय उदाहरणबाधे एकदेश्याह कथमसामर्थ्यं प्रष्टृ एकदेश्याह समानाधिकरणमसमर्थवदिति उदा
हरणबाधे एकदेश्याह अ धात्वभिहितमिति तत्रैवोषात्सर्पिषः पीयमानस्येत्युदाहरणमित्युपसर्जनसंज्ञासूत्रस्थभाष्यैकवाक्यतया सिद्धं व्याख्यानस्यैवौचित्या
दित्याहुः व्याख्यानात्पूजायामिति सूत्रोपलक्षणमित्याह मतिबुद्धीति राज्ञां मत इति क्तस्य च वर्तमान इति षष्ठी अयं च कारकषष्ठी शेषषष्ठ्योरुभयोरपि स।
मासस्य निषेधः तयोः समासयोः स्थाथादिस्वरसमासस्वराभ्यामन्तोदात्तस्यैव प्राप्त्या फले विशेषाभावात्तद्धु नयन्नाह भूते क्तान्तेनेत्यादि न च वर्तमाने क्तो भू
ते क्तस्य बाधक इति कौण्डिन्यन्यायादिति वाच्यं भूते क्तेऽवश्यं प्राप्ते वर्तमाने क्तस्यानारंभात् भूतत्ववर्तमानत्वयोर्युगपद्विवक्षाया असंभवात् दधिदानेऽवश्यं
प्राप्ते तक्रदानारंभाद्युक्तस्तेन दधिदानबाध इति बोध्यं कर्मणि च अस्य क्तेन न संबंधः पूजायां प्रतिषेधानर्थक्यात्तदाह कर्मणीति या षष्ठीति चशब्द इतीत्यस्या
र्थ इति भावः एवं च क्तस्याननुवृत्तिरेव इक्ष्णुभक्षिकेति धात्वर्थनिर्देशे ण्वुल्कर्मणि षष्ठ्याः समासः कर्तुः प्रयोगाभावेनोभयप्राप्तावित्यस्याप्राप्तेः कर्मणि चे
ति निषेधो न शंक्यः पर्यायार्हर्णोत्पत्तिष्विति भावे ण्वुजित्यन्ये पत्यर्थेति प्रसिद्धत्वेन तस्यैव तत्र ग्रहणादिति भावः कैयट इति प्रत्यासत्त्या कारकषष्ठ्या एव तन्
न्निषेध इति भावः गुणिविशेषक इति भाष्यप्रतीकमुपादाय बहुष्विति सूत्रे कैयट एतत् कर्तरि च अत्र सामर्थ्यात्कर्तरि इति षष्ठ्या एव विशेषणं भवतः शायि
केति पर्याये ति ण्वुच् धात्वर्थनिर्देशे ण्वुल्त्वा नित्यं क्रीडाजीविकयोर्निषेधस्य सिद्धेर्नित्यग्रहणाच्च विधिरयं दन्तानां लिखितेत्यादौ जीविकायां तृचोऽन।
भिधानात्क्रीडायां तृचोऽसंभवाद्विच्छिन्नत्वाच्च तस्यात्रासंबंध इत्याह अकेनेति अके जीविकार्थ इत्यत्राकग्रहणं त्वर्थग्रहणवत्स्पष्टार्थं प्रतिपदोक्तत्वे
नैव हि हितं समास एव तत्प्रसंगनिषेधः संज्ञायामितीति यद्यप्यत्र धात्वर्थनिर्देश इत्येव सिद्धं संज्ञायामिति त्वधिकरणार्थमिति कैयटे वक्ष्यते तथापि तदर्थ
स्याभावेऽपि प्रवृत्तिर्न्याय्या संज्ञायां विशेषविहितत्वाद्चारितार्थ्याभावेऽपि तस्य प्रथमं बुद्ध्यारोहे पाप्रवृत्तौ नियामकत्वमस्तीत्यन्यत्र प्रपंचितं संज्ञायामिति।
ण्वुलित्येव पाठः उदाहरणेऽधिकरणे ल्युडिति तत्त्वं षष्ठीसमासप्रसंगेन तदपवादमेकदेशिसमासमाह पूर्वापरेति अवयवित्वं चावयवापेक्षं तन्न ह्यावका।

ल॰शे॰ श्चोपस्थितत्वात्पूर्वादयएवेत्याह पूर्वादयइति अधिकरणंद्रव्यं एकत्वविशिष्टद्रव्येवर्तमानेनावयविवाचकेनेतिवाच्योर्थः फलितमाह एकत्वेति मध्यान्हइति।
स॰ राजाहइतिटच् अन्होन्हइत्यन्हादेशः अर्धंनपुंसकं निर्देशादेवनपुंसकत्वेलब्धेनपुंसकग्रहणंसूत्रनिर्देशेलिंगाविवक्षाज्ञापनार्थं नचसमांशवाचिनित्यनपुं
३९ सकग्रहणार्थंतत् एओङ्एचइगितिसूत्रेएचोह्रस्वशास्त्रेअर्धेकारौकारयोर्विधानमाशंक्यनवेदेनैवलोकेर्धे एकारोर्धओकारोवास्तीतिभाष्यप्रयोगात्समांश
वाचिनोपिनित्यनपुंसकत्वाभावात् अवयववाचीतुपुंल्लिंगएव अपूपार्द्धंग्रामार्धइत्याद्यपिसमप्रविभागएवेत्याहुः पिप्पल्याएकविभक्तौत्युपसर्जन
त्वाद्ध्रस्वत्वंसंभवतु आह एकविभक्ताविति नन्वेवंपंचानांखट्वानांसमाहारइतिविग्रहेपंचखट्वीतिनसिध्येदत आह एकदेशीति इदंचापत्यंनपुंसकमिति
सूत्रेपंचखट्वीतिभाष्योदाहरणात्ज्ञायते निषेधंबाधित्वेति भागार्थेकान्प्रत्ययांतोपिस्वार्थिकत्वात्पूरणार्थेइतिभाष्येस्पष्ट पूर्वेत्यादिविहितएकदेशिसमा-
सःपरवल्लिंगमितिसूत्रस्थमेकदेशिसमासपरंतत्पुरुषग्रहणंचपरवल्लिंगमितिसूत्रेभाष्येप्रत्याख्यातं द्वंद्वैकदेशिनोरितिवक्ष्यामिप्राप्तापन्नादिषुचाप्राप्तिरेव तदेकदे
शिग्रहणमपिनकार्यंकथंएकदेशिसमासोनारभ्यते अर्धेपिप्पल्यात्यादिः समानाधिकरणसमासः अवयवेसमुदायरूपारोपादर्धंचसापिप्पलीति नचभेदवि
वक्षायांषष्ठीसमासवाधार्थंइष्यतएवषष्ठीसमासोग्रामार्द्धमित्यादिवत् पिप्पल्यर्द्धमित्यादिभवितव्यमेवेतिभाष्यात्। द्वितीययाश्रइति नचात्रप्रश्लेषद्वि
तीयांतस्यैवाकारःस्यान्नप्राप्तापन्नयोरितिवाच्यं प्राधान्येनतयोरेवादेशात् चकारश्चभिन्नक्रमइतिभावः प्राप्तापन्नेइत्युत्तरमकारप्रश्लेषः प्रगृह्यत्वंसौत्रा-
त्वान्नेतिभाष्यस्वरसः एकादेशस्यपूर्वांतत्वेनग्रहणात्प्राप्तशब्देनसमासः जीविकाशब्दस्यैकविभक्तौत्युपसर्जनत्वाद्गोस्त्रियोरितिह्रस्वेनदंतादावितिवोध्यं
वहुव्रीहिणातुनगतार्थतास्वरेविशेषात् कालाःपरिमासस्यजातइतिषष्ठीसमासेनसिद्धेजातमासइत्यनिष्टनिवृत्तये इदं यद्यपिवहुव्रीहिणेदंसिद्धंजातिका-
लसुखादिभ्योनाच्छादनात्क्तोवाजातइत्यनेनांतोदात्तत्वेनस्वरेविशेषाभावात् जातिकालसुखादिभ्यः परानिष्ठेतिवचनात्नजातस्यपूर्वनिपातः तथापिजातवच्छ
ब्देनसमासेमासेजातवानित्यादावंतोदात्तार्थमावश्यकमिदमितिकेचित् परेतुपरिच्छेद्यपरिच्छेदकसमभिव्याहारेपरिच्छेद्यादेवषष्ठीस्वीकारेणमासस्यजात राम॰
इतिविग्रहस्यतत्रषष्ठीसमासस्यचखपुष्पायमाणता अतएवभाष्येउत्तरपदार्थप्रधानत्वेनसमासात्षष्ठीमाशंक्यसंबंधस्यप्रातिपदिकार्थत्वेनाशेषत्वात्। ९९

रिहता ।। अन्यथा मासस्य जात इति विग्रहेण तत्प्राधान्यं दर्शितं स्यात् यत्र षष्ठीप्रसक्तिरेव न षष्ठीति सूत्रेण सिद्धे इदं सूत्रं जातमास इत्येतन्निवृत्त्यर्थं न वेवम मापि कालाः प
रिमाणिना समस्यंते ननु परिमाणी कालेनेत्यर्थात् किंच मासो जातो यस्येति बहुव्रीहिणा अतीतमाससंबंधिजननक्रियाकर्तुरिव तत्संबंधिगमनादिकर्तुरपि मासजातशब्दा
त्प्रतीत्यापत्तिरित्यनयोर्बहुव्रीहेरनभिधानमेव अत्र विग्रहवृत्तौ चोभयत्राप्युत्तरपदार्थप्रधानत्वं । न च विग्रहेपि तत्त्वे जातान्नषष्ठ्यनुपपत्तिर्विशेषणादेवं षष्ठीविधा
नादिति वाच्यं वाक्यस्य वृत्त्यर्थबोधकत्वविवक्षायां विशेष्यविशेषणभाववैपरीत्येपि पूर्वजातसंस्कारानिवृत्तेः अन्यथा समासे जातप्राधान्येन विशेषणविभक्ति
षष्ठ्यापादनस्य भाष्ये असंगत्यापत्तेः मम तु न दोषः विग्रहे तस्यैव प्राधान्येपि तत्स्थितिवत् समासादपि तदापादनसंभवात् तदुत्तरषष्ठ्येव तत्र मासविशेष
णकसंबंधप्रतीतिवत् समासेपि विशिष्टोत्तरषष्ठ्या तत्संभव इत्याशयात् शब्दस्वभाव एव च तद्व्यत्यासे बीजं यत्तु एकार्थीभावबलाद्वृत्तौ विशेष्यविशेषणभाव
व्यत्यास इति तन्न एकार्थीभावफलेषु भाष्ये ऽस्यागणनात् वृत्तिविग्रहयोः समानार्थत्वभंगापत्तेश्च किंप्रधानोयं समासः उत्तरपदार्थप्रधान इति भाष्यं वृत्ति
विग्रहोभयपरं समासपदेन तस्याप्युपलक्षणात् अन्यथा मासजातो दृश्यतामित्यादौ जातस्यैव कार्यसंबंधदर्शनेनौत्सर्गिकत्वाच्च तत्पुरुषत्वेनोत्तरपदार्थप्र
धानत्वनिर्णयेन किंप्रधानोयं समास इति प्रश्नस्य निर्दलत्वापत्तेः तस्माद्वृत्तिविग्रहयोः समानार्थत्वनिर्वाहमपश्यत उभयविषयोयं प्रश्न उत्तरं चेत्युचितं ॥
अन्यथोत्तरपदार्थप्रधानोयं तत्पुरुषस्तेनान्यैरुत्तरपदार्थप्रधानैः सधर्मणा भवितव्यं अन्यत्र चोत्तरपदे यांतर्वर्त्तिनी विभक्तिः सैव समासेपि भवति इह तु वा
क्ये षष्ठी समासे प्रथमा के नैतदित्यवाशंक्येत प्रातिपदिकेनोक्तत्वेन प्रातिपदिकार्थतया ऽशेषत्वान्न षष्ठीत्युत्तरं तुल्यमेवेत्याहुः मासजात इत्यादौ मासत्वेनैकमा
सव्याप्तिरवबुध्यते ऽन्यथा परिच्छेदकत्वं न स्यात् मासो जातस्येत्याद्यर्थे तु न समासो ऽनभिधानात् उक्तपदेनेति इदं वार्त्तिकं एतत्सूत्रविषयमेव तद्धितार्थेति ।।
सूत्रे पाठेपि एतद्विषयस्यैव भाष्यकृतोदाहरणात् पूर्वत्रत्विति द्व्यहजात इत्यत्रेत्यर्थः अक्षशौंड इति अधिकरणकारकस्य कृदंतकर्मद्वारा क्रियान्वयाच्छौं
डादिभिः सामर्थ्यं । आसक्त्यादिक्रियांतर्भावेण सामर्थ्यमिति तु न युक्तं तदप्रतीतेः सांकाश्यसिद्ध इति संकाशेन निर्वर्त्तिते वने तपसा सिद्ध इत्यर्थः सांका
श्ये नगरे सिद्धो जात इत्यर्थो वा ध्वांक्षेण क्षेपे व्याख्यानादर्थग्रहणं तदाह इवेति तत्र स इव यो गुरुकुलादौ न चिरं तिष्ठति स एवमुच्यते एवं हि निंदा भवति ऋणग्र

ल॰शे॰ हणमावश्यकोपलक्षणमित्याह आवश्यकेइति तत्फलितमाह पूर्वाह्णेगेयंसामेति तत्पुरुषेकृतीत्यलुक् अयंसमासोयत्प्रत्ययांतेनैवाभिधानस्वाभाव्यात्
स॰ न तत्रेत्येतत्सप्तम्यंतमिति अधिकाराद्वाधायाधिकरणशक्तिप्रधानादपिसप्तमीतिवृत्तिकृत् तेनपूर्वपदप्रकृतिस्वरसिद्धिः अवतप्तेनकुलस्थितमिति अव्य
८० वस्थितत्वंप्रतिपत्त्यात्रनिंदा गेहेनर्दीति नदेशब्देइत्यस्मात्णिनिः तत्पुरुषेकृतीत्यलुक् सर्वत्रसमासांतरेइतिसमासप्रकरणादितिभावः तेनपात्रेसमितिरि
त्यादिभवत्येवसमासश्चानंतरत्वात्कर्मधारयएवेत्याहुः प्रवेशोनेति तेनपरमाः पात्रेसमिताइत्येव समितेति निरनुस्वारं पूर्वकालेक अत्रपूर्वकालशब्दोऽ
र्थपरोऽन्येषदेस्वरूपपराः पूर्वः कालोयस्यतद्वाचक शब्दः प्रत्यासत्त्यापरकालवाचकेनसमस्यतइत्यर्थः सिद्धेपूर्वनिपातेति एषांविशेषणत्वस्यानैयत्ये
पिएषामेवतत्वार्थमितिभावः नियमबाधनार्थंचेति मुख्याद्यर्थेकैकशब्दस्यतुअप्रसिद्धत्वान्नात्रग्रहणमितिभावः नवशब्दः पुराणसाहचर्यान्नूतनार्थः
जरन्वृद्धः समानाधिकरणेनेतिकिं एकस्याःशौक्ल्यं।नियमार्थमिति विशेषणमित्येवसिद्धेनियमोयमितिभावः विशेषणमित्यस्यैवायंनियमः तेनप्रवृद्धःपं
चगवमितिचसिध्यति पूर्वसूत्रमित्यादौसंज्ञात्वाभावेपिकालवाचकत्वात्समासः एवंदेशवाचकेनापीतिबोध्यं तद्धितार्था वैषयिके आधारेसप्तमीविषयत्वेचा
नेकप्रकारैरित्याह विषयेइत्यादि तद्धितार्थेवाच्यइतितुनोक्तं पांचनापितिरित्यादौसमासेनोक्तत्वात्तद्धितानापत्तेः अतएवद्विगोस्तद्धितस्यलुग्वचनंचारिता
र्थं तद्धितविषयेइत्येवसिद्धेऽर्थग्रहणंस्पष्टार्थं मत्वर्थेनायंअनभिधानात् तदर्थेपरेणबहुव्रीहिणाऽस्यबाधाच्च समाहारःसमूहः भावघञंतत्वात् अतएव
पंचानांखट्वानामितिनियमेनषष्ठ्यामेकविभक्तित्वेनोपसर्जनत्वात् ह्रस्वेऽदंतद्विगुत्वात्पंचखट्वीत्यत्रङीपसचावयवाभिन्नोबुद्धिकल्पितभेदवानपि समूह
स्यतद्धितार्थत्वेपिसामूहिकस्यलुकिपंचगवमित्यत्रगोरतद्धितलुकीतिटच्नस्यात् पंचकुमारिरित्यादौलुकृतद्धितलुकीतिस्त्रीप्रत्ययलुक्स्यादितिपृथक्प्र
हणं तत्सामर्थ्यादेवात्रवाच्येइतिव्याख्यातं उदात्तइतिसतिशिष्टत्वात्तत्पुरुषप्रयुक्तसमासांतोदात्तत्वेनेतिभावः विकल्पप्राप्तइति मत्वाविभाषयेतिभावः ततश्च
पक्षेटजभावेपंचगोधनइत्याद्यपिस्यादितिभावः स्पष्टंचेदंभाष्ये।एवंचोभयत्रापिनित्यत्वमात्रबोधकंवार्त्तिकमितिबोध्यं अतएवैतद्वार्त्तिकमुक्त्वाकिंप्र राम॰
योजनंसमुदायवृत्तावयवानांकदाचिदप्पवृत्तिर्माभूदित्येवप्रयोजनमुक्तंभाष्ये तत्रतत्पुरुषोबहुव्रीह्यवयवोत्तरपदेद्वन्द्वतत्पुरुषावयवोत्तरपदेपि अतएवो। ९२

तत्पदेनपरिभाषितानांद्विगुत्वमितिइयेइत्युक्तं द्वंद्वस्तुबहुव्रीह्यवयवोत्तरपदएव वागदृषदप्रियइत्यादौप्रियशब्देनोभयोःसामानाधिकरण्यंनद्वंद्वावयवोत्तरपदे चर्म्मो द्वंद्वेहोतृपोतृ
नेष्टोद्गातारइतिभाष्यप्रयोगेणतदनभिधानात् पदयोर्निष्ठाप्येकार्थीभावाभावेपिसमासादिप्रवृत्तिरस्तीतिनिरूपितम् एवंनयोर्निष्ठप्यसामानाधिकरण्याभावेपि यथा
कथञ्चित्सामानाधिकरण्यंनियामकमादायैवतत्रवृत्तिरतएव पश्चिमशालाप्रियइत्यादौ पुंवत्वसिद्धिः पुंवत्वेयथाकथंचित्सामानाधिकरण्यंनियामकंसमासेनिष्ठं ।
प्येवेत्यत्रनविनिगमकं अस्यप्रत्याख्यानपक्षेएकविंशतिर्भोस्ताजावंश्याःप्रियापस्येत्यादिबहुव्रीहौ अव्ययीभावादितुनानभिधानात् वस्तुतोनित्यत्वांशेपिन्यायसिद्धः अयाण
मेकार्थीभावेद्वयोर्व्यपेक्षायादुरुपपादत्वादित्यन्यत्रविस्तरः गोरतात्तत्पुरुषस्येतिराजाहइत्यतष्टच्चानुवर्त्तते गोंतस्यतत्पुरुषस्यसमासस्यांतष्टजित्यर्थस्तत्फलितमाह गो
तादितिबन्त्विति ननुतद्धितलुग्विषयेइत्यर्थः तेनपंचभिर्गोभिःक्रीतःपंचगुरित्यत्रन एकापूपीत्यत्रापिसमाहारेद्विगुः एकमप्यपूपंकश्चित्स्वरूपणोद्ददनेकंमन्यतइतितत्रा
रोपितबहुत्वाश्रयसमाहारसत्वात् एकविभक्तीतितुनानभिधानात् द्विगुरेकवचनमितिकर्तरि ल्युट् सामान्येनपुंसकंइदंतत्रसमाहारद्विगावेव अनुवादत्वेलाघवात् अतएवपं
चपूलीनामेकशेषेन अनुवादफलंतुद्विगुवाच्यस्यसमाहारस्यनकदाप्युद्भूतावयवभेदस्येतिबोधनंतेनद्वंद्ववाच्येतथाविवक्षायामपिबोध्यं उद्भूतावयवभेदः —
समाहारएवेतरेतरयोगपदेनोच्यते सनपुंसकमित्यत्रतद्भिन्नसमाहारद्विगौद्वंद्वस्यचप रामर्शस्तदाह सनपुंसकमिनोति कुत्सितानिकर्मनेतिव्याख्य
नात् कुत्सनैरितिकरणेल्युट् दुर्दुरूढोदुष्टकर्मकर्तरिरूढः त्वासणिकमिति अतएवसमानाधिकरणाधिकारस्याबाधः येनवस्त्वंतरंस्ववृत्तिधर्मवत्वे
नपरिच्छिद्यतेतदुपमानंसामान्यवचनत्वंचोपमानोपमेयसाधारणधर्मविशिष्टोपमेयवचनत्वं परेतुसमभिव्याहृतनिष्ठमुपमानत्वमिवादिद्योत्यं ।
साधारणधर्मसंबंधस्योभयत्रबोधतात्पर्यग्राहकताचोपमान श्यामघनाभिन्नःश्यामउपमेयइतिबोधः अतएवोपमानोपमेययोःसमानविभक्तिकत्व
नियमः समासेत्विवस्यार्थस्यसमासशक्तिबलाद्बोधः उपमानानीत्यस्योपमानत्वेनबोधकानीत्यर्थः अन्यथासंबंधिकत्वात्सामान्यवचनैरित्येवतेन
समासलाभेतद्वैयर्थ्यंस्पष्टमेव एवमुत्तरसूत्रे उपमितमित्युपमेयत्वेनबोधकमित्यर्थकं एवमेवभाष्यस्वरसइत्याहुः उपमितं उपमेयत्वमुपमानंपरि
च्छेद्यत्वमुपमानोपमेययोः समभिव्याहारे उपमानस्यविषणतेवतदाह विशेष्यस्येति एतेनोपमितमित्येतत्स्वारस्यात् तस्योपमानेननित्यसाकांक्षत्वा ।

स्व·शे·
स·
४१

व्याघ्रादीनामुपमानत्वेनकउभयोः समानलिंगत्वएवचप्रवर्त्तते अतएवपरवल्लिंगमितिसूत्रे द्वंद्वैकदेशिनोरितिन्यासंकृत्वातत्पुरुषग्रहणंप्रत्याख्यातं अन्य
थास्य पूर्वपदार्थप्रधानस्यभाष्याब्धिरित्यादौदृश्यमानपरवल्लिंगस्यसिद्धार्थंतत्पुरुषग्रहणावश्यकत्वेनतत्संगतिः स्पष्टैव भाष्याब्धिःकातिगंभीरइत्यादौसाम्या
न्यधर्मप्रयोगेपिलिंगभेदेपिमयूरव्यंसकादित्वात्सिद्धं सचराजांतरमित्यादौपूर्वपदार्थप्रधानोपिदृष्टःपरवल्लिंगतापितत्पाठेनैव विशेषणसमासेनतुनसिद्धिरु
पमानस्यविशेषणतयापूर्वनिपातापत्तेः एवंचभाष्याब्धिरित्यादौरूपकमेव यत्तुअनुपात्तधर्मेणसाम्यविवक्षणादनेनसमासइतितन्न एतदुपादानवैयर्थ्यापत्ते
रुपात्तधर्मसत्त्वेनैवसाम्यप्रतीतेरनुभावात्सकलःपुरचंद्रोराजतेइत्यादावुपात्तधर्मातिरिक्तधर्मस्यसाम्यप्रयोजकस्याभावाच्चेतिदिक् पुरुषव्याघ्रइति उपमानशूर
व्याघ्राभिन्नःशूरःपुरुषउपमेयइतिबोधः व्याघ्रइवशूरइति नचशूरसापेक्षत्वेनासामर्थ्यादत्रसमासाप्राप्तिः प्रधानस्यसापेक्षत्वेप्यसामर्थ्याभावात् विशेषण
मुपमानंतुनित्यसापेक्षमितितत्सापेक्षत्वन्नदोषः साधारणधर्मवत्त्वेनपरिच्छेदकत्वंहितत्त्वम् तच्चतत्वेनज्ञातस्यैवयद्यप्युपमेयपुरुषनत्तद्रूत्वेन
परिच्छेद्यत्वमेवतथापितस्यतत्त्वंविधेयमेवेतितन्ननित्यसापेक्षमितिदिक् विशेषणं अत्रविषयताविशेषरूपंविशेषणत्वादिग्रह्य
तेव्याख्यानात् वृत्तौभेदकभेद्यशब्दाभ्यामपितदेवव्यावर्त्तकत्वरूपंतत्तुनीलइतिसामान्योपक्रमेउत्पलस्याप्यस्तीत्यव्यावर्त्तकं अत्रजातिसंज्ञयोर्गुणक्रिया
भ्यांसमभिव्याहारेविशेष्यतैव गुणयोःक्रिययोर्गुणक्रिययोश्चानियमएव व्याप्यव्यापकभावानापन्नजात्योरप्येवं यथाभूतमूर्त्तयोः तद्भावापन्नयोस्तुव्याप
कस्यविशेष्यतैव यथाशिंशपावृक्षइति यत्रैकोऽवयवशब्दःपरःसमुदायशब्दः तत्रावयवस्यविशेषणत्वमेव अतएववर्णोवर्णेनेतिसूत्रेभाष्येकृष्णसा
रंगइत्युदाहृत्यतृतीयासमासेनेदंसिद्धमित्युक्तमन्यथाकर्मधारयेपूर्वनिपातानियमेनतृतीयासमासेनतन्नियमेनतदसंगतिःस्पष्टैव द्वयोरप्यवयवशब्दत्वे
त्वनियमः एवंचसोमयाजिडित्थइत्येवोचितं डित्थसोमयाजीत्यादयसाध्वेव कुब्जखंजःखंजकुब्जइत्यादौविषयतायाअपिशाब्दबोधेभानाद्बोधेविशेषइ
तिदिक् पूर्वापरबहुलग्रहणानुवृत्त्याक्रियाशब्दैःपाचकादिभिरेषांनसमासइतिसमर्थसूत्रेभाष्ये एवंचापराध्यापकइत्युदाहरणंचिंत्यं अपरमीमांसकइत्या
द्युचितमुदाहरणं भूतपूर्वचरणीयादौविशेषणमितितुप्रवर्त्ततएवत्यपितत्रैवभाष्येस्पष्टं व्यर्थइति तेनश्रेणीनामेवदंडनादिरूपकरणेनसमासः श्रेणीनां

यं समासः नञ्ग्रहणं चार्थ्यागतासमासनिषेधोत्तकाव्ययोपलक्षणं तेन कुत्तापकृतादिसंग्रहः पूर्वनिपातनियमार्थं चेदं देवब्राह्मण इति देवपूजको ब्राह्मण इत्यर्थः य
व्यपि पूर्वपदस्य तत्तदर्थे लक्षणायां विशेषणसमासेन सिद्धं तथापि मुख्यार्थे शाकप्रियपार्थिव इत्यादिनिवृत्त्यर्थमिदं सन्महत् महापापमित्यादौ पूजाभावेपि विशेषणं।
समासो बोध्यः अत्रापि महत्त्वेन पापस्य स्वगुणाश्च पूजात्येवेत्यन्ये वृंदारकनाग · वृंदारकशब्दो देवजातिविशेषवाची द्वितीयो गजसर्पवाची अन्त्यो गजवाचीति तेषामुपमानत्वेनै
व पूजावाचित्वादाह व्याघ्रादेरिति कततमौ समान्यति गोकुंजरः स्थूल इत्यादौ कतरकतमौ द्वयोरेकस्य वा बहूनामिति सूत्रयोरुपाधिप्रत्याख्यानात् कतमो भवतां पंडि
त इत्यादौ समासाभावाय जातिपरिप्रश्न इति यथान्यासेपि कतरार्थेन तत् · किंराजेति किमः क्षेप इति समासांतनिषेधः क्षेपे किं को राजा पाटलिपुत्रे तत्पुरुषः
तत्पुरुषाधिकारे एतत्करणेन त्वेकसंज्ञाधिकारात्तस्या अनया बाधः स्यादिति बोध्यं समानाधिकरणपदावयवक इत्यर्थोऽत्र व्याख्यानात् पुंवत्कर्मधारयेत्यस्त्रियाः पुं
वद्भाषितपुंस्कादनूङित्यनुवर्त्तते अपूरणीप्रियादिष्विति तु नानुवर्त्तते व्याख्यानात्तदाह पूरणीत्यादि एतेन स्त्रियाः पुंवत्तसिलादिष्विति सिद्धे इदं व्यर्थमित्य
पास्तं महानवमीति पुंवत्वे आन्महत इत्यात्वं तथा कोपधादीति एतेन निषेधप्रकरणात् पूर्वमेतत्पाठ्यं पुंवदिति च न कार्यमिति पास्तं मध्येऽपवादन्याये
न परनिषेधबाधानापत्तेः न कोपधायाः संज्ञापूरण्योश्च वृद्धिनिमित्तस्य स्वांगाच्चेतः जातेश्चेति पंचसूत्रेत्यर्थः विध्युन्मूलकत्वरूपयुक्तिमूलकस्य निषेधाश्च
बलीयांस इत्युक्तं तु न विषयस्तद्बाधं विना कर्मधारयांशेऽस्य विधेरचारितार्थ्यात् बाध्यसामान्यचिंतया च सर्वबाधः इभीपोटेत्यादिविग्रहः जातेः पूर्वनि।
पातार्थं तु पोटायुवतीति सूत्रं प्रशंसावच · जातिरिति वर्त्तते ननु मतल्लिकादेः स्त्रीत्वात् प्रशस्त इत्यर्थो न युक्तः प्रशस्ता गौरित्यर्थ इति पाठे उद्घादेः पुंस्त्व
प्रकांडस्य क्लीबत्वादयुक्तोऽत आह नतु विशेष्यनिघ्ना इति युवत्यामेवेति जरत्यां युवतीधर्मारोपे तु युवतीशब्दस्य विशेषणत्वेन विशेषणमिति समासेपि पू
र्वनिपातनियमसिद्धा जरतीग्रहणस्य वैयर्थ्यमेव स्यादिति भावः कृत्यतु · क्तात्य प्रत्ययांतास्तुल्यवाचकाश्च जातिभिन्नवाचकेन समस्यंत इत्यर्थः तुल्यमहानित्या
दौ परत्वादनेनैव समासः पूर्वनिपातनियमार्थमिदं सत्कात्यं परमपूज्य इत्यादौ षष्ठीसमासो बोध्यः यद्वा बाहुलकादेतद्विषये सन्महदित्यस्यैव प्रवृत्तिः साम
र्थ्यादिति पूर्वनिपातस्योभयत्रापि समत्वादिति भावः जातिभिन्नवाचकेन समासे हि पूर्वनिपातानियमे प्राप्ते तन्नियमार्थमिदं सार्थकमिति श्रजा येन तच्छर्थं

स्यादिति तत्सामर्थ्याद्विशेषणसमासबाध इति तात्पर्यं इदं प्राचामनुरोधेन परं तु अजात्येत्युक्तार्थस्य स्पष्टतया लाभायैवात एव कुरुगार्हपतेति सूत्रभाष्योदाहृतेन पथ्यकां
दंत्तः पेयमहल्लीत्यत्र विशेषणमिति समाससिद्धिः भोज्य ओदन इत्यत्रासमासस्येष्टत्वे बाहुलकाद्बोध्य इत्याहुः समानाधिकरणेनेति वर्णवाचिना तादृशेन वर्णवाचिना
मस्यत इत्यर्थः सारंगश्चित्रः कृष्णशब्दस्तद्वयवके लाक्षणिक इति सामानाधिकरण्यं विशेषणमित्येव सिद्धे इदं व्यर्थं नच वर्णो वर्णेष्वनेत इति स्वरविधायके प्रतिप।
दोक्तस्यास्य ग्रहणार्थमिदं अत एव सारंगस्यावयवः कृष्णः सारंगकृष्ण इत्यत्र तेन पूर्वपदप्रकृतिस्वरो नेति वाच्यं कर्मधारयस्वरप्रकरणे तत्पाठेन सिद्धेरिति दिक् बहु
वचननिर्देशाद्गाद्यर्थावगतिरित्याह कडारादय इति कर्मधारये किं कडारपुरुषको ग्रामः। एतदेवेति एतदपीत्यर्थः युवा खलतीति सूत्रे जरतो ग्रहणस्यापि ज्ञापक।
त्वात् चतुष्पादो जातिग्रहणं कर्तव्यमिति वार्त्तिकलब्धमर्थमाह जातिवाचिन इति मयूरव्यंसक इति केचित्तु मयूर इव व्यंसक इत्यर्थे उपानसमासापवादोऽयं प्रतिप।
दोक्तोपमानसमासविषयक पूर्वपदप्रकृतिस्वराभावायेत्याहुः उच्चावचमिति उच्चावचादेशोऽत्र उच्चनीचमित्यर्थे इदमित्यन्ये निश्चितप्रचिरस्यानिश्चप्रचं दिक् मतदं
नगेयास्सूत्रात्याह आख्यातमिति क्रियाप्रधानमित्यर्थः अत्रैहीडादय इत्यतोऽन्यपदार्थे इत्यनुवर्तते गणे तस्य पूर्वपाठात् इह त्वसार्वत्याथेतां तस्य ध्वनयितुं न
स्य व्युत्क्रमणपाठस्तदाह यत्राभिधीयत इति अश्नीतपिबतेति अन्यपदार्थस्य क्रीडादिरूपत्वेन स्त्रीत्वात् समासत्वेन प्रातिपदिकत्वाच्च टाप् स्वादतमोदतेति।
मोदंतामित्यस्य स्थाने मोदतेत्यादेशः एहीडादयति लङुत्तमपुरुषैकवचनस्य ईडे इत्यस्य ईडादेशः एहियवमित्यत्र याामीत्यस्य यवादेशः उद्धरकोत्सृजादिति उद्धू
रोत्सृजेति विग्रहः उत्सृजेत्यस्य विवरणं देहीति कोत्सृजादिति न्यूड इत्यस्याकांक्षापूरणाय इह पाठ इति एहीडादिषु तिङंतपूर्वपदोत्तरपदक समुदायानामित्य
र्थः कर्त्तेति उक्तेरित्यादिः जहिजोडमित्याभीक्ष्ण्ये नय आह स जहिजोडः चिन्मात्रमिति अत्रानुनासिकनित्यतानिपातनात् एवार्थमात्रशब्देनात्र समासः मा
यूरव्यंसकादयश्चेति चकार एवकारार्थः तेन एषां समासांतरघटकता नेति परमो मयूरव्यंसक इत्याद्येव ईषद्गुणेति अकृतेत्यस्य स्थाने इदं न दाह ईषद्रक्तमिति
नञ् अकारो निषेधार्थक नशब्देन समासेन त्पुरुषत्वाभावाय तेन नैकधेत्यादौ पूर्वपदप्रकृतिस्वरोन अत्रैव नलोपं वारयितुं लोपविधायके नकारोच्चारणं प्रसिद्धुतर
त्वान्न नत्राव्ययं न तु स्त्रीपुंसाभ्यां नञ् येतु नेत्यव्ययं नेष्ठंति अत एव नलोपो नञ इति सूत्रे नञः सानुबंधकस्य ग्रहणं व्यर्थं नस्येत्येव सिद्धं नच प्रकृपुत्रेदोक

सानुबंधकत्वात् अव्ययेष्वपि नेत्येव पाठ्यं इत्याशयः पामनपुत्र इत्येतद्वारणार्थं तु सानुबंधकः पठित इति भाष्योक्तं संगच्छते इति वदंति च तेषामुभयत्रापि नकारः स्वर्थं
र्थः नैकधेत्यादि नांतरीयकमिति च पृषोदरादित्वात्साधु नलोपो नञोऽस्तीति सिद्धे लोपवचनं साकच्कार्थं तेनाकब्राह्मण इत्यादि सिद्धमिति एके नेनेत्यादौ हि।
त्वबहुव्रीहिवद्भावेपि नानेन लोपः उत्तरपदशब्दस्य मुख्यसमासचरमावयव एव रूढेरित्याहुः तस्मान्नु नञो नुडभावायनाकनासत्ययो नेलोपाभावेन तद्वारणा
य च तस्मादिति ततो व्याख्यानाच्चाचीति षष्ठ्यर्थे सप्तमी सप्तमीनिर्देशस्तु यस्मिन्विधिरिति परिभाषाप्रवृत्तये तदाह अजादेरिति नुकनुनकतः ङमुट्प्रसंगात्
अनश्व इति आरोपितोश्व इति बोधः नञ्तु द्योतकः तत्र तादात्म्यारोपस्य भेदसाहचर्ययोः सतोरेव सत्वेन संसर्गारोपस्य तदभाव एव त्वेनारोपितत्वबोधे साहः।
श्याभावादिनामर्थतो बोध इति नाब्राह्मणपदात्क्षत्रियादिप्रतीतिरित्यत्र विस्तरः अर्थाभाव इति तत्राप्यारोपितो घट इत्येव बोधः भेदेन तदारोपबोधेऽत्यंताभावबो
धस्तादात्म्येन तदारोपबोधे भेदबोधोऽत्र च प्रकरणादिकं नियामकं इति बोध्यं विकल्प्यत इति पूर्वपदार्थप्राधान्येव्ययीभाव उत्तरपदार्थप्राधान्येऽयमिति
भावः न्यायसिद्धेर्थे लिंगमप्याह रक्षोहेति असंदेहादित्यस्य आरोपितः संदेह इत्यर्थः संदेहाभावः प्रयोजनमिति यावत् अव्ययीभावेन हृद्दे हि परवल्लिंगे।
नासंदेहा इत्यनुपपन्नमिति भावः इदंपस्पशायां भाष्ये असंहितमिति संहितासंज्ञासूत्रे वार्त्तिकं द्रुताभिन्नायां मध्याविलंबितायां वृत्तौ संहिताभावः अतिदर्थःप
रे तु भाष्ये नञ्समासपुरुषोन्यपदार्थप्रधानः उत्तरपदस्य धर्मपरतया न विद्यते ब्राह्मण्यं यस्मिन् सोऽब्राह्मणः बहुव्रीहिस्तु तस्य धर्मिपरत्वे चरितार्थः अत एव ना
ञोस्त्यर्थानामुत्तरपदलोपश्चेत्यनेकमिति सूत्रस्थं वार्त्तिकं संगच्छते एतेन तत्वे अपवादत्वादयं बहुव्रीहेर्बाधकः स्यात् इति कैयटोक्तमपास्तं असइत्यादौ सर्वो
द्विकार्यं तु एतत्तदोः सुलोपोऽकोरनञ्समासे इति ज्ञापकात्सिद्धं
अब्राह्मणोऽयमपक्षेऽवर्षा हेमंत इत्यादौ विशेष्यगतलिंगवचनापत्तिर्दोष उक्तः तत्र यद्यपि लिंगदोषो लिंगमशिष्यं लोकाश्रयत्वाल्लोकस्येति परिहर्त्तुं शक्यते तथापि व।
चनेन दोषः स्थितः ततः पूर्वपदार्थप्रधानस्तर्हि भविष्यति अत्रापि पक्षे असइत्यादिसिद्धिः प्राग्वदेव। न च पूर्वपदस्याव्ययत्वेन तदर्थप्रधानस्यास्य लिंग।
संख्याभ्यां कथं योग इति वाच्यं शब्दशक्तिस्वभावाद्व्ययेन नञोऽसत्वभूतार्थाभिधायित्वेपि समासे सत्वभूतार्थाभिधायित्वेन तद्योगसंभवात् येन्नागुणवच

ल॰ शे॰ स॰ ४३ नञ्मात्रयतो लिंगाद्विवत्समासार्थः प्रतियोगितयायतद्वृत्त्याश्रितस्तत्स्थलिंगादिस मासस्य भविष्यति एतेनात्रपक्षेऽवर्षा हेमंत इत्यादौ हेमंताद्याश्रयगतलिंगसंख्याप्रसंगः।
इति कैयटोक्तमपास्तं अभावेन प्रतियोगिनोपि स्वज्ञानीयाश्रयणे जतस्याप्याश्रयत्वात्स्वघटितसमासघटकेनोपस्थित्या च तस्यैवाश्रयस्य ग्रहणौचित्यात् अन्यथा तद्दोषदू
षितपक्षोऽर्द्धमाश्रितेपि पक्षे तद्दोषानुवृत्तौ भाष्यस्य निर्दलतापत्तिः एतत्समकक्षतयाऽथवा पुनरस्तु उत्तरपदार्थप्रधान इत्युक्तेरसंगतिश्च त्वदुक्तत्याहि अस्तु नञुत्तरपदार्थे।
तिवक्तुमुचितं एतत्पक्षद्वयेप्यनेकमित्यादावेकवचनासिद्धिं वस्य माणांमनसि निधायोत्तरपदार्थप्रधानत्वं सिद्धांतितं तत्पुरुषस्योत्सर्गतस्तत्प्रधानत्वाच्च अत्र पू
र्वपदार्थप्रधानत्वपक्षेऽपवादत्वेनाव्ययीभावस्य बाधनात् अत्राव्ययीभावाभावोऽवश्यं स्वीकार्यः अन्यथाव्ययीभावासिद्धिरूपदूषणानुपन्यासेन भाष्यस्य न्यूनता।
पत्तिः तस्मादत्यंताभावार्थकनञः क्रियादिप्रतियोगिकाभावबोधकत्वेनोत्तरपदार्थे नानन्वयात् सामर्थ्येन नाव्ययीभावोऽमक्षिकमित्यादौ नसंदेह इत्यादौ

संदेहस्य गुणत्वेन भवत्येव तदभावबोधो नञा एतदेवाभिप्रेत्य भाष्ये उक्तं प्रसज्यायं क्रियागुणौ ततः प्रतिषेधतीति असंदेह इत्यादौ चारोपितः संदेह इति भेदवारोपज्ञा
नात् दत्यंताभावप्रतीतिः किंचार्थाभावशब्देन ञो घटकतया स्वसूत्रगृहीताव्ययतयानेन नाव्ययीभावः सूत्रगृहीताव्ययेनाव्ययमिति समासाभावस्य तत्रसूत्रे उपपा
दितत्वात् अनचेर्द भाष्यमपिमानं असंहितमित्यत्र संधानं संहितमिति भावेक्तः आरोपितं संधानं आरोपितः परः सन्निकर्ष इत्यर्थे तदभावात् संहितासंज्ञानप्रा
प्नोतीत्यर्थ इति न तदसंगतिः संहितशब्दः परः संनिकर्ष इति सूत्रबलात् स्त्रीलिंगो वार्त्तिकप्रामाण्यात् क्लीबोपि अत एव संहितवदिति प्रातिशाख्य तद्भाष्ययोः प्र।
युक्तं अत एव परः संनिकर्षः संहिता चेद्द्रुतायामसंहितमिति वार्त्तिकं परः संनिकर्षः संहिता चेद्द्रुतायां वृत्तौ हि संहितासंज्ञा न प्राप्नोति इति शेषपूरणेन व्याख्या।
यद्द्रुतायामेव हि परः सन्निकर्षो वर्णानां नाद्रुतायामित्यनेनासंहितमित्यंशेन र्थतो हेतुत्वेन व्याख्यातो भाष्ये न प्राप्नोतीत्यंशस्य तद्व्याख्यानत्वे त्वसामर्थ्यात्समासानापत्तिः त्व
द्द्रुत्याहि संहितासंज्ञाभावः प्राप्नोतीत्येवं वदेत् वार्त्तिककृतो हेतुत्वकथनेन न्यूनता चेत्याहुः प्रसंगादाह नञो नलोपस्तिङीति तिङंतेन समासाभावादप्राप्तौ वचनं अ
पचसीत्यस्य कुत्सितं पचसीत्यर्थः अत एव नञ्समानार्थोऽशब्दोऽव्ययेष्वप्रामाणिक इति बोध्यं नञासमासे अनेकधेत्येवस्यादत आह नशब्देनेति एकशब्दस्ये एम॰
तिभावस्ततो धाप्रकारे अकारेऽनेकसंख्यात्वप्रतीतेः एवमेव नमेरुनाराचनांतरीयकादयः साधवः शत्रंत इति पातेः क्विपि निपा रे तनाच तु गित्युभेव नस्यत्यादि ४५

तिसूत्रेवृत्तिः नासत्याइत्येतानि चत्वारि पृथक्पदानि एते निपात्यंत इत्यर्थः समासे हि नवेदो नसत्यैति स्यात् नासत्या इति बहुवचनं वैचित्र्यार्थं न तु बहुवचनांतस्यैव साधु
त्वार्थं नासत्यावश्विनौ दस्रौ इत्यमरविरोधात् अश्विनोरेवायं साधुत्वे नान्यत्रानसत्य इत्येवेति हरदत्तः नमुचिशब्दे औणादिकः किप्रत्ययः। स्रीयतेरिति पाठे स्री
षृहिंसायामिति दिवादिस्तस्याकृतिगणत्वात् क्षियतेरिति ह्रस्वपाठे क्षि निवासगत्योस्तुदादिः एषु नञ् नैव समासः पूर्वपदप्रकृतिस्वरार्थः निषेधार्थकनशब्दांत एभा
वाच्च कुगतिप्राकुशब्दः पापार्थोऽव्ययमेवात्र गत्यादिसाहचर्यात् तेनाव्ययपूर्वपदप्रकृतिस्वरः समर्थेनेति समर्थपदं तृतीयया विपरिणम्यत इति भावः ऊर्यादि
क्रियायोगइति उपसर्गा इत्यतस्तदनुवर्तते अतएव संज्ञाविधावपि च्विडाजंशेन तदंतविधिः ऊर्यादयो निपाता भवंतीति निपाताः संतः क्रियायोगे गतिसंज्ञा इत्यर्थः का
रिकाक्रियेति मर्यादास्थितियत्नरूपेत्यर्थः धात्वर्थनिर्देशे ण्वुल् दासीश्लोकवाचिनस्तुन ग्रहणं व्याख्यानादिति भावः अनितिपरं किमिति ते प्राग्धातोरित्यस्य सं
ज्ञानियमार्थत्वे व्यर्थमिति प्रश्नः प्रयोगनियमार्थत्वाभिप्रायेणोत्तरं भाष्यकृतानुसंज्ञानियमार्थत्वमाश्रित्यैवं छंदसि परेऽपि व्यवहिताश्चेति सूत्रद्वयं च प्रत्याख्या
तं अतएव सुकटंकराणि स्वाकंभवमित्यादि भाष्यप्रयोगः संगच्छते कटंसुकराणीत्यादि त्वनभिधानेन वारणीयमत्र पक्षे खाडिति एतद्विशेषणाभावे प्रयोग
नियमशास्त्रावेवं प्रयोगोच्छेद एव स्यादिति भावः अनितिपर इति चात्र बहुव्रीहिरनितावितिव कव्ये परग्रहणं तु अनुकरणाकृतावनितिपरत्वे ... षड्
षडिति कृत्वा ... व्यवहितेपि निषेधसिद्धेरेतद्दलादेवत्ते प्रागित्यादावपि गत्याकृतिनिर्देशः एतत्प्रकरणे आकृतिपरतायां तस्य तात्पर्यग्राहकत्वादत एवाभ्युद्दर
रित्यादावुभयथा: पूर्वंप्रयोग इति दिक् आदरा अनादर इति बहुव्रीहिरतः पाखंडिनमसत्कृत्येत्यादि सिद्धं तत्पुरुषे हि यत्रादरप्रसक्तिस्तदीयानादर एव स्यात् गुरुम
सत्कृत्येत्यादौ कणेमनसी शब्दस्वरूपइति विशेष्यं कणेहत्येति परावरयोगे चेति क्त्वा पुरोव्य पुरोभूय पुरोगत्येत्यप्युदाहरणं कृञ्योगे एवेति नियमाभावात्
अव्ययपदमनुवर्तते इत्याशयेनाह मांतमव्ययमिति तेन कांडमस्तंकृत्वेत्यत्र न अस्तं क्षिप्तं जलमस्तं गच्छतीति प्राग्रीश्वरादित्यधिकारान्निपातत्वेऽव्ययत्वा
...र्मतिलुक् स्यादिति भावः सप्तमीनिर्देशेपि तस्मिन्निति परिभाषा न प्रवर्तते क्रियायोग इत्यनुवृत्तेः एतेनानुस्वारव्यवधानात् कथमत्र प्राप्तिरित्यपास्तं उ
पाजे न्वजेशब्दो एदंतौ विभक्तिप्रतिरूपकौ निपातौ दुर्बलस्य बलाधाने वर्तेते व्य थे इति च्वांते तु पूर्वविप्रतिषेधेन नित्यैव संज्ञेति भाष्ये स्पष्टं इदं प्रायिकं अतएव

नृत्संस्कृतोतीत्यादौ च्व्यर्थाभावेपिन्ननेनगतित्वमाहुः अन्येतुसउर्यादौस्वरादौचतिंविकल्पफलसिद्धिमाहुः मोतत्वमिति गतिसंज्ञासंनियोगेनलवणमुरसंशीतमुद
कमाद्रमितिपञ्चानामित्यर्थः उरसिमनसीति विभक्तिप्रतिरूपकौनिपातौ मध्येपदे विभाषाकृञीति अनत्याधानइतिचानुवर्त्तते एतत्रचएषामेदंतत्वंनिपात्यते
सप्तमीतुनेमध्येपदेकृत्वावाचेनियम्येतिचप्रत्ययेनतस्या अनन्वितत्वात् अनत्येतिकिं हस्तिनःपदेकृत्वाशिरःशेते नित्यंहस्ते उदाहरणेनत्पुरुषेकृतोत्व
लुक् उपयमनेकिं हस्तेकृत्वाकार्षापणंगतः प्राध्वं इदंमांतमव्ययंबंधनेनानुकूल्येवर्त्तते जीवनोपायः सुपुरुषइति क्रियायोगाभावादगति
त्वं अत्रेति अत्रव्यवस्थयासमासप्राप्तौव्यवस्थार्थोनोतिभावः कर्मप्रवचनीयानामिति सासंज्ञातुप्रतिस्तवनमित्यादौषत्वाभावाद्यर्थेतिबोध्यं भाष्येतुकर्मप्रव
चनीयानांप्रतिषेधः वृक्षंप्रतिविद्योतनेत्यवेतानांचप्रतिषेधोवक्तव्यः आमंद्रैरिंद्रहरिभिर्याहिइत्युक्तासिद्धंतुकाङ्सुदुगतयःप्रादयःकार्थेइत्यनेनेदंव
चनद्वयमपिप्रत्याख्यातं एतदेवसौनागैःविस्तरतरकेणपठितंस्वतीपूजायांदुर्निंदायांआङीषदर्थेकुःपापार्थेप्रादयोगताद्यर्थेइत्यादिकुक्तं एवंचेजासकत्व
कत्वेनकर्मप्रवचनीयेप्राप्तिरेवनेतितदाशयः तत्रोपपदं अयमधिकारः अत्तएवामैवतुल्यविधानमित्यादिसंगच्छतेयन्नामैवंविधीयतेतेनयत्रोपपदंसं
ज्ञाविधीयतइतितदर्थोतकर्मण्यणित्यादौकर्मणीत्यादिःसौत्रीप्रथमार्थेसप्तमी धातोरणभवतिकर्मचोपपदसंज्ञमिति तदर्थः अत्रसूत्रेसप्तमीपदंतदं
तपरंतत्स्थंतद्वाच्यंतदाह सप्तम्यंतेपदेइति महासंज्ञयाप्रथमार्थेसप्तमाबलेनचलब्धमर्थमाह तद्वाचकंपदमिति पदमत्रविभक्त्यंतंस्तवकर्णयोरित्यादौसुपी
त्यधिकारात्प्रकृतिकेसुबंतेलक्षणा अन्यथोपपदमिति

महासंज्ञालब्धोपपदसंज्ञकसुबंताभावात्तंबेरमइत्यादौसमासानापत्तिः समासविधायकेउपपदप्रकृतिकसुबंतग्रहणेसुप्यजातावि
तिणिनौराजदर्शीत्यादौसमासानापत्तिः तत्रहिसुबंतमेवोपपदंनतुतत्प्रकृतिकमात्रत्साथद्वयपरत्वेगौरवं महासंज्ञाविरोधश्चसुप्यजातावित्यादिविषये
सुबंतस्यसप्तम्यंतपदवाच्यत्वरूपंतत्स्थत्वमादायोपपदत्वंबोध्यंविभाषाग्रेप्रथमेत्यादौसुपीत्यधिकाराभावेपिमहासंज्ञाबलात्तेषांतप्रकृतिकसुबंतेलक्षणाबो एम
ध्या अतएवोपपदमितिसूत्रेऽतिङ्ग्रहणादनयोर्योगयोः सुप्सुपेतिनिष्टत्तमितिभाष्येउक्तं उपसमीपेउच्चारितंपदंउपपदंसामीप्यंचसप्तम्यंतपदघटितसूत्र १६

विधेयप्रत्ययप्रकृत्यर्थेऽन्वयित्वमेव न त्वानुपूर्व्या व्यवधानं कर्मण्यण् सूत्रे उष्ट्रप्रणाय इति भाष्योदाहरणात् आतो नुपसर्गे इत्यत्रानुपसर्गग्रहणाच्च गुरुनमस्कारो
ति कन्यामलंकरोति इत्यादौ हिमवंतं शृणोती त्यादावविवानभिधानान्नाण् अभिधानलक्षणाः कृत्तद्धितसमासा इत्यकर्तरि चेति सूत्रे भाष्योक्तेः नन्वेवं तत्र ग्रहणं व्यर्थं
प्रकृति धात्वधिकारविषयता त्वाधिकारेणैव सिद्धेत्यत आह अस्मिंश्चेति अनेनोपपदसंज्ञासंनियोगशिष्टत्वं प्र त्ययविधेर्बोधयति अन्यथा चान्व यशिष्टत्वसंभा
व्येत प्रातिपदिकार्थे सप्तम्यामेवास्य प्रवृत्त्या भुवो भाव इत्यादौ न प्रवृत्तिः तद्व्यवस्था त्वनुनासिकत्वादिवत्स्थानुरोधेनैवेति बोध्यम् उपपदं सुबंतमिति महासंज्ञा
वलल्लभ्यं अत एव राजयुध्वेत्यादौ नलोपः सधानाहारकोव्रजतीत्यत्र अतिङिति बहुव्रीहिणा तिङन्ताघटितः समास इत्यर्थेन तदप्रवृत्तेस्तदाह अतिङ् इत्यत्र समास
इति कथमपि तिङन्ताघटित इत्यर्थः समास इति तत्संज्ञकः समुदाय इत्यर्थः कुंभश्रसिति नन्वंतरंगानपीति न्यायेनेत्संज्ञालोपयोर्लुका बाधादिदमयुक्तमिति
चेन्न इत्वलापवाधाबाधयोः फलेविशेषाभावेनान्तरङ्गानपीत्यस्याप्रवृत्तेः । अलौकिकं प्रक्रियावाक्यमित्यसमा
सप्रवृत्तियोग्यं लोके प्रयोगानर्हमित्यर्थः हरिङ्ञीत्यत्रापीत्संज्ञायुत्तरमेव समासो लोके प्रयोगानर्हत्वस्योभयत्रापि सत्त्वेनाविशेषात् कृत्संज्ञालोपमेवोच्चारितमित्य
लं कृद्योगलक्षणा चात्र षष्ठी न चांतरंगत्वाद्द्वितीयाप्रकल्प्यापवादविषयमुत्सर्गप्रवृत्तेः अत्र षष्ठीसमासो न उत्तरपदे विभक्त्युत्पत्तेः पूर्वमेवात्र प्रवृत्त्यांतरं
गत्वात् कारकषष्ठीत्वेन षष्ठीसमासस्यापि ततः पूर्वप्रवृत्तौ तु अलुकः अस्य नित्यत्वेन तत्कृततत्पुरुषसंज्ञाप्रयुक्तकार्याभावाभावेप्यतत्कृतोत्संज्ञाप्रयुक्तस्वत
स्यानपगमेनादोषात् एकस्या एव संज्ञाया उभाभ्यामपि प्रवृत्त्याऽविरोधेन युगपदेवोभाभ्यां साम्य इष्टं चेदमत्र भाष्ये एवं च द्वितीयाश्रितेत्यादिसमासोप्युत्तरपदे सुबु
त्पत्तेः प्रागेव अत एव कारकेति सामान्यत एवोक्तं भाष्यकृता च तदंशे प्रमाणेनोपन्यस्तं परिभाषा न कर्तव्येति प्रकृतसूत्रभाष्यं तु विशिष्टाया अकर्तव्यत्वपरमे
व अत एव भाष्ये प्रत्याख्यानोत्तरमपि गतिकारकेति समासवचनादित्युक्तं तेन कारकांशे वाचनिकत्वमेव बोधितमिति दिक् माभवानिति समासे सति व्यवहितप्र
योगो न स्यादिति सूचयितुं भवानिति इदमुपलक्षणं कोरको व्रजतीत्यादेर्भाष्योक्तस्य किंच माङ उपपदत्वे महासंज्ञाकरणबलात् माकदाचिद्वर्णो भूदित्येव स्या
दिति सूत्रस्थभाष्यप्रयोगे माकदाचित्प्रवृत्तिर्भूदिति तद्धितार्थेति सूत्रस्थभाष्यप्रयोगे हि त्रिपदव्यवधाने प्रयोगो न स्यात् यथा कर्तुं देवदत्तो घटं ग्रामं व्रजतीति न प्रा

ल॰शे॰ सैषावश्यकेति दिक् अतिङ्ग्रहणमिति नच कारकोगतेत्यत्र सुबंतोपपदस्य समासव्यावृत्तये तिङन्तार्थक्रियाबोधकाघटितइत्यर्थकं तदिति वाच्यम् तस्य इ
स॰ संबोधितया तिङन्तार्थत्वाभावेन तेन तद्वारणस्याशक्यत्वात् किंतु गतादेर्द्रव्यवाचितया क्रियावाचकोपपदत्वाभावेन ण्वुल एव तत्राप्राप्तेः क्रियावाचकं शब्दम
४५ पेक्षे क्रियायां साध्यमात्रावस्थाया एव ग्रहणस्य गतिकारकोपपदादिति सूत्रे प्रकृतसूत्रे च भाष्ये ध्वनितत्वात् प्रकृतसूत्रे उपपदमक्रियेति न्यासेऽक्रियेत्य
स्येदं प्रत्युदाहरणमाशंक्यास्य क्रियावाचित्वाभावाद्दूषितं तत्र क्रियावाचित्वाभावादत्र प्रत्युदाहरणत्वेन तुमुन् तु भवतीत्यस्यान्याय्यत्वात् नच धातोः क्रियावा
चित्वेन तन्निबंधनस्तुमुन्स्यादेवेति वाच्यम् उपपदमिति महासंज्ञया तुमुन्विधावपि पदत्वपर्यंतं निवेशनात् तस्मात्तत्र तुमुन्ण्वुलोरसाधुत्वमेव भाष्यतात्पर्यं
अर्थमात्रग्रहणेन तु गुणीभूतादेरपि ग्रहणमिति गतपाकादियोगेपि कारकं विभक्तिकृत्त्वसुजन्त्वादौ नासाधुत्वं भवत्येवेति भाष्यप्रदीपोद्योतेषु स्पष्टं कारकोव्रजति
तरामित्यादेस्त्वनभिधानमेवेति भावः सुपेत्येतदिति सुबित्यस्याप्युपलक्षणमिदं किंच कारकोव्रजतीत्यस्यैव भाष्ये प्रत्युदाहृतत्वेन तदप्रवृत्तेः सुबिति प्रथमान्ता
नुवृत्त्यैव सिद्ध्या तद्वैयर्थ्यमिति प्रथमान्तनिवृत्तिरेव तेन बोधयितुं युक्ता परिभाष्ये प्रत्युदाहृतत्वेन तदप्रवृत्तेः सुबिति प्रथमान्तानुवृत्त्यैव सिद्ध्या तद्वैयर्थ्ये
मिति प्रथमान्तनिवृत्तिरेवानेन बोधयितुं युक्ता परिभाषाऽकरणलाघवानुरोधेन तु भाष्ये सामान्यापेक्षज्ञापकमाश्रित्योभयोर्निवृत्तिरुक्ता पूर्वसूत्रेपीति तत्रगत्यं
शेऽतिङित्यस्य संबंधफलाभावेन तिङन्ताघटितः समास इत्येवं समासविशेषणतैव अत एव प्रपचतितरामित्यादौ न गतिसमासः किंतूदात्तवता गतिमता च
तिङेति वार्तिकेन समासः तत्रातिङन्तस्य तिङ्घटितेनेत्यर्थः सहेति योगविभागेन त्वात्तत्रार्थाधिकारानुरोधेनात्रापि अतिङन्तः समास इति व्याख्यातं अत एवान
वक्लृप्त्यमर्षयोरिति सूत्रे किंवृत्तस्यानधिकारादकिंवृत्ते ग्रहणमनर्थकमित्युक्त्वा सामर्थ्यादुपपदसंज्ञार्थेन हीत्याशंक्यातिङिति प्रतिषेधात्संज्ञानर्थक्यमित्युक्तं संग
च्छते अतिङित्यस्योपपदविशेषणत्वेन तदसंगतिः स्यादेव उपपदमतिङन्तेनेति तु नार्थः अतिङिति ज्ञापयति अनयोर्योगयोर्निवृत्तं सुप्सुपेति केनेदानीं समासः सुम
र्थेनेति भाष्यासंगतेः लुप्तप्रतीयांतत्वकल्पनेमानाभावाच्च भाष्यरीत्या प्रत्युदाहरणाभावाच्च नचैवं नरवं नेतद्वारणाय तत्र तस्य चारितार्थ्यं कथं तत्र सुपेत्यस्यासंबंधा एम॰
त्तस्य ज्ञापकत्वमिति वाच्यं उपपदमिति सूत्रसंबंधेनैवानेन तिङन्तव्यावर्तकेन प्राचीनपठितपरिभाषानुरोधेन सूत्रद्वयेपि सुपेत्येतदसंबंधज्ञापनात् तदुक्तं भाष्ये १७

अतिङ्ग्रहणं ज्ञापयति अनयोर्योगयोर्निवृत्तं सुप्सुपेति तत्र पूर्वसूत्रे गत्यंश एव तत्संबंधः परिभाषानुरोधादेवेतदाह तथा चेति कारकांशेप्येकदेशानुमत्येष्ट इति
गम्यते भाष्याच्च कर्तृकरणे इति सूत्रविहितसमासो बहुलग्रहणात्क्वचित्सुबुत्पत्त्यनंतरमपि यथा साहितस्य धनक्रीतेत्यादौ प्राक्सुबुत्पत्तेरिति स्त्रीप्रत्ययोत्प
त्ते प्रागित्यपि बोध्यं अश्वक्रीतीति अश्वेन क्रीतेति करणस्य क्तेन समासः क्रीतात्करणपूर्वादिति ङीष् सुबंतेन समासे पूर्वं टाप्यदंतत्वाभावात्तन्न स्यादिति भा
वः व्याघ्रीमपि आङो घ्रशब्देनैव रा घ्रशब्देन गतिसमासः कच्छपीत्यत्रापि सुपीति योगविभागात्केकच्छेपिबतीत्यर्थे उपपदसमासः अमैवेति तुल्यविधा
नमित्यध्याहारलब्धं संज्ञायास्तुल्यविधानत्वमाश्रित्य तत्संज्ञकस्य तुल्यविधानत्वमुक्तं येनामेव विधीयते तेन यस्योपपदसंज्ञा विधीयते तदुपपदमव्ययेन
न समस्यते नान्येन तुल्यविधानमित्यर्थस्तत्फलितमाह तदेवेति कालादेरग्रेप्रभृतेश्चामेव तुल्यविधानत्वाभावान्न दोषः अमिति णमुलः खमुञोः सामान्यग्रहणं
तेन स्वादुंकारमित्यप्युदाहरणं तृतीयाप्र वासमस्यंते इति यद्यप्युपपदनिमित्तकाद्धि घोः समर्थपरिभाषोपस्थिते रुपपदसंज्ञासूत्रे भाष्ये उक्तत्वेनोपपदकृदंतयो
व्यपेक्षादुरुपपादा कृतोऽसाधुत्वापत्तेः अत एव महान्तं कुंभंकरोतीत्यत्र सविशेषणत्वेनासामर्थ्यान्नाणिति तत्रोपपदमित्यत्र भाष्ये स्पष्टं विशिष्टस्य तु नोप
पदसंज्ञाऽपदत्वात् तथाप्येकार्थीभाव एव वाग्रहणात्संज्ञाभावोऽत्र यथा गंगापारमित्यत्राव्ययीभावत्वाभावः न च संज्ञापाभावाभावविषये तेष्विति भाष्यमहाविभा
षयेति शेषः एवं च महता मूलकेनोपदंशं भुंक्ते इत्यसाध्वित्याहुः उपदंशे मूलकादेरर्थकर्मत्वस्यापि सत्त्वात्सामर्थ्यं विभक्तिस्तु प्रधानक्रियानुरोधित्वात्या
त्वा च तृतीयेवेति निरूपितमन्यत्र त्वा च क्तेति तृतीयांत अलंकृत्वेति अलंखल्वोरिति सूत्रमुपदंशस्तृतीयायामित्यतः पूर्वमिति भावः अयं तत्पुरुषासाधारण
समासांतानाह तत्पुरुषस्यां द्व्यंगुलमिति तद्धितार्थेति समासः द्वाह्वार्थमिति ब्रह्मणोऽन्हो वयवीभूतामानुषी रात्रिरित्याद्यर्थे षष्ठीतत्पुरुषाद्यनभिधानमिति भा
वः सर्वरात्र इति पूर्वकालैकेति समासः पुंवत्कर्मधारयेति पुंवत् सर्वनाम्नो वृत्तिमात्रे इति वा अतिराजीति उत्तरपदावयवत्वस्य भाष्यासंमतत्वेन राजेत्यनुपसर्जने न त्वात
ङीप् अह्नोऽह्न इति समासांतविधेरनित्यत्वान्नटच् अत एव द्विगोर्वेत्यनुवर्तमाने रात्र्यह्नः संवत्सराच्चेति चरितार्थे समासांते हि रात्र्यह्नं तद्धिगोरप्रसिद्धेरिति बो
ध्यं अनित्यत्वादिति अत एव समासांतप्रकरणे सानेति कृपास्तत्रे भाष्ये उक्तं मद्रराज्ञीति टचि भस्याढे इति पुंवत्त्वे टिलोपे मद्रराजीति स्यादिति भावः अत्रेदं अ

त०शे०
स०
४६

नेइत्येवपूर्वपदविशेषणतयासामानाधिकरण्येनान्वयः देत पूर्वपदेत्यर्थलाभेंतग्रहणंस्पष्टार्थं अह्नइतिनोनानुकरणात्षष्ठी द्व्यन्हेति द्वयोरन्होर्भवेत्यर्थः इदं
नद्धितार्थद्विगोर्विशेष्यनिघ्नत्ववादिनांमते ।वस्तुतोस्यस्त्रीत्वमेवनास्ति।रात्राह्नाहाःइतिपुंस्त्वेनबाधात् नचेदंसूत्रंरात्राह्नाहादिशब्दघटितसमासमात्रनिमित्तलिंगस्य
तरंगस्यैवबाधकंनतुबहिर्भूततद्धितार्थनिमित्तलिंगस्यापीतिवाच्यं सूत्रोपस्थितरात्राह्नादिशब्दार्थविशेष्यत्वप्राप्तस्यैवबाधापत्त्याबहिर्भूतसमाहारविशेष्य।
त्वप्राप्तस्यबाधानापत्तेः नचपुंस्त्वाधिकारे ऽन्हाहांताः खेडभेदारात्रांताःप्रागसंख्यकाइत्यनेनतत्समर्थिताः प्राद्यलंप्राप्तापन्नपूर्वाःपरोपगाःतद्धितार्थद्विगुःसंख्यासर्वनामतदंतका
इत्यमरोक्तेनपरंविरोधशेषंतुज्ञेयाशिष्टप्रयोगतइत्युक्तेरन्हाहांताइत्यनेनप्राप्तस्यपुंस्त्वस्यतद्धितार्थद्विगुरितिपरोपगत्वेनपरत्वाद्बाधइतिवाच्यंकोशस्यलोकव्याकरण
सिद्धलिंगानुवादकत्वात् व्याकरणैकवाक्यतयातद्धितार्थद्विगुरित्यत्ररात्रान्हाहांतातिरिक्तस्यैवग्रहणात् अन्यथाप्राद्यलंप्राप्तेत्यनेनापिपरत्वाद्बाधेप्राह्णःप्रगत
मह्नःपराह्णइत्याद्यसिद्ध्यापत्तेरितिदिक् सुप्प्रादिषुच तत्पुरुषातिरिक्तोहन्शब्दांतःसमासःसर्वोपिसुप्प्रादौयुवादिरपिसुप्प्राद्यंतर्गणएवेतियुवादिषुपाठइति।
भाष्यप्याविरोधस्तद्ध्वनयन्नाह अहंतानुकरणेति तत्पक्षेषष्ठ्याः स्थानेव्यत्ययेनप्रथमा स्पष्टार्थमिति समाहारेत्यस्यवृत्त्यभावात् पुण्याहमि पुण्यसुदिनाभ्यामि
तिक्लीबत्वं अग्न्याख्या अग्नेभवोऽग्नेरमुख्य अग्न्यात्यादिकं देवदत्तस्योदेवदत्तोरः उपानसमिति प्रादिसमासः अतिश्वइति ततोधिकवेगवानित्यर्थः सेवेति नौ
चेत्यर्थः आकर्षश्वइतिपंचांगुलोधान्यादिकर्षकःकाष्ठविशेषआकर्षः उपमानात्किं शुनेनिष्क्रांतोनिःश्वा फलकसक्थमिति मयूरव्यंसकादित्वात्समासः
नावो मंडूकप्लुत्यातद्धितलुकीत्यनुवर्ततेपरवल्लिंगतयास्त्रीत्वंप्राप्नोतीत्यतआह क्लीबत्वमिति द्विगोरिति खारीशब्दांतात्द्विगोरित्यर्थः अत्राप्यतद्धितलुकी
त्येवतेनद्वाभ्यांखारीभ्यांक्रीतोद्विखारीरित्येवउदाहरणे अर्धखारमित्यादौक्लीबत्वंप्राग्वत् अर्द्धखारीति एकविभक्तावषष्ठ्यंतेतिवचनादुपसर्जनत्वाभावेना
नह्रस्वः ह्रस्वपाठेतुलोकतोनपुंसकत्वेनपुंस्वद्ह्रस्वत्वं अंजलिभ्यामिति तत्परिमितधान्यादिनेत्यर्थः अस्यपरिमाणत्वात्तद्धितोः ध्यर्द्धेतिलुक् जनपदेभवोजा
नपदः भावप्रधाननिर्देशस्तदाह समासेनेति प्रत्यासत्तिलभ्यमेतत् कस्येत्याकांक्षायांसन्निधानाद्ब्राह्मणइतिलभ्यते सुराष्ट्रइति अधिकरणस्यशेषत्वविव राम०
क्षयाषष्ठीसमासोत्रबोध्यः सप्तमीतियोगविभागस्तुभाष्यानारूढः जानपदेतिकिंदेवब्रह्मा नारदः कुब्रह्मइति ब्राह्मणपर्यायोब्रह्मशब्दःश्मशानाद्यधिकृतो १८

त्र्यंशेतिवार्थः तत्रापिमूर्तित्रयस्मृतायास्तत्रेषुप्रसिद्धत्वात् आन्महतः अहीष्यतइति एवंचसमानाधिकरणपदं व्यर्थमितिभावः। महाबाहुरिति बहुव्रीहिः ननूत्तर
सूत्रे द्व्यष्टनोरेवग्रहणात् एकादशेत्यत्रात्वं न स्यादत आह आदि तीति योगविभागस्यभाष्यानारूढत्वादत आह निर्देशादेति अन्येषामपिदृश्यतइतिदीर्घ।
त्वमितिपरे इत्ते आत्वमिति आन्महतइत्यत्रलिंगविशिष्टपरिभाषाभावस्यकृत्या सूत्रेभाष्ये उक्ततयापरत्वात्पुंवत्वंबाधित्वात्वंस्यादितिनशंक्यमितिभावः
महद्भूतश्चन्द्रमाइत्यादौ उच्यते गौणत्वान्नात्वमितिभाष्ये स्पष्टं महतोमहत्याचेति पुंवद्भावश्चेति चोन्वाचयइतिभावः समुच्चये चशब्दः पुंवत्वसंनियोगेनैव।
चात्वं अतएवभाष्येस्त्रियामेवादोहृतमितिमतान्तरंकैयटेस्पष्टं अष्टनः क·हविषि किं अष्टानां कपालानि अष्टकपालानि बहुव्रीहौ न तत्पुरुषे एवसमासान्तः
सुलभइतिनयत्नो बहुव्रीहावप्यच् समासान्तः सुलभइतिभावः एतेनास्यसाधारणत्वात् बहुव्रीहावपीति चिंत्यमित्यपास्तं योगविभागेस्यभाष्ये ऽदर्शना।
दाह समाहारइति एवं च गोरतद्धितेतिटजितिभावः एकादिनवान्तानां द्वंद्वतत्पुरुषयोश्चार्थे द्वंद्वइतिसूत्रस्थभाष्यध्वनितानभिधानादाह द्वादशेति द्वाविं
शतिरिति समाहारद्वंद्वे स्त्रीत्वंलोकात् इतरेतरयोगस्तुनतत्सूत्रभाष्येएव ध्वनितानभिधानात् द्व्यधिकाविंशतिरिति तत्पुरुषो वा द्व्यधिकेत्यत्र संख्या।
संख्येयं वान्यपदार्थः एकादीनां वृत्ति विषये विंशत्यादीनां च सर्वत्र संख्यापरत्वस्यापि सत्वात् तेन द्वाविंशतिर्गवां द्वाविंशतिर्गाव इत्युभयं सिद्धं तत्र द्वंद्वे सं
ख्येत्यनेन पूर्वपदप्रकृतिस्वरत्वं तत्पुरुषे समासान्तोदात्तत्वमिति बोध्यम् भाष्ये द्व्यधिका विंशतिर्द्वाविंशतिरितिसमानाधिकरणसमासे स्वरो न सिध्य
तिसंख्येत्यस्य द्वंद्वविषयत्वादस्तु तर्हि द्वंद्व इत्यस्य द्वंद्वोपीत्यर्थः स्वरो न सिध्यतीत्यस्यसोपोष्टः स्वरो न सिध्यतीत्यर्थइतिकेचित् परे तु भाष्ये समानाधिकर
णसमासोतिरेकदेशिनः सा च स्वर एसिध्या दूषिता ततोस्तु तर्हि द्वंद्वइतिसिद्धान्तयुक्तिः तस्मादितरेतरयोगद्वंद्व वत्तत्समानाधिकरणतत्पुरुषस्याप्यनभिधा
नेएव भाष्यस्वरसइदमप्यन्वाख्यानोपायमात्रं वस्तुतः संख्यान्तराणि निर्वृत्तावयवान्यैवैकविंशत्यादीनि अतएवतेभ्यः कृत्वसुजादिसिद्धिः अन्यथास्वागमसुद
येस्वागकार्यभाववदिहापिसंख्याकार्यं न स्यादित्याहुः त्रयसितिसान्तादेशोव्याख्यानादत आह त्रयस्यादिसुजर्थे इति संख्यायाव्ययेतिसमासः सुजर्थेनेतिपाठेतदर्थेन
त्रिशब्देनेत्यर्थः व्यवहितत्वाद्अष्टनःसंबंधायसर्वेषामिति एकादिश्च अत्रैकशब्दःसंख्यावाच्येवप्रसिद्धत्वात् तृतीयेतीति सहेतियोगविभागात् मयूरव्यंसकादित्वा

लशे· द्वितितु न पाध्मा धास्विति धाप्रत्ययएव व्याख्यानात् तेन षड्धातीति षड्धेत्यत्र न आतो नुपसर्गे इति कः स्त्रियां टाप् धासु वेत्यनेनौत्वस्यैव विकल्पः तेन षड्ढं
स· जित्यमेव तेनैत्वाभावेपि षड्ढेत्येवेति कैयटः उत्वपक्षे लित्यं ष्टुत्वमिति तदनुसारेणाह षड्धेति अत्रैकैयटोक्तं युक्तं भाष्येपि षड्ढेत्येव पाठस्य प्रायेण।
५७ पलंभात् षोडन्निति बहुव्रीहावयसिदं तस्येति दत्रादेशः परवल्लिंगं समहारे सन पुंसकमित्यस्य बाधकत्वात् इहपदमितरेतरयोगविषयं तत्रोद्भूतावय
वस्य समुदायस्य तत् इहार्थेन याऽवयववल्लिंगेनानियमे प्राप्ते नियमार्थमिदं तत्पुरुषे त्वेकदेशिसमासे पूर्वपदार्थप्रधाने परवल्लिंगं प्राप्ता विध्यर्थमिदं
द्वन्द्वतत्पुरुषयोरिति षष्ठ्यंतमर्थपरं तेनानुप्रयोगेपि तल्लिंगं शब्दार्थयोरभेदाच्च सूत्रे तथा निर्देशस्तदाह परपदस्येवेति परपदार्थस्येव समासार्थस्य लिंगमित्य
र्थः द्विगुप्राप्तेति द्विगुग्रहणमेकविभक्तीति सूत्रस्थ कैयटानुरोधेन वस्तुतस्तदर्थे परवल्लिंगमित्यस्य परपदास्थिप्राप स्थितं पूर्वपदप्रयुक्तलिंगमात्र।
बाधकत्वेन तन्निवृत्त्यर्थो द्विगावेतदप्राप्तेः समाहारद्विगौ नपुंसकत्वमेव प्रायेणेष्यते अत एव भाष्ये निषेधवार्तिके द्विगुग्रहणं नोक्तं यत्तु अलंशब्देन पर्या
दयोग्लानाद्यर्थे इति समास इति तन्न तस्य नित्यसमासत्वेनालं कुमार्यै इति भाष्योक्तविग्रहानुपपत्तेरत आह अत एव ज्ञापकादिति अत एवालंशब्द।
योगे चतुर्थीविधानं सार्थकं गतिसमासपदं गतेः समासो येनेति व हुव्रीहिणा कुगतीति सूत्रपरं तच्चान्यत्र फलाभावात् प्रादिपरमेवेत्याह निष्कौशांबिरिति
द्वन्द्वैकदेशिनोरिति न्यासे नायं प्रतिषेधो भाष्ये प्रत्याख्यातः अर्धंतत्रमिति अत एव पूर्ववदिति चरितार्थो अन्यथा निपातनादेव सिद्धे किं तेन समुदायस्य पू
र्ववल्लिंगत्वेपि उत्तरपदे अश्ववडव पूर्वापरा परोत्तराणामिति निर्देशाद्धापोनिवृत्तिः अश्ववडवाविति तु समुदायस्य वंतत्वाभावाच्छीमानामप्राप्ताद्ध्या।
सिद्धमिति निर्देशस्त्वनुप्रयोगे चरितार्थः स्यात् अश्ववडवशब्दार्थः पूर्ववल्लिंगं लभत इत्यर्थात् रात्राह्ना द्वन्द्वतत्पुरुषपरमनुवर्तते इदं प्राप्तापन्नालंप्रादिसमासेष्वपि
अत एव परवदिति सूत्रे एकदेशिग्रहणं कृत्वा प्राप्तेत्यादि भाष्ये प्रत्याख्यातं अत्र वतत्पुरुषग्रहणं कार्यमिति तत्तद्भावः अत एव प्राप्तः सर्वाह्नः इत्यादिसिद्धिः
पुण्यसुदिनाभ्यामिति च चरितार्थं अस्यैकदेशिसमासविषयत्वे तु तद्द्वयस्य स्पष्टमेव ह्नाह इति अकारांतोत्तरपदत्वाभावान्नस्त्रीत्वं गणसूत्रमिति समा एम·
हारद्विगुः इदं तत्पुरुषाधिकारे लिंगानुशासने पाठात् प्रतिप्रसवविधिला घवानुरोधाच्च समाहारद्विगावेव प्रवर्तत इति भाव तत्पुरुष इत्येवेति ताद्दशद्वन्द्वा ९९

संभवादितिभावः अपथाइति पथोविभाषेतिसमासांतनिषेधः भविष्यतिमर्यादेतिहृस्वस्त्वं शद्रात्रः पंचदशरात्रइतिभाष्यप्रयोगोलोकाश्रवत्वाल्लिंगस्य
सिद्धः अर्धर्चाः बहुवचनाद्यर्थावगतिः ननुलिंगप्रकरणंव्यर्थं अर्धनावमित्याद्यर्थेलोकाश्रयत्वाल्लिंगस्येत्यस्यावश्यकत्वादितिचेत्सत्यं जात्या
ख्यायामित्यादिसूत्रसमूहवदिष्टापत्तेरस्त्वनयत्नकृतानुपयुक्तान्यपितानिव्याचष्टे जात्याख्यायामित्यादिजातेःप्राधान्येनाख्यायामित्यर्थः भावप्रत्य-
यंविनाप्राधान्येनजातिबोधेगवादिशब्दानांसाधुत्वेइदमेवसूत्रंमानंतस्याविशेष्यत्वेचवाहाद्यन्वयोव्यक्तिघटितपरंपरयाबोध्यः तत्रजातेरेकत्वेनैकवचन
मेवप्राप्नोतीत्ययमारंभः एकत्वंचानवहुवचनार्थः एकस्मिन्नर्थेवर्तमानशब्दोबहूनामर्थानां   वचनंबोधकोभवतीत्यर्थोदश्यातिदेशोयमित्याहएकोप्यर्थइत्य-
दिनुक्तंभाष्येयावद्ब्रूयादेकोर्थोबहुवद्भवतीतितावदेकस्मिन्बहुवचनमितीति एकत्वेर्थेबहुत्वप्रयुक्तंकार्यमतिदिश्यतइति अयमपिकार्यातिदेशएवेत्यन्यत्रवि-
स्तरः एतच्चभाष्येप्रत्याख्यातंजातौसंख्यान्वयेएकवचनस्यव्यक्तौसंख्यान्वयेबहुवचनस्यसिद्धत्वात् एवंचपृथ्वीनरंभुनीनांप्रामाण्यातत्सूत्रोक्तार्थप्रयोगाणा-
मसाधुत्वमेव एतेनयत्रवनेएकएवाम्रवृक्षस्तत्रजातिपरत्वेआम्राःसंतीतिप्रयोगसाधुत्वार्थमिदमित्यपास्तंसविशेषणस्येति इदंमुख्यार्थेबहुवचननिषेधाय
यदात्वस्मच्छब्दस्यस्वघटितेउद्भूतावयवभेदेसमुदायेलक्षणातदाबहुवचनंभवत्येव तेनत्वंराजावयमप्युपासितगुरुप्रज्ञाभिमानोन्नताइत्यादिसिद्धं गार्ग्योऽहं
ब्रवीमीत्यादावप्ययंनिषेधः उत्तमपुरुषानुरोधेनात्राहमित्यस्यैवविशेष्यत्वात् फल्गुनीनक्षत्रइतिप्रथमाद्विवचनंनक्षत्रेयद्वाभिधीयेतेइत्यर्थः तेनद्वयो
रित्यनुकर्षः फल्गुन्योमाणविकइति फल्गुन्योर्जातइत्यर्थेफल्गुन्यषाढाभ्यांटानाविति टः टित्वान्ङीप् एकस्यांतुतारायांनैतयोः प्रयोगः उद्भूतावयवभेदेस
मुदायएवेतत्वात्॥ तिष्यपुनर्वस्वोः नक्षत्रइत्यनुवर्ततेतिष्यपुनर्वसुशब्दयोरभिधेयेनक्षत्रेकोसमासोयोनक्षत्रवाचकानांद्वंद्वइत्यर्थस्तेनपर्यायाणा-
मपितिष्यपुष्यपुनर्वसूइतितिष्यएकातारापुनर्वसूद्वेतारेद्वंद्वस्तिष्यपुनर्वस्वोरितिनिर्देशात्तदाह तिष्यश्चपुनर्वसूचेति विशाखेति विशाखाश्चानुराधाश्चेतिद्वं
द्वः माणवकाइति नक्षत्रेणयुक्तःकालइत्यणोलुबविशेषइतिलुपिजातार्थेसंधिवेलेत्यणितस्यश्रविष्ठाफल्गुनीत्यादिनालुक् बहुवचनस्यकिं इदंतिष्यपुनर्वसु
समाहारद्वंद्वः अतएवसमाहारद्वंद्वःप्राण्यंगादीनामेवेतिद्वंद्वश्चेत्यादीनांनार्थः नचैवमप्यत्रजातिरप्राणिनामितिनित्यैकत्ववद्भावेबहुवचनाभाववत्त्वं।

ल.शे. ऽर्थमिति वाच्यं तद्वैकल्पिकत्वस्याप्यनेन ज्ञापनात् न चैते प्राणिन इति वाच्यं आपोमयः प्राण इति श्रुतेरद्भिर्विना म्लायमानप्राणानामेव प्राणित्वात् स्पष्टं चेदं भाष्ये।
स. न सत्त्र समासे इति तु नोक्तं यत्तिष्यस्तौ पुनर्वसू येषां ते तिष्यपुनर्वसव उन्मुग्धाः अवयवभूतास्तिष्यादयो वर्तिपदार्थस्तेषामेव विपर्यासबुद्धिविषयाणां मुद्भू
४८ तावयवभेदः समुदायः समासार्थः उन्मुग्धा इत्यस्य विपर्यासबुद्धिविषया इत्यर्थः अस्मद इत्यादीन्यपि व्यर्थानि आचार्याः कथयन्तीत्यादौ शक्तिमतस्यावयव
गतस्य वा बहुत्वस्यारोपेणैवेहापि तदारोपेणैव सिद्धेरिति स्पष्टप्रतिपत्त्यर्थमिति चेल्लिङ्गानुशासनमपि तथेति भावः उच्चं स्वलास्तुकालोपसर्जने इत्यत ए
कशेषप्रकरणान्तं तुल्यपदानुवृत्त्याप्रधानप्रत्ययार्थवचनेन तुल्यमित्यर्थो ल्यवेमिदं सूत्रकृतैव प्रत्याख्यातमित्याहुः सनपुंसं तच्छब्देन समाहारद्विगुद्वन्द्वौ
परामृश्येते व्याख्यानात् अकारान्तेति अत्र द्विगुः समाहारद्विगुरेव सनपुंसकमित्यपवादत्वात् पात्रादीति स्त्रीत्वेनेत्यर्थः त्रिसूत्रीत्यादिप्रयोगदर्शनात् सूत्र।
शब्दस्यात्र पाठ इति कैयटः स्थितः बहुसूत्रमिति भाष्यप्रयोगस्तु प्रकरणेनान्यपदार्थे बहुव्रीहिणा साध्याः पुण्येत्यादि रात्रान्हेत्यस्यापवादः। पथः सं कृतसमा
सान्त इति पथ इति कृतसमासान्तैकदेशानुकरणं प्रथमान्तमिति भावः प्रतिपदोक्तपरिभाषा न प्रवर्तते व्याख्यानात्तदाह त्रयाणां पन्था इति ऋक्पूरिति समा
सान्तः विपथा नगरी अतिपथेत्यादौ चनेदं अर्धनावमितिवत् स्त्रीकाश्रयत्वाल्लिङ्गस्य एतेन कापथविपथौ व्याख्यातौ आवश्यकत्वादनेनैव सिद्धे अपथं नपुंस
कमिति सूत्रं न कार्यं। सामान्ये नपुंसकमिति अनियतलिङ्गविषयं तेनादिपचतीत्यादेव। आदिशब्दो नित्यपुमान् आद्यपाकानुकूलक्रियेत्यर्थः न्यायसिद्धमेतत् वि
शेष्यविशेषासन्निधाने लिङ्गसर्वनाम्नो नपुंसकस्य न्याय्यत्वात् लिङ्गसर्वनामनपुंसकमिति दाण्डिनायनेति सूत्रे भाष्ये स्पष्टं अनेनैव क्रियाविशेषणानां नपुंसकत्वसि
द्धेः क्रियाविशेषणानां क्लीबत्वं द्वितीयान्तत्वं चेति नापूर्वं धातूपात्तभावनां प्रति फलांशस्य कर्मतया तत्समानाधिकरणे क्रियाविशेषणे द्वितीयान्तत्वस्यापि सिद्धेः न
स्य क्रियाजनकत्वमपि स्वज्ञानद्वारा बोध्यं न तु स्या पूर्वमुद्दिश्य क्रियायां प्रवृत्तेः संप्रदानादेरिव ज्ञानगतजनकत्वस्य च तद्विषये आरोपः वाचनिकत्वं तु यत्र धा।
त्वर्थस्य करणत्वेनान्वयस्तत्रापि स्यात् यथा तृप्तिकामस्तोकेनौदनं पचतीत्यादौ तृप्तिविषयकामनावत्कर्तृकः स्तोकविक्लित्तिकरणक ओदनकर्मकः पाक इति बो एम.
धः तद्विषयकामनावत्कर्तृकत्वेन तस्या उद्देश्यत्वमर्थसिद्धं केषांचित् प्रादिषु कर्मत्वव्यवहारस्तूद्देश्यत्वसामान्यादिति दिक् न त्पुरुषो न परवल्लिङ्गमिति या। २०

॥ वदधिकारोयं अन कर्मधारय इत्युक्ते नञ्तत्पुरुषस्य न कर्मधारयत्वं आरोपमात्रस्य नञ्द्योत्यत्वेन सामानाधिकरण्याभावात् यद्यप्युपस्थितयोः सामानाधिकरण्यव्यवहा
रः नञ्समासे हि आरोपितोन्तरपदार्थे आरोपितधर्मकेर्थे वोत्तरपदस्य वृत्तिः नञ्तु द्योतक इति तदभावः संज्ञायां कं अमोदिरिस संज्ञासा चाशीनेषु तत्पुरुषाभिन्नान
समासकर्मधारयरूपा च नास्तीति नात्राधिकारप्रयोजनं इदं प्रकरणं परवल्लिङ्गत्वस्य विशेष्यनिघ्नत्वस्य चापवादः उपज्ञोपक्रमसभाशाला विवक्षैव नियामिका न व
स्तुस्थितिरिति सूच्यते तेन तदुपक्रमं सौजन्यव्यवहार इत्यपि तत्र यद्यपि विवक्षा हि द्विधा प्रयोक्त्री लौकिकी च प्रयोक्तृशब्देन व्यवहारार्थं प्रयोगकर्त्तारोऽस्मदाद
यः लोकशब्देन विदितवेद्यः परावरज्ञः शिष्टो लोकः एतदेव शिष्टत्वं एषोदरादिसूत्रे भाष्योक्तं तथाप्यत्र नाद्यविवक्षा तेषामपभ्रंशप्रयोगे बाहुल्येन प्रवृत्तेः तस्मादन्त्यैव
ते हि यन्नार्थे यं शब्दं धर्मबुद्ध्या प्रयुंजते तेषां शास्त्रविषयतेति तदस्य तदस्मिन्न्यादितीनिसूत्रे भाष्ये स्पष्टं तेषामेवाभिधानानभिधाने अपि बोध्ये इह षष्ठीतत्पुरुषं विना।
तदादित्वासंप्रत्ययान्नाधिकारफलं उपज्ञायते इत्युपज्ञा कर्मण्यङ् रूपाणिनेरुपज्ञेति कर्तृषष्ठ्या समासः उपक्रमः कर्मणि घञ् पाणिनिसंबंधाद् ज्ञानविषय इत्य
र्थः छायाबाहुल्ये सति या छाया तद्वाचीयच्छायांतस्तत्पुरुष इत्यर्थः तत्र कस्य बाहुल्ये इत्याकांक्षायामाश्रयत्वनिमित्तत्वात् छायायास्तद्बाहुल्यमिति गम्यते त।
पूर्वपदार्थस्तमेवेत्याशयेनाह पूर्वपदार्थेति पूर्वपदार्थबाहुल्यस्य षष्ठीतत्पुरुष एव संभवात् नात्राप्यधिकारफलं पर्यायस्येति पर्यायवचनस्येति वाच्ये पर्याय
स्येत्युक्तिः सत्तासत्यभामेतिवत् एवकारेण स्वरूपस्य विशेषाणां च व्यावृत्तिः रूढ्यांति पर्युदासवृत्त्येत्यपि कश्चित् नेह काष्ठसभा अत्रापि नाधिकारोपयोगोऽन्यासं।
भवात् सभाशब्दः शालायां संघे च तत्राद्यप्रतिषेधादाह संघेति अशालेत्यस्य शालार्थेत्यर्थः अत्राप्यन्यासंभवान्नाधिकारोपयोगः प्रथमार्थे षष्ठीत्याशयेनाह।
एतदंतर इति द्वंद्वे समाहारेतरेतरयोगाभ्यां रूपद्वयस्य दुर्वारत्वेन बहुव्रीहौ प्रत्युदाहरति दृढसेनद्गाति इति तत्पुरुषः द्वितीयाश्रितेत्यादिनेति व्याख्यानात् शेष इत्य।
स्य प्रथमांतत्वाच्च प्रथमांतपदोपात्तापेक्षशेषस्यैव ग्रहणमिति भावः अन्यस्येति अस्य चोपस्थितसमस्यमानप्रथमांतापेक्षत्वं तच्च यस्य यस्मिन्नित्यादि तदाह।
अप्रथमेति तदंतार्थ इत्यर्थः यद्यपि पदेन प्रकृत्यर्थोपस्थानेः क्रियाकारकभावादिसंबंधरूपो विभक्त्यर्थः प्राधान्येनाभिधीयते प्रकारतानिरूपितत्वाच्च संबंधु
स्यापि प्राधान्यव्यवहारः एवं चेदेवदत्तादिपदैः सामानाधिकरण्यानुपपत्तिस्तथापि व्याख्यानात् विभक्त्यर्थास्मिन्संबंध्यंतर्भावेणापि शक्तिकल्पनयाऽदोषात् तत्र

कस्यसंबंधिनःसमस्यमानपदैरुक्तत्वेनद्वितीयःसंबंधीयस्येत्यादिप्रकृत्यर्थभूतोगृह्यतेइतिस्पष्टंभाष्ये चित्रागावोयस्येत्यादौलौकिकेवाक्येचित्राणांगवांप्रायाश्रेपिन्द
त्तोतदर्थबोधकविग्रहवाक्येचविशेषणविशेष्यभावव्यत्यासस्ततःशिष्टानांतथैवबोधात् तत्रषष्ठीसप्तमीविभक्त्यंतातिरिक्तार्थेकर्तृकर्मेवचनमुवंतानामेवसमासः
मत्वर्थेबहुव्रीहिःकर्तृकर्मवचनेनाप्रथमायाइतिवार्त्तिकात् नःपुत्रोयस्मादितिविग्रहेमत्वर्थएव तत्रपंचम्याःषष्ठ्यपवादत्वेनषष्ठ्यर्थकत्वात् एवंवन्याद्यंतरेये
प्यइत्यत्रापिमत्वंतस्यैवबहुव्रीहेरप्यस्त्यर्थानभीवेणशक्तिरितिमनुसूत्रेभाष्येस्पष्टं माहवतीनदीत्यादेःपदसमुदायस्यमास्त्वाहोतिवाक्यार्थेवर्त्तमानस्यबहु।
व्रीहिव्यावृत्त्यर्थंपदग्रहणं अन्येत्यादिकिं बहुपदोबहुव्रीहिःस्वपदार्थेमाभूदिति द्वयोःपदयोःसमानाधिकरणत्वेस्वपदार्थेवृत्तौतत्पुरुषेणबाधात् किंचबहुषु।
सावकाशंबहुव्रीहिंस्वपदार्थेपिसमानाधिकरणतत्पुरुषोबाधेतसतित्वस्मिन्स्वपदार्थेसावकाशंतत्पुरुषमन्यपदार्थेबहुव्रीहिर्बाधतइतिनदोषः अनेकंकिं बहूनाम
पिषक्तस्यात् तेनचित्राजरद्गुरित्य त्रचित्रापदेपुंवत्त्वेन कपिंजलाधिकरणन्यायस्यात्रशास्त्रेनाश्रयणात् चतुरादिपदानामप्ययं यदितुतद्धितार्थेत्यनेनोत्तरपदे
समासस्यविधानात्ज्ञापकात्बहूनांसमासोयथाभिधानंसिद्धः चित्रगुरित्यादौगोशब्दादेरुपसर्जनत्वमप्येकविभक्तीतिसूत्रेणसिद्धं नचातत्रैवोपपादितंस्पष्टंचै
दंप्रकृतसूत्रेभाष्येइत्युच्यतेतदास्यप्राथमनेकग्रहणंसुपेतिनतोयंपंक्तौतुनेहसंबध्यतेद्वयोःस मासानापत्तेः प्राप्तमुदकमित्यादि अत्रयद्यप्यनन्तकारकेउक्तंत
त्रान्यपदार्थःसमासघटकसर्वपदशक्यःपरस्परसमभिव्याहारएवचतच्छक्तिज्ञानबोधकः अतएवान्यपदार्थेवर्तमानंअनेकंसुबंतमितिसंगच्छते नञोस्त्यर्थाना।
मिति नञःपरंयदस्त्यर्थवाचिपदंतदंतस्यपदांतरेणबहुव्रीहिः अस्त्यर्थवाचिनांतुवालोपइत्यर्थः एवंप्रादिभ्यइत्यपिव्याख्येयं उच्चैर्मुखइत्यादावुच्चैरित्य।
स्याधिकरणशक्तिप्रधानत्वेपिवृत्तावाधेयप्रधानत्वात्सामानाधिकरण्यंअस्तीत्यस्यतिङंतत्वेनसुबित्यनुवृत्तःसमासोनस्यादतआह विभक्तीति विद्यमानस्तीरे
त्युदाहरणार्थः निपातनादिति अन्यथाप्राप्तस्यान्यथोच्चारणंनिपातनंप्रसज्यप्रतिषेधार्थकनञासमासोपितत्रएव भाषितःपुमान्यस्मिन्नर्थेतद्भाषितपुंस्कं प्रवृत्ति
निमित्तस्याधारत्वविवक्षयासप्तमी ततस्तदस्यास्तीत्यर्शआद्यच् अतद्गुणसंविज्ञानश्चायंबहुव्रीहिः पुंस्त्वविशिष्टस्यस्त्रीलिंगवाच्यत्वाभावात्शब्दस्वरूपस्यार्थकत्वे
लक्षण्यातिरेकेणस्त्रीवाचकसमानानुपूर्वीकःसमानार्थश्चगृह्यतेप्रत्यासत्तेः तुल्येप्रवृत्तिनिमित्तेइति यदर्थज्ञानेनतद्विशिष्टेशब्दस्यप्रवृत्तिस्तत्प्रवृत्तिनिमित्तं।

भाषितः पुमान्येनेति तु नोक्तं कुटीजीविक इत्यादावतिप्रसंगात् कुटशब्दो घटे पुमान् गेहे स्त्री गर्भिभार्यः प्रसूतभार्य इत्यत्र तु गर्भिणीभिः प्रसूतोयमित्यादिप्रयोगात्पुंस्त्वविशि
ष्टस्यापि विवक्षितत्वात् भाषितपुंस्कत्वमस्ति उभयत्रापि गर्भसंबंधोऽपत्यापत्यवत्संबंधः प्रवृत्तिनिमित्तमिति समानायामाकृतौ तत्त्वमस्ति इति कैयटः स्वयं अन्यत्तु पुंसि
गर्भी व्रीहिरित्यत्रावयवभूतगर्भसंबंधः स्त्रियां त्वनवयवभूतगर्भसंबंधस्तथा प्रसूतादिशब्दानामपि स्त्रियां गर्भविमोचनं पुंसि गर्भाधानमिति समानाकृतित्वाभाव एव पुंव
द्भावार्थं तु स्त्रियाः पुंवदिति योगविभागः स्वेऽपि यत्नः कार्यः अग्रिमेण च तस्य क्वाचित्कत्वं बोध्यते एतदेव ध्वनयितुं पुंवदिति आदौ मध्ये पठितं अत एव भाष्यकर्तेत्यत्र
यत्न इत्युक्तं न हि शब्दस्य प्रवृत्तिनिमित्तं यत्नसाध्यं शब्दार्थसंबंधनित्यताहानेः एवं च प्रवृत्तिनिमित्तविशेषगर्भिणीशब्दो नित्यस्त्रीलिंग इति गर्भिण्यादय इत्येव।
स्त्री दारादयो हि शब्दं याद्दशैः प्रस्तुतं पदैः गुणद्रव्यक्रियाशब्दास्तथा स्युस्तस्य भेदका इत्यमरोऽनियतलिंगविषयत्वमाह शैषपलिंगसंख्याबोधकैः तथा तल्लिंगसं
ख्याबोधकाः भेदकाः विशेषणभूतार्थप्रतिपादकाः शुक्लादयो गुणशब्दाः दण्ड्यादयो द्रव्यशब्दाः पाचकादयः क्रियाशब्दाः शृणुत तज्जनककल्याः स्त्रि
याः सर्व एते दशवदनभुजानां कुंठितायत्रशक्तिः नमयति धनुरैशं यस्तदारोपणे न त्रिभुवनजयलक्ष्मीर्मैथिली तस्य दारा इत्यादौ दारा इत्यादेर्विशेषणत्वेन न
[illegible]वदिति अनूङिति च प्रसज्यप्रतिषेधः तेनैडविडभार्ये न दोषः पुंवाचकस्येति प्रत्यासत्त्या पुंवद्भावभाजः शब्दस्य प्रयोगान्तरे पुमान् समानविशेषणस्य यद्रूपं
तद्वातिदिश्यते तेन जरतीशब्दे न विग्रहे दृढगुरिति न (दृढा भार्ये इत्यत्र हंसभार्य इति न) अत्र च रूपातिदेशो न तु स्त्रीरूपार्थपुमर्थातिदेश एव पूर्वस्योत्तरपदपरत्वा
भावात् भाषितपुंस्कात्परत्वस्य चासंभवेन वरटाभार्यस्य स्थाने हंसभार्यस्यापत्तेश्च भाषितपुंस्कादित्यस्यासंगतेश्च स्त्र्यर्थस्य पुमर्थो भवतीत्यर्थेऽतिदिष्टे तद्वि
शब्दप्रवृत्तिस्तत्र पक्षे इति बोध्यं यद्यपि रूपातिदेशे योनिवृत्तिरेवं च वा तद्व्य पुंवत्निष्ट्यादौ वतं डाच्च लुक्स्त्रियामिति षञो लुगापत्तिस्तथापि अतिदिश्यमानरू
पविरुद्धस्य स्वाश्रयस्यातिदेशविषये प्रवृत्तेर्न दोषः स्पष्टं चेदं कैयटे एवं तत्र कैयटे किं च स्त्रीत्वविशिष्टार्थवाचकस्य शब्दस्य स्थाने पुंस्त्वविशिष्टार्थवाचकरूपाति
देशे तदर्थविशिष्टस्य निवृत्त्यार्थस्यापि निवृत्तिरिति न कश्चिद्दोषः ध्वनितं चेदं तृतीयादिष्विति सूत्रे भाष्ये समानाधिकरण इति सामानाधिकरण्यं चैकार्थविशेष्यबो
सानुजइति यस्य पुमानग्रजः स पुंसा हेतुनाऽनुजइत्यर्थः जनुषा जन्मनाऽपूरणे इति स्वारितत्वबलात्तदधिकारविहितप्रत्ययग्रहणमत्र यस्य चोत्तरपदाधिकारे प्रत्ययग्रह।
णेन तदंतग्रहणं हृदयस्य हृल्लेखेत्यत्र ज्ञापयिष्यते तथापीहात्मशब्दात्पूरणे प्रत्ययासंभवेन तदंतग्रहणमित्याहापूरणप्रत्ययांत इति उदाहरणे हेतुत्वात्मकत्वादित्वा।
द्वात्तृतीया सुप्सुपेति समासः यथाश्रुतभाष्यस्वरसस्तु आत्मनश्च पूरणे इत्यस्य वार्तिकत्वे स्पष्टं हि भाष्ये आज्ञायिनि च आत्मनश्च पूरणे आत्मनश्च पूरणे उपसंख्यानं कर्तव्य
मिति वैयाकरणाख्यायामित्यत्र तु वार्तिकस्य स्थैवात्मन इत्यस्यानुवृत्तिर्बाध्या काम्येरोरित्यादेश्च यद्वा परस्य चेत्यनेनैकं सूत्रं चेन परप्रति द्वि तथात्मशब्दस्य ग्रहणमि
ति तद्वाक्यस्य योगविभागादिति सुप्सुपेति समासइत्युचितं गविपुधिस्थिरशब्द उणादिकिरच् प्रत्ययांतः सात्पदाद्योरिति निषेधप्राप्ते इदं अंतर्गणनपीति न्यायेना
बाधितः पूर्ववस्तुकृत्प्राप्याहलदंतादित्यस्याप्राप्तिरह वचनादेवेति हृदिस्पृगिति अलुग्विधेर्ज्ञापकात्कर्मणि संप्रमीतिभाष्यं भमहत्सु मत्तकादित्यनेन तु नासिद्धिरसंज्ञा
यामित्यनुवृत्तेः कारनाम्नि नामग्रहणं स्पष्टार्थं संज्ञायामित्यनुवृत्त्यैव सिद्धेः कारनाम्न्येवेति प्राग्देशनाम्नि चेत्कारनाम्नेव वचनेति इदं तन्त्रानुसारेण भाष्येत्वयं नियमो वा।
तः अभ्याहितपश्वादेः संज्ञात्वमेव नेति कारनाम्नीति स्पष्टार्थमिति तद्भाष्यः अविशब्दात्संघाते कटच् उरणो मेषः नद्यामिति नद्युत्तारेणात्कालिको दोहः कार इत्य।
र्थः वणिकृपशुपालकर्षकेभ्यो राजग्राह्यो भागः करः स एव कारः हलादावित्यादि ग्रहणं स्पष्टार्थं नत्र यूथपश्वादय उदग्देशकाराः हलेद्विपदिकादयः अविकटोरणा।
प्राग्देशे प्राचामेवेति नियमोपि कैयटाद्यनुसारेण भाष्ये तु पूर्वेण नित्ये प्राप्ते कारनाम्नि प्राचामिति विकल्पार्थं तेन मुकुटेकार्षापणं मुकुटकार्षापणमित्याद्युभयं ह
लादाविति योगविभागेन नियमार्थं तेनाजादौ लुगेवेति स्थितं कारनाम्नि वावचनार्थं चेदजादावतिप्रसंगः नैष दोषः योगविभागात्सिद्धं कारनाम्नि च प्राचां हलादौ
इदमिदानीं किमर्थं नियमार्थं हलादावेव कारनाम्नीति अविकटोरणाद इति हि भाष्यं वं धे च उत्तरसूत्रस्य तत्पुरुषपदमिहापकृष्यते वं ध इति घ अंते न्यमपत्रेन सिद्धेति नि।
षेधः स्पष्टं चेदं सर्वं भाष्ये वत्स्पुलग्रहणेनैव सिद्धत्वाद्धलदंतादित्यनुवृत्तिर्व्यर्थेति ध्वनयन्नाह क्वचिन्नलुक् तत्वरइति अत एव गोषुचरः कृद्भः विभाषावर्षेलिंगाविशिष्टस्पर
णाद्भाष्येतु जोपि घकाल घ शब्देन तरतमौ कालेति स्वरूपग्रहणं ततः सप्तमी ह्युह्युलो पूर्वाह्णेतरे इति प्रकृत्यर्थे प्रकर्षविवक्षयाद्रव्यप्रकर्षसत्त्वादाम्नप्रत्ययः सायंचर।

स॰श॰ मितिसूत्रेभाष्येप्राण्हप्रमयोरेदंतत्वनिपातनंव्यर्थमलुकासिद्धेरित्याशंक्य यदासप्रम्यन्याविभक्तिः प्राण्हःसोढोयस्येत्यर्थेतद्धितुक्तेर्विभाषेत्युक्तिरित्यनुरोधेनेतिवो।
शे॰लो॰ ध्यंविभाषापूर्वोण्हेतिसूत्रेदोषान्तनमित्यादावव्ययादिति लुकोनेनालुकमाशंक्यसमानकालस्यप्रत्ययनिमित्तलुकएवायमलुक् अव्ययादिति त्वंतरंगइतिसमाधाना।
६१ परभाष्यादत्रेहलंदंतादित्यस्याननुवृत्तिः अतिप्रसंगस्त्वनभिधानान्नेतिबोध्यं अपोयोनियन्मतुप्ष्विति अयंपाठोहरदत्तानुसारेणमतिषितियुक्तःपाठः एकेवचे
त्यस्यातिप्रसंगव्याजेनाप्सुनाप्सुचरादिवदस्यभाष्येउपन्यासात् नह्यप्सुमंताविन्यत्रतस्यप्रसंगोस्तिशब्दपरतयानस्यैकत्वमात्रार्थत्वात् किंतुमतुप्ष्वितिपाठेफलं।
चित्यंअस्यवामोयमित्यादाविवलुकोऽप्राप्तेः चक्रबद्धइति सप्तम्यंतेननिष्ठांतस्यसाधनंकृतेतिसमासः स्येचअयंनिषेधोअनंतरस्येतिन्यायात् तत्पुरुषेकृतीत्य।
स्यैव अतएवामूर्द्धमस्तकादित्यलुकिकंठेस्थःकालोपस्येत्यनेकमितिसूत्रस्थभाष्यप्रयोगःसंगच्छते पश्यतोहरइति पश्यनमनादृत्येत्यर्थः षष्ठीचेत्यनादरइतिषष्ठी दे
वानांप्रियइति मूर्खेणामित्यर्थः मूर्खश्चमूर्खःप्रियएवेत्यजेर्वीत्यत्रकैयट निंदायामिति आक्रोशइत्यनुवृत्त्यालब्धमिदंस्पष्टं चेदमानड्ऋतइत्यत्रभाष्ये एवंचा
रंभसामर्थ्यादेवविकल्पेसिद्धेऽन्यतरस्यामितिस्पष्टार्थं पितुःपुत्रइति आख्यातात्पितुरुत्पन्नइत्यर्थः तत्पूर्वेति विद्यायोनिसंबंधवाचकान्यतरपूर्वोत्तरपदकइत्यर्थस्ते
नहोतुःपुत्रइत्यादिसिद्धं मातुःपितुर्भ्यामिति रेफांतानुकरणंविसर्गादावप्येकदेशविकृतन्यायेनतत्वं इत्युलुक्समासेः घरूपे घशब्देनतद्धितमोप्रत्ययेषितिलेखेमहणे
नोत्तरपदाधिकारेक्वचित्प्रत्ययग्रहणेतदंतग्रहणज्ञापनादितिभावः ननुश्रेवीबदरीआमलक्यादयोभाषितपुंस्काइतिनपदांतस्तत्रभाष्याद्भ्यतेइत्यतआह कुव
लीति नद्याःशे भाषितपुंस्कादितोहनसंबध्यतेतदाह स्त्रीतरेति उगितःपरेति विहितेतिशेषः तेनेषुमतोपत्यंस्त्रीऐषुमतीततस्तरएषुमतितरेत्यत्रनित्यह्रस्वइतियुक्ता
रनाक्काविद्यत्रभाष्येस्पष्टंपंचमीसमासेनाचःपरस्मिन्नितिस्थानिवत्वेनव्यवधानंतुनबहिर्भूततरतिमित्तस्यह्रस्वस्यस्थानिवत्तत्रदृष्ट्याऽसिद्धत्वेनतत्रानदप्रवृत्तेः नि
मूलमिति नहिस्वयमप्रवर्तमानोपिह्रस्वःपुंवत्वंबाधतइतिन्याय्यत्वमितिभावः शमिनीतरेति घिनुणइत्यत्रभाष्यप्रयोगेनुताच्छीलिकानांपरत्वेनवत्वेनसंज्ञाशब्द
नयासंज्ञापूरण्योश्चेतिनिषेधान्नदोषः ज्ञापकमिति उत्तरपदंविशेष्यंकृत्वातदंतविधिनेत्यर्थः एवंचतदंशेउत्तरपदेइत्यस्यासंबंधइतिबोध्यं हृच्छब्देनसिद्धेहृद राम॰
यलेखइत्यादिनिवृत्त्यर्थमिदंसोढार्थमिति ब्राह्मणादित्वात्ष्यञ्‌हृद्भगसिंध्वंतइत्युत्तरपदवृद्धिः प्रपंचार्थमिति अप्रयोगद्वयमेष्वेवान्यत्रहृदयशब्दप्रयोगएवेति। २२

व्यवस्थार्थमितिभावः पादस्य पदा उत्तरसूत्रे पदग्रहणात्पदेत्यदन्तं लुप्तविभक्तिकं तदाह अदन्तइति पादशब्दस्य स्वाङ्गशिटामित्याद्युदात्तत्वेऽप्ययमन्तोदात्तो निपात
नात् पद्याइति विध्यत्यधनुषेति यत् पाद्यपादार्घाभ्यां चेति यत् पादस्येत्यत्र पादशब्दः प्राण्यङ्गवाच्येव व्याख्यानात् इकेइति पर्पादिषु पादः पच्चेत्यनार्थे पत्काशीति
सुप्यजातावितिणिनिः पद्गोकर्मणि पत्तिन् ऋचः शे अत्र चतुर्थोशवा विपादग्रहणं उदकस्य प्रसन्नोदमर इति त्वासाध्वेवोदकपर्यायोदशब्दाङ्गीकारे एकहल
दावित्यस्यैवैयर्थ्यं समुद्रेत्विति संज्ञात्वादितिभावः एकहला संज्ञायां तु पूर्वविप्रतिषेधेन नित्यमेव एकशब्दोऽसहायवाची समृत्यश्च तुल्यजातीयको हलेव व्यवच्छि।
द्यतइति बोध्यं प्रसिद्धत्वादेकशब्दः संख्यावाच्येव सर्वस्यापि शब्दस्यैकहलादित्वात्सामर्थ्यादनेकं हलमुच्चार्य यत्रालुच्चार्यते तत्रैव तन्मात्रवृत्तिरिति भाष्ये स्पष्टं असहा
यवाची तु स्यात्किन्तु जन्मात्रविषय इति तद्भावः पूरयितव्यं पूरणार्हं शुक्लो भवत्विति ऊर्यादिच्वीति निपातत्वेनाव्ययत्वेऽव्ययभावित्वान्निषेधे प्राप्ते आह अभ्र इति॥
स्कात् एकशब्दात्परस्य ह्रस्व इत्यर्थे न पुनपुंसकयोर्विशेषाभावादाह एकस्या इति रेवतिपुत्र इति संज्ञा कुदस्याह अजसीरमिति अजसीरेणजुहोतीति प्रयोगः
त्विच संज्ञाया असंभवात्कुदस्यैवेदं अनुत्तरपदार्थवचनं ष्यङः सं अनुबन्धस्योच्चारणं पाशादिभ्यो यस्य ष्यङो निर्दिष्टेति ष्यङ व्याख्यात्यर्थे संप्रसारणस्य हलोप
इत्यतो दीर्घ इत्यनुवर्तते उत्तरपद इत्यधिकार हल इत्यनेन न तु नात्र दीर्घः संप्रसारणात्पूर्वस्य हलः संप्रसारणनिमित्तनिरूपिताङ्गावयवत्वाभावात् प्रत्यासत्त्या ताद
शाङ्गावयवस्यैव तत्र ग्रहणात् अत एव निरुक्तस्थित्यादेर्नसः कुमुदगन्धेरपत्यं स्त्री इत्यर्थे णो णिञोरिति ष्यङि यङः ष्यापूर्वोत्तवत्वेन ष्यङ नेत्वा संप्रसारणे पूर्वत्वे चा
त्वे भावेऽपि दीर्घविधिसामर्थ्यात्स्यान्निवृत्तेनसंप्रसारणत्वात् दीर्घः ह्रस्वो नेति इको ह्रस्व इत्यनेन प्राप्तः परेऽपि ग्रामणिकुलमित्यत्र कृत इति ह्रस्वस्यावकाशः ह्रस्वस्यैव
कृत्रिमकत्वेनाभावे कारीषगन्धीपुत्र इत्यादौ संप्रसारणस्येति सावकाशे ह्रस्वप्रसङ्गे उभयप्राप्तौ परत्वात्संप्रसारणदीर्घत्वमेवेत्यत्रैव भाष्ये स्पष्टमित्याहुः अतिकारीष।
ति अन्यत्रापि इति समासे षष्ठीतत्पुरुषः ष्यङन्तेन पूर्वपदमिति भावः मातजादेश इति सचकवभावपक्ष एव ननु नष्ठत इति नित्यं कप्प्राप्नोति भावपक्षो कुलेभोत आ
ह कविकल्पस्येति अयं मातजादेशः संबुद्धावपि कारीषगन्धीमातरिति भाष्योदाहरणात् बहुव्रीहावेवेति तत्रैव भाष्ये उदाहरणात् चित्रवति मातच इति शेषः इष्टके
षो असंज्ञार्थं दीर्घवचनं उत्तरपदाक्षिप्तं पूर्वपदं विशेष्यमाक्षिप्यत इति तदन्तविधिरित्याह तदन्तानामिति इष्टकचितं साधनं कृतेति समासः कारेस अरुर्द्विषदित्यतो मुम

ल·श· तुवर्ज्जेमस्तंकाग्इति सत्यस्याशपथेहतौ तुडाजेवतत्रोपपदमिति सूत्रेण व्यंते उपपदेण भवतिनवेति विचारे सापेक्षत्वान्नेति भाष्यात्तया च्वेः प्रत्ययोत्पत्तेः पूर्वमुत्पत्तिरि
शे·म· त्यर्थलाभेनतद्दूदेवततः पूर्वेडाचः प्राप्तेः नहितदासुमः प्राप्तिरुत्तरपदपरत्वाभावात् व्यंजं तेपि समासप्रवृत्तिकालएवडाचःप्रवृत्तिरित्याहुः धेनुंभव्येति मयूरव्यंस।
६२ कादित्वात्समासः।नेभव्यस्यपरनिपातः लोकंपृणात्तीति विग्रहेकर्मण्यण्स्यादत आह मूलेति रात्रेः क्त अत्रप्रकरणेप्रत्ययग्रहणेतदंतविध्यभावेपि कृतोऽसं
भवात्तदंतइत्यर्थः नित्यमेवेति स्पष्टंचेदमत्रभाष्ये रात्रिंमन्यइति आत्ममानेइतिखश्श्यन सहस्यसादेशोनिपातनाद्युदात्तइतिभाष्यं सहस्यध्येति सहेचेति।
कतिसुपपदसमासः समुहूर्तमिति अंतवचनेव्ययीभावः मुहूर्तादिशब्दानांकालवाचिनामेवतत्प्रतिपादकेग्रंथेकालत्वारोपेणप्रवृत्तेरव्ययीभावेचेत्यनेननसोऽका
लइतिनिषेधात् ज्योतिषमिति ज्योतिषइदमित्यर्थः द्वितीयेचा उपारूप्रत्ययांतादिन्नेतुमेयेसहायवाचिनिउत्तरपदेइत्यर्थः अप्रधानेसहार्थेद्वितीयशब्दइतिह
रदत्तः सराक्षसीकेति बहुव्रीहिर्नेद्युतेश्चेतिकप् योगोविभज्यतइति छांदसमपीदमेतदर्थमेवात्रोपन्यस्तं विभक्तेर्वोपसर्जनस्येत्यत्रो वेत्यनुवृत्त्याव्यवस्थितवि
भाषाश्रयणात्समानजातीयग्रहणमपीत्याहुः योगविभागस्यभाष्यनुक्तत्वादाह अथवेति सदृशावचनइति भूयंवृत्तिविषयएवतदाह तेनायमस्वपदेति तेनस
हशब्देनसमासेऽयंवक्ष्यमाणइत्यर्थ वोपसर्जनस्येतिसादेशः अतएवविभाषोदरेइतिचरितार्थे अन्यथाकर्मधारयेसोदरसमानोदराभ्यांसपक्षादिवद्योगवि
भागेनसिद्धाभ्यांयतोरूपद्वयसिद्धौनद्वैयर्थ्यंस्पष्टमेव सदृशार्थकसहशब्दस्यतुतत्रसादेशोदुर्लभोऽतपक्षेसमानशब्देनसमासेसमानजातीयग्रहवेत्याहुः।
ब्रह्मचारीति व्रतइतिसुप्यजातावितिणिनिः समानःसइति तस्यसमानत्वंवेदस्यव्रतस्यवासमानत्वात्तस्यतत्त्वंचाध्येतृभेदाद्वेदभेदंवापरिकल्प्यबोध्यं तेनस
मानवेदाध्ययननिमित्तब्रह्मचारीत्यर्थः समानेब्रह्मवेदाध्ययनार्थव्रतंचरतीत्यर्थोभाष्यात्त्वभ्यनेतीर्थेये अकारोऽत्रविवक्षितः यशब्देविवक्षितेइत्यर्थः निरनुबं
धकपरिभाषात्तुनात्रतीर्थोनान्निरनुबंधकस्यासंभवात् सचप्रत्ययएवसंभवतीतिध्वनयन्नाह यादाविति समानतीर्थेइति सादेशोप्येकदेशविकृतन्यायेनस
मानतीर्थशब्दत्वं एवंचसतिशिष्टत्वाद्यत्स्वरएवोदाहरणेएतदर्थमेवविवक्षितइतिव्याख्यातं विभाषोदरेइतिवर्ततेविवक्षितसप्तमीत्वादत्रापिसतिशिष्ट एम·
त्यत्प्रत्ययस्वरएव अन्यथासादेशस्वरःस्यात् तत्रसादेशपक्षेसोदर्यः समानोदरेशयितइत्यर्थेप्रथमोच्चारितोवाभवतिसचसोदरात्यइतितदर्थंसादे ३५

शाभावे तु समानोदरे शयित इति यत्नसोदरोप्यौति प्रयोगात् तु समानमुदरं यस्येत्यर्थे अथवेत्याद्युत्तरीत्या सपक्षवाक्यभावे बोध्यः वोपसर्जनस्येति विकल्पात् यत्र भ्राता स
होदर इत्यपि सिद्धं हसेयति सह ह्यासः इति भाष्योदाहरणात् अस्य वो दसत्वेऽपि संदर्भशुद्ध्यर्थमिहोपन्यासः ॥ स्यदादिषु दृशोऽनालोचने कञ्च समानान्ययो घट्टषो
ध्वतिक ऊ किन् कक्षः दीर्घ इति अन्त्यस्यात्वे कृते सवर्णदीर्घ इत्यर्थः इदं पूर्वपरान्वयि अमूदृगिति अः सेरिति व्याख्यानेऽप्येवमेव अकारेणाकारस्यापि ग्रहणात् स
मासे ग्र अंगुलेः संगः भीरोः स्थानं ज्योतिषः स्तोमः आयुषः स्तोम इत्याद्यर्थप्रत्यासत्यातयोः पदयोः समासे सस्य ष इत्यर्थस्तद्बुनयन्नत्तुदाहरति ज्योतिष इति एवं
हिंसं म इत्यादि प्रथमानिर्देशान्नाजस्य भवति अयं सुषामादिराकृतिगण इत्यर्थः तेनैतयोर्गणस्थत्वमिति सूचितं अषष्ठ्यतृतीयेति नञ्द्वयोपादानस्य ध्वे कृष्टे
बहुव्रीहिः इदमेव तत्पुरुषग्रहणमत्रप्रकरणे प्रतिपदोक्तसमासस्यापि ग्रहणं ज्ञापयतीति तद्व्याप्ति अक्षिशब्देन बहुव्रीहिर्वेति कापथं कुगतीति समासः आक्
रित्यः पथः संख्यति नपुंसकत्वं अनीषदर्थमिदं पूर्वविप्रतिषेधादिति भाष्यानुक्रमपि वृत्तिप्रामाण्यादुदाहृतं स्थेषाद् आंदिशब्दः प्रकारे स्थयोपदिष्टमिल्लुकेः अ
पदिष्टमिति कर्मणि क्तः उपदेश उच्चारणं तस्य कर्त्रीकां स्वायां शिष्टैरित्थ्याहारलभ्यं शिष्टाश्च शब्दतत्वसाक्षात्कारवंतो योगिन इति भाष्यस्यार्थं उत्तरपदाधिकारात्स
मासविषयमिदं हंसः सिंहयोर्दृष्टांतार्थमुपादानं यथा तयोः कृणादि वात्साधुत्वं तथागुद्ठोत्मा देः पृषोदरादित्वादित्यर्थ इत्येके परेतु इदं तद्धितविषयमपि पु
राणशब्दे ननलोप इति सर्वादिसूत्रे कैयट एवं बहं समदेरणधेतत्वेन शास्त्रांतरोक्तस्यापि अनेनसाधुत्वं सर्पिषत्यादौ षत्वमप्यनेनैवेत्याहुः इडाशा दौरफस्याते
संवर्णदीर्घः ध्वंशब्दे न प्रत्ययांतस्य ग्रहणं आगंतुरावृणधीशब्दस्य च ग्रहणं तेन सवेस्यद्दुर्वुद्धं हहति रूपद्वयं नोस्मान्मावधीदित्यर्थकं मानः समस्येहदूमिति सिद्धं ।
दुः ष्ठं ध्यायतीति निवि ग्रहे कारकपूर्वपदत्वाद्यण् सुतोनु प्रत्ययांत इः सस्थानिकस्वं ततु नोतस्वरितासंगतेरिति दिकुसंहिता एतत्फलं च वत्तिङः नस्यातो दीर्घः स्या
दित्यर्थकेन च यातसिद्धेरित्यनेन विग्रहहित्वामे पतिं शृंगोनामित्य संहितायामिव विग्रहित्वेतिपदकालेन दीर्घः एतदधिकारस्यान्यशास्त्राणां तत्तरपदाधिका
रात्समास एव प्रवृत्यात अत्र संहितायां नित्यत्वान्नतेस्तस्याधिकारस्य फलमिति बोध्यं कर्णेलक्षण यत्यस्तूनां स्वामिविशेषसंबंधज्ञापनार्थं दात्राकारादि चिन्हं क्रि
यते तदिह लक्षणं तेनल्लवकर्णे सिद्धिः अष्टकर्ण इत्यादे रष्टसंख्यालिपिचिन्हकर्ण इत्यादिरर्थः नन्वसंख्येस्वाचिन्हकर्ण इति वा मर्मविदिति व्यधेर्ग्रहिज्येति संप्रसार

ल·श· णं साद्यव्यवस्थितेति एतच्च प्रचुरलक्ष्यदर्शनादास्थितं केचित्तु यथोपदिष्टमित्यनुवृत्त्यान्यात्र वारयंति एभ्य एवेति कृतदीर्घेभ्य इत्यर्थः कृतदीर्घेणामिति व्याख्यानात् ।
शे·स· अत एव विपरीतनियमो न अन्योत्तरपदे एषां दीर्घीतत्वासंभवाच्च नियमार्थ इति पूर्वपदात्संज्ञायामित्येव सिद्धेः दीर्घस्य संज्ञायामेव विधानाद् अस्य णत्वस्य संज्ञायां प्रवृत्तेः
६३ विधेयेऽर्थे इति अप्येवण शब्दस्यासंज्ञात्वादिति भावः पुरगा दृश्यमित्यत्र अग इति निषेधस्तु न अगकारान्त पूर्वपदादित्यर्थात् असिपत्रवनमिति नरकविशेषस्य संज्ञा व
लं प्रत्यय इति यथोपदिष्टमित्यनुवृत्तेरिति भावः तेनाज्ञानेतृ धातोर्न अण इत्येव नेह आर्द्रवलः रजः कृषीत्यत्र अम्भ्योपि दृश्यत इत्युक्तेर्वेसच्प्रत्ययः उदाहर
णं रजः कृषीति वलच् संज्ञायामेवेदं तेन पुत्रवल इत्यादौ न प्रत्ययनिमित्तत्वेपि संदर्भस्तु इयेषामुपन्यासः शरादिराकृतिगणः इकोव ... पचाद्यच् उपसर्गादृ
णो संभवेन तदंतविधिरित्याह घञंत इति इकः काश इति पचाद्यजंतार्थं अन्येषामपीति सूत्रस्याभियुक्तोक्तं प्रपंचमाह सुनोदंते मितं तस्मपंचत्वादेवस्वपुरु
मित्याद्यपि यथादृश्यते तथासाध्विति तदर्थात् स्वापचवराहस्वस्वापवराह इयेषां च विरोध इत्येकवत् प्रनिरंतः संज्ञायां वनं पुरगेति नियमाद् प्राप्तेऽसंज्ञाया —
पूर्वपदात् संज्ञायामित्युक्त्या ऽप्राप्ते वचनं शरादीनामोषधिवनस्पत्यन्यतरत्वाद् उत्तरेण विकल्पे प्राप्ते वचनं असंज्ञार्थमपीति अस्येतः संज्ञायामिति नानुवर्तत इति ता
त्पर्यं विभाषौ औषध्यः फलपाकांताः वनस्पतिरत्र वृक्षमात्रं व्याख्यानात् ध्वनितं चेदं लुपियुक्तवदिति सूत्रे भाष्ये आरोप्येति अने न वाह्यस्याचेतनत्वं तत्तुस्प
ष्टं वा बोधितं ऊह्यन इति सूत्रे भूतकाले विवक्षितत्वेन वाह्यं यदा नारोपितं संनिहितमात्रं तदापि भवतीति भावः तदुक्तं भाष्ये आरोपितोपस्थितयोरिति वक्तव्य
मिति तथा वाहनं वाह्यादिति वक्तव्यं यदा हि गर्गाणां वाहनमपविद्धं तिष्ठति तदा मा भूत् गर्गवाहनमिति यदा गर्गा वाह्यत्वेन विवक्षिता भवंति तदा णत्वं भवत्येवे
ति कैयटः कर्मणि ल्युडिति वाहुलकादिति भावः देशे किं दाक्षीणां पानं दाक्षियानं देश इत्यस्य देशवासिष्वित्यर्थः क्षीरपानमिति नपुंसके भावे करणे वा ल्युट् स
र्पिष्पानमित्यादौ तु न षात्पदांतादिति निषेधात् तस्य हि पदे परतो यः षकारस्ततः परस्य नस्य णो नेत्यर्थः अंतग्रहणसामर्थ्यात् तेन सुसर्पिष्केणेत्यादौ णत्वं भव
त्येव सर्पिष्पानमित्यादौ तु वृत्त्यनंतरमेव समासः अत एव निष्पानमिति तदुदाहरणं भाष्ये संगच्छते पदपदं पदत्वयोग्यपरं वा व्रीहिवापीणीति कर्मण्यण् घ राम·
ञंतेन बहुव्रीहिर्वा जसः शिः अदंतत्वान्नुम् अत एवेति पूर्वपदात् संज्ञेनोत्तरपदेन प्रातिपदिकस्य विशेषणादेवेत्यर्थः उत्तरपदशब्दस्य समासचरमावयवे रूढ ३५

त्वान्माषवापिणावित्यादौ उत्तरस्य पदत्वं नेति न शंक्यं ज्ञापकं शिथिलमित्याह किंचेति पूर्वपदात्स्त्रिप्रसमास प्रातिपदिकान्तस्येति व्याख्यायनुमग्रहणं भाष्येन प्रत्या ।
ख्यानमिति तत्र णत्वस्येष्टत्वानुमानादिति भावः भाष्ये समासरूपप्रातिपदिकान्तस्येत्यर्थकरणादगस्येत्यादि तदुपपादनं श्रेयोपि चिंत्य एवेति परे णत्वार्थमपीति णत्व-
मेवेत्यर्थः प्रेन्ननमित्यादौ त्विति प्रत्ययसंबंधिनस्येव धातुमध्यवर्तिनुमोपि नस्येत्यर्थः एवं समुदाया एव तत्र पाठ्या इति द्वयोरपि नयोर्णत्वाभावसिद्धिरिति नु-
म्व्यवायेनुस्वाराभावेण त्वप्रतिषेधो वक्तव्य इति नकार्यमिति भावः युवादेर्नेति समस्ता युवादिषु असमस्ताः शब्दाः क्षुभ्नादिष्विति भावः अत एव युवादेर्नेति ।
प्रातिपदिकान्तेति सूत्रे भाष्ये पठितं उभावप्याकृतिगणौ वृत्रहणाविति वृत्रहतवंतावित्यर्थे ब्रह्मभ्रूणेति क्विप् वृत्रहणीत्युदाहरणं हरिमाणीति मानयतेः
क्विपि समासे ङीप् क्षीरपेणेति पिवतेः कर्मण्युपपदे आतोनुपसर्गे इति कः आतो लोपः रम्यविणेति रम्य आसां विद्यतेति विग्रहे आङो नानन्वेतवौत्ति विभक्त्यावि
शब्दस्य पदत्वात्पदव्यवायेपीति निषेधः स्यादिति चेन्न अतद्धित इति वार्त्तिककवाक्यतया णत्वाश्रयातिरिक्ततद्धितभिन्नपरतः पदेन व्यवायेनेत्यर्थेनादोषात् व्य-
वधायकपदस्य णत्वाश्रयातिरिक्ततद्धितभिन्नपरत्वेनेति यावात् तत्सत्त्वाख्यानेतु पदे व्यवाय इति सप्तमीसमास इत्यदोषः अत एव सत्याख्यानारंभयोः सम-
फलता कुमतिच कारावित्यर्थे भियाकाविति नोक्तं अनेकाज्ञुत्तरपदार्थमिदं अत्रकवर्गवदुत्तरपदात्स्त्रिप्रसमासस्य विभक्त्या सिप्रमकृते श्वप्रत्यासत्त्यैक-
त्वाश्रयणेपि चित्रगवीणामित्यादौ णत्वं भवत्येवेति लिंगविशिष्टपरिभाषया विभक्तिप्रकृतौ समासत्वात् णत्वरहितपाठस्तु लेखकप्रमादात् पदव्यतेति निमित्तनि-
मित्तिनोर्मध्ये पदेन व्यवधाने इत्यर्थः पदेनेति किम् चतुर्वेदिगेणव हुजयंप्रत्ययः माषकुंभवापेनेति न च माषकुंभस्य वापश्चत्वार्योगानियस्यतेन योग इति विग्रहे उत्तरपद-
त्वे वेति निषेधादगकुंभयोः पदत्वं दुर्लभमिति वाच्यं प्रत्यासत्त्योत्तरपदस्य कार्यित्व एव तत्प्रवृत्तेः अपदादिविधाविति पर्युदासेन पदान्तविधावेव तत्प्रवृत्तेश्च न चैवम-
पि माषकुंभस्येत्यादेर्वापादिनिरूपितकारकत्वात्कृतिकारकोपपदानामित्यनेन वापादिभ्यः सुबुत्पत्तेः प्राक् समासेनेषां पदत्वं दुर्लभमिति सप्तमीसमासेन व्याख्यानेण त्वनि-
षेधासिद्धिरिति वाच्यं तस्यानित्यत्वेनात्र सुबुत्पत्त्यनंतरमेव समासेनादोषात् यत्तु कुमतिचेत्यत्र भाष्ये माषकुंभवापेनेत्यत्र षष्ठीतत्पुरुषोत्तरपदकषष्ठीतत्पुरुषे कुमति चेति नि-
त्यणत्वेन भवितव्यं षष्ठीतत्पुरुषपूर्वपदकषष्ठीतत्पुरुषे प्रातिपदिकान्तेति विभाषयेत्युक्तं तत्प्रामादिकमिति निरूपणं बोध्यं यत्तु एतद्भाष्यादयं निषेध उपसर्गादसमासेपीत्यादेर्ले

त॰ शा॰ नप्राप्नोत्यसुदाहरणमितितन्न पदव्यवायेपीत्येतच्छेषभूतस्मात् ङितइति वार्त्तिकस्यार्द्रगोमये णेत्यादिभाष्योक्तोदाहरणासंगत्यापत्तेः अतद्धितइत्ति प्रवधायकस्यप्रा
शे॰ स दस्थणत्वाश्रयानिमित्तकतद्धितभिन्नपरत्वेनिषेधइत्यर्थः उदाहरणेगोशब्दःपदं सूत्रेनपुंसकनिर्देशात्कुत्सुकुरित्ययुक्तमतआह अत्रत्रमिति वक्तुत्वंचैवमितिबोध्यं गो
६४ प्रादंसे असेवितेसामर्थ्यान्नञ्पूर्वकमुदाहरति अगोष्पदान्यरण्यानीति असेवितइतिबहुव्रीहिस्तेनगवांसंचारोयत्रनैवकदाचित्तत्रैवनञ्पूर्वंसुडितिभाष्यसंमतोयमर्थ
क्षेत्रमित्रि क्षेत्रस्यास्यप्रमाणत्वमनेनबोध्यतेतेनगोष्पदमात्रस्याधिकत्वेपिनक्षतिः आलम्ब्यापर्नशरीररक्षणमित्यर्थः तत्फलकस्थानलाभःप्रतिष्ठाप्रकृतेलाभ
विषायस्थानेनयापथास्पदमनेनलब्धंशरीरस्थलापन्नस्थानंसब्धमित्यर्थः अद्भुतेति अनित्यत्वेनकादाचित्कतयाद्भुतंलक्ष्यतेइत्यर्थः विकिरग्रहणमिति विष्कि
रः शकुनौविकिरोवेतितन्मतेसूत्रपाठः तस्यापिविकिरशब्दस्यापि भाष्येति तत्रहिशकुनौविकिरोवेतिवाच्यंविष्किरः शकुनौवेत्युच्यमानेशकुनोन्तुस्यजातौ
येचान्यत्रार्थेनित्यमेवविष्किरःस्यात् सिद्धिशब्दस्यविकल्पायोगात् शकुनौवा अन्यत्रवेत्यधिकरणविकल्पस्यैवप्रतीतेरित्युक्त्वानवक्तव्यंनवावचनेनशकुनिरूप
मधिकरणंसंबध्यतेकिंतुनिपातनंविष्किरइत्येतच्छकुनौवानिपात्यतइत्युक्तं एवंचान्यत्रविकिरस्येष्टत्वंस्पष्टमेवलभ्यतेदृश्यतेचाविकिरैवैश्वदेविकमितिप्रयो
गइतिदिक् कशधातोरिगुपधज्ञाप्रीकिरइतिकेनेनसुट्पनिविभ्यइतिषत्वं कशेरेवकशेति कश धातोरेवकशंस्यइत्यर्थः इहचगतिःप्रतिरूपसर्गोनकशेरिति
भावः अमंत्रार्थमिति मंत्रेतुहस्वश्चंद्रोत्तरपदेमंत्रेइत्येवसिद्धमितिभावः हरिश्चंद्रोराजर्षिः सुडितिवर्णोइतिश्चेति परिव्राजके चात्सुडपि इदंहस्त्यनुसारेण
अयंनाकरोदयंनाकरोदितोमाकृतकर्माणिशान्ताकाम्यकर्मेहानिद्रासकेलकर्मपरिहानिर्युष्माकंश्रेयसीत्युपदेष्टामस्करीपरिव्राजकःमाङ्युपपदात्कृञः
निर्माङोहस्वःसुट्चनिपात्यतइतिभाष्यकैयटयोः इदमेवयुक्तं वृत्तिमतेमस्करशब्दादिनेयोगरूढ्यापरिव्राजकवाधे सिद्धेमस्करिपरिव्राजकग्रहणवैयर्थ्या
पत्तिरितिबोध्यंकातीरईषदर्थेवेतिकोःकादेशःकारस्करोदिवाविभेतिटः केचित्विति अत्रारुचिवीजंतुपारस्करादिषुप्रत्ययस्तनोदर्शनंप्रकरणाद्धिमृगस्थानेएवत्ते
नसत्वविधानंचेति नसूत्रेष्विति नगणसूत्रेष्वित्यर्थः एवंचपारस्करादयंतगणसूत्रमिदमितिबोध्यं पारंकरोतीति कृञोहेत्विति टः पारस्करोदेशानगरंच तद्ध एम॰
हनोरिति प्रायस्येतिचगणसूत्रे करप्रत्ययेसुसुडितिअतोनरुत्वंनहूहताःसत्यादेशेतुनतद्दुर्वारं वृहस्पतिरिति वृहत्याःपतिरितिकुकुट्यादीनामंडादिष्वितिपुंवत्वा २६

ल॰ श॰ वाग्विस्टहतीनस्याएषपतिरितिदर्शनात् तन्मात्पाश्च्यानेतुद्दहतोवाक्समूहस्यपतिरितिविग्रहोवोध्यः प्रायस्येतिनिर्देशादकारांतः पुल्लिंगस्तयोर्वा चीप्राप्त

पो॰ स॰ शब्दः प्रायोनामतपः प्रोक्तंचित्तनिश्चयउच्यतेइतिस्मृतेः प्रायःपापमितिस्मृत्यंतरात्पापवाच्यपीतिसर्वेष्टसिद्धिः इतिसमासाश्रयविधयः सवत् १९ २८

६५

॥ श्रीगणेशाय नमः ॥ मंगलादीनि मंगलमध्यानि मंगलांतानि च शास्त्राणि प्रथंते इति भाष्योक्तेर्विघ्नविघातार्थं ग्रंथमध्ये कृतं मंगलं शिष्यशिक्षार्थं निबध्नाति ॥ श्री
त्वा ऽर्हतीति। श्रौत्रं श्रोतीति यत्त्वं वेदाध्ययनकर्तृत्वं आर्हं तीयोग्यता। तद्विहितकर्मानुष्ठातृत्वमाभ्यां विनैः प्रसिद्धैरित्यर्थः। गुरुभिः प्रशस्तगुणवद्भिः अर्हद्भिर्वा। अहन्यहनि
विजयते नरामिति। वीति भिन्नं पदं। तिङ्ङ्श्चेति नरप्यामतिङः नोन्तरपदस्य समासश्चेद्रस्य वा। उपसर्गाणां द्योतकतया वीत्यपि तत्सापेक्षत्वेनासामर्थ्यात्कथं नरविति न
नांक्वं। पूर्वार्द्धेनास्य संगतिमाह। पूर्वार्द्ध इति। कथितः प्राधान्येनेत्यर्थः। तृतीयाध्यायेति। उणादीनामप्युणादयो बहुलमिति सूत्रबोधितत्वात्तत्त्वात्पंचम इति। लट्
लिडित्यादिकक्रमापेक्षयेदं। छंदोमात्रेति। तेन तद्रूपाणामिह प्रदर्शनान्न्यूनतेति पसलं। वर्तमाने। कालादेर्ग्राह्यतयाह। वर्तमानक्रियेत्यादि। वर्तमानकालक्रि
यस्यार्थः। वर्तमानत्वं प्रारब्धापरिसमाप्तक्रियाश्रयत्वं कालगतं बोध्यं। अटाविना वितिअकारस्य विनेत्संज्ञानि वस्तुप्रायाभावान्नाटिवं टेरेत्वार्थं। लः कर्मणीति लः
ति उच्चारणार्थो कारेण जातौ प्रथमैकवचनांतं। लस्येत्येतत्स्वरसात् प्रतिपत्तिः सौत्रत्वान्निर्विभक्तिकानुकरणत्वाद्व्याख्यासांप्रातसूसीसादौ हल्त्वं नातिवारीनो
पित्वं गुणार्थं स्वरार्थं च आदेशैः साहचर्यान्नागमत्वमिटः एषां स्थानिवद्भावेन प्रत्ययत्वे सिद्धे पिदेशांशनिरांकासलोपं च अविरोधात्प्रत्ययः परश्चेत्याद्युदात्तश्चा
नि च संबध्यत एव। अत एवैतत्सूत्रविधेयतादिविषये प्रत्ययसंज्ञासन्नियुक्तमाद्युदात्तत्वमित्याद्युदात्तश्चेति सूत्रे भाष्ये उक्तं। लरित्यादेशापेक्षया षष्ठीत्याह। ल
देशा इति। सिजादयस्तु विशिष्टोद्देशेन विहिता न लमात्रोद्देशेनेति न तेषामत्र ग्रहणं। अस्याकडारत्वेपि प्रत्यादौ सावकाशं परस्मैपदसंज्ञां पुरुषसंज्ञा न बाधते
सिचि वृद्धिः परस्मैपदेष्वित्यादि लिंगात्। एकसंज्ञाधिकारादेवात्मनेपदपरस्मैपदसंज्ञयोर्बाध्यबाधकभावः। शेषपदार्थज्ञानायात्मनेपदविधायकान्याह। अनुदात्तङि
त इति। नतरं ज्ञाश्चेति। तेन यङ्गः नात्मनेपदसिद्धिः। यङ आदेर्ङित्वमादायतत्सिद्धावपि यङन्तसमुदायस्य तद्भूनिरूपिताङ्गत्वाना पत्त्याः डाघ्यव्यवस्थापनिरिति केचिनाचा।
अघंते तु नामंडूकप्लुत्या भूवादयः इत्यतो धातवः इत्यस्य षष्ठ्या विपरिणतस्यानुवृत्तेरिति भाष्ये स्पष्टं। स्वरितञितः। कर्त्तारमभिप्रैतीति तत्कर्त्रभिप्रायं कर्मण्यण्। अभिप्रै
तिर्गत्यर्थस्तदाह कर्तृगामिनीति क्रियाफलं च श्रुत्यालोकतो वा यद्वद्देशेन क्रियाप्रवृत्तिरवगतात देवनरस्सिणादिरूपं। तच्च पच्यादौ भोजनादि लोकतोवगतं य
ज्यादौ स्वर्गादि श्रुत्यावगतं। कर्तृगामिफलफलकक्रियावृत्तेर्धातोरित्यर्थः। नरर्थत्वद्योतकं चात्मनेपदमेव यजमानस्य पाकयागादिसामग्रीसंघटनरूपं संविव

नयंगभ्यानो यजतेरित्यादौ धात्वर्थः। नचैवं णिजापत्तिरिति वाच्यं संविधानपूर्वकप्रेरणायामेव णिजर्थत्वात्। यत्र सति प्रयोजकस्त्वुच्यते न हि संविधानमात्रेण तथोच्य
ते। संविधानं कुर्वन्नपि नयावत्प्रेरयति न तावत्प्रयोजक इत्युच्यत इति हेलाराजोक्तेः। भिक्षा वासयतीत्यादावपि प्रयोजकत्वारोपो बोध्यः तूष्णीमासीनोऽपि यत्तत्समर्था
चरति सोऽपि वासादि प्रयोजक इति भाष्यात्। तत्समर्थाचरणमात्रेण तत्प्रयोजकत्वारोपपरत्विति तदर्थः। तत्समर्थाचरणपूर्वकप्रेरणा तत्र तत्र धात्वर्थः॥
। तदुक्तं हेलाराजेन यः स्वर्गादिफलार्थं भृत्यादीतरं व्यापारयति स्वयं च प्रतिविधानमारभते तत्रैव यजमानादौ कर्तर्यात्मनेपदमिभ
ष्यते इति। केषांचित्तु कर्त्रभिप्राये णिचा सह विकल्प्यते आत्मनेपदमिति हरिकारिकाव्याख्यावसरेऽपि हेलाराज आह। णिच् प्रेरणावाची। तत्प्रयोजको हेतुश्चेति सूत्रा
त्। अत एव तदाश्रयस्य कर्तृत्वं पाचयति देवदत्तो यज्ञदत्तेनेत्यादौ। एवं च भिन्नविषयत्वाद्विकल्पोक्तिरसंगता। किंच सामान्यविहितणिचो धातुविशेषाद्विहितेना
त्मनेपदेन बाध एवोचितः। एतच्च केषांचिदित्यनेन सूचितमिति। क्रीणीष्व वपतेरित्यादिप्रयोगाणां तेनैव गतिरुक्ता। क्रीणीष्व मानमिति विनतां कद्रुराह। तत्र प्र
त्युपकारं विना दास्यान्मुक्त्यसंभवात्। प्रत्युपकारस्य च स्वासाध्यत्वात्पुत्रसंविधानं गम्यते न तु स तदर्थः। एवं केशान्श्मश्रु वपतेरित्यादावपि स्वस्यासामर्थ्येन साम
र्थ्यात्कर्तुः संविधानं गम्यते न तु स तदर्थः। एवमन्यत्राप्यूह्यमिति॥ स्वामिदासौ पचेते इत्यादौ स्वामिधर्मस्य दासे आरोपादात्मनेपदं दासधर्मस्य तु न स्वामिन्या
रोपः उत्कर्षनिकृष्टधर्मारोपस्य प्रयोजनं विना स्वरसतोऽप्रतीतेरिति न कदाचित्तत्र परस्मैपदमेतच्च मंजूषायां विस्तरेण निरूपितं कमलवनोद्घाटनं कुर्वते इ
त्यादौ तु सुगंधाघ्राणादिरूपविकासफलारोपः किरणेष्विति न दोष इत्यन्यत्र निरूपितं। युष्मद्युपपदे। सामानाधिकरण्यमेकार्थबोधकत्वं तच्च प्रत्यासत्त्या लकारे
णैव स्थानिना इत्येनाह। तिङ्वाच्येति। अत्र तिङ्ग्रहणं तस्यानिलकारत्वात् सलिणकं। एतद्विधेयस्य तिङ एतद्वाक्ये उद्देश्यत्वासंभवात्। उपोच्चारितं पदमुपपदं त
तु कृत्रिमं तस्येहानुपयोगात्॥ अप्राप्तेश्च स्थाने प्रसंगस्तद्भिन्नस्थानिनीत्यर्थः स च तदर्थावगतौ सत्यां वक्ष्याप्रयोगएवेत्यभिप्रेत्याह। अप्रयुज्यमाने इति॥
अपरेऽर्थमाह। प्रयुज्यमाने चेति। त्वद्भवति॥ अलं त्वं संपद्यत इत्यादौ तु न। त्वं त्वाद्वस्य गौणत्वात्। त्वत्कल्प इत्यादौ कालांतरदृष्टगुणस्यैवेप्सदसमासोऽप
स्य इति त्वत्कस्यो भवसीत्येवा। ननु तिङ्वाच्यकारकवाचीत्वत्कल्पत्राव्दो न स युष्मच्छब्दः। न च युष्मदीत्यस्य युष्मद्वतीत्यर्थः सोऽपि लक्षणेति वाच्यं॥

अतित्वं भवतीत्यादावपि मध्यमापत्तेः स्पष्टं चेदं भाष्ये इति चेन्न। युष्मदि साधने इत्येवं भविष्यतीति भाष्य एव समाधानात्। युष्मदर्थेन यत्र त्वं न तस्य सामानाधिकरण्यं तत्र मध्य-
मरूत्सर्थेन तत्त्वाभ इति कैयटः। त्वबोध्यार्थेन समानाधिकरणे युष्मदर्थबोधकशब्दे उपपदे इत्यादिक्रमेणार्थः। सामानाधिकरण्यं च तदर्थप्रवृत्तिनिमित्तयोर्वोध्यास-
लिंगस्य चेतनाचेतनसाधारणस्य भवदर्थत्वात्। युष्मदस्त्वलिंगचेतनैकविषयत्वाद्भवच्छब्दयोगेन मध्यमः। संबोधनार्थो मध्यमे प्रतीयते। युष्मदर्थं संबोधन एव
प्रथमेति तु न युक्तं त्वं पचसीत्यादौ तदप्रतीतेः। क्रियाविनियोगफलकाभिमुखीकरणस्यैव संबोधनत्वात्। तदुक्तं हरिणा। प्रत्युक्त्वापरभावश्च त्वमुपाधीकर्तृकर्म-
णोः। तयोः श्रुतिविशेषेण द्योतकौ मध्यमोत्तमौ। सदसद्धापि चैतन्यमेताभ्यामवगम्यते। चैतन्यभागे प्रथमः पुरुषो न तु वर्तते इति एवं च मध्यमोत्तमाभ्यां चैतन्ययुक्तक-
र्तृकर्मणी बोध्येते प्रत्यक्त्वं प्रयोक्तुरहंकारानास्पदचेतनत्वं। अपरत्वं तदहंकारास्पदचेतनत्वं। कर्तृकर्मविशेषणं तयोः श्रीतिसिद्धैवेति श्रुतिविशेषेणेत्युक्तं-
शृणोतन्त्रावाणं इत्याद्यर्थमसदिति अनभिव्यक्तमित्यर्थ इति मंजूषायां विस्तरः। अतित्वं भवतीत्यादौ अतिक्रमितुः प्राधान्यान्न मध्यम इति बोध्यम्। प्रहासे च। आ
पूर्वोत्तरसूत्रयोरपवादः। मन्योपपद इति बहुव्रीहिः। प्रकृतिभूतस्य मन्यतिकर्तृकर्तृक एव प्रत्यासत्तेः समानाधिकरणे इत्यनुवृत्तेश्च मध्यमोत्तमयोर्व्यत्यासेन प्रा-
योगे प्राप्ते इदं। अत्राद्ये वाक्ये स्मद्युपपदे इति द्वितीये युष्मद्युपपदे इति च संबध्यते। उत्तमार्थस्यैकत्वविधानात्तत्समानाधिकरणे युष्मच्छब्दे एकवचनान्त एव। अ-
स्मदि। आद्यंतपदरहितं पूर्वसूत्रमनुवर्ततेतराह। तथाभूत इति। युष्मदस्मद्भ्यां समानाधिकरणे तु परत्वादुत्तम एव। अहं च त्वं च वृत्रहन्त्संयुज्याव हेर इति यथा-
ऽऽदिवरन्तश्च त्वं चेन्नैकशेषे युवां भवथ इति मध्यम एव युष्मदर्थसत्त्वेन शेषत्वाभावात्। एकशेषे शिष्टशब्दप्रवृत्तिनिमित्तेनैव तु मार्थबोधात्। उपयुक्ता समभिव्या-
हृतस्योपयुक्तादन्यस्य शेषपदार्थत्वात्। स्पष्टं चेदं सर्वे भाष्ये। एवं च तत्र वाक्येऽपि भवथ इत्येव भवच्छब्देन युष्मदस्मदोः सहविवक्षायां पूर्वशेषे एष इति मध्यमोत्त-
मयोरिव। परस्य भवतः शेषस्तु नानभिधानादिति कैयटः। भूवादयो। स्नेहाद्यन्सधारणं सत्तायामित्यादेरर्थनिर्देश इति शेषः। पूर्वं भूकथनं महाभाष्यादिनिस्मारकतया मांगलिकत्वा-
त्सत्तार्थनिर्देश्यप्येवं सत्तास्वपरत्रसरणः स्मरणात्। कर्मणः कर्त्रधीनत्वेन पूर्वं कर्तृप्रत्ययानाह। कर्त्रिति। धातोरिति पंचम्यंतस्य पृथक्सूत्रस्याधिकारसामर्थ्यादा-
ह। धात्वधिकार इति। कर्त्र्यर्थे इति। विकरणास्तु सति संभवे द्योतका इति भावः। अतीत्यादौ विकरणं विनापि तत्प्रतीतेः वस्तुतस्तिवादयोऽपि द्योतका एव तत्कारार्थश्च क्रिया-

ति
भ्वा॰ प्र॰
२

यामेवांने देनान्वेति गुणागुणिनोरिवक्रियानद्वत्तोरपितादात्म्यांगीकारात्। अत एव कैयटेन युष्मदर्थस्य यत्र त्वंतेन सामानाधिकरण्यमित्युक्तं। अन्यथा त्वेनेत्येव वदेत्। इ
त्यन्यत्र निरूपितं। ननु कर्तरीति व्यर्थं भावकर्मणोस्तु यकावाधान्न दोषः न हि धौहि भावकर्मणोरिति वर्त्तते इति चेन्न। दिवादिभ्य इत्यादावनुवृत्त्यर्थत्वात्। अन्यथाऽपु
वात्सुविप्रतिषेधेन भावकर्मणोरपि तेभ्यः श्यन्स्यात्। यक् पुरस्तादपवादन्यायेन श्यप एव बाधक इति दिक्। प्रत्ययावयवस्येति ति नो ऽस्मिन् तत्यादेर्मे दोषः सर्वे सर्व
पदादेशा इति न्यायेन तु प्रविशिष्टस्यांतविशिष्ट आदेशा इत्यर्थः। अत एवानुनासिकादावुपदेशिवद्वचनेनांतरंगत्वादिति भावे कृते स्थानिवत्त्वेन परस्मैपदत्वादि
नोलोपे एकदेशविकृतन्यायेन झित्वात्मनोऽजु सधातोरित्यधिकारान्नेति भाष्ये स्पष्टं। झेर्जुसित्यत्र प्रक्रियालाघवाय विशिष्ट एव स्थानित्वं बोध्यं। भवंतीति। अत्र अ
वकारांत्यकारयोः पररूपे कृते चः परस्मिन्निति स्थानिवत्त्वाद्गुणः॥ वार्णादांगमिति तु समानस्थानिकत्वे एवेति बोध्यं। अतो दीर्घो यञिकि। भवतः। एहि मन्ये इति। आ
दनं भोक्ष्य इति त्वं मन्यसे इत्यर्थः। एवमग्रेऽपि बोध्यं। सत्यप्योदने परिहासशीलस्यालकादेर्वाक्यमेतत्। अत्र मननापेक्षया भोजनस्य भविष्यत्कालत्वे मननस्य तु
वर्त्तमानत्वेन परिहासपोषायैवेहीत्याकारणं। रथेनानिर्देशादिह न। एहि मन्ये रथेन यास्यामीति। अत्र पुरुषव्यत्ययस्य प्रहासव्यंजकत्वं। परोक्षे लिट्। परो
क्षत्वं च साक्षात्कृतमित्येतादृशविषयताशालिज्ञानाविषयत्वं। भूते इति अनद्यतने लङित्यतोऽनद्यतन इति चानुवर्त्तते तत्र भूतादीनां साक्षाद्धातुविशेषण
त्वासंभवाद्धात्वर्थे विशेषणमित्याह। भूतेत्यादि भूतत्वं वर्तमानध्वंसप्रतियोगिसमयवृत्तित्वं। अतीतरात्रेरंत्ययामेन आगामिन्याः पूर्वयामेन च सहितः कालोऽद्य
नस्तद्भिन्नोऽनद्यतनः लिट् इव षष्ठ्याः सौत्रीत्युक्तत्वादाह लिडादेश इति। एकसंज्ञाधिकारादन्यत्र सत्वेन संज्ञासमावेशः स्यादत आह। एवेति। लङः शाकटायन
स्यैवेत्यतोऽनुवृत्तेरिति भावः। परस्मैपदानां। णलः सर्वादेशत्वं ततः प्राक् णकारस्य लोपाभावेनानेकालत्वादिति केचित्। तन्न। नानुबंधकृतमनेकाल्त्वमिति
निषेधात्। अनुबंधत्वयोग्यकृतमिति तदर्थः ध्वनितं चेदं डारौरस इति सूत्रेऽनेकाल्शिदिति च सूत्रे भाष्ये इति जसः शीत्यत्र निरूपितं। तस्मात् णल अलिति प्रश्लेषेण णोऽने
काल्त्वेनेति सर्वादेशत्वसिद्धिः प्रश्लेषसामर्थ्यादादेशोत्तरमेकादेशप्रवृत्तिः। एवं डा आ इति प्रश्लेषात् डादेशः सर्वादेशो जोध्रुः। लित्वं स्वरार्थं। अन्यथाद्विःप्रयोग
त्वाद्द्विर्वचनस्य पर्यायेणोभयोरंतोदात्तत्वं स्यादित्यत्रैव भाष्ये स्पष्टं। भुवो वुक्। अचिश्विंत्यतो चीत्यनुवर्त्तते। नित्यत्वादिति। कृताकृतप्रसंगित्वमात्रेण कश्चिन्नित्य

नाभ्युपगमादितिभावः। ओः सुपीत्यत ओ इति नुनात्रानुवर्त्ततेफलाभावादस्वरितत्वाच्चेत्यपिबोध्यम् अधिकृत्येति। व्याख्यानादस्याधिकारत्वमेवेतिभावः। एकाजितितद्गुणसंविज्ञान
बहुव्रीहिरप्रथमविशेषणं। अतएव जागर्त्तारौ द्वित्वं तदाह धात्ववयवस्येत्यादि पचादौ रणधातौ च प्रथमस्यैकाच्त्वधात्ववयवत्वे स्तोऽनिष्ट्यपरे शिवद्भावे न बोध्यानि। अजादेरि
तिकर्मधारयः तदाह। आदिभूतादिति। एवंचद्वितीयस्येतिनकार्यमितिबोध्यं। अत्रैकाच्त्वादेः कारकषष्ठीत्वापद्धिः प्रयोगापत्तिरेव। अतएवाटिट्दित्यादौ णिलोपसिद्धिः। स्पष्टंचा
रेत्रामतस्ययोरिति सूत्रे स्पष्टिः प्रयोगत्वमुक्तं भाष्ये। अत्रोनरखंडस्यैवार्थवत्वं। अभ्यासो नर्थक एव ध्वनितं चेदं दयतेरिति सूत्रे भाष्ये। न चात्र पक्षे सिषेधे त्यादौ सात्पदाद्योरितिष
त्वनिषेधापत्तिः सिधेरचातिङ्विहितत्वात्द्वितीयोच्चारणविशिष्टस्यपदत्वान्यदादित्वस्यात्तरखंडाघसकारे सत्वादिति वाच्यमनावेवमुत्तिङैयेोतनः परौ सैष च प्रकृतिराद्या। आ
दिग्रहणं चकृतं समुदायपरत्वमेनेनेति भाष्येण समाधानात् यौततो विधानावधेः परौ तावेवेमौ सुप्तिङौ यतो विहितौ सा प्रकृतिराद्यैव। आगंतूनामंतेनिवेशः इति न्यायात् द्वि
तीयोच्चारणस्यैवविधेयत्वात्। आद्या। आद्योच्चारणविषया। ननु द्वितीयोच्चारणे नव्यवधानमत आदिग्रहणमिति। यस्मात्प्रत्ययविधिस्तदादीत्यस्यात्रानुवर्त्तनात्। सम
दायपरत्वमिति। उच्चारणद्वयविषयत्वेन समुदायव्यवहारइति तदर्थः। कृते तु द्वित्वे द्वितीयोच्चारणेनैवार्थबोधादभ्यासस्य निरर्थकत्वव्यवहारोपि। यत्तु द्वित्वे लिटीत्यस्य वि
षयसप्तमीत्वमाश्रित्य पूर्वं द्वित्वे ततः समुदायाल्लिटितदित्थं च यस्मात्तिङ्विधिस्तदादि तिङंतस्य समुदायस्यैवपदत्वं। समुदायोपि द्विः प्रयोग त्वाद्द्वित्वस्यधातुबुद्धिविषयइ
तिपक्षान्तरमुक्तं। तन्नैकदेशस्यक्रियागणपठितत्वाभावेन क्रियावाचकत्वाभावेन च तस्यधातुत्वापत्त्यभावात्। अतएव दयतेरिति सूत्रे असासितिद्वित्वपरस्यभूभावेरूपा
सिद्धिमाशंक्याङ्धातुके इत्यस्य विषयसप्तमीत्वेनपरिहृतं दंप्रथमद्विर्वचनापवादः। अजादेर्धातोर्द्वितीयाभावे प्रथमवाक्येनैवप्रथमस्य द्वित्वमिति भाष्ये स्पष्टम् न्यपरे शिवद्भावे
नतु नद्वितीयत्वं प्रथमस्येत्युक्तोऽभ्यस्तानामेवाजादेरित्यस्यप्रवृत्तेः। धातोरिति किं तदभावे लिङ्गीत्यादिप्रथमैकाच एव विशेषणं स्यात्। एवं च पपाचेत्यादावेव स्यात् न तु जागारे
त्यादौ अनभ्यासग्रहणमनर्थकं छंदसिवावचनादिति भाष्यं यङन्तानि सनंतानि णिचि चङि वा लोके प्रयोगा अनभिधानात् साधवएवेति तदाशयः। श्लौ तिरयोरितिसूत्र
भाष्योदाहृतं सोषूपिषतेरितितुच्छांदसमेव जुगुप्सिषतेरित्यादौलक्ष्यलक्षणस्येतिन्यायेन निर्वाह इति बोध्यं। द्विरित्यनुवृत्तं षष्ठ्या विपरिणम्यते तदाह। तयोरितिहल्लादिः
शेषः। अत्रलोपोभ्यासस्येत्यतो भ्यासस्येत्यनुवर्त्तते। यद्यपि अभ्यासस्यादिर्हल्शिष्यत इति वाक्ये आदिहल्त्वे न एव ग्रहणान्नमन्यासत्याशेषग्रहणसामर्थ्याल्लभ्याभ्यासस्या

ति
पा॰ ३॰
३

न्यहलांदुष्यंतरतिवाक्येनादन्त्यस्यैवाभ्यासस्यग्रहणंप्राप्नोति। तथापिलस्यानुसाराद्व्याप्तिन्यायात् श्रयेणाभ्यासमात्रग्रहणंबोध्यं। यद्वासंहितापाठेऽहलादिःशेषइति
छेदः अभ्या सस्याहलहल्भावोभवतियत्रादिःसतत्रशिष्यतइत्यर्थान्नदोषः शेषोक्तेःप्रत्यासत्त्याऽन्त्यस्यहलएवलोपइतरनिवृत्तिपूर्वकावस्थानेऽपवादस्यप्रवृत्तेरित्या
शयेनाह। अन्येहलइतिह्रस्वः यद्यपिभवतेरित्येवसिद्धेरस्यप्रकृतेनोपयोगस्तथापिपर्जन्यवच्छास्त्रप्रवृत्त्यभ्युपगमेनेदमत्रोक्तं। अत्राभ्यासस्येत्यनुवर्त्तते। अचइति
चोपस्थितंतच्चाधिकरणमभ्यासावयवस्याचइत्यर्थः। अतएवछोरित्यस्यालेलिटिष्ठाशब्दस्यद्विलेतरंगत्वात्तुकिअनजंतस्यापिह्रस्वसिद्धिः ह्रस्वोह्यांङ्लाहहिरंगः
एतेनतुगपेक्षयापरत्वाद्ध्रस्वइत्यपास्तं। स्पष्टंचेदंदीर्घोकितइत्यत्रभाष्ये। एवमुरत्सत्यतइत्यनयोरपिबोध्यम्। वार्णादांगमितितुउभयोरादेशत्वेएवेतितद्भावः। भवतेरः
प्रयोगेदृष्टानांभूनामनुकरणेतुष्किप। अतएवाशेभूभावेऽपिबभूवेत्येव। तस्यार्द्धधातुकएवविधानेनलुग्विकरणत्वाभावान्नलुग्विकरणेतिपरिभाषाप्रवृत्तिः उभयानु
करणेनादादिमात्रत्वाभावान्नशपोलुक्। प्रकृतिवदनुकरणमित्यस्यानित्यत्वेनादादित्वानतिदेशाद्वा। व्यथोलिटीत्यनुवर्त्ततइत्याह। लिटीति। असिद्धवदत्रेदंसूत्रमनि
त्याश्नसोरल्लोपइतिसूत्रस्यतपरकरणेनातथाहि। असतामितिस्थितेजनसनेतिसूत्रभाष्योक्तरीत्याभीयेषुविप्रतिषेधसत्त्वेनपरत्वादल्लोपेतस्याभीयत्वेनासिद्धत्वा
त्पुनःप्रसंगविज्ञानेनाऽऽटिलस्यभेदाद्वस्येलक्षणस्येतिन्यायात्प्राप्तौप्रागस्यागोलोपस्यवारणायतत्रतपरकरणंनत्वाटोःसिद्धत्वेव्यर्थंसत्तदनित्यत्वज्ञापकमितिबोध्य
मा। इदंचानएकेतिसूत्रेभाष्येस्पष्टं। तेनइंभेदंभेरितिसिद्धं। उवङीति। एतस्यापिह्रस्वापेक्षयानित्यत्वाद्धुकिकृतेऽराभीयत्वाभावेनतत्रासिद्धत्वाभावात्तद्बाधावुवङ्प्राप्तिः
अभ्यासविकारेषुबाध्यबाधकभावाभावाद्धलादिःशेषात्वयोरत्रसमावेशोबोध्यः। आर्द्धधातुकस्येड्वा नेड्वशिकृतीतिप्रकृतेएकयोगनिर्दिष्टानामेकदेशोऽप्यनुवर्त्तत
इतिन्यायेननेतिनिवृत्त्यासिद्धेपुनरिड्ग्रहणंनेड्वशीतिसूत्रेभाष्येप्रत्याख्यातं। आर्द्धधातुकस्येतिकिंजुगुप्सति। स्यतासी। यद्यपिलृशब्देनलङ्लुटोर्ग्रहणंतथापिइह
यथासंख्यंवाचकत्वाच्छब्दसाम्यात्। शवा स्यपवादइति। अत्रार्द्धधातुकइत्यनुवृत्त्याऽस्यलावस्थायांप्राप्तावपियदीदंनस्यात्तदाशप्स्यात्तत्तेत्वप्राप्तिरेवेत्येतावतेतिभावः
लुटःप्रथमएकार्थस्यैकार्थइत्याद्यांतरतम्यान्निर्वाहः। डित्वेतिसर्वादेशत्वंत्वनुबंधान्तरेणापिसुवचमितिभावः। पुगंतेतिबहुव्रीहिगर्भोद्वंद्वःसार्वधातुकार्द्धिकंचेकोवि
शेषणमंगावयवस्येकइत्यर्थः। अतएवमिनत्तीत्यादौनगुणः। नन्वेवंभेत्तेत्यादावपिनस्यादतआहयेनानेतिसूत्रारंभसामर्थ्यादेकवर्णव्यवधानमेवाश्रीयतइत्यर्थः ॥

अत्र कोऽपि किंच सामर्थ्याद्भूतपूर्वलघूपधत्वाश्रयो गुणः इको गुणवृद्धी इति सूत्रे भाष्ये तु पुकि अन्तो लघी उपधा तयोः समाहारद्वंद्व इत्याश्रितं सार्वधातुकादिकं चांगविशेषणं
तत्रैवोक्तिनाकस्य स्खानात् नत्परांगावयवपुगंतलघूपधारूपेको गुण इत्यर्थ इति तदाशयः दीधीवी इड्त्रागम एव व्याख्यानात् ज्ञास्य ल्पेः। अस्याईधातुक इत्यनेः तु इत्तंती
त्पित द्वेधित सकारस्य प्रत्ययावयवस्यैव संभवेन फलितमाह सादाविति। लटूत्रोष्व इति च रहितः पाणिनेः पाठ इति भाष्य स्वरसः तत्र योगविभागः लृडित्सन्न क्रिया
र्थायामित्याद्यनुवर्तते त्रोष इति अक्रियार्थोपपदार्थं। न च क्रियार्थेत्यादिनिवृत्तैव सिद्धे त्रोषग्रहणं व्यर्थं। भावकर्त्रोः लुमुन्ण्वुलभ्यां लृटो वा धाभावाय नतत्र च वासरूप
विधिना तत्सिद्धिः तुमुन्ण्वुलाविति सूत्रे ण्वुलग्रहणेन क्रियार्थायां क्रियायामुपपदे वासरूपविधिना प्रत्ययांतराभावज्ञापनस्य भाष्ये उक्तत्वात्सर्वं चेदं भाष्ये स्पष्टं। आ
त्रोषि। आशीरिष्टप्रासीच्छा। अनन्यार्थ ङित्वेपीति न ह्रूलकल्प्यमानार्थानुवादे एव ङित्त्वे स्येतत्। अर्थांतरकल्पनानिवृत्त्यर्थमिति भावः। परिभाषायां च प्रायेणप
ष्ठप्रामार्थानुवादेनार्थांतरनिवृत्त्यर्थत्वं ब्रीही नवहंती त्यादिवदिति स्पष्टमेवं संप्रसारणादीति। आदिनाग्रवर्ज्रमाक्षुः संभवत्प्रयोजनेति इदं प्रयोजनं सर्वादेशत्वेए
वनांत्यादेशत्वे प्रत्ययत्वात्। मंथरमिति संभवत्प्रयोजनतया स्वविषयाभावसंभावनया ङित्वमात्रदर्शनेन स्वविषयसंभावनया चमंदप्रवृत्तिरित्यर्थः। संभवल्लक्ष्यादि
ति। मंदप्रवृत्तैव तत्त्वमिति भावः एतेन टापयप् अवादि पजन्यार्थपित्वपुचरितार्थस्यानुदात्तौ सुप्पितावित्यस्य जित्वरीत्यादौ तुक्संपादनेन चरितार्थपित्वकरपि उ
क्तन्यायेनांतरंगत्वप्रत्ययाद्युदात्तत्वेन वाधापत्तिरिति परास्तं तद्दरस्य पित्त्वसामर्थ्यसिद्धत्वाभावात्। वस्तुतस्तु तत्सामर्थ्यसिद्धस्य ङित्वेन्यस्याप्राप्तिरेव ङित्त्वस्य सावकाशत्वा
न्नातङि विप्रतिषेधात्सर्वादेश इति भाष्यस्य सावकाशङित्वे प्रवृत्तौ परिभाषात्वविरोधात् प्रवृत्तौ सर्वादेशः सिद्ध इत्यर्थः। न च गुणवृद्धिप्रतिषेधार्थत्वे सर्वादेशत्वं तत्वे च
तदर्थत्वमित्यस्योक्त्याश्रयेण सर्वादेशत्वालाभे अंत्यादेशत्वमेव स्यादिति वाच्यं। एरुरिति प्रकरणे तिस्योस्सादिति न्यासेनानयोरिवर्णस्य नादित्यर्थके नांत्यादेशत्वसिद्धौ
ङित्करणस्य गुणवृद्धिप्रतिषेधार्थत्वबोधनद्वारा सर्वादेशार्थत्वेनादोषात् स्पष्टं चेदं सर्वभाष्ये कैयटयोः तुस्थानिकश्चायमांतरतम्यादनुदात्त एव। हिस्थानिकस्तूदा
त्त एवेत्याहुः निसंङितः ङितुंतमस्येति षष्ठीतत्पुरुषः एतत्त्वे स्वाभवानीत्युत्तरमुचितः से त्यर्थः॥ अपिद्ग्रहणान्नित्वेनानुदात्तः स्थाने जायमानहेरांतरतम्यात्स्वाप्तमंप्य
नुदात्तत्वं एतेन सेर्हि ङित्वेन्येवास्तु इति परास्तं भवतादिति लुगपेक्षया परत्वाद्ध्वातङ् अंतरंगानपीति न्यायस्तु ज्ञापकसिद्धं न सर्वत्रेति न्यायेनानित्यत्वान्नमेर्नि अमोप

त॰

सू॰शे॰ वा देयं स्वपिचेति यस्याडागमः स्वरत्यर्थः सामर्थ्यादिति अन्यथा प्रक्रियालाघवाय हनूएव विदध्यादिति भावः भवानीति लङ् वद्धा वा त्वामसमपि रत्नश्चेति नं मो न इति वक्तव्यम
५ र्मिरिति सूत्रस्थेन। एवं हेर पि बोध्यं अनद्यतने अयं बहुव्रीहिः तेनाद्यस्त्वश्वाभुंस्म हीत्यत्रव्यामिश्रे लुङ् वस चोदात्त इति अंतरंगत्वात्तिवादिषु कृतेषु नित्यत्वाडिकरणे कृ
तेपि कृ रणांतांगस्याडागमः लकार प्रश्लेषेण लावस्थायामेवाडिति षष्ठभाष्ये पस्पांतरमुक्तं। नन्वत्रपक्षे क रोदित्यादौ उपत्स्यया घुदात्तत्वनिबंधनमनुदात्तत्वमटः स्या
त्। उदात्तेस्वंतत्वम भवदित्यादौ चरितार्थमिति चेन्न उदात्तपरे स्वरितत्वप्रतिज्ञानात्स्वरितेनाधिकं कार्यमित्यस्यार्थात्। बलवतोपि सतिशिष्टस्वरस्य बाधनात्। पूर्वेणास्त्रेणैव
लवतोपि परत्वात्स्वस्य बाधनवत् अधिकः कार इत्यपपार्थस्तेन पूर्वेणपरस्य बाध इतिस्य दृष्टं स्वरितेनेनेति सूत्रेभाष्ये अत एव पक्षयोर्न फलभेद इत्यलं अभवदिति नचात्रा
दः परस्येत्यादेर्लोपापत्तिः अनुवृत्तधातोरित्यस्य विहितविशेषणत्वेन परशब्देन परस्य कार्यविधानाभावात् विधिनि॥ संप्रश्नः संप्रधारणं विचारस्तद्धा कर्तव्यमिदं वे
त्यादिरूपः यासुट्पासीयुटोःपवादः प्रत्ययसन्नियोगशिष्टत्वांतरंगत्वात्परस्मैपदानां तसादीनामुदात्तत्वे कृते यासुडागमो नुदात्तः स्यादित्युदात्तवचनं न चाद्युदात्त
श्चेति सूत्रोक्त भाष्यादिरीत्या परस्मैपदविषये लस्यैव यासुटि धातोरित्यस्य विहितविशेषणत्वात् निर्दिश्यमानलस्यैवादेशा इति नोक्तं फलमिति वाच्यं लस्य यासुडा
पिलस्यस्थाने आद्युदात्तत्वसंभवतीत्येवमर्थादुत्पद्यमानस्यैवाद्युदात्तत्वेन तत्र पदागमा इत्यस्य अनुवादविषयाया अप्रवृत्त्या तेन यासुडुदात्तत्वस्य दौर्लभ्यात्। आ
गमा अनुदात्ता इत्येषोर्थः शेषनिघातमूलक एव अनुदात्तं पदमिति सूत्रे पदग्रहणस्य परिमाणार्थत्वेन यावतः परत्वं भावि यावच्च परत्वं भावि तावत्संनिहिता
नां सर्वेषां शेषनिघातेन पश्चात्प्रवृत्तागमानामपि तेन निघातप्रवृत्तेः। सन्निहितानां तु तत्समकालमेव निघात इत्यन्यत्र अलावीदित्यादौ सिचश्चित्वेनेट उदा
त्तत्वान्न निघात इत्याद्युदात्तश्चेति सूत्रे भाष्यप्रदीपोद्योतेनिरूपितं अनेनयासुटोङित्वेपवयवेः चरितार्थेलिंगसमुदायेविशेषणमिति न्यायेन समुदायेङित्वबो
ध्यं ङित्वोक्तेरिति अत्र यद्दत्तच्चांतङितिसूत्रेउक्तं सुटायासुडितिआत्मनेपदे चारितार्थ्येपि परत्वान्मा सीबाधो नेत्यर्थः। विषयभेदादिति एवं च यौगपद्यासंभवरूप
विप्रतिषेधाभावान्न परत्वेन बाध इति भावः एतेनैधिषीष्टेत्यादौ सुटासीयुटोयेन नाप्राप्तिन्यायेन बाधः स्यादित्यपास्तं तकारथकारयोः सुटः सत्वेन कार्यभेदादि।
ति भाष्यकैयटयोः स्पष्टं न त्वस्ति च संभवो यदुभयं स्यादिति वार्त्तिकमते स्यसमाधेर्वक्तुं शक्यत्वेपि सत्यपि संभवे बाधनं भवतीति भाष्यनये प्रथमद्विर्वचनस्य हि नि

यद्विर्वचनेन बाधवत् सुडापि सीयुटो बाधो दुर्वार इति चेत् सत्यं यासुड्विषये सीयुटः प्रतिषेधो वक्तव्य इति वचनेनात्र प्रकरणे बाध्यबाधकभावाभावज्ञापनेनादोषादितिनि
रूपितं भाष्यप्रदीपोद्योते अत एव ऋजुसुविषये यासुट्सिद्धिरन्यथा जुसा यासुटो बाधापत्तिरिति दिक्। लिङः सरुदादिभ्य इत्यतः सार्वधातुक इत्यनुवर्तते। सकारस्य।
स्यापीति। युगपत्प्रवृत्त्या लक्ष्यभेदात् पुनः प्रवृत्त्या वेति भावः यलोप इति न च तत्र कर्तव्ये अंगसंज्ञासापेक्षस्येयो बहिरंगतयासिद्धत्वमिति वाच्यमानस्याभंगाश्रयत्वेन भ
द्रूपस्य सप्तम्यार्थं तोयात्तस्य निमित्तस्यैव ग्रहणं न तु संज्ञाया आर्थस्य चेत्यदोषात्। एवं च येयोऽपरनिमित्तकत्वेनान्तरंगत्वमिति बोध्यम्। सार्वधातुकाव यक्तस्येति
मिति। रुदादिभ्य इत्यतः सार्वधातुकग्रहणमत्रानुवर्तते अन्यथा पचेदित्यादौ दीर्घप्रसंगात् चिकीर्ष्यादित्यादौ अतो लोपप्राप्त्यानर्थक्येनोभयोरपि बाधः स्यात् मध्ये
पवादा इति न्यायेन लोपमेव बाधेतेति स्पष्टं चेदं भाष्यकैयटयोस्तदाह मध्येपवादेत्यादि उसपा। अपदान्तात् किं काउस्ता को स्नान चात्र लाक्षणिकत्वमुसः अपदान्तादि
सेतत्सामर्थ्येनेह परिच्छेदकत्याया प्रवृत्तिज्ञापनात्। अत एवानर्थकेऽ प्रत्यये च भिंद्युरित्यादौ पररूपसिद्धिः अवर्णादुस वपरेऽचीति सूत्रार्थस्तदाह इति भाष्य इत्यत्र
शब्दाकारेणेति भावः नित्यत्वादिति एकादेशस्य पूर्वान्तत्वेन ग्रहणादिति भावः यास इत्येतस्येति॥ वार्णादाङ्मित्यनपेक्ष्येदं संधिरार्ष इति आने मुगिति सूत्रे भाष्येऽतो यार
त्वियुत्तपाठ एव दृश्यते नन्वेवमपि भवेत्यकारेण उसः पररूपं दुर्वारं यदागमास्त इति न्यायेन युस उत्वादिति चेन्न भिंद्युरित्यसिद्ध्यापत्त्याऽर्थवत्परिभाषया यासुट इत्यदागमा
त्तस्या अप्युसविषयेऽप्रवृत्तेः अन्यथागमसत्वे केवले उत्वस्याप्यभावेन तदसिद्धिः स्पष्टं वा। क्ङिति च॥ इह चर्त्वेन गकारोपि निर्दिश्यते तेन जिष्णुः सिद्धिः स्थास्नुरित्य
त्रत्वापत्त्यानार्यं किंदित्याशयेनाह गिदित्यादि। निमित्त इति। क्ङिति प्रतिषेधे गुणवृद्धी भाष्यत्त इत्यध्याहारेण सिद्धसाध्यसमभिव्याहारन्यायेन निमित्तत्वं बुध्यत इति कश्चि
त्तु वार्तिककृता नं तन्निमित्तग्रहणं कृ नैव्यमित्युक्तं भाष्यकृता ज्ञौः किंत्वेन ज्ञापकेन प्रत्याख्यानं गुणवृद्धिविज्ञापनात्वेपि क्ङिति अव्यवहिते उपश्लिष्टस्य पूर्वस्य प्रा
प्नुत इत्यर्थस्य संभवेन परिभाषाया दुर्वारत्वात् अनुवादपरिभाषा नेति तु इको गुणवृद्धी अचश्चेति सूत्रद्वयविषयमेवेत्युक्तं भाष्ये तस्य निषेधस्यानुपलंभाच्च अधि
करणसप्तमीसंभवे उपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायेन यस्य च भावेनेति सप्तम्यपि युक्तेत्यप्युक्तं सिद्धसाध्येति न्यायस्य परिभाषया बाध एवेति चि
न्तः तन्निमित्तग्रहणेन सामर्थ्यात् ज्ञापकेन परिभाषाबाध इति सूचितं स्क इति च स्वरूपपरमत्रानुवर्तते अर्थाधिकारात् तदाह इग्लक्षणा इति इक परलक्षणा इत्य

ति॰
पू॰शे॰
५

र्थः भूवा त्वमिति धातोर्विहितत्वमादीनामित्यर्थेन परत्वाद्गुणाच्च श्चिनिसूत्रभाष्यरीत्यालस्ययासुटि अंतरंगत्वाद्वापूर्वयासूत्रपिनिर्दिश्यमानपरिभाषया न क्षतिः माङिलुङ्माल
ङ्त्यादौ तु निषेधार्थो माङ्शब्दो न माङितिनदोषः इतिकश्चित्तन्न आङ् माङोश्चेतिसूत्रस्थेन माङो विशिष्टस्य ग्रहणं किमर्थं प्रतिषेधार्थकसंप्रत्ययार्थं ममाच्छत्रमित्यादौ माभू
दितिभाष्येण तद्भाववाधनादितिपरेंगापाविहितैस्याख्यानादितिभावः अतएवगापोर्ग्रहणे इण्पिवत्योर्ग्रहणमितिउक्तं भाष्ये भूसुवोः अत्रपितीत्यनुवृत्तावनन्तुवृत्तौ वा फलसं
षयोस्भावेनान्तरन्तुक्तिः। भत्वमितितेनकुत्वजश्त्वेनाविद्यमानादिति।तत्वंचसर्वादेशो नानपत्त्वतत्वं अतएवासीदित्यादौ न दोषः भाष्यात्तु अस्तिसिचोः एक्तेइतिसूत्रपाठे लभ्य
तेतत्रसइतिमध्यमलिन्याये नोभाभ्यां संबध्यतेसांतादस्तेः सांतात्सिचश्चेत्यर्थः लुक्यपिस्थानिवत्त्वं नाल्विधित्वात्प्रत्ययलक्षणसूत्रं तु नियमार्थं विध्यर्थत्वे पि सांतादितिविशेष
णसामर्थ्येन श्रूयमाणसांतपरं अतएव वार्तिककृता सकारः सिचएवविशेषणमित्याशयेन भुवईटिस्थानिवत्त्वप्रतिषेध उक्तः नतु सिज्लुकोपि तन्निषेध आरब्धः सिचस्सइ
तिप्रश्लेषेणेष्टसकारको निर्देशः इत्यस्य भाष्यस्यासंगतिः तदुच्चारणाभावादितिभाष्यप्रदीपोद्योते विस्तरः स्साहुः इतिप्राप्ते इतिप्रत्ययलक्षणेन प्राप्तिः आरंभादेवेति विपरीतनि
यमस्तु न व्याख्यानात्तौ ह्विलुङीत्यत्रप्रकृतसूत्रे चभाष्ये स्पष्टमेतत्सर्वं अडाटाविति।।लुङादिषु यदुक्तं तन्नेतिव्याख्यानादितिभावः "लिङ्मित्तेहेतु हेतुमद्भावादौ त्यादिनाआत्रास
वचनेलिङिन्यपिगृह्यते इत्येके अतिपत्तिरनभिनिर्वृत्तिः उदाहरणेसुवृष्टिभवनसुभिक्षभवनयोर्हेतुहेतुमत्तोर्भविष्यत्कालयोरनभिनिर्वृत्तिरितो वाक्यादम्यते प्रमाणांतराच्च
तयोरतिपत्तिवक्ता वगम्यवाक्यं प्रयुंक्ते "आ निलोडूं उपसर्गसमुदायावयवानिशब्दनकारस्य णत्वमित्यर्थः प्रहिमानीत्यादौ तु नदोषः अनर्थकत्वात्मादीनामनुपसर्गत्वाच्च
वंचलेन्द्र हणमनर्थकमितिभाष्ये स्पष्टं दुरः षत्वणत्वेति। दुरः कृतरेफसांतस्याप्यत्रानुकरणात्तस्याप्ययंनिषेध इतिनिरूपितं "अंतः शब्दस्येतिहिंनेर न्पूर्वस्यत्तुतरमंतरदेशा इति
तु देशाप्रतिषेधार्थमितिभावः अयनं चेत्युत्तरसूत्रमपिकृत्यचइतिसिद्धे देशप्रतिषेधार्थमेवं शेषेविभाषा। अकखादावितिच्छेदः ननु संहिताधिकारात्द्वि वक्षागविवक्षाभ्यांरूप
द्वयसिद्धौ विभाषाग्रहणं व्यर्थमत आह "संहितेति" अत्रैकपदत्वादेन अखंडम्पदम् अतएव नित्यसमास इति चरितार्थं अतएवाग्रेअग्रे इत्यादौ पदद्वित्वेसंहिता अनित्यैव अखं
डत्वं चपदत्वाभाववद्वुत्तरखंडत्वं तेन राजीयतीत्यादौ न दोषः अथान्यतत्रपक्षद्वावेकादेशोपि नस्यादितिवोध्यं अर्थनिर्देशश्चेति भूसत्तायामित्यादिरभिप्रकृत्कृतइत्यर्थः सचक्रिया
वाचित्वबोधार्थइतिभावः पाणिनिलुकाश्चिदर्थरहितान्पठतिकांश्चिदर्थसहितान् अतएव भूवादिसूत्रे परिमाणग्रहणं कर्तव्यं कुतोह्येतत्तभूशब्दोधातुसंज्ञो मविष्वतिन

पुनर्भवं धत्वाद्वदति भाष्ये उक्तं चुटू इति सूत्रे यद्यपि रितः कांश्चित्तु मनुबन्धान्पठन्ति उवुन्दिर् निशामने स्कंदिर् गतिशोषणयोरिति तेन नेरितामिरिहि द्विधिरिति भाष्ये उक्तं तथा नसोवरि
वरतिसूत्रे भाष्ये उक्तं कः खल्वपि पचादीनां क्रियावचनत्वं यत्नं करोतीति अथ खल्वप्याचार्यश्चित्रयति क्वचिदेकं क्वचिन्नेति। उपलक्षणमिति। अनेकार्था अपि धातवो भवं
तीति भाष्यमन्त्रमानं तच्च प्रयोगानुसारेणैव न त्वमर्यादं भाष्यस्यापि श्लिष्टत्वात् एवं च सेधतुर्गताविति सूत्रे गताविति पाठानान्न विधगत्यामित्यर्थनिर्देशः पाणिनीय इति बोध्यं
द्योतका इति अत एवानुभवत्यादेः सकर्मकत्वं अन्योपसर्गास्त्वित्युक्त्वा निपातानां द्योतकत्वं वाचकत्वं चाभ्युपैति एधवृद्धौ अकर्मकः॥ वृद्धिक्षयभयजीवितमरणं लज्जास
त्ता स्थितिजागरणं शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुरित्यभियुक्तोक्तेः टित आत्मनेपदानां आत्मनेपदशब्देनात्र प्रकृतानां तङ एव गृह्यते तेनानस्य नेति
वेष्यमाणं सार्वधातुकं अपिदिति पर्युदासः। न च च्यवे इत्यत्र परादिवद्भावेन अविटोरेकादेशस्यापि त्वाण्डित्वे गुणानापत्तिः एकादेशस्य पूर्वविधौ स्थानिवत्त्वेन दोषाभावात् य
नुवर्तति पिदाद्धातुकयोरिति पठित्वा इदं त्यक्तुं शक्यमिति तन्न मृष्ट इत्यादौ मृजेरिड् क्ङिति चेति निषेधानापत्तेः स्यात्। सेन्तअदेशानीट इत्त्वं नैतन्निज्ञापनार्थं कारोच्चारणं इ
जादेश्च गु॥ धातोरेकाच इत्यतो धातोरिति कास्प्रत्ययादित्यत आम् लिटीति चानुवर्तते इयेष न्यासे तु नामुसन्निपातपरिभाषाविरोधात् लिङ्निमित्ताहितस्य गुरुमत्त्वा
इजादेर्गुरुमतो विहितेन लिटीति वार्थोन्न दोषः इचो गुरा इत्येवानृच्छ इति पर्युदासादर्थान्तरस्यासंभवाच्च इजादेर्गुरुमत इत्यर्थलाभे मनुप्रहणमादिग्रहणं च स्पष्टार्थं
मनुप्रहणादौपदेशिक गुरुमतो ग्रहणमिति तु न युक्तं इदिकं जीत्यादेरुञ्छेश्चामनापत्तेः तत्र हि नुमुत्तरं गुरुमत्त्वा अनृच्छ इत्यस्य वैयर्थ्यापत्तेश्च आदिग्रहण
मुच्छेजादेरेव ग्रहणं न तु व्यपदेशिवद्भावेन जादेरित्यपि न युक्तं ईङ्गतावित्यादेरयांचक्रे इति माधवाद्युदाहृतस्यासंगत्यापत्तेः न च ऋच्छेर्लिटि गुणविधानसामर्थ्यादेव
तत आमभावसिद्धेः नृच्छ इति व्यर्थं आमबाधापेक्षया तस्मिन्निति परिभाषाबाधेन व्यवधानेऽपि गुणप्रवृत्त्या तत्सामर्थ्याभावेन न तत्सार्थक्यादिति तात्पर्यं ज्ञापकादिति नुमि
त्वादित्यादेः परत्वसामर्थ्याद्संजातविरोधित्वन्यायेन सवर्णदीर्घबाधोस्त्विति चेन्न प्रधानसवर्णदीर्घबाधापेक्षया इत्संज्ञाबाधस्यैवौचित्यात् कृञ्चानु। कास्प्रत्यया
दिति सूत्रादनुवृत्तमाम्मिति पंचम्या विपरिणम्यते लिटि परत उपश्लिष्टस्य कृञ आमंतादनुप्रयोग इति सूत्रार्थ जल्फलितमाह आमंताल्लिट्परा इति आमन्तादिति पंचम्या
निर्दिष्टे परिभाषया प्रशब्देन चाव्यवहित एव प्रयोगः अनुप्रयोगव्यासश्चादेवेति च बोध्यं कृञ्प्रहणेति कृञ एवानुप्रयोगे नुप्रयोगस्य सेवसिद्धे तद्वैयर्थ्यं स्पष्टमेव तेषां कि

ति॰
प्र॰ शे॰
६

यति। एधस्पृत्रादयः फलानुकूलव्यापारवाचकाः कृञ्जुन्यस्तनुकूलव्यापारवाचीभवन्नीसत्तानुकूलव्यापारवाचकः आम्प्रकृतिसमभिव्याहारे चान्यत्पारिकमामन्तार्थफलनिष्ठमेव
एवं चएधांचक्रे इत्यस्य कर्तृकवृद्ध्यनुकूलव्यापाराभिन्नपरोक्षानद्यतनभूतउत्पत्त्यनुकूलो व्यापार इति बोधः। सं परिहरति। अभिविधौ संपरा चेति सूत्रे पठितः इत्यर्थः। अ
नन्वितार्थत्वादिति। संपरौ हि सिद्धवस्तुनो योग्यरूपान्तरापत्तिरूपार्थकत्वादिति भावः। द्रव्यं संपादयतीत्यादौ तु धातूनामनेकार्थत्वात्स्वस्वत्वाकामताकरणमर्थः केवलपदेऽप्यनुप्र
योगेनोपाधिः उत्तरदेशसंयोगानुकूलव्यापारवाचित्वं न तस्यापि विशेषवाचित्वात् एतेन कृसजातीयानां धातूनामेव प्रत्याहारग्रहणं संपदे विशिष्टस्य धातुत्वाच्चिंत्यमिदमित्यपास्
तं अनतु इति आमन्तस्यात्मनेपदानर्हत्वात्प्रत्ययग्रहणाच्चेति भावः। तृतीयांतात्तु इतिः अनुप्रयोगस्येति कर्मणि घञ्रूपं च प्रत्यर्थे षष्ठी अत्र न प्रत्याहारग्रहणं अनुप्रयोगस्येत्येव सिद्धे
कृञ्ग्रहणान्न पूर्ववदिति तृतीयांतात्तु इतिः पूर्ववत्शब्देन पूर्वोपादानफलमात्मनेपदमेव नं लक्ष्यते न तदाह पूर्ववदेवेति पूर्वषाष्ठे आम्प्रत्ययवदिति तु इदं दाञ्चकारेत्यादाववकर्तृगामिक्रि
याफले एतद्धि हि गात्मनेपदव्यावर्त्यं न तङिति रदमुपलक्षणं कानचोऽपि एकारोच्चारणमिति। थासः से इत्यत्र न्यमप्येवं तेन डे त्यादि। टित आत्मनेपदानामित्यत्र भाष्यस्पष्ट
मिदं मकदेशस्तु नत्ववस्तुतः परत्वादेत्वे पुनः प्रसंगविज्ञानेन डादिषु कृतेषु लक्ष्यलक्षणस्येति न्यायेन नैत्वमिति लुटः प्रथमस्येत्यत्र भाष्यस्पष्टं कित्यादिर्निर्निकृत इत्यादिन्यर्थे हि
र्वचनोऽस्यान्यत्र पूर्वत्वेन दृष्टस्यैवं चक्रे इत्यादौ कार्याभावात् च परस्मिन्नियमे नासिद्धरिदमारब्धं द्विर्वचनेचीत्यनयोः सामानाधिकरण्यासंभवात् द्विर्वचनशब्देन तन्नि
मित्तं लक्ष्यते ऽतो चीत्यनेन सामानाधिकरण्यं तदाह द्वित्वनिमित्त इति चीतिमससप्त्या — तन्निमित्तकादेशस्य वस्थानिवत्त्वं बोध्यं ऊर्णुनविषती मां दावपितज्ञावमाचिकमन्ते
ण निमित्तताश्रयणाद् चलन्निमित्तत्वं किं च लक्ष्यानुरोधेन साक्षात्समुदायघटकतया वा द्वित्वप्रयोजकत्वं निमित्तत्वमिहेति चक्रतुरित्यादि सिद्धिः एवं च द्वित्वे ऽजादि श्लु
यस्य निमित्तत्वे ऽचोपि तत्त्वं यणि अचो निमित्तत्वे ऽजादि प्रत्ययस्यापि सत्त्व सेरित्यस्य षष्ठ्यंत त्वेपि मनोद्वित्वप्रयोजकत्वमस्ति तत्र लोके समवायिकारणतिरिक्त एव निमि
त्तकारणत्वव्यवहारादरिरिषतीत्यादौ नेसः कारस्य वा द्वित्वनिमित्तत्वमिति न गुणनिषेधः इसो द्वित्वाश्रयत्वात्तदाहुः नहि कार्यमनुभवन्कार्यनिमित्तत्वेनाश्रीयते तस्य समवा
यिकारणत्वादिति तदाशयः एतेन ज्ञापितरित्नतर इति ज्ञापकसिद्धं परिभाषांतरमिति वदन्तः परास्ताः भाष्येऽस्यानुक्तेश्च व्याकरणेऽपि कार्यिणोपश्लिष्टस्यैव निमित्तत्वव्य
वहाराच्चन चारिरिषतीत्यादावविलथा उपश्लेषस्य समीपसंबंधरूपस्य भेदनिबंधनत्वात् अचि किं अधिजगे गाङ्लिटीत्यत्र द्विलंकारकनिर्देशेन लाववस्थायां गाङादेशस्य

सत्वाल्लिटि आर्द्धधातुके इत्यादीनां विषयसप्तमीत्वेपि तद्भावभावित्वेन तद्वृद्धिभावभावितामात्रेणापि निमित्तत्वस्य वक्तुं शक्यत्वात् अत्र सूत्रोपात्तलिड्वृद्धिभाव एव निमित्तमित्यनि
मित्तत्वाभावः सर्वत्रैव वाच्यः शास्त्रे वृद्धिकृतमेव निमित्तत्वादिदमेवाचीति ईदृशनिमित्तत्वाश्रयणे लिंगं आवृत्त्या कालावधारणं मत्वाह द्वित्वे कर्तव्ये इति अच इति किं इ
जायेत तत्र हि कित्वनिमित्तत्वात् संप्रसारणं स्यादेशेषु कृतेषु प्रवृत्त्या तन्निमित्तत्वात् अत्र तन्निषेधे द्वित्वे हलादिःशेषे उत्तरखंडे संप्रसारणे पूर्वखंडे संप्रसारणं न स्यात् न सं
प्रसारणे इति निषेधात् लावस्थायां तु न कित्वं परैः लिवादिभिर्बाधात् अत एवासंयोगादित्यत्रापि दित्यनुवृत्तिश्चरितार्थेति दिक् उरत् चंच्छृतुरित्यादावभ्यासविकारे
वाध्यवाधकभावाभावेन पूर्वं हलादिःशेषे ततोंतरंगत्वात्तु किं उरदत्वसिद्धये आह अभ्यासस्य ऋवर्णस्येति इदं च रीर्कित इति सूत्रे भाष्ये स्पष्टं ननृते इत्यादौ तेनैव म
नोरदत्वे कृते हलादिःशेषः इति बोध्यं प्रत्यये किमिति अंगेन प्रत्ययाक्षेपः किमर्थमिति प्रश्ने वक्ष्यन्निति अन्यथा रदत्वस्यापरनिमित्तत्वात् स्थानिवत्वाभावेन न संप्रसार
णे इति निषेधानापत्तिरत एवासप्तमसमाप्तेरंगाधिकार उक्तो भगवता न च प्रागभ्यासविकारेभ्योंगाधिकारेपि अभ्यासे न प्रत्ययाक्षेपो भविष्यतीति वाच्यम् अभ्यासे
संज्ञैकवाक्यतया लिटि परे ये द्वे तयोः पूर्वस्य ऋतः इत्यर्थलाभेपि अत्वस्यापरनिमित्तत्वानुपपादनात् किंच सन्यङोरित्यस्य षष्ठीत्वेन तद्विषये सत्त्वं तस्य ये द्वे इत्य
र्थेन सर्वस्यापरनिमित्तत्वं दुरुपपादं अंगसंज्ञैकवाक्यतया तु प्रत्यय इत्यस्यावृत्त्या न दोषः अजघांश्चर्करीत्यादौ यङ्लुगंते न लुमतेति निषेधानित्यत्वेन न क्षतिरिति
भावः वस्तुतस्तेन तदाक्षेपाभावेपि अंगसंज्ञाद्वाराः स्यपरनिमित्तत्वं नियमतः परवृद्धेः पूर्ववृत्तितया परनिमित्तत्वात् एवं च चर्करीत्यजघा इत्यादौ दोषशंकैव नेति दि
क् ननु प्रदेशेऽनुदात्तस्यैकाच्त्वाव्यभिचारात् किं तेनेति पृच्छति एकाच इति किमिति॥ न च वधिव्याहृत्यर्थं तत्र तत्सामर्थ्येनोपदेशमात्रे एकाचो यद्ग्रहणादिति वाच्यं आ
द्युदात्तनिपातनेनैव सिद्धेरित्यभिमानात् एकाज्ग्रहणेनेति। तदर्थकेनाच इति पदेनेत्यर्थः अन्यथोपदेशेऽनेकाचामुदात्तत्वस्यैव सत्त्वेन न तद्वैयर्थ्यस्य स्पष्टमेवेति भावः ननु
अकृत्स्न तास्मिन्प्रत्ययेत्र लक्षणत्वेन क्ङिति चेति निषेधाय कं सा किन्तु सामर्थ्यान्निषेध विषयस्यापि तस्य गुणस्य निषेधाभीकारान उपधावृद्धिरिति जाग्रो वीति गुण
विधाने पुजागृधातो वे व गुणांतरस्याभाववोधकमत एव क्रुधातावरौभावः कर्मणोः परत्वाद्गुणे उपदेशग्रहणाच्चिरेव त्वकारिष्यत इत्यादावुपधावृद्धिरिति भावः अयुकः
एकाचः किंजागरितः गिरितिवर्णनायं प्रश्लिष्यते ते न भूः सुः सिद्धः स्यात्सु सिद्धये हि सुर्गिरिति दिक् परत्वादितिखरतीति विकल्पस्यैव मध्ये पवादन्यायान्नास्य बाधक
इति भावः अरुछ न्मृत्रूधातो रितिबहुवचन निर्देशाद्दकारोपि प्रश्लिष्यते स्मृवर्णे तथा च मात्रस्यतु न ग्रहणे ऋतश्च संयोगादेरित्यस्यवैयर्थ्यापत्तेः अन्यथाक्र अतु
मितिस्थिते हि तेव उरत्वे अभ्यासलोपे अत आदेरिति दीर्घे उजर खंडे प्रात्तं यत्वं बाधित्वा परत्वाद्गुणे अरतुरिति स्यादिति भावः इडभावनिरइग्रहणं स्पष्टार्थं अतीत्युभयो
र्ग्रहणं व्याख्यानात् गृध्रवृधातोर्धृतधर्मघृणेभ्यो नक्त्रन प्रयोगइति तृज्वत्सूत्रे भाष्ये स्पष्टं श्रुवः शृवश्रुवः स्वादिपाठः कृतोनवक्ततोरनितिविधिं नेयं यङ्लुक्प्रिगृणातीति
पाठीमिति मन्त्रा ग्रावादेशाः अव्ययात्स्य इति भाष्योक्तपक्षान्तरेतोः स्थानिवत्वेन प्रमाणस्य लुकि सन्नियोगशिष्टन्यायेनादेशनिवृत्तौ कारूप स्यलुर्ल्लभवान् स्मान्तरं प्य
स्य साहचर्याद्यङ्लुक्प्रवृत्तिश्चर्करीतं चेत्यदादौ पाठाद्व्याः दुः हुश्नुवोः एतेनेकाच इत्यतो संयोगपूर्वस्येत्यनुवृत्तमेः सुधीत्यतो नुवृत्तस्य ओरित्यस्य विशेषणं न तु प्रत्ययस्य तेना
शुधंतीत्यत्र यणन अचिश्नु इत्यतो वीत्यनुवर्त्तते हुश्नुवो रितिकिम् अपुवनं न चानेकाच इत्यनुवृत्या टआभीया सिद्धत्वेन न दोष इति वाच्यं तत्तन्या ख्याने दोषवारणा ९७
यतत्वाज स्पष्टाचेयं रीतिर्विविन्हि एव्या रचेति सूत्रभाष्ये तत्र हि वलोपेन सिद्धेः कारविधानं तत्त्वोपस्थानिवद्भावाद्गुणाभावाय नचवलोपविधानधातुलोप इति निषेधसिद्धिः प्र
त्याख्यायते संयोगः तस्मिन्नन्त्यात्परस्माते गुणः स्यादेव अपुत्रं अस्रो रादिति तपरत्व व मन्त्राद्रिन्यत्वबोधनेनचारितार्थ्याच्च भाष्ये यङ्लुको भाषायामपि प्रयोगइत्यर्थज्ञापकत्वान्ति

त्वेकदेशिना एव अत एव क्ङिमेतत्स्थापनप्रयोजनं वेभिदीतीति चेच्छिदीतीत्येतत्सिद्धं भवति भाष्यामपीत्यग्रे भाष्ये उक्तं अन्यथा ज्ञापितेऽप्यस्य सार्वधातुके य उवर्णात् इत्यस्यापि यङ्लुकि आव
श्यकत्वेनैत्येतदिति भाष्यासंगतिः इत्यादि सिद्धं भवति एवं सिद्धं भवतीति वक्तव्यं स्यात् क्ङिमेतस्येत्यादि प्रश्नस्याप्यनुपपत्तेश्च लोके उवर्णान्तप्रकृतिकप्रयोगादर्शनमेवा
स्य प्रश्नस्य बीजं तत्र तत्प्रयोगादर्शनेनैतत्सैकदेश्युक्तिरित्यपि बोध्यं यञ्चिचेति सूत्रे बहुलग्रहणानुवृत्त्या वाक्यभेदेन चलभ्यस्य नैमित्तिकयङ्लुको बाहुलकेनैव प्र
याप्रयोगं लोके पि लाभेन ज्ञापकानुपयोगाच्चेति सुधियो विभावयन्तु इडादेशस्यैवेति व्याख्यानादिति भावः स्पष्टं चेदं गाङ्कुटादिसूत्रभाष्ये फले तु न भेद इति गा अ आते
इत्यत्र वार्णपरिभाषया सवर्णदीर्घं बाधित्वाऽतो ङितः इतीयादेशः स्यादिति भेदस्तु न तस्याः स्थान्येकत्व एव प्रवृत्तेः वृत्तिरितिरिदमुपलक्षणं भाष्यस्यापि मात्वधभ्या
सविकार आभ्यासः सचेत्वमेव व्याख्यानात्तदाहेकारस्येति वस्तुतस्तद्धितनिर्देशो व्यर्थः अभ्यासविकाराणां समावेशस्यैव वक्तव्यतया इत्वाजरदीर्घस्य सुलभत्वान्नस्य
पूर्वं चेदं गुणो यङ्लुकोरित्यत्र भाष्ये गुपेर्निन्दायामिति गोपनाद्यर्थकानां निन्दादौ वृत्तिरनेकार्थत्वाद्धातूनां ध्याजिज्ञासायामिति तत्प्रयोज्ये विचार इत्यर्थः अत एव मानेर्वि
चार इति वृत्तिग्रन्थेन न विरोधः सन्नन्तस्येति अत एव सन्यङ्‌चङ्‌श्विति न सूत्रितम् अत एव यङ्लुकि प्रत्ययलक्षणेन यङन्तत्वाद्द्वित्वमित्यपि परास्तम् न लु
मतेति निषेधान्न स्यात् गुपिप्रभृत्य इति गुप्तिज्मान्वधा इत्यर्थः कितः मिन्ना इति य एवं विद्वान् चिकित्सतीत्यादिप्रयोगात्तस्य परस्मैपदीति भावः यद्यपि भाष्ये गुप्तिज्
कितः मान्बा अनुदात्तेत इत्युक्तं तथापि अनुक्रमदर्शनाय कितिः पठितो न त्वयमनुदात्तेदिति कैयटः यद्यपि विधिर्नोक्तो हन् शानोऽवस्वरि मेता विति नोक्तं तथापि दृश्य
नुसारादेवमुक्तं गुपादिष्वनुबन्धकरणमिति भाष्यणध्वनितोऽप्ययमर्थः अन्यथा गुपादिष्वनुदात्तेत्त्वमित्येव वदेत् परे तु यथा श्रुतभाष्यस्वरसात्कितिरनुदात्तेद
धिः परस्मैपदी निचिकित्सतीति तु च्छान्दसमित्याहुः अर्थान्तरे त्वननुबन्धका इति अत एव गुपादिष्वनुबन्धकरणसामर्थ्यात्संज्ञान्तादात्मनेपदमिति भाष्योक्तं संगच्छ
ते अन्यथा सन्नभिधानस्वभावादर्थविशेष एव साधुत्वेनार्थान्तरे सन्नभावे आत्मनेपदार्थं तस्य चारितार्थ्येन सामर्थ्योक्तिरसंगता स्यादिति भावः चुरादय इति एत
च्च वृत्त्यनुरोधेन परे तु स्वाधर्जीति सूत्रे तेतिक्त इति किं निपात्यते तिजेर्यङ्लुगन्तादात्मनेपदमिति भाष्याद्धातोरिति विकरणोऽप्यते अन्यथा णिजन्ताद्यङ्लोपयोरा
पि निपात्यमानत्वात् एतेन भ्वादौ गोपनाद्यर्थे गुपादेरनुदात्तपाठो व्यर्थ इत्यपास्तं गुपादिष्वनुबन्धकरणसामर्थ्यादित्यस्य सन्प्रकृतिभूते स्वार्थविशेषविशि

ति·भ्वा· ष्टिश्चित्यर्थः भाष्ये हु पधामाख्या जहिशिष्टे घपि अनुदात्तपाठः पाणिनेरिति न्यायतेरित्याहुः भाष्योदाहरणादिति आद्यमतएवेति सूत्रे अन्त्यं सदेः परस्य लिटीति सूत्रे इति वो।
पू·भो· ष्यमुक्तं सेवेदमिति परेत्वत्र न भाष्यानुग्रहः अत एवानुविपर्यभिनिभ्य इति सूत्र इवात्र भगवता पर्युदासप्रसज्यप्रतिषेधयोः फलभेदविचारो न कृतः तस्माद्धि पूर्वस्यास्यति
९८ ऽप्रयोगो वा सत्वं वा प्रयोग इत्याहुः भाष्यमिति संप्रसारणाच्चेत्यादिसूत्रे स्थितिशेषः मतान्तरे त्वितिरिदमेव सारमिति वक्ष्यते अत्र रुचिवीजं तु वैपादिके नारंगोप
रिभाषाया भाष्यनये प्रवृत्तिरिति तस्मादत्रापि षत्वं भवत्येव अत एवाभिषिषेणयिषति अभिषुणु इति भाष्यप्रयोगाः संगच्छन्ते इषगमि अत्र मंडूकप्लुत्यावीति
वर्तते तस्य च शितीति विशेषणं तेनाज्रूपे शितीत्यर्थः दिस्यातीष्यत्योनीति प्रसंगः एवं चात्र सूत्रे तुदादौ चोदित्याठे नार्थ इति बोध्यं इकानिर्देशोपि सौत्रत्वान्नापवोलो
पः गमेरिट् अत्र परस्मैपदमात्मनेपदाभावेला स्थालिकं न इड् इर्जिवतु अत एव नचिसंजिगमिषितेत्यत्रेट् सिद्धिः अनुदात्तस्य च आदेन्नत्वान उपदेश इति सुजिद
नूपसितो इत्यमकितीति च वर्तते धातोः कार्यमुच्यमानमिति परिभाषया सन्निधापितस्य प्रत्ययस्य अकितीत्यस्य वा सकीति विशेषणं अनुनासिकलोप इति स च दंष्ट्राव्याघ्र
र्थके त्वेन नकृत्वं धर्मरं ऋानमित्त परस्वरसात् आधुनिकत्वादिति सर्वधातुपर्यनिर्देशस्य पाणिनीयत्वाभावादित्यर्थः यजदेवपूजेह देवतोद्देशेन द्रव्यत्यागः लिड्यभ्यासवचि
स्वपियजादीनां ग्रहिज्येति सूत्रोपात्तयोरुभयेषां ग्रहणमित्याह वच्यादीनामिति वचिस्वपियजादीनां इकानिर्देशो सौत्रमसंप्रसारणं आदिशब्देन वचिस्वपिभ्यां न संबध्यते स्वपि ग्रह
णेन तु चुरादौ संप्रसारणयोग्यवच्यादेरभावाच्च यजादिः प्रत्ययतः परत्वात्संप्रसारणे कृते सकृद्गतिन्यायेन दित्वाप्राप्तेराह पुनरिति विकिरणमिति कुप्रत्ययः अत एव वपि
प्रकिरणोर्थ इति सन्यङोरित्यत्र भाष्ये असिद्धवदत्र आदेशप्रत्ययत्वाभावाद्भाविधिरयं त्रासिद्धमप्यत्र गृह्यते आशिषि लिङि इत्यादिनिर्देशात् अवात्तामिति सिज्लोप
स्यासिद्धत्वात् सः सीति न त्वे सिज्लोप इकार इति इत्संज्ञकत्वे नुम्स्यादित्याभिमानः परे तु वयिरित्यादौ स्थानिवद्भावेन भाव्यातिदेशिकधातुत्वं गृहीत्वा धातुनिर्देश इकः स
त्वेनमत्तुमित्याहुः उ वायेति लिटि वयो य इति यस्य निषेधात् स्य संप्रसारणं अत्र ग्रस्तादि साह वर्णान्तरस्मैपदिनो वयेर्ग्रहणं न त्वयवयेति इदं कपठितस्यात्मनेपदिन ऊ
वतुरिति वकारे कृते तस्य संप्रसारणं तु न उश्वास्येत्येव सिद्धवादेशविधानसामर्थ्यात् उपदेशेऽजंतत्वादत्वत्वाच्च थल्यिनिषेधमाशंक्याह वयेस्तास्विति यत्तासावल्लिन ९८
त्यानिट् चेति भाष्ये कैः नहि तासौ सत्तास्थानिवद्भाव सह सेणापि अतिदेशुराक्यतिभावः वेजः अत्र किती ति नानुवर्तते तदाह बवाविति सामर्थ्यादिति नत्सामर्थ्यात् तु न विधा

नंतेन विध्यंतरालं बाधय इति भावः इदमेव च सामान्यतो ज्ञापयति अभ्यासलोपाभ्यासंप्रसारणविषये ऽभ्यासविकारे बाध्यबाधकभावो नेति न प्रवर्त्तत इति बोध्यं नेनेष्योर्लिटीत्
स्यापि यण्लोपबाधित्वाप्रवृत्तिः संप्रसारणं तदाश्रयं च कार्यं बलवदिति तु उभयेषां ग्रहलवैयर्थ्यापत्त्या भाष्ये प्रत्याख्यातमिति दिक् इड् इत्यर्त्तीति अन्यथा ऋतो भारद्वाजस्येति विक
ल्पः स्यादिति भावः वीयादिति संप्रसारणे कृ सार्वेति दीर्घः अभ्यस्तस्य च न[illegible]ः भ्यसंज्ञायामुत्तरखंडस्य संप्रसारणे अभ्यासस्य न संप्रसारणमिति निषेधः स्यादित आह अभ्य
स्तीभविष्यत इति प्रवजिस्याय वीयिषतीत्यादावपि संप्रसारणोपपत्तिः अभ्यस्तीभविष्यतो हेत्र इत्यस्याभ्यस्तप्रकृतिभूतस्य हेत्र इत्यर्थेनादोषात् अत्र हि कार्जनतः सन्नेवात
त्मकृतिः यद्वंद्वं धातुस्वरूपमिति कृत्वावयवस्यैकाचो द्वित्वं सहितत्मकृतिरित्युच्यते अत एव हूः संप्रसारणमिति सन्चङ्परे लोसंप्रसारणविधायकं चरितार्थं तन्न ह्वा यपने
रभ्यस्तप्रकृतित्वाभावादेवं भाष्ये यत्तु कैश्चिदेनाभ्यस्तात् हि सप्रत्यये नंतरस्य कृ यतेर्ग्रहणेन नात्र दोष इत्युक्तं तत्तु शुनिस्वाप्योरिति सूत्रोक्तरीत्याः संगतमिति स्पष्टमेव
गुरुवनुरिति ह्व अनुसरणमालोपापेक्षया नैमित्तिकत्वेनांतरंगत्वात्संप्रसारणे वार्णपरिभाषाया अनित्यत्वाश्रयणेनांतरंगत्वात्पूर्वरूपे वतो द्वित्वे उवङ् उवङि पूर्वरूपस्य
नस्या निवर्त्ते उवर्णांतधातोरुवङ्विधानेनाकारात्पूर्ववृत्तिधर्मावच्छिन्नोद्देश्यकत्वाभावात् आकारैकादेशस्याकारात् परभूतनिमित्तकत्वाभावाच्च प्रत्यासत्त्याचः
पराणि नित्यत्वादेशस्याप्यपेक्ष परत्ववन्निमित्तकस्यैव ग्रहणात् अंछु वदतीति अंछुगत्यर्थवदेधितिगति त्वं विभाषा श्वेः उभयत्र विभाषेयं शुशावेति अत्र नित्यत्वात्संप्रसार
णे नाभ्यस्यात्पूर्वरूपे द्वित्वे शुश्वा वा चेति भावः नन्वेतदभावे लिट्यभ्यासस्येति दुर्वारं तथा च शुश्वायेति सिद्धिरत आह श्वयतेर्लिटीति वाचनिकमेवेदं एतत्सामर्थ्या
च्छु यत्यभ्यासविषयलक्षणानुपप्लव एवेति भावः यत्त्वनेन परत्वात्तस्य बाध इति तन्न अस्य परत्वेन द्विर्वचनात्पूर्वं प्राप्त्या लिट्यभ्यासस्यान्यस्य च द्वित्वान्तरं प्राप्त्या
पुणापेक्षत्वभावेन विप्रतिषेधत्वात्स्वाप्रवृत्तेः तदभावपक्षे तेन बाधस्य वक्तुमशक्यत्वाच्च ॥ मररूपमिति आर्द्धधातुकोपदेशे ऽदंतत्वाभावान्नातो लोपः अभ्यस्यादिति
नन्वंतरंगत्वाद्गुणे रंगत्वाभावाद्ध्रस्वप्राप्त्या यादेशो ऽयांतत्वादेव हलंतलक्षणाया निषेधे सिद्धे किं स्यनेनात्र तिस्विपहलोनेति चेन्न सिचि वृद्धेर्येन नाप्राप्तिन्यायेनांतरंगाय
वावत्वादिति दिक् इति भ्वादयः सौत्र इति कर्मे लिङ्गि तिसाह चर्याजांतरका निर्दिष्टो न त्विकारांतः ऽप्रत्यये कृ सार्वेति दीर्घेणसिद्धेरीयङ् करणात् इत्येके इति ऋतीयते स्यात्
घृणयोरितिको ज्ञादर्थद्वयमपि तत्र घृणयोरिति तस्य जुगुप्साकरुणयोरित्यर्थः निन्यमिज्ञिति अन्यथा भारद्वाजनियमाद्धि कल्पः स्यादिति भावः इत्यल्भ्योः दिहीत्यादौ तु न हि

ति·
घु·शे·
२९

ष्यमानस्यव्यवहितत्वादिट्सहितस्य चानिर्दिश्यमानत्वात् अन्तादित्यत्र धित्वात्परत्वात्तातङि स्थानिवत्त्वेन पुनर्ङित्त्वं तु न सकृद्गताविति न्यायात् युगपत्प्रवृत्तौ स्वस्वनिमित्ता
नंतर्याभावरूपासंभवस्य सत्त्वेन परत्वप्रवृत्तेस्तादृशासंभव एव च विप्रतिषेधशास्त्रप्रवृत्त्युपयोगी स्थानिवद्भावस्तु कार्यप्रवृत्त्युत्तरं न प्रवृत्तिकाले इति युगपदसंभवः स्पष्ट एवेति
दिक् अदः सर्वेषां अड्गार्ग्येत्यतोडिति वर्तते प्रणिहन्तीति नेर्गदेति णत्वं लुप्तषष्ठीकं इति असमस्तं सौत्रत्वाल्लुप्तविभक्तिकमित्यर्थः तेन मुचादौ न दोषः अनुदात्तोपदेशेति अ
नुनासिकान्तार इति दोषः उपदेशे इति किं यतिः क्तिनि नित्त्वेनाद्युदात्तत्वेऽपि न दोषः जघनिषेत्यादौ ... स्वरत्वादाह अभ्यासाच्चेति इदं चाभ्यासांगनिमित्तमन्यपेक्ष एव तेन जिहननी
यिषतीत्यादौ न अङ्गं त इति तेनावधीदित्यादौ न वृद्धिः अलिक्षन्नेति शल इति क्सः लुग्वेति वा लुक् अलिक्षातामिति क्तस्याचीत्यंतलोपः युजर्थ इति अनुदात्तेतश्च हलादेरिति
युच्च विवच्च ल्यंतोदात्तः ज्ञापनार्थ इति अंसेरित्त्वव्याघातकत्वेन चारितार्थ्यात्कथं ज्ञापकत्वं भाष्यानुक्तं च ज्ञापकत्वमन इदं माघवानुरोधेन स्फायन्निसाघसाध्वेवेति बोध्यं भ
असिद्धकांडे इति तेन सुप्रख्येन निर्वृत्तं सौप्रख्यं तत्र भवः सौप्रख्यीय इत्यत्र धन्वयोपधादिति वुञ् न किं तु छ एव तच्च वचनं णत्वप्रकरणानंतरं बोध्यं तेन पर्यायस्यानमित्यत्र कन्य
च इति णत्वं न अस्वातिवर्तिं अस्यतेः पुषादित्वात्सिद्धे तङर्थं ग्रहणं वक्तीति वच्यादेशः ख्यातेन ह्यशोरुभयोरपि ग्रहणं ख्यातीति प्रयोगस्य ख्यानामनुकरणं दाधेतिवत् वैचित्र्या
र्थ इति श्वेरत्यस्य पूर्वत्रापकर्षः सरत्यस्योत्तरत्रानुवृत्तिरिति वैचित्र्यं इ शोर्ध्वे इङभावार्थं योगविभाग इति न युक्तं भाष्यविरोधात् इङजनोस्त्वेवेति भाष्यसंमतः पाठः आङः शा
सु अयं धातुर्वेवीङ् नंनरमिति जक्षित्यादिसूत्रस्य भाष्यस्वरसः नमोवाकमिति वचेर्घञि वाकः नम इति वचनमित्यर्थः नमस्कारमिति यावत् प्रशास्महे कुर्महे इत्यर्थः धा
तूनामनेकार्थत्वात् ञिञ्जि अयं इस्वादिरपि श्रीङोरुट् ञोन्त इत्यतो ञ इति अदभ्यस्तादिसतोऽदिति च वर्तते तेन च षष्ठ्या विपरिणम्यते तदाहान्त इति ञस्यैव रुडित्वरादेशो दुर्लभः
उतो वृ अचीत्येतद्व्यवहितं नाभ्यस्तस्येति सूत्रमनुवर्तते तदाह पितीति भाष्येऽपि चेति इदं च हलः श्न इति सूत्रे भाष्ये स्पष्टं सार्वधातुकमपिदित्यस्याप्येतदंलभ्यते ननु पूर्ववाक्ये न ङित्त्व
मपि दुर्लभमत आह विशेषेति यूयादिति आर्द्धधातुकत्वान्न वृद्धिः स्तरंतीति अव्यवहिततिङ इड्विधानमत्र बीजं शम्यमोर्बहुलं छंदसीति विकरणलुकि वेदे उदाहरणं ऊ १६
र्णोते उतो वृद्धिरित्यतो वृद्धिरित्यनुवर्तते आम्नतीति ऊर्णोतेर्नुवद्भावेनेजादेरित्यनेकाच इति वाऽऽमोऽभावस्यातिदेशादिति भावः नन्द्राः अजादेरिति कर्मधारयोऽयं चमीतदाह आ
अचः परा इति आदिभूतादचः परा इत्यर्थः ननूत्तरखंडे पिणत्वं स्यादत आह नन्द्रस्येति णत्वस्यासिद्धतयानुवृत्त्यैव द्वित्वकरणेन पङ्क्त्या शास्त्रप्रवृत्तिलक्षणीय द्वितीयप

योगस्यैवसाधुत्वात्वाख्यानान्नोत्तरखंडेनश्च वर्णपूर्वोच्चारेणान व्यवधानाच्च नशास्त्रेणतत्संग इति भावः पूर्वत्रासिद्धीयमिति पूर्वत्रासिद्धमित्यधिकारे भवत्वमित्यर्थः गहादि
त्वाच्छः यत्पूर्वत्रासिद्धीयं त्रापस्य नत्वाद्द्वित्वे रत्सुपतिष्ठते इत्यर्थः तच्च पूर्वत्रेत्यनेनान्वेति एवंच द्वित्वभिन्ने पूर्वत्रेदमसिद्धमित्यर्थः द्वित्वस्य त्वन्यत्रासिद्धत्वं भवत्येव अत्र द्वित्वग्रा
हणबाच्छमाष्टमिकं चाविरोधात् लिंगादिति अन्यथा अनितेरित्यनेन नक्त णत्वस्य द्वित्वे प्राणिणदित्यादेः सिद्धावुभाविति सूत्रं व्यर्थं स्यादेवं च णत्वविधावेवास्यानुपस्थान
मिति भावः विभाषोर्णोः गाङ्कुटादिभ्य इत्यतो ङिदिति विजइडित्यत इडिति चानुवर्तते तत्रे डागम एव विजइडित्यत्र तस्यैव संभवेनार्थाधिकारात् अतः प्रोर्णवीत्यत्र नायं
विकल्पः अन्यथा परमपि सार्वधातुकमपिदिति बाधित्वा निषेधाश्च वलीयांस इति इदमेव स्यादिति दिकृगुणोः पृक्तेनाभ्यस्तस्येत्यतः पितीत्याद्यनुवर्तते उतो वृद्धिरित्यतो हली
ति च ऊर्णोतेर्विभाषा सिचि वृद्धिरिति सूत्रे नेटीति च वर्तते निषेधविकल्पविधिविकल्पस्य फलितत्वान्नेति निवृत्तेर्वाऽऽ हद्वृद्धिर्वेति सूत्रे: पंचानां आद्यंतद्वय इति पंचम्यंतं द्वि
तीयं च छंदं तत्विरोलवो वेत्यतो लटो वेति वर्तते चत्वमिति महाप्राणेद्यामकरणादाहल इति नोक्तं हलादेः पित इति नाभ्यस्तस्ये यतः पितीत्याद्यनुवर्तते सार्वधातुकस्यापिवि
ध्यंतेन उवक्त्येसम्न अपृक्त इति तु नानुवर्तते ब्रवीतीत्यसिद्ध्यापत्तेः वक्तीत्यडिति प्रयोगस्यानामनुकरणेः स्यस्वतंत्रस्य च विनिगमनाविरहादनुकरणमिति भावः दीर्घ
इणः अत्र लोप इत्यतोऽभ्यासस्येति व्यत्ययो लिटीत्यतो लिटीति चानुवर्तते किं तीति किं इयायन च परत्वाद्दीर्घेपि अभ्यासविकारे बाध्यबाधकभावाभावेन पुनःप्रसंगविज्ञानेन
चेयङ् रूपसिद्धिरिति वाच्यं अभ्यासविकारे बाध्यबाधकभावाभावेन परत्वात्प्रवृत्तौ इयङ् जातं दीर्घः निष्टस्यापत्तेः ईयतुरिति ननु इइ अतुसिति स्थितेऽभ्यासदीर्घे यणपि स्या
निवृत्तं न सवर्णदीर्घः अभ्यासदीर्घविधानसामर्थ्यात् पुनर्यणभावे ई अतुरिति प्राप्नोति अनंतरस्येति न्यायेन तत्सामर्थ्येन यण एव बाधो न तु दीर्घस्येति चेन्न पूर्वस्यैव बाधो
स्यानिवर्तत्वेन यणि दीर्घप्रवृत्तेः आयन्निति यण आभीयासिद्धत्वादाद्गुण इत्यसिद्धत्वप्रत्याख्याने तु लाघवस्यायामेडेव कर्तव्यः आङ्जादीनामिति च न कार्यं आटश्चेति सूत्रमट
श्चेति कार्यं तेन एज्यते त्यादौ न दोषः वृद्धिर्विधौ धातोरित्यपकर्षणात्स्वपो हसतीत्यत्र न वृद्धिः अत्तो गुण इत्यनुवर्तनाद इति कर्तव्यं तेनाटीदित्यादौ न पररूपं आयुनगित्यादौ
विदेतुर्णोदसो दीर्घः आयन्नित्यत्र चान्तरंगत्वाद्वृद्धावायादेशः वृद्धौ कृतायामिणो यणिति तु न तत्र एरित्यपकर्षणेनेकाररूपस्येणो यणित्यर्थात् इदं चासिद्धवत्सूत्रन
माङ्योग इति सूत्रयोर्भाष्ये स्पष्टं इणो ण इति प्रसिद्धत्वादस्यैवात्र ग्रहणमिति भावः उभयत इति पूर्वपरशब्दाभ्यामन्तादिशब्दाभ्यां च विरोधस्य पुरःस्फूर्तिकत्वाद्द्वि

ति·भ्व ह्यतिदेशात्तु तस्य युगपदसंभवः यथा द्वयोरेकः प्रेष्यस्तयोर्युगपद्भिन्नदेशकार्ये प्रवृत्तौ विरोधार्थिकस्यापि कार्यं न करोतीति तद्वदिति भावः एतद्विषयेस्थानिवत्त्वं तु न आनुमानि
शु·शे· कस्यान्यादेशप्रभावे विशिष्टस्यस्थानिवत्त्वेपि प्रत्येकं त्रयोः स्थानित्वे मानाभावात् श्रौतसुवर्णचोरवेति बोध्यं स्पष्टा चेयं रीतिरुपसर्गादृस्य त्यूत्सोरित्यस्य प्रोत्यत इत्यादेरेण
२९ कृते प्रवृत्तिवारणपरभाष्येन च भांतस्यैकदेशविकृतन्यायेनोपसर्गत्वारीकारस्य परादिवद्भावेनैत्वाद्ध्रस्वादुर्वारस्पष्टा चेयं रीतिरुदस्केकेवलेइति पूर्वपदान्तोदात्त
त्वप्रयोजनं गुडोदकमिति भाष्यमुपादायांतादिवच्चेति सूत्रे कैयटइति वाच्यं येन विधिरिति सूत्रे भाष्ये सर्वके इत्यत्र नसः पूःकथं न स्यस्यागंगाप्रविष्टनद्याः गंगा
ग्रहणेन ग्रहणं तथात्र दंतः प्रविष्टाकेस्यापि तद्ग्रहणेन ग्रहणमिति वाच्यं यथा परिच्छिन्नपरिमाणार्थवाचकानां द्व्यादिदृशादिशब्दानामूनाधिकयोर्न प्रवृत्तिस
यासर्वाद्युपादानेन क्रि- यमाणसंज्ञयाविनात्रा स्त्र्यापारं न न्यूनेऽधिके वा प्रवृत्तिरित्यात्रां क्वनेदमरसोऽरिति न्यूपकान्समाहितं तत्तुल्यन्यायादत्रापि दीर्घविशिष्टभांते च लौकिक
न्यायेनोपसर्गत्वाभावात् उपसर्गसंज्ञायाः परिच्छिन्नपरिमाणप्रादिगतत्वादिति बोध्यम् लक्ष्यानुसारात्क्वचिन्न्यायानाश्रयणमिति न दोष इत्यन्ये परे तु वतिघटितशास्त्रस्याहा
यरोपबोधकत्वेन तस्य च विरुद्धविषयस्यापि युगपत्संभवेन लौकिकन्यायेनोक्तेन नास्य सिद्धिः किंच तत्रांतादिवत्त्वेपि व्यपवर्गाभावेनोपसर्गान्परत्वस्यैणाभावेनाभी
पादित्याद्यसिद्धिः न चोपसर्गस्येति सूत्रे यतिपरस्योपसर्गस्येत्यर्थज्ञायते इत्यादावेकादेशे कृते व्यपवर्गाभावाद्यताविति लत्वं न स्यादित्यात्रांकांतादिवद्भावेन व्यपव
र्गइति भाष्यासंगतिस्तस्मात्पूर्वपरांतस्वद्भावे आर्थसमाजग्रस्तः स इति वाच्यम् तद्वद्भावेपि वाक्यवभेदाभावेनायतिपरत्वस्यानुपपादने तस्यैकदेशशब्दत्वात् न हि
तेनातिदेशेन वाच्यतुल्यतद्रोपबोधनत्रां कांकर्तुं तस्मादेकदेशिनोक्ते तस्मिन्नर्थपरेलोकेदशिनो भयत आश्रयेनांतादिवदित्युक्तेऽच्परस्मिन्निति स्थानिवद्भा
वाद्व्यपवर्गइति सिद्धांतिनोक्तं अतएवाभेअप्पसमिति सूत्रे ईत्सनित्यादेर्नुम्प्रतिषेधएकादेशे कृते व्यपवर्गाभावाद्धरितेः किंचाभीप्यादित्यादौ वार्णादांगमिति न्या
येन ह्रस्वेकृते लस्येल क्षणस्येति न्यायेन पुनर्ह्रस्वप्राप्तेर्नस्यनिषेधस्योपयोगः इत्थमुपसर्गाद्ध्रस्व इति सूत्रे कैयटस्पष्टं यत्तु न्याश्रयत्वात्स्वत्र तन्न्यायाप्रवृत्तिरितिते नोक्तं तन्तुद २०
र्थायेस्यायसिद्धासंगतमिति स्पष्टमेव यद्यपि प्रोत्स्वते इत्यत्रैकादेशे कृते व्यपवर्गाभावान्न ह्रस्व इति तत्सूत्रे भाष्ये उक्तं तस्य अंतादिवद्भावेपि उपसर्गात्परत्वाभावा
दित्यर्थः भाष्येकदेशयुक्तिरेव वार्णपरिभाषयासिद्धेः आउत्वेन ओत्वते समोत्वते इत्यन्न द्वारणायत्र समेयादित्येतद्वारणायात्र चाणइत्यनुवर्तते इति भाष्य

मध्येकदेशयुक्तिरेव आङेश्चुपसर्गत्वेन तेन न्यायेन पूर्वं ह्रस्वस्यैव प्रवृत्तेः अतएवांतादिवत्सूत्रेः स्यासादीनीं ह्रस्वत्वेनांतादिवत् के पुनरभ्यासादयः अभ्यासो संज्ञार्थ नदीनपुंस
कोपसर्जनह्रस्वत्वानि उपेयाय प्रोत्यते अभ्यासत्रे स्यायुदात्तत्वनवावहिरंगलक्षणत्वात् अन्तरंगह्रस्वत्वं बहिरंगाएते विषयइत्युक्तं न च उहेरह्रस्वत्वेन अंतरंगमुप
सर्गसंबधोत्तरमेव प्रवृत्तेः वर्णाश्रयत्वादेकादेशाएवांतरंग इति वाच्यम् तदपवादवार्णपरिभाषाया अप्यनेनोपलक्षणात् एवं चोभयतइत्यादेरणूयहणानु
वृत्तेश्चैकदेशयुक्तित्वंस्पष्टमेवोक्तं किंचोहेरिवेणमभ्यासादिषगणयत्ताभीयादित्यादेरनभिधानंसूचितं यदप्यंतादिवच्चेतिसूत्रे प्रादितेत्यादावेकादेशाकृत
रपरप्रकृतिस्वराभ्यविप्रतिषेधेन सचावश्यं विप्रतिषेध आश्रयितव्यः नत्वेकादेश उत्तरपदं परं भवतीति अपवर्गाभावाभिप्रायेण सिद्धांतिनोक्ते ननु चांतादि
वद्भावेन परमिति पूर्वपक्ष्येकदेशिनाशंकिते उभयत आश्रयेनांतादिवदित्युक्तं साप्येकदेशयुक्तिरेव एवं न परं [illegible] यत्र च भाष्ये स्योऽह्लोस्वल्क
देशयुक्तिरेव निरूपितं च तत्र भाष्यप्रदीपोद्योते तस्य तत्त्वं अतएवांतादिवच्चेति सूत्रे उभयत आश्रये इत्यर्थं न्यायसिद्धमुक्तं तस्योदाहरणं नदंतं हृजिकता चरसोव्यो
नोकरत्वाकुः समेयादिति आङः प्रश्लेषोऽत्र बोध्यः भौवादिकस्येति इटकिटकटीत्यत्र प्रश्लिष्टस्याङ्गी लिंडीति भावः ईहाईधातुक इति स्वरूपकथनं कितिलिङी
त्यमावतैव सिद्धेः नित्यमधिपूर्वइति धातुसंज्ञानुपाठापेक्षणादधिरहितस्यैव क्रियावाचकत्वं तु काल्पनिकं तस्यास्त्येव अधिरुपरिभावे उपरिभावश्चापठनेनित्य
मपूर्वकत्वमिति भूवादिसूत्रभाष्ये स्पष्टं ननु ह्रिर्वचनेऽचीति निषेधादिणएव ह्रित्वे उत्तरखंडस्य गादेशोऽचीग इति स्यादत आह लावस्थायामित्यादि एवं च ह्रित्वनि
मित्ताज्निमित्तस्याभावेन ह्रिर्वचनेचीत्यस्याप्रवृत्तिरिति भावः गुणयादेशयोरिति पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेणेति सुट्कात्पूर्व इति सूत्रे भाष्ये सिद्धांति
नत्वादिति भावः साधनेनेत्यस्य कारकेणेत्यर्थः उपसर्गेण तत्संज्ञकशब्देन इति दर्शन इति अनेनारुचिर्बोधिता तद्बीजं तु तत्रैव भाष्ये एवमुपक्रम्य नेतत्सारमिन्तु
त्तिः निर्दिशन्नेति अनेन हि निर्देशान पूर्वं धातुः साधनेनेत्युक्तन्यायो ज्ञाप्यते उपसर्गार्थेन तु पूर्वयोगः तेन पूर्वं योगादेवानुभूयते निविशतेरित्यादौ कर्मलकारा
त्मनेपदयोः सिद्धिः नेर्विश इत्यादेर्नेः परत्वयोग्यादित्यादिक्रमेणार्थः पूर्वमेव तङ् संपृचानुरुधेत्यादेरपि संपूर्वत्वयोग्यात्पृचेरित्यादिक्रमेणार्थः अतएव न तत्र धातू
पसर्गयोः समासः तिङि अतिङि इति निषेधात् ध्वनिनं चेदमुपपदमतिङिति सूत्रे भाष्ये गोसंदाय इत्यादावपि सन्न्यासार्थविशिष्टाद्दानोः कर्मण्युपपदेऽणिततः ८

ति॰भ्वा॰ मंत्रा॰ व्ययोगेगतिसमासे उपपदसमासे बोध्यः साध्यत्वेन प्रतीतये च पूर्वं साधनसंबंधः तस्मिंश्च तत्प्रयुक्तं कार्यमपि पूर्वमेवांतरंगत्वात् एवं च तिङ् त्वमस्य नंतरमधि
प्र॰श्री॰ संबंधे वार्णादांगमिति न्यायेन गुणादौ कृते यण् घञ्ल्युडादयोऽप्युपसर्गार्थविशिष्टे सिद्धत्वप्रतिपादनाय पूर्वं तदर्थसंबंधे मंतरंगत्वान्स्वरं हूयनिमित्तसमासात्पूर्वमे
२१ व एवं भावार्थाः तिङोऽपि ध्वनितं चेदं सुट्कात्पूर्वो गतिर्गतो उपपदमतिङिन्त्यादि भाष्ये सुभिन्नपदवाच्यकारकबोधकपदसंबंधप्रसूपसर्गसंज्ञकशब्दयोगोत्तरमेव
अत एव अध्यआउढा अवोढेत्यत्र पूर्वमंतरंगत्वादाद्गुणे पररूपमिति संप्रसारणाच्चेति सूत्रे भाष्ये परत्वादियङिति आङये सयेत्यादिः अत्र वदंतिलावस्थायामङि
तिपक्षे अंतरंगत्वाद्वृद्ध्यावेत द्रूपासिद्धिः कथंचिद्वार्णादांगमित्याश्रयणेऽपि अनेकात्त्वाद्वृणापत्तिः न चाटोऽसिद्धत्वान्न यण् अत्र पक्षे असिद्धवत्सूत्रस्य भाष्ये प्रत्याख्या
नात् न च एरनेकाच इति योगं विभज्य इणो यणित्यनुवर्त्य डादिसहितानेकाचश्चेयण् तर्हि इवर्णान्तेन एवेति नियमान्न दोष इति वाच्यम् शब्दमर्यादयाऽलाभा
त् उक्तरीत्याऽडादिसहितानेकाजिणो यण एवाभावात् भाष्ये त्वसिद्धवत्सूत्रप्रत्याख्यानेऽस्य योगविभागस्य विध्यर्थतामाश्रित्यैतत्सामर्थ्याद्यप्यनित्यत्र पूर्वमाङित्युक्तं
तस्मादीदृग्विषये पक्षयोः फलाभेदायेङ्धातोर्लङ्के नभिधानमेव संप्रसारणाच्चेति सूत्रोदाहृतमध्येयात्तामित्यादि तुच्छांदसं तत्र हि बहुलं छंदस्यमाङ्योगेपी
ति बहुलग्रहणादादिस्त्रोत्तरं परत्वादियङि ततआटि वृद्धिः न चाण् नित्यः इयङेऽपि तत्वात् अंतरंगयादृद्ध्याबाधेऽपि लक्षणांतरेण निमित्तविघातेऽपि नित्यत्वं
गीकारादिति केचित्तु लावस्थायामङिति पक्षेऽपि वार्णादांगमिति न्यायेनांगस्य तन्निमित्तभूतादेशानां च पूर्वं प्रवृत्त्या न दोषः यथांतरंगानपीति न्यायो लुक्तन्त्र
योजकसमासादीनां च प्राबल्यबोधकः अतिप्रसंगस्तु अनित्यत्वाद्वारणीय इत्याहुः गाङादेशादिति व्याख्यानमत्रारणे घुमास्थाजहातीनि हाको ग्रहणं न हाङो व्याख्या
नात् दीङो युडित्यतः क्ङितीति निवर्त्तते आ ईङ् धातुक इति चाधिकृतं ईघतीत्यत्र ईदिति च वर्त्तते इक्स्मरणे इ एवादिकरणादौ विशेषणार्थः ककारः केचित्तु अत
एव भाष्ये इणो गालुङ्योरित्यत्र प्रकरणे इदं पठितं अधीयन्निति ईयङि सवर्णदीर्घः राघवयादिग्य घीगत्येति बष्टीकेचिदिति अत्रारुचिवीजमट आभीयत्वात्सिद्ध
त्वेनानेकाच्त्वाभावः लीवस्थायामङिति पक्षेऽपि लङादिनिमित्तत्वादट् समीनाश्रयत्वेन स्थानिनमादाय वा समानाश्रयत्वेनासिद्धत्वं सूपपादं ईट् इयर्थमसिद्धव २१
त्सूत्रमावश्यकमेव अत एव तत्सूत्रे भाष्यवार्त्तिकोक्तफलानामन्यथासिद्धिं कृत्वापि आरम्भमाणेऽस्मिन्सूत्रे इत्याद्युक्तं सर्वथा प्रत्याख्यानेतु असलङ्प्रथमपुरुषवक्त

वचनेऽनभिधानं स्वीकार्यं अस्यार्द्धधातुके न प्रयोग इत्यजधातावुक्तं युक्तं चेति एवकारः सूत्रस्थ पक्षमाने लिट् च लिङाशिषी त्यादावर्थवान् तथा मित्यंङित इत्यतो ङित इत्य
त्यनुवृत्त्या सिद्धे लङ्ग्रहणं लङ्वद्भावेनैतत्प्रवृत्त्यर्थं विध्याशिषोः स्कोरिति सलोपे यासादित्त्वे वस्मिनिति विशेषद्योतनाय द्विवचनं मुदाहरति यायान्नामिति लिङः
सलोप इति सलोपः यासस्लोगातिस्याद्युमास्थेत्यत्र पिबतेरेव ग्रहणं नेत्वमिज्लुकौ प्रतिदानीति घुत्वाभावाच्छेषे विभाषेति वैकल्पिकं णत्वं सार्वधातुकमात्रेति
मात्रग्रहणं वधात्ले सस्थानत्वमिति स्थानादेशैःस्थानत्वादित्यस्य प्रयोजनकथनावसरे वार्तिकमिदं सस्थानत्वं सस्थानग्रहणेन सवर्णग्राहकेन जिह्वामूलीयो बोध्यते यथा सस्थानत्व
मध्ये सस्थानग्रहणः श्रावृपरत्वज्ञानवर्यन्तरार्थ एवतदाह सस्थानो जिह्वामूलीय इति अन्यथाऽस्मात्सूचितस्य दुर्वारत्वेन भाष्यासंगतिः प्रमाणानां सामान्यपक्षपातात्ताहई धा
तुकमात्रे प्रयोगाभाव इति भावः नटः स्यात्तीत्यादौ तु जिह्वामूलीयो भवत्येवेति दिक् संपूर्वस्येति सार्वधातुकेपि नेति भावः संस्थेति प्रयोगस्तु चस्सिड् एवं नास्येति घुप्रकृ
तिमात्रे इति भाष्ये याम इति भावः अयमंतीति विशेषे इति शेषः अत्रार्थे न भाष्यानुग्रहः विरइतियं चमीविकरणव्यवधाने लटस्तनः परत्वासंभवादाह वेनेरिति अ
कारांतत्रिप्रलनादिति आम्सन्निवेशेनेति शेषः तदुक्तं भाष्ये निपातनाद्गुणत्वमिति विदांकुर्वन्त्विति इतिशब्दः प्रकारे एवंजातीयकमित्यर्थः लदाहे पुरुषवचने इति
तथा जातीयकमुच्चारणमिति भावः कर्तृत्वपरस्मैपदेतु विवक्षिते एव लोकविवक्षानुसारके तिप्रभृतिरिति केते अप्यविवक्षिते गंतरीयकत्वादेवेत्यन्ये लोट् तु
चारणसामर्थ्याद्धि विवक्षित एव अत एवोषविदेत्याम् विधानं तत्राप्येष्याख्यानादुषजागृभ्यामाह च यथा चास्यैव परस्मैपदिनो ग्रहणं गणकार्यस्येति तु नादि साहचर्य
णान दूणस्यस्यैव कृञोत्र ग्रहणं क्रियासामान्यवाचित्वेनान्वययोग्यतया तस्मै वात्रानुप्रयोग इति भावः भाष्ये कृग्रहणस्यात्र प्रत्याख्यानादत्रापि तात्पर्यमयुक्तं
न विस्मृसेदित्याद्यार्थमेव तत्रापि तेपि तस्मादिनार्थ्याभावाच्चेत्यन्ये अत उत्सागमह ने त्यत नक्तीनीति नित्यं करोतेरित्यतः करोतेरिति उत श्च प्रत्ययादित्यत उत इति चा
नुवर्तते तपरत्वसामर्थ्यादिति इदं स्थानिवत्सूत्रे भाष्ये स्पष्टं उदवोढामित्यत्र हृद्धि वत्त्व स्येलक्षणस्येति न्यायेनाप्यतद्धारयितुं शक्यं विकारभेदकृत लक्ष्यभे
दानाश्रयणादिति केचित् तन्न स्थानिकरवतः स्थानिकस्थानि केपि लोकन्यायेन तन्वृद्धेः स्वस्थानिकादेशस्थानिकादेश कृतलक्ष्यभेदानाश्रयणेपि स्वस्थानि
कादेशावयवस्थानिकादेशकृतलक्ष्यभेदानाश्रयणे मानाभाव इति स्थानिवत्सूत्रस्थभाष्याशयं परे॥ कुर्वन्त्विति त्रहलिचेति दीर्घः न भकुर्छुरामिति निषेधात्

नं॰भा॰ लुकोऽसिद्धत्वादिति सार्वधातुक इत्यस्याभावेपि उकारांतांगावयवकरोतेरत उदित्यर्थात् अंगसंज्ञायाश्च लुकापि प्रत्ययलक्षणेन युवोरनाकावित्यादिसूत्रभाष्ये
शु॰शे॰ स्वीकारेण सार्वधातुकग्रहणं स्पष्टार्थमेतत्सूत्रशेषस्यामिदं तर्हि प्रयोजनं सार्वधातुके भूतपूर्वमात्रेपि यथा स्यात् कुर्वितीतिभाष्यं त्वेकदेश्युक्तिरिति बोध्यं
२२ इंश्च सिपि धातोरिति सूत्रं परत्वेन नित्यत्वाच्च तुवर्त्तते परांतत्वेनित्यत्वे किं वेत्सि चर्त्वस्यासिद्धत्वात् हो त्यत्र श्नसोरिति शाकंध्वादित्वात्पररूपं अत्र सार्वधातुके इति निष्फलं अ
र्द्धधातुके तस्य भूभावात् ईहामास इत्यत्र अत आदेरिति दीर्घपरस्यलोपेपि सत्यभावात् अस्य सार्वधातुके एवं सत्वाच्च आसन्निति आयन्निति वत् उपसर्गपरस्येति
सस्य विशेषणं तेनेन प्रादुरासीदित्यत्र न षत्वं अस्तेः किं अनुसूतेऽनुसूतस्यायन्यमानुसेय इत्यत्र शब्भादित्वात् किंच लोप इत्यनुलोपे सकारनिरूपितोपसर्गत्वसत्वेन
लब्धापत्तेः मृजेर्वृद्धिः अस्यास्या धृषीयस्य च मृजूर् इत्यस्य ग्रहणं व्याख्यानात् लुग्विकरणपरिभाषात्वनित्यत्वाद्यत्र न प्रवर्त्तते धातोः कार्यमुच्यमानमिति परिभाषाल
भ्यमर्थमाह धातुप्रत्यये इति तेन परिमृड्भ्यामित्यादौ न अजादाविति आद्यंशो यस्मिन् विधिरिति परिभाषालभ्यार्थानुवादः मृड्ढीति हेर्धिः षत्वष्टुत्वजश्त्वानिप
रत्वादिति युगपत्प्रवृत्तौ द्वयोः स्वस्वनिमित्तानन्तर्यासंभवरूपो विरोधोऽस्तीति भावः रुद इत्यपंहल इति किं व्यस्य रुदिपंचभ्यः किं अजागः पित इति सूत्ररूपकथनं अप
क्तापितोऽसंभवात् इत्यत्रैव तन्निवृत्ते सार्वधातुकस्येत्यप्येवं अरुदितामिति नामादि विधौ धातोरित्यस्य विहितविशेषणत्वेन निर्दिष्टपरिभाषानपेक्ष
णादंतरंगत्वाच्चामाद्येयणंतरङ्ग इदं पाद्भ्यः इति सूत्रे भाष्ये स्पष्टं प्रकृतीति प्रत्ययविशेषापेक्षया सुडपेक्षयांतरंगत्वादिति [illegible] प्राप्तयोः अंतरं
गत्वाभ्यासुडित्यर्थः सामान्यधर्मापेक्षणाज्ज्ञापेक्षया कश्चिद्धि शेषधर्मोऽधिको निमित्तकोटौ यत्र विशेषापेक्षत्वात् [illegible] नत्वंगोबहिरंगमिति तदर्थः रुदादि
त्वे सार्वधातुकत्वं च यथा सार्वधातुकत्वज्ञानापेक्षं तेषां तु ज्ञानं प्रत्ययस्य प्रत्ययत्वज्ञानं चावश्यकमिति सामान्यधर्मनिमित्तकत्वमप्यत्रास्तीति बोध्यं
वस्तुत इदं बहिरंगत्वं भाष्ये क्वापि नाश्रितमिति परिभाषावृत्तौ निरूपितं तस्मान्नित्यत्वादत्र यासुट्कृते प्रकृत्याभावेनाडीटोः प्राप्त्यभावेन तयोर्नित्यत्वा
दित्यन्ये सुविनिर्दुर्भ्यः सुपीत्यागं तु नेकारेणैकस्य संप्रसारणस्य ग्रहणं सूतीति क्तिन्नंतं समेति पचाद्यजंतं साहचर्येण तुस्यापि कृदंतस्यैव ग्रहणान्न सूर्वं धा २२
तुरूपेति द्वित्वान्न पूर्वषत्वाय इत्थं कृते रत्ति सुपि भूतो हि कृत्स्न तेइति भाष्यादिति भावः यदि तु सुपिसंबंधिसस्येति सूत्रार्थोऽभ्यास सोपि सुपि विधीम वत्येव

त्तीयहीयप्रयोगसंबंधित्वादित्युच्यते तदापत्वान्पूर्वेहि त्वेपि न दोषः इदमेव युक्तं पूर्वं धातुःसाधनेनेति सिद्धांतात् अतएव भाष्ये सुपि मृतो हि इत्युच्यत इति प्रभु
रः पाठः अभ्यस्याभ्यासस्यानर्थकात्तत्संबंधिनः षत्वमेव न स्यादिति निरूपितं स्यादिधिंति सूत्रे नित्यत्वाच्चेति अभ्युच्चयोयं सुपि रूपाभावादिति अर्थवत्तापि रूपा
भावादित्यर्थः अन्यथैकदेशविकृतन्यायेन तत्वं दुर्वारमेव अभ्यासस्य नार्थवत्त्वं नापि समुदायस्येत्यत्रैव सूत्रे दयतेर्दिगि लिटीत्यत्र सुट्कादिति च भाष्ये स्पष्टं अनिते
उपसर्गादसमासेपीत्यत उपसर्गादिति वर्त्तते नो ण इति च अत्र समीपार्थकमंतपदमपहृत्य समस्याविपरिणम्यानितेः समीपे यो रेफस्तस्मात्परस्य णत्वमित्यर्थः।
सामीप्यं चाव्यवहितमेव व्याख्यानात् प्राणितीत्यत्रैकादेशस्य पूर्वादिवत्वेनानितेरव्यवहितत्वे रेफस्यास्ति स्यान्निवत्वं तु न पंचमी समासस्य नित्यत्वात् पर्यनिनीत्यादौ यथा
रेणाव्यवधानाच्च णत्वं अन्यथा उदाहृत्यव्याप्तिः स्यत्र पदांतस्येति प्रतिषेधबाधयेपि स्यादिति भाष्ये स्पष्टं अंत इति सूत्रेहे नार्थ अंतापं वाद इति यद्यप्यंतरंगो
हृस्वस्तथाप्यपवादविषयं प्रकल्प्योत्सर्गाणां प्रवृत्तेर्न ग्रामस्येकुल्यायेत्यादौ प्रवर्त्तत इति तृतीयादिष्विति सूत्रके यटोक्तरीत्या प्रकल्प्य वापवादविषयमुत्सर्गो
भिनिविशत इति भाष्योक्तन्यायमूलकेनोपजनिष्यमाणोप्यपवाद इति न्यायेन ददतीत्यादौ अंतरंगोप्यंतादेशो न ईर्त्सीतीत्यादौ नायं अनन्तरस्य पक्षान्त अतएव प्रगोपि वंगी
त्यादौ मजागोविचिण्णल्षयुदासेन वृद्धिविषयस्य ङित्पर्युदासेन प्रतिषेधविषयस्य ग्रहणं विरत्त्वैतच्छास्त्रकल्प्यो विना जागृ किदित्यादि रिन्या यद्युत्यत्र प्रसाप्तिर्यदि कं ॥ उ
णादिषु पालिषेरव्युत्पत्तिपक्षस्यैव सत्वात् । अत्रोणादिको विनिमित्ति चिंत्यं एतच्चोणादय इति सूत्रे निरूपयिष्यते। विग्रहणसामर्थ्याज्जागृवोलस्पर्णांतरेणापि गुणेनाक्ङितु
न मृत्स्येता गुड्ढवार परस्मान्त्र ग्रहणेनात् क्विपस्तुसोनुनासिक इति भाष्ये स्पष्टं । निषिध्यते इति। जागरक इत्यत्र गुणे कृते उपधावृद्धिमुनविण्णल्प्रतिषेधवैयर्थ्यापत्त्या।
जागर्त्तेर्गुणो उपधावृद्ध्यनवकाशनात् यत्तु गुणोत्तरं वृद्धिमात्राभावे एतज्ज्ञापकमाश्रित्य हस्येनेति सूत्रे जागृग्रहणं त्याज्यमिति तन्न सति संभवे स्य ज्ञापकत्वायोगात् तैव ज्ञापक
स्योचिते सःथस्य जागृग्रहणेन ज्ञापनादित्याहुः। जय इति सूत्रस्य भाष्यस्वरस्तु सामान्यापेक्षज्ञापकत्वे एव स्वरसो दृश्यते। इ ह्रि द्रुस्या सौत्रो ह्रस्वः। ईहृत्यघोरित्यस्यापवादस्त्र
आर्द्धधातुके लोपविधानात्सार्वधातुक एवेदं आत इत्यनुवृत्त्या लोपोनंतरं नास्यं प्रवृत्तिः। अनयोरात इति। श्नासाहचर्येणाभ्यस्तेष्वस्यैव ग्रहणाज्जाग्रतीत्यत्र न दोषः। तम्म इ
ति। कास्पत्ययादिति सूत्रे भाष्ये स्पष्टमिदं। ओरत्स्येवेति। ओकारस्य विधानतरत्वेन पदलाघवादिति भावः। आलोप इति। आर्द्धधातुकाविवक्षिते लोपेपि ओविधानसामर्थ्या ८८

देवभूतपूर्वगत्यां कारांतत्वमाश्रित्य णल आदेश इति भावः। आमेनिति पक्ष इति भावः इदंमतं वस्वेकाजादिति सूत्रभाष्ये ध्वनितं। कैयटेन स्पष्टमेवोक्तं। सनिष्वुर्लीति। अनंतरस्ये
तिन्यायेन वार्तिकप्राप्तस्यैव निषेधः तेन दिदरिद्रिषतीत्यत्रातो लोपो भवत्येव दिदरिद्रिषतीत्येके दिदरिद्रासतीत्यन्ये इति भाष्यात्। अदरिद्रासीदिति। अयं प्रयोगः इट्ईटि
स्येति सूत्रे भाष्ये इत्येके इति। धिचेत्यत्र सिचो ग्रहणं कर्तव्यमिति वार्तिकादिति भावः। भाष्यमिति। इष्टमेवैतच्चकाधीति भाष्योक्तेः। सिचोनुवृत्तेरभावात् पूर्वकरणं चोनि
घ्रावहमिति तद्भावः। इति प्यनसेः अनसेः किं। सलिलं सर्वमा इदं। आइति लङि तिप्यसेः रूपं। बहुलं छन्दसीति इट्। नासिपि धा। सिपि वेत्येव रुत्वविकल्पे सामान्यसूत्रेणै
वरुत्वे सिद्धे धातोरुरिति रुत्वेनुवृत्तेरार्धधातुकेस इति। अनुवाग्यस्येव ... सेर्गृहणादाशासेः इत्याशेनेति भाष्ये स्पष्टं। शाहौ इत्वापवादः यद्यपि पूर्वसूत्रेणासइत्यवयवषष्ठी
... पीहोपधायाः इति ... नषष्ठी ... पंचेति। अतएव दीधीवेवीति सूत्रे दीधीवेव्योः छन्दस्त्वादिति भाष्यं जक्षित्यादय इति सूत्रे शासिवशी छान्दसाविति भाष्यं च यी
वर्णयोर्दी। नासस्योरित्यतो लोप इत्यनुवर्तते। यि च इवर्णश्चेति हूंहृः यीत्यत्रेकार उच्चारणार्थ लटाहा यकार इति। नित्यत्वादित्यं तरंगत्वस्याप्युपलक्षणं टेरलमिति।
अचः परस्मिन्निति सूत्रे आदीध्ये इति भाष्यप्रयोगादिति भावः आदीधयते ण्वुलि अंतरंगत्वेन णिलोपात् पूर्वं यीवर्णयोरिति लोपे आदीधक इति सिद्धं। यत्तु णिलोपा
ति सूत्रे भाष्ये वर्णग्रहणसामर्थ्याल्लुप्तेपीत्युक्तं तत्तु अंतरंगत्वमनालोच्या एवं चांतरंगपरिभाषाया अनित्यत्वे एतज्ज्ञापकं इति बोध्यं एतेन वर्णग्रहणसामर्थ्याच्चूयमाणे
इवर्णएवलोप इति ह... इत्ता ... मपास्तं। वेवीङो नंतरं मा... शासित्ति पक्षेतर इति जक्षित्यादय इति सूत्रस्य भाष्यस्वरसः। वससस्ति। जक्षित्यादय इति सूत्रस्य भाष्यस्वर
सात्तु ससि धातुरत्र ... तेन नैव कैयटेष ... भेद ... पठंति। तत्र इति पाणिनिर्देशेन शासएवार्थभेदात्पुनः पाठ इत्युक्तं माधवेनुसेधीत्युमूलपाठः। तदनुसारेणै
वं पचानां ... रसस्वोक्तिः। असः असदिति सिपि धातोरिति वारुः संगीति। इदित्वान्नुमिस्सोरिति सलोपे इरोइरीतिपक्षे तल्लोपः इत्येके इति। अशाद्विसिषीअंगुहस्वेनंतराइति सूत्र
भाष्यविरोधः। तच्च भाष्यादप्ययमप्रामाणिकः। अन्यथा बहूनां सन्निधाने बहूनामेवेति पक्षे समस्त धात्। विवाचापि दोषात् इत्युक्तौ बीजानापत्तिः ... । अस्य भाष्या
यां प्रयोगः सघुरेव। उद्धीति। संप्रसारणं घित्वषत्वजश्त्वष्टुत्वानि। अवडिति। लङि हल्ङ्यादिलोपे षत्वजश्त्वचर्त्वानि। औष्टां संप्रसारणेआदित्वा ... पङ्क्तिपत्वे
वस्यायामडिति पक्षे आड्प्राप्नोति। तथापि भाष्यजादेरपि तेनाद्विधानान्नदोषः। तत्वसेऽज्यतेन्यादिसिद्धये टमेवाश्रित्य आटः प्रत्याख्यानाच्चा चर्करीतं चेति। चर्करीत

२ यजुहोतीत्यपिस्यादित आह प्रसपरीत वेधरीत अह्कमयमादस्य नमन्वालनापम्रस्य २

मितियङ्लुकः संज्ञा तेन तदंतग्रहणं सामर्थ्यात् किरतिं चर्करीतांतमिति समम्मेभाष्योक्तेः। अदादावितिः। तेन यङ्लुगंताच्छ्वेव ननु तन्नग्रहणं प्रयुक्तः स्वस्त्रादिः। पृणो लुक्च
परस्मैपदिनंउपक्रम्यास्य पाठादस्य परस्मैपदित्वमेवेति बोध्यं। इत्यादादयः। भाष्यमिति। तृतीया च होरित्यत्र। दानेप्रसिद्धं चेहि ग्रोप्यमाण काष्ठा दावति प्रसनिवृत्त्यर्थे आ
हा। हविष्वेति। जुहुतइति। श्लोः परनिमित्तत्वाभावेन शत्वेन स्थानितया ऽजादेशत्वाभावेन च स्थानिवद्भावेन त्रात्वमाश्रित्य न गुणापरत्वादिति। हुश्नुवोरित्यत्र दृपेस्य
यतिभावः। मियोन्या। गमहनेत्यतः क्ङितीति वर्तते। अभ्यासस्येत्यनुवृत्त्या सार्वधातुकइत्यनुवृत्त्या वा भातइत्यादौ न दोषः। प्रादीर्घोच्चारणमुत्वाय। उश्छेछ्या। अंगावयवौ इति
ऋगतावितिश्वादेः। जैसमीर्लइतियणास्यादिति न। शृदृहृस्वविधानस्य कित्येव फलमिति सूचयितुं कितीति गुणाभावे वार्णदांगमितियणं बाधित्वोत्वापत्त्या गुणएवनति
कल्पितः। मृजामिति। बहुवचनादाद्यर्थावगतिः निजामित्यतस्त्रयाणामित्यनुवर्त्तते। ईहल्य श्नासाहचर्यादभ्यस्तांतोपि सार्वधातुकएवेद जहातेश्च अभ्यासस्येत्यनुवृ
त्याः स्यलोपायीत्यत्र च सार्वधातुके एव प्रवृत्तिः। दत्तइति। अघोरितिप्रतिषेधादीत्वाभावे श्नाभ्यस्तयोरातोलोपः। अदात। गातिस्थेति सिचो लुक्। दधस्। अंतस्य तथोरित्य
नुवृत्तिसामर्थ्याद्धिरुक्तग्रहणेन धइत्येव सिद्धे दधइति स्पष्टार्थं झषंतस्येति किं। दधाति। नन्वाल्लोपस्य स्थानिवत्त्वाद्भष्त्वमित्यादावपि न स्यादत आह। वचनेति पूर्वत्रा
सिद्धइति। एवंच वामनादीनां वचनसामर्थ्याश्रयणं वृथेति भावः। निजांत्रयाणामितिः किं। निनेजा। कपिंजलाधिकरणन्यायस्यात्र शास्त्रे नाश्रयणबोधनाय त्रयाणामिति
मितामिदित्युत्तरार्थं। अत्र तु नोपयोगः। गणांतेपाठेन त्रयाणामेवनिजादित्वस्य वक्तुं शक्यत्वात्। नाभ्यस्तस्या अभ्यस्तस्य किं। दुषाणि। अचिकि। नेनेक्ति। विजीत्युत्तरार्थं
अत्र धिर्सिद्धइति। ओविजीत्यस्यैवेति। जौदादिकस्य रौधादिकस्यैव च तत्र ग्रहणं व्याख्यानादिति भावः। अभिजिहर्तीति। अत्रापिच्छांदसत्वादित्वं। इयर्तीति। यणोऽचः
परस्मिन्निति स्थानिवत्त्वात् लोपो व्योरिति यलोपो न यलोपस्य स्थानिवत्त्वनिषेधसूत्रेपरस्मादेशस्यैवेति इका। ऐयरिति। द्वित्वे ऽभ्यासस्येत्त्वे इयङ् उरत्त्वं डेगुणे रपरत्वे ह
ल्ङ्यादिलोपे विसर्ग आट्वृद्धिः। ल्यवस्थायामडिति पक्षेपि बहुलंछन्दस्यमाङ्योगेपि बहुलग्रहणात् तदुत्तरमत्राट्। बहुलंछन्दसीति सिद्धेः तिपिपर्त्योश्चेत्स्यर्तिपृहणं। प्र
ज्ञापकाल्लोके प्रयोगेपिच्छान्दसप्रकरणेपाठात् क्वचिदेव लोकेसाधुत्वं न सर्वत्रेति बोध्यं। अतएव ऋलृक्सूत्रे भाष्ये उक्तं अर्तिप्रवृत्तिश्चैव लोके लक्ष्यत इति प्रकारांतरमप
पीङ्धातावुक्तं। केचित्तिन्यादिना। दधंतइति। चसंसइति वत्तदीर्घः। जजायादिति। यविभाषेत्यात्वं। जिगीत इति। बहुलंछन्दसीत्यभ्यासस्येत्वं। ईहल्यघोरितीत्वाद्दाति

मो जुहोत्यादस्य। दिवुउदितमुदितो वेति न्काया मिद्धिकत्स्यार्थं। सेसिचि। सहत्यकारोः विवसितः। अभि चीतिपर्युदासा नृसादेरित्यर्थलेमो। यथातथातीयसहेनत्र निहपितं
ध्रु.से. नृषिरिति यथापि प्रतीयानो। पिचकार्थत्या यापि पक्षे नेनृसेरेवग्रहणं। बूरणगुणेति सूत्रेमुहितार्थशब्देन नृसेरेवग्रहणस्या करेउक्तत्वादिति भावः। जेरतुरिति मृज्लमृतामि
४४ तिगुणेवाजृभ्रम्वित्येत्वविकल्पः। दीअयुङ। उभयनिर्देशे पंचमीनिर्देशावलीयानित्यचीतिषष्ठ्यर्थेसप्तमीन दादिविध्यर्थेन्याद्यायेना हाजादेरिति उत्तरार्थाचसप्तमीत्यपि
वोध्यं युटिकृते पितस्यासिद्धत्वेन यण् प्रामिमार्थं न्वाह। युग्युटाविति। मीनाति। अत्रेचइतिउपदेश इतिचवर्त्तते। उपदेशपदं चतद्गुन इकालपरं। एवचइत्यस्यविषयेस
तीतिशेषः। एवंचैचो विषये सतिउपदेशोत्तरकालेएवआत्वमित्यर्थः स्पष्टंचेदंभाष्ये। एवंचाशितीत्यनुवृत्तेः फलंचिंत्यमितिपरे। लीलीङोरिति। क्यादिराघृवीषश्च।
सिन्तुवंधः पस्मैपदी। स्वादयइतिगणसूत्रमेतन्नासूइइत्यारभ्यवीङ्तादत्यर्थः। ओदित इत्यतिदेशः। सकर्मक इति अत्रमानंतुचिंत्यं। पोतः। अंतकर्मनाशएनोपंते
ति। अत्रपाठेप्रमाणंप्रयोगमाह। घुनयामेति। पक्षांतर इति। परेतुनित्येणुशब्देकुस्यान्यादेशात्वानुपपत्तिमाशंक्य वुद्धिविपरिणामेनपरिहृत्यएवंनहि अपकारेउत्सर्गस्य
तंप्रायोगीत्याशंक्यानापवादेउत्सर्गकृतंभवति। यदयंस्वन्नादीन्कांश्चिच्छितःकरोतीतिस्वनः। श्चित्वस्यज्ञापकत्वोक्ता स्यानिवत्सूत्रेभाष्येन चपित्वमिद्धनियमार्थंपित्
त्वं। नित्वसामर्थ्यदेवतत्सिद्धेः। तथापुदत्तार्थंस्यनः पित्वेतुपित्वादेवानुदात्तत्वेलसार्वधातुकानुदात्तत्वेचधातुस्वरेणैवसिद्धेःकिंतेनेतितत्रैवाशयः। नेवेतास्थौस्यादिवि
षयेचानशिप्रकृते। अनुदात्तार्थंनित्वमितिवाच्यम्। अन्यत्रविकरणेभ्यइत्युक्त्यातत्रस्यस्वरापत्तेः। नचतस्यापितन्सामर्थ्याद्बाधः। तद्बाधकल्पनापेक्षयाशिदेवश्नाम
पित्वबाधस्यैवौचित्यात्। वास्तुइत्यस्यानेकाचःसत्वेतत्रधातुस्वरेणासिद्धेर्नित्वस्यावश्यकत्वेपातत्सामर्थ्याभावेनपित्वमिदंनयेशित्वस्यावश्यकत्वाद्वाप्यासंगातिस्से
टेवभट्टिप्रयोगेतुवाशब्दस्यैवार्थत्वामामन्यमानेवनतुतथाकिंतुछलनार्थमागतेत्यर्थान्नदोषः वृत्तेतुवृत्तवावृत्ताविति। कोशोकयावृत्तशब्दस्यएकोदरादित्वात्। पित्व
नित्वयोरविरोधमुक्त्वाचनशिविशेषंप्रदर्शयतः कैयटस्याप्यनेकाचो धातोरत्रगणेऽभावेएवस्वरसः। नचज्ञापकत्वान्नियमार्थत्वेलाघवंसर्वथानुपपन्नमेवज्ञापक
तयानियमार्थत्वेज्ञापकत्वस्यैवासंभवात्। किंचनियमार्थत्वेएकत्रैवातिदेशबाधोज्ञापकत्वेतुअनेकत्रेतिनियमएवयुक्तइत्याहुःक्रांतकेदइति। अतएवकिंतेनेत्युक्तम्। २८
विप्रयोगः। तथाचैदइति। सचात्रात्मनेपदप्रथमैकवचनंपरस्मैपदस्यैवसंभवात्। अवीधीति दीपजनेतिचिण् युधमिद्धतीति। व्यत्ययोबहुलमितिसूत्रभाष्येतुप्रतीपमन्यतु

म्रियुध्यतीत्यत्र व्यत्ययेन परस्मैपदमित्युक्तं। एतद्भाष्यविरोधादनुदात्तप्रयुक्तात्मनेपदानित्यत्वमपि चिंत्यमेव। अकर्मक इति। अकर्मकोपीत्यर्थः। अतः सृजियुजोः सक-
र्मकयोः कर्मवद्भाव इति कर्मवत्सूत्रस्य वार्त्तिकेन न विरोधः। स्वयैवेति सृजिदृशोरित्यम्। एवकारादर्थान्तरे राधः श्यन्नस्यादत आह। भिन्नेति। अत एवाकर्मकादिति
सार्थकं। उदाहरणमिति। तथा च हेडाविनुपलक्षणं। अत एव राध्यत्योदनः स्वयमेवेति कर्मवत्सूत्रस्य भाष्ये प्रयोगोपपत्तिरिति भावः। हिंसार्थस्येति। त्रुमपराध्योती
त्यादौ हि नसीत्यर्थदर्शनात्। चुरादिश्चेति। ञ्रेपर इति शेषः। तथा प्रयोगदर्शनादिति भावः। श्लिष इति प्रतिप्रसवविधित्वादाह। अजेपवाद इति। पुषादिङ स्तन्येपुषा
दयोऽवकाशाः पश्चाद्वक्ष्यमाणनियमपर्यालोचनया नालिंगने चरितार्थस्याङोयमपवाद इति भावः। सिक्कलं दर्शयति। आश्लिक्षत अश्लिक्षा इति। अत्रादादेशस्लो
पूर्वीतिस्लोपयोः सिद्धिरिति भावः। रंधतुरिति। परत्वान्नुमि सत्यक्तित्वान्नलोपः नशेः षां। नभाभूरित्यत्तो नेति वर्त्तते भूतपूर्वेतिस्थं चेदं भाष्येनुक्तमापादितनिषेध
स्यैवकादिसूत्रेणानियम इति मतेनाहदुद्रोढ दुद्रोहिथेति वस्तुतो दुद्रोहिथेत्येकमेव रूपं न्याय्यं आगणान्तादिति यत्वस्य तेस्युगिति सूत्रमत्र लिंगमिति तन्न अस्य
निवर्त्यत्वेनेनात्मनेपदे तङि तस्य चारितार्थ्यात् दाह दाहे पठित इति दिवादावेवेत्यर्थः युषरूपलुपेति पाठः उदित्पाठोले स्वंकप्रमादान्नधातुवृत्त्यादिविरोधान्न रह पाठ इ
ति त्रिधागण पुषादिविसर्थः श्यन्नर्थ इति एवं च पुषादेः प्रागेव पठितुं युक्त इति भावः अत्र गणे त्रुटच्छेदने इति पठंति चुरादौ च। चुरादेर्निजयं तत्वाच्छोटनी त्यस्य सिद्ध
भावाभो न्यत्र त्रुटिग्रहणं रद्द तद्ग्रहणे तद्दीर्घ ते वैजिमाष्यान्त दृधातुरप्यत्र बोध्यः तदाह भ्वादिवदाकृति गण इति इति दिवादयः सुरासंधाने सुरोत्पादव मकारः सुन्व इति लो
पश्चास्येतियो उलोपः सुनु इति उतश्चेति हेर्लुक् सुनवानीत्यत्र हु श्नुवोरिति यणं बाधित्वा परत्वाद्गुणः। सुनोति स्यनरपरेन्यत्तो नेति वर्त्तते सन्याभिसुसूषते प्रत्यये भिसुसूषितु
दाहरणं अन्यत्र बलीति एयोरेवेति स्यादिष्वभ्यासे इति च नियमादेव तदभावसिद्धेः विभाषाचेः चजोरिति सूत्रात्कुरित्यभ्यासाच्चेति सनलिटोर्जेरित्यतः सनलिटोरिति चा
नुवर्त्तने स्यात्स्वसं इदूसनिवेन्यतरद्वे निलिङ्सिचोरिजि सूत्रं चानुवर्त्तितेन चलावस्थायामटि संयोगादित्वाभावादनरिष्टत्यसिद्धिः संयोगादेरिति कर्मधारयो गस्येति न
हि श्रपणमिति संयोगसंज्ञा सूत्र भाष्योक्तप क्षेप्यंगावयवसंयोगात्परस्य ऋकारस्येत्यर्थादसिद्धिरेवेति वाच्यम् अत्र सिज नुवृत्तिसा मर्थ्येनाडागमे भूतपूर्वसंयोगा
दित्वमादाय गुणस्त्वप्रवृत्तेज्ञापनेनादोषात् अत एवास्मर्यते त्यादौ गुणोर्त्तीति गुण सिद्धिरिति दिकृञ्कादिनिषेधादेव सिद्धेर्वर्थ्यग्रहणं निगम एवेति नियमार्थं तदाह

ति॰ स्वा॰ तिनेतिलिङ्सिचोवृत इतिइटसनिवेत्यत इड्वेतिवर्त्ततेनलिङि· वृत इति दीर्घ इति च वर्त्तते अवरीष्टेति वृतो वेति दीर्घः प्रहिण्वोनीति गुणस्य स्थानिवत्वाद्धि नु शब्दोऽत्र पूर्वत्रा
प्र॰ शे॰ सिद्धेनस्थानिवदित्यस्य न स्पर्शदोषः संयोगादिलोपेत्यादिना निषेधात् तु स्पष्टं चेदं भाष्ये बहिरंगपरिभाषा तु त्रैपादिके अंतरंगे नेत्यसकृदावेदितेहेऽरअच ऊँति पर्युदासोऽन्याय्यः।
२५ आप्नुवंतीति संयोगपूर्वकत्वाद् ध्रुवोरिति यण् उत श्चेति हेर्लुक् न राधो अत इत्यनुवर्तमाने पि सामर्थ्यात्तपरत्वलभ्यार्थबाधः श्राम्यन्त्योरात इत्यतो मंडूकप्लुत्या आत इत्यनु
वृत्तिर्वा अशू अयं परस्मैपदी पीति उपदेशेऽत्वत इति सूत्रस्थभाष्यस्वरसः अश्नोतेश्च तस्मान्नुडिति वर्त्तते अशोरितिवक्तव्ये श्नातिव्याप्त्यर्थं श्नुनिर्देशः इहाप्याश्नो
यत इति सदेः परस्य लिटीति सूत्रस्थः परिषस्वज इति भाष्यप्रयोगो देमतुरिति अत एकेति सूत्रस्थभाष्यप्रयोगश्चेह मानं दंभेश्चेत्यत एकेति सूत्रे भाष्ये वार्तिकं सु
धाकृतादयमिति आत्मानं चिचीजं तु श्रंथिग्रंथी त्यत्र लिट्पदस्य किन्नदस्य च कर्तव्यतापत्त्या गौरवमिति ममतुम्ब्याकरणांतरेष्वसंयोगादिति किन्त्करणप्रवेन्तदि
ति तयोः कर्त्तव्यता स्पष्टैव अत एव भाष्ये प्रथमोपस्थितणलं विहाय दंभतुरित्युदाहृतं दंभेश्चेत्येत्वविधायके॥ तृप अत्र न्योऽपं सेद्धः छंदसीति गणसूत्रं इति स्वा
दयः आर्द्धधातुके इंताबरीभृज्यत इत्यत्र रीकारेफस्य न निवृत्तिरभ्यासस्य नैरर्थक्यान्न समुदायस्य तु न भ्रष्ट्रित्वं हि भ्रयोगपक्षे दुरुपपादत्वात् अतो न तन्मध्य
पतितन्यायेन तत्र प्राप्तिशंका उपदेश इत्यनुवृत्त्या रीकोरेफस्य वरीभृज्यत इत्यादौ रमागमव्यावृत्तिरित्यितद्भाष्योक्तिम् एकदेशिन इः यतोऽतिगीति सूत्रसंमतया
न्यायसिद्धयोक्तरीत्याभासिद्धे वाभावान्न इत्यकारउच्चारणार्थः रोपधेत्यत्र रोपधयोः स्थाने प्रसंगेऽरप्रयुज्यते रोपधेनप्रयुज्यत इत्यर्थः वभ्रज्जतुरिति संयोगात्परत्वात् किन्त्वाभावः
नत्वा श्रीलिङि संप्रसारणं बाधित्वा परत्वाद् अमि सक्तद्गतिन्यायेन संप्रसारणाभावे पुनः प्रसंगविज्ञानेन संप्रसारणं स्याद्गुणो भर्ज्यादिति स्यादत आह पूर्वविप्रतिषेधेनेति संप्र
सारणरमो भृज्जतिर्भर्ज्यस्य वकारेण कृताकृतप्रसंगित्वमात्रेण संप्रसारणं नित्यमित्यपि सुवचं न च ऋकारांतर्गतरेफमादाय रमपि नित्यः सिद्धांते वर्णग्रहणे वर्णैकदे
शाग्रहणादिति स्पष्टं भाष्ये अकृक्षतेति क्सादेशो तङ् कवचने सिच्यसे बहुवचने चानत इत्यदादेशोऽएतदेव रूपं अकृक्षतेति क्सादेशेऽ नत इत्युनोरत्वोऽभवन्न तृ॰ २५
मात्रेति अवधारणे मात्रशब्दः ऋच्छत्यृतामिति ऋच्छति शब्देन धातुपाठे साक्षात्पाठादस्यैव ग्रहणं न ऋधातोः प्रश्लेषेणैव तस्य सिद्धत्वाच्च अत एव सूत्रे बहुवचनं न च
स्य तु कितस्य च तुल्येन चकारे लिटि द्विर्भ्यासकार्ये ऋच्छतीति गुणे त्रिहल्त्वान्नुडनस्यादत आह अनेकहल्त्विति॥ नृप नृपशोमुचादीनामिति सूत्रभाष्ये शोतृपादीनां

नुम्वाच्यः नृंपतीति नृंफतीतिपाठ दर्श्नोनादा द्योपि सनकार इति प्रतीयते नेमूलं तुधातुरत्यनुसारीति बोध्यं अङ्पवादत्वादिति उत्सर्गसमानदेशा अपवादा इति न्यायादिति भावः किंचैतत्रा
नयोर्ग्रहणोपपक्षिसि जभावेज्ञैरेव श्रवणोपपत्तौ च्छि कापिन श्रूयत इति भाष्यविरोधः वृणु चयमुरुधादिभ्य इति सूत्रे भाष्ये एणती त्यादौ ण्यादीनामिति हुस्वाय श्रम शित्वं नवा
त्वन्यत्वात् एणिमृणीतौ दादिकौ धात्वंतरमित्युक्ता यत्तु हिनधात्वंतरं दणसे इति तन्नतद्योग्यं धात्वंतरं नेत्यभिप्रायकं अस्यपरस्मैपदित्वात् परेतु व्यत्ययेन श्रम्वं नेते मेवान्मने
पदसंभवात्तज्ज्ञाप्य प्रामाण्येनास्या प्रामाणिकत्वमेवेत्याहुः करोतेरेवेति व्याख्यानादिति भावः लिखालिखितुमित्यादि प्रामादिकमेव कडमदे अस्य कुटादित्व सामर्थ्यादि
दनिम्लसणइडेरपि निषेध इति कश्चित् अ शोकवनिकान्यायेनात्र पाठ इति परे तङिन्यानस्याप्युपलक्षणं अंतरंगत्वादिति नाजानंतर्य इति तु न समकालप्रवृत्तिकत्वा
त् तस्यासत्वाच्च अडभ्यासेत्यादि अत्रय ह कृव्यंततनादौ वस्यते गिरतेरिति व्याख्यानात् योयङीत्यत्रास्यैव ग्रहणमिति भावः अजाद्या विति धातोः कार्यमुच्यमानमिति प
रिभाषासन्निधापितसामर्थ्ययस्या चीति विशेषणमिति भावः अतएव गिरावित्यादौ नामृजेर्वृद्धिरित्यादौ भाष्ये स्पष्टमेतत् आ दिपत इति रिङ् इयङ् प्रवृत्ति रेचेति षः न च
षत्वस्यासिद्धत्वात् पूर्वं तु किं स्वस्य पत्वे प्रत्येति स्यादिति वाच्यम् अथापि सनुकनिर्देशात् मज्जतीति सस्य श्चुत्व जश्त्वे अंत्यात्पूर्व इति एतत्फलं तु मग्न इत्यादौ नलोपः नतु संयो
गादिलोपः ममङ् क्ष्यतीति जस्य कुत्वे न स्यानुस्वारे परसवर्णेन स्यचत्वे बोध्यं मंस्यतीति स्यस सस्य षत्वं विशेषः नङर्थ इति पूर्वपाठ स्तु कर्त्रभिप्राये पिपरस्मैपदार्थः विद्वान् नोनागे
तिसूत्रस्थ कैयटे विन्दिर्लाभे इति पठ्यते इति तु दारव्यः अनंतं हुत्वमित्यादि अत्र प्रक्रिया दर्शनमात्रे तात्पर्यं न तु क्रमे शिंङ्क्षीति सानुस्वार एव पाठः अनुस्वारस्यादि शत्व इत्वं पूर्व
त्वेन स्यानिवर्त्यमनस्ताव पिदीर्घादाचार्याणामित्युत्तरमनुस्वारस्य पयिवा पदांतस्येति लिंउदः स्या झयोहो पूर्वश्चोटीति षट्सूत्री पाठोत्तरं झलांजशझशि अभ्यासे च
चर्खरि च वावसाने अणोऽप्रगृह्यस्येति पंचसूत्री पाठ इति भाष्यसंमत्तत्वात्याध्यायीपक्षे परसवर्णे दृष्टया झलांजशीत्यस्य झरो झरीत्यस्य चासिद्धत्वेन यणपूर्वत्वाभावात् परसवर्णं
प्राप्तेरित्यन्यत्र विस्तरः नृणहश्नमिकृतेरमुपथास्यादिति श्रमानिर्देशोऽन्यथा येननाप्राप्तिन्यायेनेमं श्नमो बाधकः स्यात्तदाह श्रमिकृते इति अंजेः सिचिउदित्वसणविकल्पा
पवाद इति रुधादयः तन्व इति लोपश्चास्यामिति वा लोपः आत्रेयादयइति अत्रारुचिसूत इति नित्यत्वे भाष्यानुक्तत्वं क्षिणु इत्यादि प्रयोगास्तु बहुलमेतन्निदर्शनमितीत्या
श्रिधातुं स्वाद्य व्यंगीकृत्य निर्वाह्या इत्यन्ये तत्र पठित एव भाषायामपीत्येके समवायः संबंधः समूहश्च उपात्ताया यद्यप्यत्र सूत्रे चोवृत्तौ नपठ्यते तथापि संपर्युपेभ्य इति वृत्तुक्त

ति॰ त षाठफलस्य भाष्यमत्ते साधनार्थं तदावश्यकत्वमाहुः केचित्तु भूषणसंबंधयोरुपान्त्यरस्यसुटं नेच्छंति वंचनपठंति सुट्कात्पूर्वे अभ्यासं सूत्रं अंत्यं वार्त्तिकं अभ्यासस्यानर्थ
शु॰ शे॰ कत्वेमोत्तरखंडस्यैवार्थवत्तयाकरोतित्वेनचतस्यचसमोभ्यासेनव्यवधानादड्विषयेविकरणांतभक्ततयाऽटस्तेनव्यवधानात्सुटोऽप्राप्तौ अंत्यमारब्धं अड्भ्यासव्यवायेपि
२६ सुड्भवतिसचकात्पूर्वइत्यर्थः भाष्यकृतात्तु अत्र कात्पूर्वग्रहणं कालावधारणार्थं तदा सुट् भवति यदा कृतः कात्पूर्वो भवतीति तेनांतरंगमपिद्वित्वादिकंबाधित्वापू
र्वंसुडिति अड्भ्यासव्यवायेपीति न कार्यमिति तन्मत्याख्यातं कात्पूर्व इत्यपि प्रत्याख्यातमित्याह पूर्वंधातुरिति उपसर्गेणेत्यस्यतदर्थे नेत्यर्थः अतएवानुभूयतइति
कर्मणिलकारः एवं चांतरंगार्थकोपसर्गनिमित्तकत्वाद्द्वित्वाद्यपेक्षयासुडंतरंगइत्याशयः लावस्थायामडिति पक्षेतु संपरिभ्यां परत्वयोग्यस्य करोतेः सुडित्यर्थात्सर्वतः पूर्वं सु
डितिनदोषः सुडितिनैषा सुसंपरिभ्यामित्यत्रैव पाठ्य इतितदाशयः ऋतश्च संयोगादेरिति ननु द्वित्वे समुदायस्यैवांगत्वेन संयोगादित्वं दुरुपपादं नित्यत्वेनगुणात्पूर्वंद्वित्वेपूर्वोः
स्वपरत्वस्यप्रवृत्तेः न चाभ्यासस्यानर्थकत्वेनोत्तरखंडस्यैवार्थवत्त्वेनांगत्वमितिनदोषः अभ्यासस्यानर्थकत्वं चस्त्रेके केवलाभ्यासतोर्थावबोधात् उत्तरखंडस्यतुपर्यायाव्य
वहितप्राग्वर्त्तिनः केवलस्याप्यन्यत्रार्थबोधकतायाः दृष्टत्वेनार्थवत्त्वमेव पेचतुरित्यादौ तदभावेप्यर्थबोधेन तस्यार्थवत्त्वाच्च अभ्यासप्रयोगस्तु रेयाधूर्पुष्यतीतिवत्साधु
त्वार्थ एव यात्तिरित्यादौ शिष्यमाणं लुप्यमानार्थाभिधायीतिन्यायेन शिष्यमाणाभ्यासस्यैवोत्तरखंडाभावादर्थबोधजनकत्वं इदं केवलस्यानर्थकत्वं समुदायस्यार्थवत्त्व
मितिवदतोप्यावश्यकं अतएव दयतेर्दिगीतिसूत्रेऽस्तु द्वित्वे कृतेपरस्यभूभावे पूर्वस्य श्रवणं प्राप्नोतीत्याशंक्याह धातुकइत्यस्यविषयसप्तमीत्वेन परिहृतं समुदायेऽस्ति
त्वंतु द्विः प्रयोगपक्षे दुरुपपादं भिन्नानुपूर्वीकत्वात् एवं च धातुत्वमप्युत्तरखंडएवेति वाच्यं द्विः प्रयोगो द्विर्वचनमितिसिद्धांतेनाद्येप्रत्ययविधानावधित्वप्रत्यमित्या
नदादिग्रहणसत्त्वेनसमुदायएवांगत्वस्यैकाचोद्वेइतिसूत्रेभाष्येउक्तत्वात् अंगसंज्ञायाविकरणविशिष्टेसमुदायेनिरर्थकेप्यंगीकारेणसमर्थसमासेनिरर्थकस्याप्यं
गत्वदर्शनेनचांगसंज्ञायामर्थवत्परिभाषायाअप्रवृत्तेः यस्मादित्यनेनोद्देश्यतावच्छेदकशब्दानुपूर्वीमात्रावच्छिन्नस्यैवग्रहणात् धातुत्वादिकंतूत्तरखंडएवेतिबोध्यं न
चासूकरीत्यासमुदायस्यांगत्वमुत्तरखंडमात्रस्यापितु तदुर्वारं ईदृशे विषये मुख्यतदादित्वाभेनव्यपदेशिवद्भावलब्धतदादेरप्रवृत्तेरितिचेन्नप्रत्ययोत्पत्तिवेलायांसंयो २६
गादित्वस्यविवक्षणेनादोषात् अतएवसस्वरतुरित्यादिसिद्धिः सूत्रं चसार्थकं स इत्तसंपरिभ्यांपरत्वयोग्यस्यसुट्विधानात्प्रत्ययोत्पत्तेः पूर्वमेवेतिदिक् नित्यमित्य

मुर्च्छतरसितिरदंचसुदकारितिसूत्रे कैयटेस्पष्टं परंत्विदं चिंत्यं तस्यातिदूरत्वात् विच्छिन्नत्वाच्च तस्य तत्सूत्रे विधेयविशेषणत्वाच्च किंच नित्यं संयोगादित्वं न प्रयोगमात्रावच्छेदेन त
त्त्वं काप्यभावात् सस्वरतुः सस्वरिथेत्यादौ तदभावात् यगादिघटितप्रयोगमात्रावच्छेदेन तत्त्वमित्यपि न अस्मर्यतं तरीतर्यादित्यादावभावात् अत एव प्रत्येकं संयोगसंज्ञा
वसेसंप्रसारणं सुप्रसंहीयतइत्यादौ इट्गुणापादनपरं हलोनंतराइतिसूत्रस्थं भाष्यं संगच्छते एतेनेड्विधावुपदेशग्रहणानुवृत्तिरपि परास्ता तस्मादिड्गुणयोः प्रतिषे
धवचनारंभएवज्यायानितिपरे॥ इतिजनादयः हलः अङ्गस्येत्यनुवर्त्तते तत्रैकं हलो विशेषणमवयवसंबंधे षष्ठीहि तौ पंचसंप्रसारणस्य विशेष्यं तदंतविधिस्तदाह अं
गावयवादितितेन निरुतमित्यादौ न दीर्घः निर्दिशतीति॥ अंगग्रहणं परिभाषानिष्फलेत्यनेन सूचयति सिज्लोपस्येति प्रत्ययलक्षणेनः सूत्रं विध्यर्थमेकाचइतिसूत्रे घसादेच
र्थोन्माद्यिमित्यप्येवगृह्यतइति मतेनेदं यदात्विदं नियमार्थं स्यान्निवत्सूत्रदृष्ट्याच त्रिपादीनासिद्धा तदाल विधित्वान्नस्यान्निवत्त्वमिति बोध्यं तत्रमूलमितिव्याख्यास
लोपावत्रेत्यारभ्य यदुक्तं तत्र मूलं मृग्यमित्यर्थः संपुक्तहलग्रहणस्य त्वात् ग्रेथेरादेरपि त्वाच्च सूत्रेण ग्रामे वार्त्तिकादर्शनाच्चेति भावः इयन्प्रत्ययादिति बहुव्रीहिः ग्रहो रडित्य
नुवृत्तस्य ग्रहइति पंचम्या षष्ठी कल्प्यतेइत्याह एकाचइत्यादि इह ददत्तानुरोधेनेदमुक्तं अग्रहीष्टामित्यादौ लावस्थायामडिति पक्षेएकाचोविहितत्वाभावादीर्घोमास्या
ः संगतमिदं हारदत्तेनोक्तं इतिऋत्वादयः मप्रेचार्थमिति न चस्वार्थे विधानार्थमस्तु सत्यस्य कृत्यापुगिति भाष्यविरोधात् न चापुग्निपातनार्थं सत्यापग्रहणेपि अधुपकं
अर्थवेदार्थमाकृतस्य कवार्त्तिके एवं सत्यपाठेन सिद्धेरिति भावः॥ स्वार्थइति करणइत्यस्य तु नानुवृत्तिः विच्छिन्नत्वादिति भावः णिचश्चेत्यत्रयस्यतः स्वरितत्वमनार्षत्वे न
नत्वस्येः स्वरितत्वादिदं चुरादौ वाणवर्तनेइतिपरास्तं इदित्करणमिति णिचो नित्यत्वेहि तेनव्यवधानान्नलोपाप्रसक्त्या किंतेनेति भावः नत्वणिजंतात् क्विपि नलोपाभा
वासतत्त्वरितार्थं स्यान्निवत्त्वं तु क्वौविधौ निषिद्धमिति वाच्यं असिद्धवदत्रेति णिलोपस्यासिद्धत्वात् क्वौ विधिमित्यस्य क्विशब्दमुच्चार्यविहितविधिविषयत्वाच्च क्वौलु
प्तमिति तु न सार्वत्रिकं परेत्विदित्त्वस्य तत्रिमत्र्यादौ व्यभिचारितत्वेन क्वौ लुप्तमित्याश्रयणे ज्ञापकतो चिंत्येन च चिंतेति पाठे ऽर्हमाश्रागौरवेणापि चूर्णास्त्र बाधन
मानं भाष्यानुक्तत्वाच्च वसमाणेलोरणाविति सूत्रस्थ कैयटासंमतेश्चेत्याहुः सामान्यापेक्षमिति चुरादित्वापेक्षमित्यर्थः जगणत्तुरिति मंत्रत्वादाम्नेतितदाश्रयः नि
त्यएवंतत्वे पि णिलोपेनेष्टसिद्धा इयं वृत्तिर्न साधिका गलोरनित्यएवंतत्वेलोरणाविति सूत्रस्थभाष्यासंगतिश्च तत्र हि गणयतिगणः स्वयमेवेत्यादौ णौ कर्मत्वे

सि· कु· कर्तृत्वे आत्मनेपदाभावापत्तेः णिचश्चेति सूत्रमित्याशङ्क्य अत एवात्रात्मनेपदं चुरादिण्यन्तानां नित्यण्यन्तत्वया केवलानां चुरादीनां प्रयोगाभावात् अलौकिकमेतत् संभवात्।
पू· रो· अत्र सूत्रे हेतुमण्णिचोरेव ग्रहणमित्यहेतुमण्णिजन्तस्य कर्मत्वं हेतुमण्णौ कर्तृत्वमिति सूत्रविषय एवायमिति भाष्यकैयटयोरुक्तं किंच ज्ञापकस्य सामान्यापेक्षत्वे घुषिरवि
२७ शब्दने इति सूत्रस्थभाष्यविरोधः तत्र हि विशब्दनार्थस्य चुरादित्वेन नित्यणिजन्तत्वात् आश्वारेश्या विशब्दन एव वृत्तेः सूत्रे विशब्दन इति व्यर्थमित्याशङ्क्य एतदेव ज्ञापयति
घुषेर्विशब्दने विभाषाणिच् तेन जुघुषुरिति सिद्धमित्युक्तं अत एव चुरादावि इरित्वमपि सार्थकमिति बोध्यं विशेषेति असंयोगोपधेकारान्तरूपविशेषेस्यार्थः। तच्चित्यामि
ति नस्यापधत्वाभावेन नलोपाप्रसक्त्या ज्ञापितं नापि चारितार्थ्याभावादिति भावः परितेत्यादीति आदिना ज्ञकारान्तत्वप्रयुक्तकार्यविशिष्टस्य ग्रहणं फलमिति एवं च
पर्तृतिरूपवारणस्य दीर्घोच्चारणमिति भावः वस्तुतः इदमपि ज्ञापकं चिन्त्यमेव दीर्घपाठस्य संदिग्धत्वादित्याहुः बालसामके चित्तत्र षामसां त्वप्रयोग इति पठंति
णिजन्तात्तङ् इति। चिन्तनं शबाधकन्यायस्यकृमत्वात् शास्त्रबाधस्यान्याय्यत्वाच्च णिचो वैकल्पिकत्वं नोक्तं ज्ञापनेचेति चानमारणादावपीत्यन्ते वेष्टनमिति अण्यं
तपरिविषेत्युङिति भावः नन्वेवं तत्तत्प्रकृतिकल्यडनेनादनीयवस्तुनो भोजनार्थं भोजनपात्रे निक्षेपोप्युच्यते तत्राह नतु भोजनेति उक्तरूपेत्यर्थः भुजर्थयमधा
विध्यतिखड्गेनेत्यादावपिन।नचतत्राऽसामर्थ्यंप्रधानस्यसापेक्षत्वेनादोषात्।प्रत्ययार्थैकदेशव्यधनंप्रत्यतदंशेनित्यसापेक्षत्वात्च।चोरंविध्यतीत्यादौत्व
नभिधानाद्वारणीयःसत्यनिष्ठत्वे।तदित्यनुवर्तमानद्वितीयांतावाधायाहतृन्नंतमितितद्योगेहिनलोकेतिषष्ठीनिषेधाद्द्वितीया।तृजंतत्वेहिषष्ठीस्यादिति
भावः।सर्वस्यापिस्वेच्छानुसारित्वेनसामर्थ्यलभ्यमर्थमाह।परेच्छानुसारीति।पदमस्मिन्निर्देशादेवात्रप्रथमासमर्थविभक्तिः।आवर्हिउत्पाटनयोरस्य गृह
पतिनास्य ।निर्देशादेव तृतीयासमर्थविभक्तिःसंज्ञायामित्यनुवृत्तेर्दक्षिणाग्न्यादौननौवयो।मूलशब्दयोनेकशेषोपत्तदेतेभ्यइतिवत्।मूलांतमूलादिद्वंद्वयोः
पुनर्द्वंद्वइत्यन्ये।नाववातार्यमितिशक्यार्थेऽर्हत्वोण्यत्।करणेतृतीयातस्यस्वातंत्र्यविवक्षायांकर्तरिवा।वयसातुल्योमित्रएववयस्यः।धर्म्येधर्मं फलंचधर्मावधा
र्हः दंडादिभ्यइत्यर्हार्थेयत्।मूलेनेतिकर्तरितृतीया।सीता।कृष्टक्षेत्रसमीकरणार्थः।काष्ठविशेषोमईइतिमध्यदेशप्रसिद्धः।समितमिति।संपूर्वादिणः क्तः।धर्मा
दनपेतं।यदनुष्ठानंधर्ममनुवर्ततएवतदित्यर्थः।निर्देशादेवपंचमी। समर्थविभक्तिः।छंदसो।निर्माणेइच्छायाःकरणत्वेनतृतीयांतात्प्रत्ययः।पुत्रइति।सं
साधिकारवसलब्धंप्रीणातीतिप्रियः।भावःसाधनंचेतिसुट उभयोर्विधानादितिभावः।प्रतिजनमिति।जनंजनंप्रतीतिविग्रहः।भाक्तइति।भक्तोन्नंतत्रसाधुर्वा। राम
स्त्रिष्कलीकृताइत्यर्थः।योगविभागादिति।सर्ववेदपारिषदंहीदंशास्त्रमितिभाष्यप्रयोगादितिभावः।णस्यानुवृत्तेरुभयोर्विधानमित्यन्ये।समानतीर्थेधिकरणेक १८
वासकर्तृत्यर्थेप्रत्ययइत्यर्थेप्रथमोच्चारितसमानतीर्थशब्दस्यप्रकृतित्वंवासीत्यस्यप्रत्ययार्थत्वं।यादिप्रत्ययविवक्षायांपूर्वमेवतीर्थेयेइतिसादेशेप्येकदेशविकृ

न्यायेन समानतीर्थशब्दत्वात्प्रत्ययः। पूर्वापरप्रथमेति तत्पुरुषः। समानोदरे प्येवं॥ समाप्ताश्चातुरर्थिकाः॥ ॥प्राक्क्रीता॥ अर्थस्येव व्याख्यानं तीर्थधितविमिति
अर्थबोधकेष्वेवास्योपस्थितिरतः प्राग्वतेष्ठञित्यतः प्राक्छयतोः पूर्णावधिरित्ययुक्तमित्यपास्तं। तदग्रिमाणां शास्त्राणामर्थबोधकत्वाभावेन तेष्वनुपस्थितिः
निभ्यो ढ इत्यादि। अत्र हितार्थे यत्। नभ्यं चक्रमिति तु नाभिरिवेत्यर्थे शाखादित्वात् यत्। साधु सच्छिद्रं चक्रावयवो नाभिः स यथास्यैकावयवं धारयति प्रवि
र्त्तते चांजनाद्यपेक्षते च। तथा चक्रमपीति सादृश्यं। एवं नभ्यार्थो वृक्षोपि नभ्य एव। तदर्थोऽतोऽक्ष न्यायेनेति स्पष्टं भाष्ये। पाचदीर्घत्वमिति। येन प्रकृतिभावः सनु
ध्यीयते तेन दीर्घ तदभावयोष्टिलोपेन हविष्यमिति। हविःशब्दो गवादिः विभाषा हविरित्यत्र तु हविर्विशेषवाचकानामेव ग्रहणं तस्य पद्मनेति नस्प्रभृतिष्वद्
णस्य प्रकारार्थत्वात् भाष्ये तु नास्ति काश्यायतत्स क्षुद्रेषु नास्तीति पठितं। ये च ताशीर्षन्छन्दसीत्यतः शीर्षन्नू इति कल्पेनो शीर्षण्यं ये चेति प्रकृतिभावः। विषयवाद्
वंशशब्दोत्राकारांतो व्याख्यानात् तु नांतः। वृषन्शब्देन वृष्णे हितमिति वाक्यमेव। एवं ब्रह्मन्पर्यायब्राह्मण शब्देन ब्राह्मणेभ्यो हितमिति वाक्यमेव। न तु भा
त्यय इति स्पष्टं भाष्ये। आत्मन्विश्व। उत्तरपदग्रहणं भोगेनैव संबंधनान्येन व्याख्यानात्। भोगशब्दः शरीरवाच्यत्र। अहिरिव भोगैः पर्येतीति दर्शनादिति स्पष्ट
भाष्ये कर्मधारयादेवेति। पंचजनसर्वजनेष्वप्येव। रथकारपंचमेषु चतुर्षु वर्णेषु रूढ्येकं पंचजनशब्दस्य रूढिः। मातृभोगीणेय षाणत्वं तथा रषाभ्यामित्य
त्र निरूपितं। सर्वपु। यथासंख्यमत्र। पुरुषाद्वधेति। वधादिषु त्रिषु सामर्थ्यात् षष्ठी समर्थविभक्तिः। कृते तु तेनेति निर्दिष्टेवं। अग्निपाते इति। पाक्षिकमपष्टी
प्युपलक्षणं हिते तु पुरुषाच्छ एवेति बोध्यं। तदर्थंवि। विकृतिवाचकादिति न चास्य न प्रथमत्वप्रकृताविव्यर्थे समर्पकापेक्षया तत्संभवात् तस्मादित्यनुवृत्ते रा
ह। चतुर्थ्यंतादिति। तदर्थमिति सप्तम्याः स्थाने प्रथमा सामान्येन नपुंसकं तदाह तदर्थायामिति। प्रकृतिविकृतिशब्दावुपादानकारणतत्कार्यपरौ परस्परसा
मभिव्याहारात्। तदर्थग्रहणं सष्ठार्थं। शंकव्ये उगवादीतियत्। वालेया इति वल्यवस्थायां यो लोहितादिगुणस्तद्राहित्ये तावालेया इत्युच्यते प्रकृतिविकृति
भावोऽन्यथा कथंचित् आर्षभ्य इत्यत्राप्येवं योवत्सऋषभावस्थाप्राप्स्यर्थयोप्यते स एव मुच्यते पूर्वविप्रतिषेधेनेति अजपेक्षयेति भेवत्तदस्तदभिन्नस्यादिति तदर्थे विकृ
तेरित्यादिनिवृत्तमिति कैयटः। लौकिकीमिति लोकोऽत्र न प्रयोक्तुस्सदसदिति तेन मूढैरुक्षणरूपापभ्रंशप्रयोगस्यैव प्रायेण करणात्। तस्माच्छिष्टलोकोत्र लोकशब्दे

।।इतिहयतोःपूर्णोऽदर्शिः॥

ना। लौकिकीविवक्षायत्रप्रायस्यसंप्रत्ययः प्रायइतिलोकोव्यपदिश्यतेइतिभाष्यात् लोकः शिष्टोलोकइतितदर्थः प्रायस्यसमयकल्पस्येतिकैयटस्यापिसम
यशब्दार्थविषयेसमर्थस्येत्यर्थः।तादृशश्चशिष्टलोकएवेतिबोध्यं।प्रासादोदेवदत्तस्येतिई दृशेर्थेप्रासादीयोदेवदत्तइतिप्रयोगोलोकेनदृश्यतेइतिभावः।प्राग्वा
तेः।अत्रवतिशब्देनतदर्थोलक्ष्यतेतेनार्थबोधकेष्वेवास्योपस्थानंतेनाप्स्वादविषयेन आर्हादः।आर्हाहतीतिमितिङ्तैकदेशःसर्वत्रानुकरणंव्याख्यानात्आङ
भिव्याप्तौतदाह।नदर्हतीत्येतदभिव्याप्येति।यद्यपिऊर्ध्वमानंकिलोन्मानंपरिमाणंतुसर्वतः॥ आयामस्तुप्रमाणंस्यात्संख्याबाह्यातुसर्वतः।ऊर्ध्वयन्मीयनेतदु
न्मानंसर्वतोमानमितिचातःपरिमाणं।आयामविवक्षायांप्रमाणमित्येनद्भवति।संख्यासर्वतोबाह्याभेदमात्रप्रयोजिकेत्येषा।मेयमानंकृतश्चनेतिभेदोत्रबोध्यं।
ण्यमितिकैयटस्तथाप्यत्रपरिमाणशब्देनोन्मानमपीत्यसमासेइतिसूत्रस्थभाष्यस्वरसः।प्रमाणंतुनस्यादेतेमानाभावात्।समदशस्यामनुवर्त्ततइतिसं
बध्यतइत्यर्थः।एतेनषोडशसूत्राणामेवानुवृत्तिविषयत्वमित्यपास्तं।परिमाणान्तइहपरिमाणशब्देनपरिच्छेदकमात्रंशाणपर्युदासात्।यद्यप्युत्तरपदस्येति
सूत्रेभाष्येतदधिकारस्यात्रसत्त्वेप्रयोजनाभावप्रतिपादनायपरिमाणान्तस्येत्यत्रसंख्यायाइत्यनुवृत्तिरुक्तातथापितदनुवर्त्यवाक्यभेदेनव्याख्येयं।तेनपरिमा
णान्तस्येत्यस्यासंख्यापूर्वपदेकाचित्कत्वं।अतएवात्रपरमनैष्किकमितिभाष्योदाहृतंसंगच्छते।संख्यायाइत्येतत्घटितवाक्यस्थाहृत्वर्यान्परिमाण
न्तस्येत्यस्याप्युत्तरपदेएवप्रवृत्तिरितिनतत्रतदधिकारप्रयोजनमितितदाशयः।यद्यपिकालोपिपरिच्छेदकस्तथापितस्यनेहग्रहणं।परिमाणान्तेषु
वसिद्धेसंख्यायाःसंवत्सरसंख्यस्यचेतिसंवत्सरग्रहणेनपरिमाणग्रहणेकालाग्रहणज्ञापनात्।नचसंज्ञायांवृध्यर्थंसंवत्सरग्रहणंज्ञापकपरमाणप्र
माण्येनतादृशसंज्ञायाअभावकल्पनात्।एतेनसंवत्सरस्यचेत्संख्यायाएवेतिनियमार्थंनदित्यपास्तं।भाष्यप्रामाण्येननियमव्यावर्त्यप्रयोगानभिधा
तेनज्ञापकत्वस्यैवागीकारादितिदिक्।ज्ञापकमिति।नचपरमनैष्किकमित्यत्रापरिमाणत्वात्पूर्वसूत्रप्राप्तस्याकोनिषेधार्थंतदितिवाच्यं।एतज्ज्ञापकप्र
माण्येनतत्रपरिमाणशब्देनोन्मानस्यापिग्रहणात्ध्वनितंचेदंनिष्कस्यपरिमाणवाचित्वात्पूर्वेणाप्राप्तोनेनठक्विधीयतइतिवदताकैयटेन।पर्णा
पादाद्यप्युन्मानरूपमेवात्रगृह्यतेज्ञापितेतुतत्संभावनामात्रेणतन्निवारितार्थ्येतत्फलितमाह इतःप्रागिति।प्रत्यासत्त्यापांचमिकेष्वेवेदंतदाह।सुगव्य

एम ९९

मित्यादि। अन्यथाप्रत्ययविधित्वात्तन्निषेधः स्यात् इदमुपलक्षणं व्यपदेशिवदित्यस्यापि तेन गव्यसिद्धिः। व्यपदेशिवद्भावनिषेधस्य सूत्रगृहीतांतादिश
त्वविषयकत्वाच्च। प्रतिषेध्यसमर्पकगोपुच्छादिषु तदंतविधिव्यपदेशिवद्भावो स्त एव तन्निषेधस्य प्रत्ययविधिविषयत्वात्। अंत्यनिषेधसो त्वयुक्त्या व्यपद
न्निर्वोध्या। इतऊर्ध्वं तु विति। वाचनिकमेवेदं। असमासे इति सूत्रात् ध्वर्धमार्धीयतेनाहीयिचेत्यर्थस्तदाह। प्राग्वतेरिति। तद्धितालुकीति लुगंतायां प्रकृतेरित्यर्थः। अ
ते द्विसूर्पमिति। न तावदेषा लुगंताप्रकृतिरिति संख्यापूर्वपदात् शूर्पादञन्यतरस्यामित्यञष्ठञोर्वा ध्यर्द्धेति लुक्। अर्धात्य। जंगलधेन्विति सूत्रे विभाषितं ग्रहण
स्योत्तरपदसंबद्धत्वात्पुनर्वाग्रहणं। तपरः किमिति दीर्घस्य वृद्धिनिषेधफलाभावात् प्रश्नः॥ निषेधो न स्यादिति। पूर्वपदस्य वृद्ध्यभावपक्षे वृद्धिं प्रतिफलोप
हितनिमित्तत्वाभावादिति भावः। तस्य वृद्धिप्रसंगे तु नामादायैव निषेधः सिध्यतीति बोध्यं। शताच्च। उत्तरसूत्रप्राप्तकनोपवादोयं। अशत इति न प्रकृतेर्विशे
षणमसंभवात्। किंतु प्रत्ययार्थस्य तत्रापि यत्र प्रकृत्यर्थशतस्यैव प्रत्ययार्थत्वं तत्रैव निषेध इष्यते तदाह। इहेति। तेन शतेन क्रीतं शत्यं शतिकं शाटशतमित्या
दौ न निषेधः। वस्तुत इति। अभेद एव पारमार्थिको भेदस्तु काल्पनिक एवेति भावः। द्विशते वेति। द्विगुणशतेनेत्यर्थः। तेन द्विगुत्वाभावात्कनो न लुक्। द्व
भ्यां शताभ्यां क्रीतमित्यर्थे कलुगंतद्विशतशब्दात्त्वलुकीति तदंतविधिनिषेधात्प्राप्तिरेव नेति बोध्यं। संख्याया अति। सूत्रे द्वंद्वगर्भबहुव्रीहिगर्भो न नेता।
त्पुरुषः। अंतग्रहणमेकसम्प्रत्याक्रीतमित्यत्र निषेधार्थं मिन्यथा प्रत्ययग्रहणपरिभाषया न स्यादित्ति हरदत्तः। वतोरि। अत्रेटन प्रत्ययो व्याख्यानात्
। योगविभाग इति। अन्यथा त्रिंशतः शदंतत्वाद्धि शब्दस्य विंशादेशस्ति प्रत्ययइति पक्षे विंशतेस्त्यं न त्वात्कन्स्यादिति भावः। विंशकेति विंशते डित इति लो
पे पररूपं। त्रिंशके टेरिति टिलोपः। अधिक इति। अस्य भागवदपेक्षत्वेपि नित्यसापेक्षत्वान्नासमर्थ्यं। अध्यर्द्ध पू। द्विगुसाहचर्याद्ध्यर्द्धपूर्वोप्यत्र स
मानाधिकरणसमास एव गृह्यते संख्यासंज्ञासूत्रे भाष्ये ध्यर्द्धपूर्वाद्द्विगोरिति पाठो दृश्यते। द्विगोश्च परस्येति। तन्निमित्तस्येति शेषः। समाहारद्विगोर्द्वि
शूर्पाक्रीतमित्यर्थे त्वनभिधानात्प्रत्यय एव नेति बोध्यं असंज्ञायामिति द्विगुविशेषणं पंचकलापाः परिमाणमस्य पंचकलापं कचद्धितलुगियकस्य
चित्संज्ञातत्वात् तत्पन्नस्य न लुक्। तस्य द्विगुनिमित्तत्वाभावात्तु कोप्राप्तस्य भाष्यप्रत्याख्यातमिदं विभाषा का-कार्षापणात् द्विगोरध्यर्द्धपूर्वाच्चेत्यर्थः। अध्य।

त॰
क॰ श॰ ई प्रतिकमिति। आदेशस्य प्रत्ययसन्नियोगशिष्टत्वान्न तत्पक्षे प्रत्ययलुगिति भावः। द्वित्रिपूर्वग्रहणं स्पष्टार्थं। अत एव द्वित्रिभ्यामिति यदुच्यते तद्द्वैयोग्यमि
शे॰ सु॰ ति भाष्ये उक्तं। द्विनिष्कमिति। ठञो लुक् न कुपूर्वादिति। इदं बिस्ताच्चेति सूत्रेपि बोध्यमिति भाष्ये स्पष्टं। विंशतिकात्खः। अत्र द्वित्रिपूर्वादिति न संबध्यते। खार्या
२० ई। दीर्घोच्चारणं स्पष्टार्थं। कन्प्रत्यये केण इति ह्रस्वेन च सिद्धे दीर्घोच्चारणसामर्थ्येन ल्लोपं बाधपूर्वकं सवर्णदीर्घकल्पने गौरवात्। खारीशब्दस्य स्वपर्या
यपुंल्लिंगखारशब्दप्रकृतिकत्वे पुंवत्त्वेनेष्टासिद्धेश्च। पणपादमा। पणादिसाहचर्यात्पादशब्दः परिच्छेदकवाच्यत्र। त्रयोदशेति। ठञ्ठकौ ठन्यतो ४ कन्द्व
नूटिठनः ७ अञ् शतमानादण् १० ईकईकनौ ११ पणादियत् १२ द्वित्री तिवार्त्तिकोक्तौ ण चेत्येवं त्रयोदशेत्यर्थः। अनुवर्त्तनेन तु नान्यत्वमिति भावः। तेन
क्रीतं क्रयो नाम द्रव्यदानपूर्वकं वस्त्वन्तरग्रहणं तेनेत्यनेन च प्रत्यासत्त्या क्रयघटकं द्रव्यमेव गृह्यते। सा स्यांशवस्नेत्यनेन न तु न सिद्धिः। यस्य शतं मूल्यं न
भवति। अथ च कार्यवशात्तेनं क्रीतं तत्र तस्य प्राप्तेः। धनपतिसंयोग इति। संयुज्यते येन पुरुषाः फलेन स संयोग इति भावः। अत एव संयोगो नामेदं कृ
त्वेदमवाप्यत इति भाष्यं करणव्युत्पत्त्या यागादिरेव संयोग इति कैयटश्च संगच्छते॥ गोद्व्यचो। ठकोपवादः तस्येश्वरः। तस्येत्य नुवर्त्तमानेन तस्य ग्रहणं निमित्त
मित्यस्य निवृत्त्यर्थं। पाञ्चिकीति। षित्वान्ङीष्। तदस्मिन्वृद्ध्या प्रत्येकमिति एकैककर्मकदानाधिकरणेपि प्रयोगस्य दृष्टत्वाद्वृद्ध्यादिसूत्रत्वात्साधुरिति भावः। आ
यादिसाहचर्यात्संज्ञा वृद्धेरग्रहणं। उपदेतिं टाबन्तं। रक्षानिर्वेश इति रक्षानिमित्तकभृतिरूप इत्यर्थः। उत्कोच इति। उपहार इत्यन्ये। रूपकस्येति रूप्यकार्षा
पणस्ये त्यर्थः। अत्र मानेवित्यं। असामर्थ्यं तु नित्यसापेक्षत्वाद्गमकत्वाद्वा वारयितुं शक्यं अर्द्धमित्युक्ते कस्येति जिज्ञासायां रूपकस्येत्युत्तरमत एव संगच्छ
ते भारभृतेभ्य इति। वंशादिशब्दानां भारभूतत्वं तथाभूतार्थाभिधायित्वाद्बोध्यं। सौत्रमेकवचनं। अत्राद्यव्याख्यानमेव युक्तं। द्वाठकिकीति। नच्वाभ्यामित्य एम
स्यानंतरस्येति न्यायेन परिमाणान्तस्येति वृद्धिनिषेधकत्वाभावाद्रञ्जना। लुगभाव इति। अन्यतरस्यांग्रहणमनुवर्त्तत इति वृत्त्यनुरोधेनेदं। वस्तुतस्तदत्र २०
नानुवर्त्तते पुनः खग्रहणात्तत्कुठञ एव। खष्ठनोस्तु न लुक्। सह विधाने उद्देश्यविधेयभावासंभवात्। इहेन च सह विधानस्य स्फुटत्वात्। अत एव भाष्ये ष्ठ
न्खेनाप्यनुकृष्टस्य स्यान्यतरस्यामित्यस्य चानुवृत्तिः स्वीकृत्य लुकस्तौ चेति प्रत्याख्यातं। तेन द्वैकुलिजिकीति चिन्त्यमेव तदस्य परिमाणमुत्तरेण योगविभागो गात्र

भाष्येध्वनितः। अत्र। परिमाणशब्देन परिच्छेदकमात्रं तेनोत्तरत्र संख्याया अनेन विशेषणं संगच्छते। तेन षष्टि जीवितपरिमाणमस्य षाष्टिक इति सिद्धं।
द्विषष्ट्यादिभ्यस्त्वनेनानभिधानान्न प्रत्ययः। किंतु द्वेषष्टी भृत इत्यर्थे तमधीष्टो भृत इत्यनेन तस्य च न लुक्। अनार्हीयत्वात्। कालादित्यधिकारेपि यथाकं
थंचित्कालवाचकानां तत्र ग्रहणान्न दोषः रमणीयादिभ्यो नभिधानान्न प्रत्ययः। स्पष्टं चेदं सर्वमत्र भाष्ये अस्येति वर्त्तमाने पुनस्तदस्येति तु स्पष्टार्थं।
तत्सामर्थ्यादार्हीयत्वनिवृत्त्या द्विषाष्टिक इत्यादौ लुक्केति वक्तभाष्यविरोधाद नादेयं। काकवाशितेनेव नदस्येत्यनेनार्हीयत्वनिवृत्तेरशक्यत्वाच्चेति दि
क् संख्यायाः। संज्ञा अत्र तदंतविधिः। ठञ्विधौ संख्यायाः प्रयोजनमिति येन विधिरिति सूत्रे वार्तिकात्। ठञ्विधायके संख्याया इति पदघटिते सूत्रे त
दंतविधिरिति तदर्थः। तेन द्वेषष्टी परिमाणमस्य सूत्रस्य संघस्य वा द्विषष्टितत्परिमाणमस्याध्ययनस्य तद्विषष्टिकमिति सिद्धं। अत्र द्वितीयस्य न
लुक् द्विगुनिमित्तत्वाभावात्। पूर्वसूत्रमिति। तेन पंच गावो स्य संघस्य धनमित्यादौ न न नु पंचादीनां संख्येयवृत्तित्वा। परिच्छेदकत्वाभावः। पंच संख्या
कप्रस्थादिपरिमाणके तु नेष्यत इत्यत आह। तत्र संज्ञायामिति। यद्वेति। वृत्तिविषये तन्मात्रवृत्तित्वमिति भावः। संघे पंचक इति पंच परिमाणमस्य
संघस्येत्यर्थः। प्राणिसमूह इति। परे तु संघः समूहः समुदाय इत्यनर्थांतरमिति पंक्त्यादिसूत्रभाष्यात् समूहमात्रं संघः परं तु तस्य बहु समुदाये शक्तेः
पद हूणामकेकेण इत्यादौ द्विकं सूत्रमित्यस्य सिद्धये तदित्याहुः। पंचकमध्ययनमिति पंचावृत्तयः परिमाणमस्येत्यर्थः। स्तोमे ड। मंत्रसमूहे स्तोमशब्द
क इति कैयटः। समूहमात्रे प्रयोगस्तु लक्षणयेति तदाशयः। मंत्रसमूहः प्रत्ययार्थः। स्तुतिः स्तोम इदर्थं यत्र स्तुतिपदं स्तुतिकरणमंत्रसमूहपरं। पंक्ति।
विंशति। अत्र विंशत्यादयः संख्यायां संख्येये च। उभयत्राप्येकवचनांताः तेन विंशतिर्गवामित्यादि सिद्धं। तत्र नवत्यंताः स्त्रियां सहस्रादिव देकवाचि
वचे मान्यव्युत्पन्नानि इति वार्तिककृतः। एषां प्रदर्शनं तूदाहरणमात्रं। पंचदशतौ। डत्यंतौ निपात्येते। तदस्य परिमाणमित्यर्थे वर्गे च। आभ्यां तद
स्य परिमाणमित्यर्थे डण्प्रत्ययो भवति ब्राह्मणे भिधेये समुदायेन चेत्यत्या सस्या ब्राह्मणसंज्ञा गम्यंत इत्यर्थः। लघुमिति। उपलक्षणमिदं क्रियामात्रस्य
। तेनोपवासं कर्तुं योग्यो भवतीत्याद्यर्थे औपवासिकादि सिध्यति। नित्यमाभीक्ष्ण्यमिति। एतदृत्यनुरोधेन। वाक्यस्य दर्शनान्नित्यग्रहणमनर्थकमि।

त· ११ कर्तनरस्यस्यपूर्वम्सूत्रे इतिशेषः अनन्तरस्येत्युक्तातस्यानंतरत्वंसूचितंतच्चपूर्वसूत्रेनन्वपकृः
ल·श· तिभाष्योक्तेस्तदर्थत्वान्नोचित्यं। दंडादिभ्यश्चेति। दंडादिभ्योयइतित्वपाठः। पाश्चात्। अत्रनित्यसमासः। कडंकर — कडंगमितिमादमित्यर्थकं। कडंकरंवुसंत
शे·सु· त्कर्मार्हतीति। यद्यपिप्रज्ञादिकृशब्दयोस्तत्कर्मणिलक्षणयासिध्यतितथाप्यत्रप्रकरणेमुख्यार्थेप्येवप्रत्ययइतिज्ञापनार्थमिदं। पात्रीयमिति। यद्यपित
२१ त्गुरुशिष्याभ्यांनिर्वर्त्यतेतथापिशिष्यएवेष्यतेअभिधानस्वभावात्तदाह। छात्रइति। एवंतौरापणिकोपज्ञमानएवनतुश्रोतिजोतिवोध्यं। चांद्रा
यणंतयोर्विशेषः। संशय। संशयशब्दस्तद्विषयत्वेलाक्षणिकः। आपन्नइतिकर्तरिक्तः। ततोनिर्गमनमितिपंचम्यंतात्तसिल्। पंथोण। पथःपंथादे
शोणश्चप्रत्ययः। अणितिपाठस्तुछेदादिभ्यइतिसूत्रस्थभाष्यासंमतः। नित्यंगच्छतीति वृत्त्यनुसारेणभाष्येनित्यग्रहणप्रत्याख्यानात्। कालात्। काल
ग्रहणेयथाकथंचिदपिकालवोधकस्यग्रहणमितितदस्यपरिमाणमितिसूत्रेभाष्येस्पष्टं अतिप्रसंगस्त्वनभिधानान्न। आह्निकमिति। अन्हःष्टखोरे
वेतिनियमान्नटिलोपः अन्हष्टखोरेवेति। तस्सत्तया व्याप्यमानकालइत्यर्थः। तंअधीष्टइत्यत्रसंयोगेद्वितीया। मुहूर्तमध्येषणेपितत्फलीभूताध्य
यनक्रियाव्याप्तेनतत्व्याप्तत्वोपचारात् यावत्कालमध्येषणाभाणीक्रीयेतेतावतःप्रत्ययोनेष्यते। भूतभाविनोरुभयोरुपादानसामर्थ्यात्कालांतरभावोवो
ध्यः मासाद्य। निर्वृत्तादीनांपंचानांअधिकारेपिभूतइत्येवसंवध्यते। नह्यर्थांतरेप्रत्ययेतदंतेनवयोगम्यतेतदाहमासंभूतइति। यश्चेतिनि। अवयसीतिसू
त्रभाष्यात्तुअत्रापियपोनानुवृत्तिरिवलभ्यते। एवंहितत्रभाष्यं अवयसिठंश्चेत्यनंतरस्यण्यतोनुकर्षःठ्यंविज्ञानीयात्यनप्यनुवर्त्तनइतियवप्यनु
वृत्तावेवभवतीतिवोध्यं व्यवहितस्यापिक्वचिदनुवृत्तिर्दृष्टायथाद्वितीयायांठेस्वेनइत्यत्रैतदइवेदमएवमिहापिकश्चिद्गम्येदित्यर्थइतिवदताकैयटेन।
दृष्टांतेनव्यवहितस्यापीत्युक्त्वाचपूर्वसूत्रेतदसंवंधएवोक्तोमूलंतुवृत्त्यनुसारीतिदिक्। चा पण्मदिति। अवयसिठनितिसूत्रद्वयंतुनकृतंशार्ङ्गरवादि राम
पियोगविभागस्यगरीयस्त्वात्। पंचस्वर्थेष्विति। यथायोगमितिशेषः। द्व्यहीनइति। तद्धितार्थद्विगोरूपं। समाहारद्विगौतुनखः। समासांतेकृतेह्नशब्दांत २१
द्विगोरभावात्। संख्याया। संख्यायाःपरस्यसंवत्सरसंख्याशब्दस्येत्यर्थः। द्वेषष्टीति। षष्टीतिषष्टिशब्दोत्रतत्संख्या। केहणादिरूपेक्षालेवर्त्तनेतःकालादित्य
धिकारस्यभूतार्थप्रत्ययः। संवत्सरग्रहणमिति। संख्यायास्तुनपरिमाणग्रहणेन। असतिगमकेग्रहणं। संख्यावाह्यातुसर्वत्रइत्युक्तेरितिभावः। वावृत्ति

ति। वाक्यभेदेनतयोरेवेत्यर्थः। द्वैवर्षिकइति। अस्यव्याधिरितिविशेष्यं। तेननित्योलुक्। प्रतिषेधोनेति। भविष्यदर्थकोप्रत्ययभिन्नेजिद्दा। दावित्यत्र
त्तदाह। गम्यतेहीति। कर्मकरिष्यतीत्यादिपदांतरसमभिव्याहारेणेत्यर्थ त्तदाहाधीष्टोभृतोवेतिभूतोवेत्यपाठः। तत्रभविष्यत्त्वस्यकथमप्यनवगतेः
द्वैवार्षिकोमनुष्यइति। चितवतीत्यस्यारंभसामर्थ्यादेवनित्यत्वेसिद्धेपुनर्नित्यग्रहणाद्भूतरूपेर्थेएवनित्यंलुक्तत्रैवाभिधानाच्चेतिनात्रलुगितिहरद
त्तः। परेतुनित्यग्रहणेनवाच्यवृत्त्योकार्थालाभस्तस्मात्अध्येषणमरण्योश्चेतनविषयकत्वेनतत्रलुकोनित्यतया त्रिदादिप्रत्ययपष्ठ्याभावेनतत्रवृद्धि
प्राप्तिरेवननित्यग्रहणेतुवेत्यस्यनिवृत्तयेस्यष्वार्थमेवमूलंतुवृत्त्यनुरोधेनेत्याहुः। परिमाणांतस्या। व्याख्यातमिदं अत्रापिवृत्त्यादिलिखनंतुप्रमादात्। केचि
त्पठंतीति अत्राहचिबीजंकुलिजाकुरेवोचेत्यत्रदर्शितं। षष्टिकाः। शालिविशेषएवायंसाधुर्नमुद्गेषु। एकवचनांतप्रयोगादाह। बहुवचनमिति। पञ्जिपद्द
त्यस्यविवरणं। जेतुंशक्यइति। अस्येत्यर्थइति। ब्रह्मचर्यंचेत्तत्कालपरिच्छेद्यमित्यपिबोध्यं। यद्वेति। अत्रपक्षेब्रह्मचर्यंचेद्विशेष्यमित्यर्थः। मासोस्यति
अत्रमासस्यप्राधान्यात्प्रथमा। अत्यंतसंयोगेद्वितीयातुविशेषणादेवेतिभावः। भाष्यंतुयद्वेतिपक्षपातेवामासिकीब्रह्मचारीतित्वर्थ्याद्यजंतंबोध्यं। म
हानाम्नीनामेति। अनेनरूढतयाभाषितपुंस्कत्वाभावात्पुंवत्त्वंनेतिसूचयति। अतएवभाष्येमाहानाम्निकमित्युदाहृतं। भाष्येतुतदस्यब्रह्मचर्यमिति
महानाम्न्यादिभ्यउपसंख्यानं। महानाम्नीनांब्रह्मचर्यंमाहानाम्निकमित्युक्तंमाहानाम्निकइतितुमहानाम्नीसहचरितव्रतपरान्महानाम्नीशब्दात्तच्चरती
त्युपसंख्यानमितिवचनेनसाधितंतस्यदक्षिणा। यज्ञवाचकेभ्यःषष्ठ्यंतेभ्योदक्षिणेत्यर्थेठञित्यर्थः। अकालादपीति। परेतुयज्ञग्रहणादेवात्रकालवा
चकादित्यस्यासंबंधः। नहिद्वादशाहसाध्ययज्ञवाचीसशब्दःकालशब्दः। अतएवभाष्येआख्याग्रहणात्प्रसिद्धमग्निष्टोमादिअप्रसिद्धंपंचोदनादिकंप्र
कयज्ञादिचयेआचक्षतेतेभ्यःसर्वेभ्यःप्रत्ययइत्यर्थकमुक्तम्। तत्रचद्वे। कालवाचिभ्योदीयतेकार्यमित्येतयोरर्थयोर्भववत्प्रत्ययाइत्यर्थः। प्रावृषएण्यःश
रदेसंधिवेलाद्यृत्वित्यणइदंवृत्त्यनुरोधेन। भाष्येतुचोभिन्नक्रमःदीयतेइत्यनंतरंबोध्यःचकारेणचप्रज्ञाख्येभ्यइत्याकृष्यते। तत्रदीयतेइत्यर्थेयज्ञाख्येभ्यःष्ठ
ञ्भवतीत्यर्थः। अग्निष्टोमेदीयतेभक्तमाग्निष्टोमिकं। कार्यरूपार्थेएवभंववदतिदेशइत्युक्तं। वृषमहर्षभकं वृषेदीयतेइत्यादिभाष्यरीत्यापूर्वत्रोभयोर्धि

त·
ल·अ· कारः। संपादिनि। गुणोत्कर्षेः संपादः संपत्तिस्तद्वदित्यर्थः। प्रभवतीति समर्थ इत्यर्थः। काल्यमिति। प्रातः कालवाची काल्यशब्दस्तद्धा चिकल्पशब्दवदव्युत्पन्नं प्रा
श·सु· तिपदिकं वोध्यं। ततः स्वार्थिकाणं तं वा। इंद्रमहः इंद्रोत्सवः। मंथो विलोडनदंडाधारः काष्ठविशेषः। मंथदंडयो रूढावेतौ। चूडादिभ्य इति इदं व्युष्टादिभ्योणक्।
२२ तोरण इत्यनयोरपि वोध्यं। तेनयथादर्शनं व्यवस्था। अग्निपदे दीयते कार्यं वा आग्निपदं पैलुमूलं उपवस्ता प्राप्तो स्य औपवस्त्रं प्राशितं। भाष्ये ऽग्निपदादिभ्या
इति पाठः। ऐकागारिकं। चौर इति। तेन भिक्षोर्न। दित्वंडीवर्थं। आद्युदात्तत्वमप्यत्र निपात्यते। अत एव ठञा सिद्धे निपातनानर्थक्यमिति भाष्ये उक्तं। समाना
कालस्येति। एतदर्थमेव निपातनमयमप्याद्युदात्तः। आद्यंतावुत्यतिनाशौ। आकालाट्ठंश्चेति वार्तिकान्निर्दयं। आकालिका। समानकालिकाद्यंता चंचलेति।
यावत्। चादाकालिकी। तेन तु। सूत्रे तुल्यमिति सामान्येन पुंसकं प्रथमांतं चा उदाहरणेप्येवं। व्यापारविशेषणत्वात्। क्रियेति च संनिहितत्वात् समानविभक्ति
कत्वात् प्राधान्याच्च प्रत्ययार्थविशेषणं। यत्तुल्यं सा चेत् क्रियेत्यर्थः। प्रकृत्यर्थविशेषणं तु न। ब्राह्मणादिशब्दानां लक्षणया ध्ययनपरत्वेन क्रियोपमानत्वयोग्य
र्थकत्वेपि तत्र तृतीयार्थान्वयेन सत्वरूपतया क्रियात्वासंभवात्। स्थातव्येन तुल्यं गच्छतीत्यादिप्रयोगसत्वे तत्रापि तृतीयार्थान्वयेन सत्वरूपत्वमेव। पाका
दीनां तु सत्वरूपतास्पष्टैव। असत्वभूतार्थक तिङंतार्थानामुपमानत्वमेव न। नवैतिङ् तेनोपमानमस्तीति सन्सूत्रस्य भाष्यात्। उपमेयत्वं तु स्त्येव। क्यच्
तानां क्रियान्वय नियमेन तुल्यशब्दार्थेऽनन्वय एव। अत एव प्रकृत्यर्थविशेषणत्वे कथं च तृतीया समर्थनाम क्रिया स्यादित्युक्तं भाष्ये। यस्मार्थस्य तिङंता
दिवाच्यत्वे क्रियारूपताभूत्स संप्रतिसत्व भूतोपि क्रियेत्याश्रयिष्यते इति कल्पने गौरवं। नृत्यवद्गमनमित्यादावस्तीत्यध्याहृत्य सत्तयोरेवोपमानोपमेय
भावेनादोष इत्यन्यत्र विस्तरः। तत्र तस्येव। यद्यपि मथुरायामिव पाटलिपुत्रेऽधीते इत्यर्थेपि पूर्वेणैव सिद्धं तस्य मथुरया तुल्यमधीते पाटलिपुत्रे इत्यस्य च तु एम
ल्यत्वात्। तथापि द्रव्यगुणादितुल्यार्थ आरंभः। क्रियाचेदिति तु नानुवर्तते। किंचे वार्थस्योपमानविशेषणतया तुल्यपदार्थस्य विशेष्यतया ततो वोधे भेदः। एवं २२
च उपमानमथुराभिन्ने पाटलिपुत्रे मे गृहमित्यर्थे मथुरावत्पाटलिपुत्रे मे गृहमिति साध्येव। उपमेयेनाभेदान्वयात् तत्समानेषष्ठीसप्तम्यावुपमानाद्वोध्ये। त
दाहा मथुरायामिवेति। अत्र वाक्ये प्राकारादिपदाध्याहारेणैव वोधः। प्राकारयोरेव चोपमानोपमेयभावः। वृत्तौ तु मथुरादिपदानां तत्संबंधिप्राकारे वृत्तिरिति

केचित्। परेतु षष्ठ्यर्थे सप्तम्यंतात्वस्मंताच्चायं साधुः। अधिकरणसप्तम्यंतात्तु नायमसामर्थ्यादत एवैतत्सूत्रे तत्र ग्रहणस्य वैशब्दयोगे षष्ठ्यर्थे सप्तमीज्ञाप
कतोता भाष्ये। देवेष्विव मनुष्येषु नामेत्युदाहृतं। तत्रैव देववन्मनुष्येषु नामेति साधु। उपमानदेवसंबंधिनामाभिन्नं मनुष्यसंबंधिनामिति बोधः। मथुरावत्पा
टलिपुत्रे प्राकार इत्यस्य उपमानमथुरासंबंधिप्राकाराभिन्नः। पाटलिपुत्रसंबंधी प्राकार इत्येवं बोध एव साधुत्वं। अस्मादेव ज्ञापकादिवयोगे उपमानवि
शेषणादुपमेयविशेषणाच्च षष्ठ्यर्थे सप्तमीत्याहुः। तदर्हं तदिति द्वितीयांतादर्हमित्यर्थे वतिरित्यर्थः। सूत्रे सोत्र त्वा नद्वितीया। विधिवदिति। विधिविषययोग्यकर्तृहरिका
मंकं देवदत्तकर्तृकं पूजनमिति बोधः विधिशब्देन तदुक्तप्रकारः सादृश्याप्रतीतेः। पूर्वेणासिद्धौ वचनं विनीतवदागमनं विच्छेदकृतहस्तवदित्यादौ विनीतानामिदं यो
ग्यमागमनं कृतहस्तानामिदं योग्यं छेदनमिति प्रतीतेरिति दिक्। तस्य भावः। भावे चाकर्मकेभ्यो भावे इत्यादौ भावपदार्थस्यान्यादृश्यस्य प्रसिद्धेः स्पष्टमाह प्रकृतीति। भवंति अ
र्थबोधाय प्रवर्तते अनेनेति भावः इति करणे घञिति भावः। प्रकार इति। मुख्यविशेष्यतानिरूपितविषयताश्रय इत्यर्थः। तेन राजपुरुषादौ [illegible]रादेः प्रकारत्वेपिन
क्षतिः। स च तच्छब्दप्रवृत्तिनिमित्तरूप एव। प्रवृत्तिनिमित्तत्वं च यत्र[illegible] सति विशेष्यभूतार्थबोधनार्थं शब्दस्य प्रवृत्तिः प्रयोगस्तत्वं। कचित्प्रकारस्य
तत्त्वं यथा घटादिपदे। कचित्तु संसर्गस्य यथौपगवराजपुरुषकारकादौ प्रकार इति च मूले उपलक्षणं। यद्वा संबंधस्यापि संबंधतया प्रकारतया चेति द्वि
धाभानं। संज्ञाशब्दे च प्रायः शब्द एव प्रवृत्तिनिमित्तमिति केचित्। परे तु संज्ञाशब्दे प्रवृत्तिनिमित्तं नास्त्येव। डित्थत्वमित्यादौ विशेष्यभूतार्थ एव त्वार्थः। प्रकृत्या
नि श्चेद्दृशे पुंशब्दपरा डित्थशब्दवानर्थ इत्यादिक्रमेणैव बोधः डित्थ इत्यादितः संख्यादिप्रकारकबोधान्निर्विकल्पकं। कुत्वमित्यादेः कुशब्दार्थः कवर्गः इ
त्यादिरीत्या बोधः। अन्यथा कुत्वं कस्मान्न भवतीत्यादौ कुत्वशब्दार्थकुशब्दस्य प्राप्त्यभावात्तस्य स्वार्थेऽये लक्षणा अपर्णायास्यादित्यादिभाष्यप्रदीपोद्यो
तादौ विस्तर इत्याहुः। भावत्वेन च प्रवृत्तिनिमित्तं शक्यं। प्रकृतिजन्येत्यादि तदुपलक्षकं। घटत्वमित्यादेर्घटसंबंधी भाव इत्यादिक्रमेण बोधः भावप्रधाना
निर्देशस्थले च तादात्म्येन व्यक्तिप्रकारकः स्वरूपेण जातिविशेष्यको बोध इति न तत्रासाधुत्वमत एव जात्याख्यायामेकस्मिन्निति चरितार्थं। अपवादैरिति
अन्यथापवादविषयेप्यस्यानुपस्थितिः स्यान्निराकांक्षत्वादिति भावः। चकार इति। अन्यथापत्याद्यर्थप्रत्ययानामिवैतयोरपि तौ बाधकौ स्यातामिति भावः। पुं

त·
ल·श· स्वमिति। हृस्वान्तादाविति र्षत्वं तु न सवनादिषु पाठात्। ननञ्पूर्वात्। अधिकारसूत्रमेतत्। नञ्गृह्यमाणप्रातिपदिकाद्विधीयमानानां तदंते प्राप्त्यभावादाहापति॥
शे·सु· त्वमिति। पत्यंते तीर्गतावृत्ति च क्रमेण यगणौ प्राप्तौ आपटवमिति। इतरो भावप्रत्ययो नञ्पूर्वाद्बहुव्रीहेर्नेष्यत इत्यादि भाष्यं पत्यंते ति प्राक्तन पृथ्वादिभ्य इत्या
२३ दिविषयमेवेति भाष्यप्रदीपोद्योते निरूपितं आचतुर्यमिति। नञ्पूर्वाणामेषामत एव पर्युदासाद्गुणेपाठानुमानेन ष्यञ् बोध्यः रक्तो हलादेः किं। ऋजिष्ठः। ल
घा किं। क्रष्णिष्ठः। मेवरत्वमिति। तेन कृतयतीत्यादावि ष्ठवद्भावाद्भावे न। यथातथय। नञः शुचीत्यतो नञ् इति वर्तते यथातथा शब्दो निपातसमुदायः। यथापुरमि।
ति। पुरा शब्देन पदार्थानतिवृत्त्ताव्ययीभावः। केचिदिति। भाष्यानुक्तत्वमत्रारुचिः। वाणिज्यमपीति। अपिना दौत्यं यौवनमिति। मनोज्ञादित्वाद्यौवनकमपि। प्रकृत्या
केराजन्येत्यादिना प्रकृतिभावः। तह्य याहेति। पक्षे ब्राह्मणादित्वात् ष्यञ्। इदं भाष्ये क्वचिन्मृग्यं। शैष्योपाध्यायिकेति। अस्यापि प्राप्तिरस्तीति भावः। गोपालपशुपालिके
त्यादित्वस्योदाहरणं मुख्यं। गोत्रच। श्लाघादयश्च पदांतरोपात्ता एव प्रत्ययार्थान्वयिनो न प्रत्ययवाच्या इति बोध्यं। गार्गिकयेति। स्वभावात्स्त्रीत्वं तल्लोवाधनार्थमिति
अधिकारवशाद्गोत्रात्म्य इति भावः कर्मणोः प्राप्तस्येति भावः एतेन कर्मणि त्वस्याप्राप्तेस्तदर्थत्वग्रहणं। किंच पूर्वसूत्रविहितस्य त्वादेरपि निषेधः स्यादित्यपास्तं। श
ब्दोपात्तस्यैव निषेधात्॥ ॥ इति नञ्स्नञोरधिकारः समाप्तः॥ ॥ धान्यानां। निर्देशात्षष्ठ्यर्थ समर्थविभक्तिः। अलौकिकेतु प्रत्ययार्थस्याक्रियात्वेपि न।
हितधावनुवादसामर्थ्येनैवसा बोध्या। अलौकिके प्रथमा प्रवेशेपि न क्षतिरिति कश्चित्। क्षेत्रशब्दस्तु धान्यादीनामुत्पत्त्याधारभूतवचनः। भवतिश्चोत्पत्तिवा
चीपरस्परमन्वययोग्यत्वात्॥ तेनेह न मुद्गानां भवनं गृहभूतोयं कुसूल इति। विभाषाति। अत्र पूर्वत्र च पंचमी षष्ठ्यर्थे इति धान्यानामित्यस्य संबंधात्षष्ठ्येव सम
र्थविभक्तिरिति केचित् असामर्थ्येपीति। सर्व इत्यस्य कृतेनान्वयेनोत्तरपदार्थेनन्वयादसामर्थ्यमित्यर्थः। सर्वेण चर्मणा कृत इत्यर्थे तु तद्धितो नेष्यत इति।
भावः। निपातनादिति। प्रत्ययसंनियोगेनैवेदं निपातनं तदाह। सर्वश्चर्मणेति। समंसर्वमिति। आभिमुख्यार्थकसमित्युपसर्गपूर्वात्तु प्रत्ययो नेष्यत इति भावः। राम
यथामुखीन इति। प्रतिबिंबदर्शनाधिकरण इत्यर्थः। तत्सर्वादेः। पत्रपात्रमिति पंचम्यर्थे प्रथमा सर्वादेरिति बहुव्रीहिस्तत्सामानाधिकरण्याय पथ्यादिभिस २३
दंतग्रहणं तदाह। पथ्याद्यंतादिति। व्याप्तिक्रियाकर्मत्वलभ्यमाह। द्वितीयांतादिति। अनुसयामेइति। आद्यपादसंबंधिदैर्घ्योपलक्षितेत्यर्थः। अंत्यपादेनम

दृशीत्यर्थः। सादृश्यं तुल्यपरिमाणतया समर्थविभक्तिर्द्वितीयानिर्देशात्। योग्यचाद्य। स्थलविशेष इति। अयः प्रदक्षिणगमनमनयो वामगननमयः सहितो नयो
ऽयानय इति। यद्यप्यसौ गतिविशेषशक्तस्तथापि प्रदक्षिणप्रसव्यगामिनां शाराणां यस्मिन्युग्मादिपदे स्थितानां परकीयैः शारैस्तत्स्थानां नाम संबंधस्तद्बाध
भावरूपः ससहायस्य शारस्य परैर्नाक्रम्यते पदं। असहायस्तु शारेण परकीयेण बाध्यत इति द्यूतशास्त्रात्तत्स्थानं लक्षणयोच्यत इति भावः। स्पष्टं चेदं सर्वं भाष्य
इत्यन्यत्र विस्तरः। तं नेय इति। प्रधानकर्मणि यत्। अप्रधाने द्वितीया। संन्नियोगेनैवेति। अत एव भाष्ये परांश्चावरांश्चेत्यनेनादेशेनैव विग्रहो दर्शितः। राष्ट्रा
वारेत्यत्रावारपाराद्विगृहीतादपीत्यादि पठितं तदिहापीत्याशयेनाह। अवारीण इत्यादि। पूर्वपद इति। उत्तरपदे तु विभक्तिलुकैव सिद्धिरिति भावः। पूर्वप
देयल्लोपनिपातनसामर्थ्याद्लुगिति तु भाष्यकृतः। विजायते गर्भं मुञ्चतीत्यर्थः। तेनात्यंतसंयोगाभावान्न द्वितीया। ख प्रत्ययानुत्पत्ताविति। पक्षे हूयेपीति
शेषः। सूत्रे उभयत्रापि तथोच्चारणात्। विकल्पस्तु वाचनिक एव। समाशब्दो वहुवचनात् तएवेत्युक्तसूत्रभाष्यादिवलादुपेक्ष्यमिति भावः। अघश्वीनेत्यवि
भक्तिकं व्याख्यानात्। तेनास्त्रियामपि। अद्यश्वीनं वाडवमिति। अवष्टब्धमासन्नं। आगवीने आङ् मर्यादायां गोशब्दो गोः प्रत्यर्पणे। तदाह। प्रत्यर्पणादिति। असंयोगा
वाभृत इत्यादिः। अलंगामीति। सुप्य जाताविति णिनिस्तत्र न यस्त्वाह। गच्छतीति। अनुग्विति। पश्चादर्थेऽव्ययीभावः। अध्वानमलंगच्छतीति। अलंगामिपदेनवि
ग्रहेतु अध्वनोलंगामीत्येव भाष्यमिनाध्वच। अलंगामीत्यनुवर्तते। लक्षणेनाभीत्यव्ययीभावः। गोष्ठा। अत्र केचित्। यद्यपि भूतपूर्वे चरट्षष्ठ्यारूप्यचेत्येते अत्रै
वपठित्वा गोष्ठात्खञित्येव सूत्रं युक्तं। तथापि तयोरन्यत्रकरणसामर्थ्येन विशेषविहितेनापि खञा वरणे वाधानेति ज्ञाप्यत इत्याहुस्तज्ज्ञाप्येन दृष्टं। शालीनकौ
पीने। शालाकूपाभ्यां तत्प्रवेशतत्पतनलाक्षणिकाभ्यामेव प्रत्ययोऽनयोरूढिशब्दत्वात्। नानाजातीयानामनियतवृत्तीनां शरीरायासजीविनां संघो व्रातस्तु
त्कर्मात्र शरीरायासरूपं व्रातः अत एव निपातनादिदमर्थेण तेषामन्यतम एव व्रातीन इष्यते। नवनीतमिति। भाष्ये घृतमिति पाठः। संज्ञायामित्युक्तेरुदश्वि
तिना। तस्य पाकः। अर्थयोः प्रत्ययोः प्रकृत्योश्च यथासंख्यं विनञ्भ्यां। नसह इति प्रकृत्यर्थविशेषणमित्याह। असहार्थेति। तद्व्याख्या पृथग्भाव इति। असहार्थे किं।।
विगत इत्यादौ क्रियाविशेषकान्मा भूत्। गोष्ठजिति। एतत्प्रत्याख्यानपरभाष्यबलादेते वितः पठिताः अश्वत्थादिशब्दार्थबोधकानि वार्तिकानि आह। संघात इ

तिहस्तिषड्ढ्वमितिभार्तेतप्रयोगाः।अवाचीनःप्रसिद्धः।नतइति।नासिकासंवंधिनतेत्वेवर्तमानादवात्स्वार्थेप्रत्ययइत्यर्थः।नेर्विड।निविडाःकेशाइतिप्रयोगा
न्नतेनासिकायीरत्यादेरन्यासंवंधः।अग्रेतुमंडूकानुवृत्तिर्वोध्या।अभिधेयइति।तत्रवर्तमानान्नेरित्यर्थः।चिकादेशेऽकारउच्चारणार्थः।क्लिन्नस्येति।चिल्पिलावा
देशोलश्चप्रत्ययइत्यर्थः।आसेवंसमीपं।आरूढंउच्चंसंज्ञाधिकारलभ्यमाह।पर्वतस्येतिसमुद्रोपत्यकाहेमीपर्वताधित्यकापुरीत्यादौतुलक्षणयाप्रयोगो
वोध्यः।कर्मठइतिठस्यागसंज्ञानिमित्तत्वाभावादिकादेशान।प्रमाणेद्व।प्रमाणेइत्यर्थद्वाराप्रकृतिविशेषणंतत्रवर्तमानात्प्रथमांतादित्यर्थः।प्रमाणमत्रप
रिच्छेदकमात्रंतत्रमात्रच्।अतएवप्रस्थमात्रमूरुमात्रमित्यादिसिद्धिः।आद्यौतूर्ध्वमानेएवप्रथमश्चद्वितीयश्चऊर्ध्वमानेमतौममेत्युक्तेरितिकेचित्।अन्ये
तुआयामपरिच्छेदकमेवात्रप्रमाणं।अतएवयत्तदेतेभ्यइतिसूत्रेप्रमाणपरिमाणशब्दयोरेकार्थत्वंमन्यमानस्यपरिमाणग्रहणंकिमर्थमितिशंकायामु
क्तौत्रविशेषइतिभाष्येसमाहितंतेनोक्तविशेषणवाचकावत्रप्रकरणेप्रमाण परिमाणशब्दावितिसूचितं।एवंचप्रस्थमात्रमित्याद्यसाध्वेव।मात्रच्त्वावि
शेषेणपरिच्छेदकमात्रवाचिनःस्मप्रमाणादितिकैयटोपिचित्यंएवेत्याहुः।प्रमाणेलः।प्रमाणेवर्तमानाद्विहितस्यलुगित्यर्थः।इहायाम — स्तुप्रमाणंस्यादित्ये
वगृह्यते।तेनोरुद्वयसमित्यादिसिद्धं।शमादीनामपिपद्यायामपरिच्छेदकत्वंतदामात्रचोलुक्।यदातूर्ध्वाधरदिगवस्थितवस्तुपरिच्छेदकत्वंद्वयसजादि
तदाऽप्रमाणत्वान्नलुक्।द्विगोर्नित्यमिति।प्रमाणांतद्विगोरित्यर्थः।एतत्सामर्थ्यादेवनदंतद्विगोरप्रमाणत्वेपिमात्रच्।प्रमाणपरीतितेनोन्मानात्संशये
मात्रजन्।शममात्रमिति।शमःस्यान्नवेत्यर्थः।वत्वंतात्स्वार्थेइति।वहुलग्रहणसहितोत्रपाठोभाष्ये।हस्तिनेइनणितिप्रकृतिभाव।यत्तदे।इहपरिमा
णग्रहणंसर्वतोमानार्थकं।ननुप्रमाणेइत्यनुवर्त्यतत्रैवास्यविधानमस्तुयावानध्वेत्यादिप्रयोगाएवमुख्याःसंतुपरिमाणप्रयोगाएवसादृश्यादृवंतुन
इत्युक्तंभाष्ये।किमर्थंपरिमाणइत्युच्यतेनप्रमाणइतिवर्त्ततेइतिचेन्नयदादिभ्योविशेषविहितेनवतुपामात्रादीनांवाधप्रसंगात्।परिमाणग्रहणेतुभिन्नो
पाधिकत्वान्नवाधइतिप्रमाणोपाधौतन्मात्रमूर्ध्वमानोपाधौतद्द्वयसमित्यादिसिद्धं।यावानध्वायावतीरज्जुरधिकरणेतावत्त्वेचेत्यादिप्रयोगास्तुसादृश्या
द्बोध्याः।तदुक्तं।मात्राद्यप्रतीघातायेति किमिदं।वस्यघविधानसामर्थ्याद्वतुपोप्यत्रविधिः।प्रत्ययांतरवत्रमध्याहृतयेत्रइति।एतेनादेःपरस्येत्यत्रवसि

द्विवड्ढति व्यर्थमित्यपास्तं। यद्वा किंमिदंभ्यामिति वाक्यभेदेन वतुपं विधत्ते। किमः सं। इदमो निवृत्त्यर्थं किम इति। संख्यापरिमाणमिति कर्मधारयः। परिमाणशब्दः परि
च्छेदकपरः। पूर्वत्र परिमाणग्रहणस्य सर्वतोमानार्थत्वात्पुनस्तद्ग्रहणं। संख्यारूपपरिच्छेदविषयके प्रश्ने वर्त्तमानात्किमो स्येति षष्ठ्यर्थे इतिरित्यर्थः। संख्येति किं। किया
न्वृक्षाः। कतीति। नित्यबहुवचनांतः। द्व्येकयोः संदेहाभावेन प्रश्नाभावात्। बहुत्वव्याप्यसंख्यानां बहुत्वात्प्रश्नो युक्त एव। संख्यायाः। अवयवे वर्तमानसंख्यावाचकादवयवि
रूपे स्येत्यर्थे तयप् इत्यर्थः। अवयवी चात्रानुद्भूतावयवभेदोपि समुदायः। तेन मुनित्रयं बहुतयं यूथं उभये देवमनुष्या इत्यादि सिद्धं। द्वित्रिभ्यां। ननु यच्चित्त्वं व्यर्थं
चित्त्वेपि द्व्यादीनामंतोदात्ततया यस्येति लोपेनानुदात्तस्य चयत्रेत्यनेनाद्युदात्तस्यैव प्रयोगे श्रवणादिति चेन्न। प्रत्ययसंबंध्याद्याकारस्यैव प्रकृतेरपि शेषनिघातेनानु
दात्तत्वात्। उभादु। अदात्तग्रहणसामर्थ्यादाद्युदात्तः। अंतोदात्तत्वस्य चित्त्वेनैव सिद्धेः। सर्वोदात्तत्वं तु बाधितं अनुदात्तं पदमेकवर्जमित्यनेन। न चोभय इत्यत्र संबुद्धावाम
न्त्रिताद्युदात्तं बाधितुमुदात्तग्रहणमिति वाच्यं। येन नाप्राप्ति न्यायेन चित्स्वरस्यैव बाध्यत्वात् तस्य सतिशिष्टत्वेन बलवत्त्वाच्च। उभयं शृणवच्च न इत्यादौ मध्योदात्तप्रयोगा
च्च। तयप इति। इदं तयादेशे प्रतिषेध उभये इति स्थानिवत्सूत्रस्थवार्त्तिकानुरोधेन। वस्तुतो नात्रादेशता। किंतु प्रत्ययांतरत्वमेव उभयीत्यत्र ङीप् तु टिड्ढेति सू
त्रे मात्रच इति मात्रशब्दात्प्रभृति अयच् अश्वकारेण प्रत्याहाराश्रयणादिति तत्प्रत्याख्यानभाष्यादत एवोदात्तग्रहणं सार्थकं अन्यथा निरनुबंधकादेशांत
रमेव कुर्यात्। आदेशत्वेप्याद्युदात्तश्चेत्यधिकारेण तस्याद्युदात्ततायालाभात्॥ तदसंबंधेपि स्थानिसादृश्येनानुदात्तत्वे उभयस्यांतोदात्ततया अनुदात्तस्य च यत्रेत्य
नेनाद्युदात्तत्वसिद्धेः। अयचः श्चः समुदायानुबंधः सानुबंधश्चेत्यन्यत्र विस्तरः। तदस्मिन्। उपश्लिष्टपदाधारेणोपश्लेषिकेधिकरणे सप्तमीति स्पष्टं भाष्ये
। ग्रहणवतेति षेधार्थं ग्रहणं दशशब्दात्तु न व्यपदेशिवद्भावस्याप्रातिपदिकग्रहणेऽभावात्। समानजातीयत्वे इति करणलब्धोयमर्थः। शदंत। तदस्मिन्नधि
कमिति ड इति च वर्त्तते। संख्याया अवयवे इत्यतः संख्याग्रहणं च वर्त्तते। तेन गो त्रिंशदधिका अस्मिन् शते इत्यादिषु न। अंतग्रहणादेकत्रिंशतमित्यादि सि
द्धं विंशतावप्यंतग्रहणं कर्तव्यं एकविंशतमित्यादिसिद्धये। गुणस्य निमाने। गुणोत्र समानभागः। निमीयते क्रीयतेऽनेनेति निमानं मूल्यं। तदस्येति मंडूकप्लुत्यानु
वर्तते तदाह। प्रथमांतात्षष्ठ्यर्थे इति। गुणस्येति मध्यमणिन्यायेनोभयान्वयि। गुणकर्मकनिमाने वर्तमानाद्गुणगतसंख्यावाचकान्मयडित्यर्थः। निमाननिमेययो

भागरूपस्त्वि निमेयसंख्यायेशघ्यानिमानसंख्यायाआधिक्ये चनिमेयस्यैकत्वएव चायंप्रत्ययइतिभाष्येस्पष्टं।तेनैकोयवोभागोनिमानमस्योदश्विड्गागस्येत्यत्रत्रयोयवा
नांभागानिमानमनयोरुदश्विड्गयोरित्यत्रवना।द्विमयमिति।द्विशब्दस्यभागवृत्तेर्नित्यसापेक्षत्वाद्यवानामित्येतत्सापेक्षत्वेपिप्रत्ययः।उदश्विड्गागस्याप्युदश्वित्वा
द्विमयमुदश्विदित्युक्तं।संख्यायाइतिकिं।यवभागोनिमानमस्योदश्विड्गागस्यतस्यपू।संख्यायाइतिवर्तते।संख्येयार्थकसंख्यावाचिनोग्रहणं।प्रवृत्तिनिमित्तसंख्या
पूरणेवाप्यं।वाक्षीशास्वेतिवदवयवः प्रत्ययार्थः।नांतादसंख्यादेर्मट्।तुनकृतः पंचमइत्यादौनलोपानापत्तेः।डटित्यनुवर्तत्यनांतादितिपंचम्याषष्ठीकल्प्यतेइत्याशयेना
हाडटइति।तयतावितिविशेषविहिताभ्याममप्याभ्यांचतुरोडेण्नबाधते।थुड्विधानसामर्थ्यात्।डटोपवादइति।सहायवाची द्वितीयशब्दस्तव्युत्पन्नप्रातिपदिकं।
अनेनतुनास्यसाधुत्वं।नचपूरणस्तीयशब्दोसीतिपूरणाद्भागेतीइतिसूत्रस्यभाष्यासंगतेः।तत्रत्यपूरणग्रहणंतुप्रागेकादशभ्यइत्युत्तरार्थमितिभाष्येस्पष्टं।विंश
त्यादिभ्यस्तम्।अत्रविंशत्यादयःपंक्तिविंशतीतिसूत्रस्थाःउत्तरसूत्रेसंख्यादेरितिलिंगइहप्रकरणेतदंतविधिज्ञापकं।तेनैकान्नविंशतितमएकविंशतितमइत्यादि
सिद्धं।ज्ञापकेनचप्रत्ययविधिविषयबाधोध्यतेग्रहणवतेत्यादेः।अयंचागमविधिरितिषष्ठ्यादेरितिसूत्रेभाष्येस्पष्टं।मतौछः।अस्यवामीयमित्यादौप्रकृतिवदि
त्यस्यानित्यत्वान्मत्वाद्देनेलुक्।अस्यवामस्येतिवेदपठ्यतेतात्रद्वितीयविभक्तिप्राग्भागानुकरणाद्दनुकार्येणार्थवतःप्रत्ययइतिबोध्यं।विधानसामर्थ्यादिति।ज्ञाप
कसिद्धविधानसामर्थ्यादित्यर्थः।भाष्येवालुगितिवचनमेवारब्धं विमुक्तादयः शब्दपरागणेनिर्दिष्टाः।गोषदादयोप्येवं।मतौछइत्यारभ्येतदंता अनुकरणशब्दादे
वप्रत्ययाःसाधवः।कामडूक्लेति।नतुकामयितानभिधानात्।तत्रेत्यनुवर्तते।तदाहधनेकामइति।नद्धवनायामिति।अत्रैवार्थस्यसाधुत्वस्वभावात्।उदरात्।तत्र।
प्रसितइतिचवर्ततेयःप्रसितःसचेदविजिगीषुरित्यर्थः।उदरकोमहत्तुःशीतोष्णाभ्यां।संज्ञायामित्यनुवर्ततइत्याशयेनाह। अलसइत्यादि।अध्यारूढशब्दा
दिति।व्युत्पादनमात्रमुद्रूढस्तत्वमितिबोध्यं।अनुजुरिति।संज्ञाधिकारादीदृशेर्थेएवसाधुत्वंबोध्यं।दंभइति।दंभसाधनत्वात्।दांभिकाहिप्रायेणदंडाजिनंधा
रयंति।तावतिथं।ग्रहणमितिमावेल्लुग्वातच्चप्रत्ययार्थः।तावतिथमिति पूरणप्रत्ययांतोपलक्षणं।तृतीयार्थेप्रथमा।तृतीयांताद्ग्रहणमित्यर्थेप्रत्ययः।तावतिथेन
गृण्हातीत्युपसंख्यानमितिवार्तिके तृतीयायाएवसमर्थविभक्तित्वस्फुटमत्वात्तस्यन्यनवक्ष्यतिद्वितीयेनरूपेणेतिपूरणप्रत्ययस्येति।षष्ठेनगृण्हातिषष्ठकः।

इतिभाष्योदाहरणेतत्तुकएवदर्शनादितिभावः। द्विकंवाग्रहणमिति। अगृहीतयोरपिप्रत्ययविधानेनासंदेहाययग्रहणमित्युक्तं। द्वितीयेनरूपेणेति। द्वितीययागुरुकृतयाशब्द
कृत्येत्यर्थः। इतिलौकिकविवक्षार्थः। तेनग्रंथविषयेग्रहणेएवतेनद्वितीयंग्रहणंदेवदत्तेनदंडस्येत्यादौना। एवंचग्रंथरूपकर्मणःप्रत्ययेनोक्तत्वादुभयप्राप्ताविस्या।
आस्त्रेग्रहणपदघटितेउदाहरणेदेवदत्तस्येतिषष्ठीकर्तरिनिर्बाधा। नित्यंलुभिति। तावतिथेनगृण्हातीतिउपसंख्यानंकर्तव्यंलुक्चवक्तव्यइतिवार्तिकपाठइतिभा।
वः। षष्ठेनेति। पंचभीरूपेरसौनगृण्हातिकिंतुषष्ठेनेत्यर्थः। शृंखलमितिशृंगलमितिभाष्येक्वचित्पाठः। काष्ठमयंपाशकंयत्त्यादेव्यतिषज्यतेतत्शृंखलमितिकैयटः। का
लप्रयो। कालबोधकःपूरणप्रत्ययांतएवततःसप्तम्यंताज्ज्ञापकप्रत्ययः। करणवाचकात्तृतीयांताज्जनितइत्यर्थेफलबोधकात्प्रथमांतादस्यकार्यमित्यर्थेअभिधान।
स्वाभाव्यात्। तदस्मिन्नन्नं। अन्नमत्राभ्यवहार्यं। वटकेभ्यइति। संज्ञायामित्येवावेत्यनुवृत्तेरिति। तावतिथमितिसूत्रान्मंडूकप्लुत्येतिभावः। अन्यथाव्यवधानान्नस्या
त्। इदंवृत्त्यनुरोधेन। सूत्रेऽधीतइत्यस्याध्यायनपूर्वंतदनुष्ठानमर्थः। तेनाध्येतृमात्रेऽणूसिद्धइत्यन्येऽप्याहुरिति। श्राद्धशब्दात्तत्साधनद्रव्यवृत्तेःप्रत्ययःपूर्वादिनिः। अनेनं
तिकर्तृबोधकमनुवर्ततेतस्यक्रियाकांक्षायामंतरंगत्वात्करोतिक्रियाएवगृह्यते। सपूर्वादित्यसनियमानपूर्वात्पूर्वशब्दादित्यर्थः। कृतपूर्वयोःसुप्सुपेतिसमासः। का
दसमपीदमनुवृत्तिसौकर्यायेहव्याख्यातं। साक्षाद्द्रष्टरीति। साक्षाद्द्रष्टृत्यर्थेप्रथमोच्चारितादिनिरित्यर्थः। संज्ञाग्रहणाच्चनदातृप्रतीतेरयंप्रयोगः। किंतुपार्श्वस्थितःस
न्नुदासीनतयायःपश्यतितत्रैवइंद्रआत्मेति। सएतमेवपुरुषंब्रह्मततमपश्यदिदमदर्शमितितस्मादिदंद्रोनामतमिदंद्रंसंतमिंद्रइत्याचक्षतेइतिश्रुतेः। कर्तृधि
ष्ठातानामेवाकरणत्वात्तस्यलिंगमनुमापकंतदस्त्यास्य। गोमान्देवदत्तइत्यादावाधाराधेयभावात्षष्ठ्युपादानं। नचतत्राप्यधिग्रहवृत्तेपंचालाइतिवत्तत्त्वभ
वः। अधिश्रयणेगेतथाबुद्धिसत्वात्तत्रतादृशबोधाद्यधिकरणत्वमस्तत्वेऽप्यत्रतत्त्वमानाभावात्। गोमान्देशइत्यादावधिकरणत्वेपिसंबंधाभावेनषष्ठ्यप्राप्त्यास
प्रत्युपादानंसर्वत्रक्रियाकारकभावमूलकःसंबंधोद्रव्यान्वयेषष्ठीनियामकः। नचैवमप्यत्रसंयोगएवाधाराधेयत्वमूलं। ननुतन्मूलकःसः। किंचसंयोगोनष
ष्ठीनिमित्तं। कथंचित्संयुक्तयोर्घटपटयोरन्यतरबोधकात्षष्ठ्यापत्तेः। अतएवभूमादिषुसंसर्गपदेनसंयोगग्रहणं। तत्त्वात्संयोगस्यभूमादिवत्संबंधांतरेसत्येवप्र
तीतिर्नतुषष्ठ्यर्थतानापिमत्वर्थता। तदुक्तंभाष्येपर्वतेवृक्षाःसंतिनतुतेतस्यकिंचिदिति। लोहितोष्णीषाइत्यादौसप्तम्यर्थेएवबहुव्रीहिर्बोध्यः। अत्रषष्ठ्यर्थमत्व

बृ॰
ल॰ श॰
श॰ त॰
२६

र्थीयां तात्पर्यमत्वर्थीययोः सप्तम्यर्थस्तदर्थात् सप्तम्यर्थो न भिन्नस्तत्तावपि सरूपः सन।सप्तम्यर्थवचनेनेनिठनाविति भाष्ये स्पष्टं।अत्र शव्दशक्तिस्वभावादेव
वहुव्रीहाविवर्त्तमानकालास्त्यर्थो तं भो वो वोध्यः।गोमानासीदित्यादेस्तु तथाव्यवहारविषयआसीदित्यादिरर्थः।अस्तिग्रहणंत्वस्तिशव्दादस्तिसामानाधि
करण्याभावेनाप्राप्तमतुपो विधानार्थं।तेनास्तिमानितिसिद्धं।सत्ताकर्तृधनवानितितदर्थे इतिभाष्ये स्पष्टं। इतिशव्दलभ्यमर्थमाह भूमेत्यादि।अत्र संसर्गः
संयोगः।सचसंवंधांतरसत्त्येव तन्नियामको तएवदंडीत्यतः संयुक्तदंडस्यैव तत्स्वामिनः प्रतीतिः।येस्तिविवक्षायां मतुवादयो विधीयंते ते भूमादिषु विषयेषु भ
वंतीतिवाक्यार्थः।एवंवहुव्रीहिरपि यथायथं भूमादिषु वोध्यो मत्वर्थे वहुव्रीहिरिति वार्त्तिकात्।रसादीनां विशेषणमिति।तेन गुणवाचकानामेवैषां ग्रहणं
मिति जलादिवाचि रसादीनां द्रव्यवचनगंधादीनां चनेति भावः।एभ्य इति ठनावपीष्येते इतींदं व्यर्थमिति भाष्ये स्पष्टं।गुणवचनेभ्य इति।गुणगुणिवोधकेभ्यः
शुक्लादिभ्यः इत्यर्थः।पटः शुक्लः इति गुणगुणिनोरभेदव्यवहारेपि पटस्य शुक्ल इति भेदव्यवहारस्यापि सत्त्वेन प्राप्तमतुपोश्रवणार्थमिदं।अतएव।गुणि
निविशेष्यलिंगता सिद्धा।तत्रापि रूढं तु सर्वलिंगता नियतलिंगता वा प्रसज्येतेति भाष्यकैयटयोः स्पष्टं।अयं च लुक् द्रव्यवाचकसमभिव्याहार एव एत
देव ध्वनयता भाष्यानुक्तमपि इष्ट इति वदता तादृशस्थल एवेष्ट इति तदर्थः। ध्वनितं चेदं पूरणगुणेति सूत्रे भाष्ये गुणगुणिनोरभेदस्यापि सत्त्वादिदं
वचनं भाष्ये प्रत्याख्यातं।गुणिलिंगास्तु तद्वतीति कोशस्य मतुप्लुकाभेदेन वा तद्वतिवर्तमाना इत्यर्थः। भेदेपि मतुपोनभिधानं।गुणवाचिनामेषां पुं
स्त्वमेव गुणिनि विशेष्यलिंगतेति त्वभिधानस्वाभाव्यात्। मादुपधायाः।विधीयमानत्वेन सवर्णाग्राहकत्वान्मस्य नानुनासिकोवकारः।आसंदीवदष्ठीव।
अत्र सूत्रे कक्षीवच्छव्दपाठो नार्ष इति न संप्रसारण इति सूत्रस्य भाष्यस्वरसः। तत्र हि कक्ष्यायाः संज्ञायां मतौ संप्रसारणं वक्तव्यमिति वचनमारभ्य वत्वं तु
संज्ञायामिति सूत्रेण सिद्धमिति दिक्। राजन्वतीति।राजन्वान्देश इत्यपि वोध्यं।शिखावानिति।शिखाशव्दस्य व्रीह्यादित्वे तु चूडावती प्रतिमेति प्रत्युदाहार्यमे एम
धावानिति।नचात्रास्मायामेधेति विनिनावाधान्नलचः प्राप्तिः चिकीर्षावानित्यस्यानेनोपलक्षणात्।चूडावलोसीति।असीतितिङ् तिङ इति निहतं चूडा। २६
लान्तो मत्वेतस्य सुप्त्व नानुदात्ततया तस्यानिकस्याद्गुणस्यैकादेश उदात्तेनेत्युदात्तत्वे तस्य परेण पूर्वरूपेकादेशे तस्य पदाद्यनुदात्तेन सहैकादेशत्वात्स्व

रितो वेत्यस्य प्राप्तिरिति बोध्यं। एतच्च वृत्तौ स्पष्टं। समुच्चयार्थमिति। भाष्योक्तव्याख्यानादिति भावः। वत्सांसाभ्यां। लच्म्यादित्येव पाठः। मतुवंते नस्ते हवलयोरप्रतीते-
रित्यनुवृत्त्युक्तेः प्रज्ञाश्रद्धा। यद्यपि कर्तृव्युत्पन्नप्रज्ञशब्दात्प्रज्ञाद्यणि प्राज्ञः सिध्यति। तथापि स्त्रियां ङीब्भावार्थमिदं। तदाह। प्राज्ञेति। श्रद्धा साहचर्याज्ज्ञानार्थे काडं-
तस्यैवात्र ग्रहणं। तपःसह। अर्थाभ्यां यथासंख्यं न। अस्वरितत्वात्। उत्तरार्थ इति। तपःसहस्राभ्यामण्विनीनी इति न्यासे न भिन्नविभक्त्युच्चारणाद्गणउभयसंबंधो-
विनीनी यथासंख्यं च सिद्धमिति भावः। मतुश्चेति। समुच्चयार्थान्यतरस्यांग्रहणानुवृत्तेरिति भावः। सिकता इति। लुपि युक्तवद्भावः। हयवरट् सूत्रे एकाः सिकतेति भा-
ष्यादेकवचनांतोप्ययं। दंतुर इति। निम्नोन्नतेप्रयोगस्तु लक्षणया। उन्नते किं। दंतवान्। उषःक्षारमृत्। मधु माधुर्यमिति। रसवाचिन एवात्र ग्रहणादिति भावः।
स्पष्टं चेदं भाष्ये नगरमिति। चातुरर्थिकप्रत्ययांतनगरशब्दस्तु देशविशेषनाम अयं तु नातिवाची अत एव नगरीति जातिलक्षणो ङीष्। पुनर्ग्रहणमिति। पुन
र्ग्रहणस्य युद्रुभ्यां म इत्यस्यानित्यत्वार्थतायां भाष्ये उक्तत्वेन व्याख्यानादेवास्य सर्वविभाषार्थत्वमिति वक्तुमुचितं। मणिव इत्यादि विंबावंकुस्त्वमिरकावमित्यप्यसो
दाहरणं अन्येषामपीति दीर्घः। अर्णसो लोपश्चेति भाष्ये न दृश्यते। नेहेति भ्रात्र, वलः पुत्रवल इत्यादौ। भ्रातृवले ऽण इति अनुवृत्तेरपि तदभावः। अत इनिठनौ ए
काक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृताविति भाष्यं। यवब्रीहीति॥ व्रीह्यादिगणे पिपाठादिहार्थग्रहणं। तेन शालिलः शालिक इति सिद्धमिति वृत्तिः। एकगो
पू। सूत्रे बहुव्रीहिः। अधिकारप्राप्तमपि पदिकादित्यन्यपदार्थः। ऐकशतिक इति। पूर्वकाले केति समासः। तद्धितार्थोत्तरपदेति समासस्य मत्वर्थेनभिधा-
नेनाप्रवृत्तेः। संख्यायाः संवत्सरेत्युत्तरपदस्थद्विगुन। तत्र संख्यापदमुच्चार्य विहितस्य तद्धितार्थेति समासस्यैव प्रतिपदोक्ततया ग्रहणात्। अत्रात इति निवृत्तं
अत एव गोशकटिरस्यास्तीति विग्रहेपि गोशकटिक इत्येव। न तु गोशकद्रिमानिनिगुर्विंशतिरस्यास्तीत्यादौ त्वनभिधानान्नेति स्पष्टं भाष्ये॥ द्वंद्वोपतापे।
त्यादौ मंडूकघ्नुत्यात इत्यस्य संबंधः। समासांता इति सूत्रस्थभाष्यादित्यलं। निष्कात्पराविति। सूत्रे सामर्थ्येपि सोऽत्रत्वात्समासः। अंतग्रहणं शतादिपूर्वा-
न्निष्कादित्यर्थं निरासार्थं। मिनजिति पाठः। हृदयी हृदयिक इत्यादि। अनेनान्यतरस्यांग्रहणेनात इनीत्यस्य प्रवृत्तौ तत्र मतुप्समुच्चायकवोधकान्यतरस्यां-
ग्रहणानुवृत्तेः प्रत्ययत्रयं सिद्धं लभ्यमिति भावः। तप्पर्वपिदयमित्येकं। निदयं मरुद्भिर्दत्तो मरुत्त इत्येवं मरुत्तं साधयित्वास्य भाष्यप्रत्याख्यानात्॥ तत्रहि

सु:
ल.श. मरुतउपसर्गत्वेउपसंख्या॰नेष्यसर्गनेतिसामर्थ्याद्जंतत्वाभावेप्यत्वउपसर्गादिति तत्त्वंतत्रतत्त्वविधावुपसंख्यानेनसिद्धेप्रथमेउपसर्गसंज्ञायामुपसंख्या।
शे.त. नमनेकसंज्ञालाभार्थमितिनिपातत्वान्मरुतश्चाद्युदात्तत्वेनतृतीयाकर्मणीतिपूर्वपदप्रकृतिस्वरेणमरुत्तस्याद्युदात्तत्वं। एताश्चसंज्ञास्तत्वविषयाएवे।
२९ तिनरूढिर्दत्तइतिभाष्यप्रयोगोनानुपपन्नः एवंचफलाभेदायनित्त्वमेवोचितं। पित्वेतुतथ्योदात्तत्वंस्यादित्यपरे। एतद्विषयेमतुब्न। अस्यरूढिशब्दत्वाद।
वयवार्थाभावेनतदप्राप्तेरित्यन्यत्रविस्तरः। पदत्वमिति। तेनयस्येतिलोपोन। अनुवर्तयंतीति। बहुलंछंदसीत्यतः। वाचोग्मिनिः। गकारोच्चारणंप्र
त्ययेभाषायामित्यनुनासिकाभावाय। उत्तरसूत्रस्यबहुभाषिणीत्यस्यात्रापिसंबंधात्सम्यक्बहुभाषिणिवाग्मीतिबोध्यं। ऐश्वर्येति। तेनधनवा
नित्यर्थेस्वामीतिन। कटकवलयिनीति। कंटकवलययोःकश्चिद्भेदंपरिकल्प्यद्वंद्वउपपाद्यः। अतइन्त्येवेति। समासांताइतिसूत्रस्थभाष्यात्मंडूका
प्लुत्यातदनुवर्ततइतिभावः। ठनादीति। आदिनामतुपोग्रहणं। मतुप्समुच्चयार्थान्यतरस्यांग्रहणस्यैकगोइतिसूत्रेनित्यग्रहणात्बलादिभ्योमतुवि
तिसूत्रेन्यतरस्यांग्रहणाच्चासंबंधइतिभावः। अस्मायेत्यत्रतुसंबध्यतएवतसाविति सूत्रेयशस्वानितिभाष्येउदाहरणात्स्वकत्यैकाजितिसूत्रेस्त्रग्वत
इतिभाष्येउदाहरणाच्चेतिबोध्यं। वातातीति। कुगर्थमेवेदं। अदंतत्वादेवेनसिद्धत्वादितिवृत्तिः। ठन्बाधनार्थमिति। सामान्यसूत्रेणसिद्धेः। सूत्रस्यफलांत
राभावाच्च। वर्णाद्ब्र। वर्णोत्रवेदाध्ययनार्थंब्रह्मचर्यं। अर्थाच्चेति। अर्थशब्दोत्रधनवाचीकालतोत्रासंनिधिर्नदेशतः। तत्रविरोधादस्तीत्यस्यासंबंधइ
त्यप्राप्तएवेनिर्विधीयतेसत्तोपाधिकादिनिठनोरभावोनभिधानात् अतएवासंनिहितइतिकिमर्थमर्थवानितिभाष्येउक्तं। अर्थासमर्थाविद्यन्यः। शा
स्त्रानुपहतश्चयइतिस्वार्थं। अर्थेनसमर्थसमर्थइतिक्रियाशब्दात्सत्तोपाधिकादिनिठनौभवतएव। मतुप्तुनानभिधानात्। तेनार्थिकप्रत्यर्थिकौधान्यार्थीत्या
दिचसिद्धं। धान्यकरणकप्रार्थनावानित्यर्थः। बलादिभ्यो। अन्यतरस्यांग्रहणंद्वंद्वोपतापेतिप्रकृतस्येनः समुच्चयार्थं। तेनेतस्मात्प्रच्च। प्रथिमिनीति। इम एम
निजंताप्रकृतिः। अनिनस्मन्नित्यनर्थकेनापितदंतविधिः। मेतिमांतस्योदाहरणमित्यर्थः। चकारयकारपरस्येतिबहुश्रीहिरनुस्वारोन्यपदार्थः॥ ॥६ २९
॥इतिमत्वर्थीयाः॥ ॥प्राग्दिशोव्याख्यानादिदंसंज्ञासूत्रंतदाह। विभक्तिसंज्ञाइति। स्वार्थिकाइति। प्रायेणेतिशेषः। स्वीयप्रकृतेरर्थेभवाइत्यर्थः

तसिलादावर्थनिर्देशाभावादतिशायने इत्यादीनां प्रकृत्यर्थविशेषणत्वादिति भावः। जात्यंताच्छबंधुनि प्रकारवचने इत्यादिविहितस्य तु थाल्... त्वमेवा
त एव तदर्थस्य विशेष्यतया सा न मतः प्रायेणेति पूरितं। किं सर्वनाम। प्राग्दिश इत्येव द्व्यादिपर्युदासात्किमः पृथग्ग्रहणं। द्व्यादिभ्यः प्रागेव किम् शब्दस्तु
न पठितः। कस्त्वं भवांश्च कावित्यत्र भवतः शेषापत्तेः। त्यदादीनां यत्परं तच्छिष्यते इत्युक्तेः। विधेयानिर्देशादाह। अधिक्रियत इति। बहुशब्दस्यात्र संख्या
वाच्येव व्याख्यानात्प्रकरणलभ्यमाह। प्राग्दिशीये परे इति दिशः प्राक् प्राग्दिशं तत्र भवे इत्यर्थः। एतेतौ। द्वितीयो व्यंजनांतः। यथासंख्यं कार्यनिमित्त
योः। नलोप इति। सर्वादेशत्वं त्वानुपूर्व्यात्सिद्धं। इत्संज्ञा तु न फलाभावात्। परत्वादनः पूर्वमेव त्यदाद्यत्वे कृते लक्ष्ये लक्षणस्येति न्यायेन पुनरत्वाप्र
प्तिरिति भावः। कु तिहोः अष्टन आ इत्यतो विभक्ताविति अनुवर्तते॥ तीत्यत्रेकार उच्चारणार्थः। तिहोरित्यस्य फलमाह। कस्मादिति। यत इति। तसिलादीनां
विभक्तित्वात्त्यदाद्यत्वं। परस्य तसेरिति। प्रतियोगे पंचम्यास्तसिरपादाने चाहीयरुहोरिति वक्ष्यमाणस्येत्यर्थः। प्रत्ययग्रहणपरिभाषया तमू धातोर्न
ग्रहणं। व्याख्यानाच्च। स्वरार्थं। लित्स्वरार्थं। विभक्त्यर्थं विभक्तिनिमित्तत्वाद्यर्थं। स्वरार्थमिति भाष्यं तूपलक्षणं पूर्वोक्तविभक्तिकार्यस्यापीति बोध्यं। स
र्वोभये ति। अभिधानमूलमेतत्। भाष्ये तूक्तं ओदनं परिषिंच तीत्यादौ सर्वार्थेपि वाग्रहणानुवृत्तेर्न तसिल्। वाग्रहणमिति। साहचर्याच्च कुत्रचित्तान्य
त्र कुत्रापि च साभिलाषमिति बहुतरप्रयोगदर्शनादिदमुक्तं। भागवृत्तिकारादयस्तु किमो भाषायां त्रलं नेच्छंति। भाष्यस्वरसोप्येवमेव। एतदस्त्र। इद
मो नादेश इत्यतो श अनुवर्तते। एतदो नित्यमेव सिद्धे अनुदात्तार्थं वचनं। ननु लित्स्वरे शेषनिघातेनैवात्र तसोरनुदात्तत्वे सिद्धे तयोस्तद्विधानं व्यर्थमिति चेन्न॥
लित्स्वरापवादेशो अनुदात्तत्वकृते लित्स्वरप्राप्त्या प्रत्ययस्वरेणात्र तसो रुदात्तत्वप्राप्तेस्तत्सार्थक्यात्। अतो नेति। अत एतस्माद्धामादित्यर्थः। सप्तम्यंतेभ्य इति।
सप्तम्या इत्येवानुवर्ततेके न स्वरितत्वान्नेतराभ्य इतीति भावः। सर्वत्र देश इति। सर्वत्र काले इत्यपि बोध्यं। काले इत्युपादानेन सर्वशब्दस्य तत्र कालार्थ
कत्वात्। अत एव वर्तमाने लडिति सूत्रभाष्ये अनागतमतिक्रांतं वर्तमानमिति त्रयं। सर्वत्र च गतिर्नास्तीति प्रयोगे कालवृत्तित्वाविवक्षायां दानकृत इति कैयटः
॥ विहितत्वादिति। सर्वैकान्येत्यत्र नंनाप्युतज्ञाप्येस्य ष्टां तर्हीति। एतस्मिन्निति द्विभूते यदीत्येतदखंडमव्ययं। एतर्हीति। एतदइतियोगविभागेन एतादेशः। अस्मि

प. श. न्नहनीति। सुष्येण सुत्तः कालोयस्मिन्नर्थे के अद्य पुष्य इत्यादौ शक्तिमत्प्रधानता। इदमह इत्यर्थे प्यसि इत्यन्ये। व्यपदेशिवद्भावेन सप्रयोगइत्यपरे। एत्तु सि
शि. सु. ति निपातनादंतोदात्तोऽयं भाष्ये तु चिंत्यमते। प्रकारवचने। पंचम्यर्थे सप्तमीत्याह। प्रकारवृत्तिभ्य इति वचनेन ग्रहणात्प्रकारवद्वृत्तिभ्य इत्यर्थः। तेन प्रकारेणे
२८ त्यस्य विशिष्ट इति शेषः। सामान्यस्य भेदको विशेषोत्र प्रकारः बहुभिः प्रकारैर्भुक्ते इत्यत्रो बहुभिर्विशेषैरित्यवगमात्। तादृश्यं तु न गृह्यते। अन्यथा सर्वथे
त्यादौ तन्दप्रतीत्यानभिधानात्। यथा हरिस्तथा हर इत्यादौ यत्प्रकारवान् हरिस्तत्प्रकारवान् हर इति बोधे हरिसदृशो हर इति फलतीति बोध्यं। अत्यंतस्वार्थि
कोयं प्रत्ययं विनापि यश्चैत्रः स मैत्र इत्यादौ प्रकारवचनत्वदर्शनात् द्योतकत्वे तदर्थस्य विशेषणतापत्तिश्च। एवं जातीयर्विधावपि बोध्यं। स्थूलादिभ्यः
कन्विधौ चैवमेव स्थूलादीनामपि गौर्वाहीक इत्यादौ गवादिपदानामिवास्यैव प्रत्ययं विनापि प्रकारवाचित्वमत एवैषां नित्यत्वं नोक्तं। दिक्शब्देभ्यः नेह।
यथासंख्यं अस्वरितत्वात्। शब्दग्रहणलभ्यमर्थमाह दिशि रूढेभ्य इति। संख्याया इत्येतत्पर्यंतमस्तातिपदरहितमिदं सूत्रमनुवर्तते। अस्तातौ पुराद्यादे
शविधानार्थमस्ताति चेति हलेस्य तत्रानुवृत्तिप्रदर्शनाय पूर्वेत्यादिसूत्रमपीहव्याचष्टे· पूर्वाध· असीत्यविभक्तिकं संनियोगशिष्टत्वाय चकारः। अवराणा
मित्यनंतरयोगे षष्ठी। अस्ताति च। लुप्तसप्तम्यंतमिदं। तदाह। स्तातावित। शब्दभेदादर्थभेदेपि समानुपूर्वीकत्वाद्दिक्शब्दो देशादिवृत्तिरिति व्यवहारो बो
ध्यः। पूर्वादयस्तत्तद्दिक्स्यत्वं प्रवृत्तिनिमित्तीकृत्य क्वचित् वक्तृसंमुखदेशत्वं तथाकृत्वा क्वचिद्देशे प्रवर्तंते। अत एव पुर इत्यस्याग्रिम इत्यर्थकत्वं विश्वकोशा
दावुक्तं। क्वचित्स्वसंयुक्तसंयोगित्वं यथापरादिशब्दे प्रकृतसूत्रे च सर्वेषां ग्रहणं विनिगमनाविरहात् पूर्वस्मिन् गुराविति। पूर्वकालाध्ययनकर्तरीत्यर्थः। द
क्षिणोत्त· ननु तसुरेव प्रत्ययोस्तु दक्षिणस्यां दिशि दक्षिणत इति तु सर्वनाम्नो वृत्तिमात्र इति पुंवत्त्वेन सिद्धं। षष्ठ्यतसर्थेति सूत्रे षष्ठ्यातस्वर्थेति पाठं तेन ततो
ग्रामादन्य इत्यादौ पंचमीं बाधित्वा परत्वात् षष्ठी नेति चेन्न स्वषष्ठ्यार्थत्वात्। प्राच्यामिति लिंगविशिष्टपरिभाषया स्तातेर्लुक्। विभक्तित्रयार्थं प्रकटयितुमाह व एम
सत्यागत इत्यादि। एनबन्यतः। अपंचम्या इति। प्रागसेरनुवर्तते। अदूरे इति॥ अवधिमानवधेश्चेददूर इत्यर्थः। केचिदिति। [illegible] विभाषा २८
विज्ञानादिति तदाशयः इयमेवात्रारुचिः। दक्षिणादाच्। चकार आजाहीत्यत्र विशेषणार्थः। तेन वाकारस्मरणयोरङिदाकारस्य व्याप्तिरिति [illegible]। उत्तरा

च्चेन व्यवहित आञ्जपि समुच्चीयते व्याख्यानात्। तदाहोत्तरेति। संख्याया वि· विधस्यार्थ इत्यर्थः विधानं विध इति घञर्थे कः विधशब्दस्या[illegible] सामा-
न्यस्य भेदकविशेषरूपः प्रकारः स चाभिधानस्वाभाव्यात् क्रियाविषयक एव गृह्यते तदाह क्रियाप्रकारे इति तदुक्तं भाष्ये विधायुक्तगताश्च प्रकारे भवंती
ति त्रेधा गुणो नवधा द्रव्यमित्यादावप्युपदिश्यते भवतीति वा क्रियाबोध्या। चतुर्द्धेति। चतुर्भिः प्रकारैरित्यर्थः। अधिकरणस्य द्रव्यस्य विचलनमन्यथाक
रणं तच्चेह संख्यासंनिधानात्तद्विषयमेवेत्याह। द्रव्यस्य संख्यांतरेति। तदवगमश्च पदांतरसमभिव्याहारादिति बोध्यं। एकं राशिं पंचधेति पंचत्वसंख्यावि
शिष्टमित्यर्थः। एकाद्धो। धाग्रहणं धामात्रस्य यथा स्यात्। अन्यथानंतरत्वादधिकरणविचाले विहितस्यैव स्यात्। अतएव प्रत्ययो नाका[illegible]धिकरणवि
चाले एव संनिहितत्वादापत्तेः। यदप्यनेकमेकं क्रियते सोऽप्यधिकरणविचाल इति बोध्यं। ऐकध्यमिति। भुंक्त इति। राशिं कुर्विति। अशि[illegible]धानीति। स्व
भावात्स्वत्ववाचितं। एधाच्च। द्वित्र्योर्धा इत्यस्य एधाजित्यर्थः। याप्ये पा·। याप्यमत्र कुत्सितं। कुत्साविशिष्टेऽर्थे वर्तमानात्पाशवित्यर्थः। अयं प्रवृत्तिनिमित्त
कुत्सायामेव कुत्सित इत्यस्य त्वप्रवृत्तिनिमित्तकुत्सायामपि प्रवृत्तिरिति बोध्यं। पूरणाद्भागे पूरणार्थे कतीयप्रत्ययांताद्भागे वर्तमानादित्यर्थः। तीयादी
कक् इति वचनद्वयं दृष्टं सामेत्यत्र भाष्ये स्पष्टं। पूर्वत्राञानौ नित्याविति। न च षष्ठाष्टमाभ्यां भागार्थप्रतिपादनार्थं लुम्विधानं प्रत्ययानां स्वार्थिकत्वेन
प्रकृते तदर्थत्वलाभात्। प्रकरणादिकं तु न वाव्यावश्यकं। स्वरस्तु लुकि नास्त्येवेति न लुमतेत्यत्र भाष्ये स्पष्टं। एकादा। असहायवाचकादेकशब्दा
दित्यर्थः। असहाये किं। प्रसिद्धतरत्वात्संख्यावाचकस्यैवान्यत्रेवात्रापि ग्रहणाप्तौ द्विवचनाद्यसिद्धिः स्यात्। वाक्यभेदेन कनाकिनिचोरेव लुक्विधा
नसामर्थ्यात्पक्षे श्रवणमपि। भूतपू। तत्रार्थे वर्तमानात्प्रातिपदिकादित्यर्थः। षष्ठ्याः। अत्र भूतपूर्व इत्यनुवृत्तेः श्रुतत्वात्षष्ठ्या विशेषणभूतपूर्वसंबंधे
या षष्ठी तदंतात्स्वार्थे प्रत्ययोऽत एव स्वार्थिकप्रकरणविरोधो न। अतिशायने। अतिशेतेः प्रकर्षापरपर्याय इतरस्मान्न्यूनीकरणरूपोऽभिभवोऽर्थः एवं च स
कर्मकादस्मादाह लक्षा कर्तरि ल्युट् इत एव निपातनाद्दीर्घः। तत्र वर्तमानात्प्रातिपदिकात्स्वार्थे प्रत्यय इत्यर्थः। यावद्रूपात्प्रकर्षेऽतिशये इति तावदति।
शायने इत्युक्तमुपक्रमे भाष्ये। तत्र भावार्थकस्य कर्तृ पचाद्यजंतस्य च तंत्रेणोच्चारणं बोध्यं। अग्रे गुणीभिधीयते इत्युक्तं कालातिशेते इति विग्रहप्रदर्शने

नबाहुलकाल्ल्युडित्युक्त्या तु तथा भाष्यार्थलाभः तदाहातिशायविशिष्टेर्थे इति अतिशयकर्तृरूपेर्थे इत्यर्थः। भावे ल्युडिति तु न युक्तं तत्रार्थे प्रत्यय इत्यर्थे त
स्वप्राधान्यापत्तेः। अतएव भावे ल्युट्पक्षे लिंगवचनासिद्धिर्भाष्ये शंकिता। अतिशये वर्तमानात्प्रातिपदिकाद्धि दित्यर्थे तिशयप्रकर्षादिष्वेव प्रत्ययः स्यात् न पट्वा
दिभ्यः। न हि विशेषणीभूतमर्थमादाय तत्रायं शब्दो वर्तत इति व्यवहारः स चेत्तस्थानं चातिशयशब्दस्य तद्विशिष्टलक्षणा। अभिभूयमानादेव प्रत्ययापत्तेः। तत्क
र्तरिलक्षणायां तु भाष्योक्तमेव साधुः। अतएवैतेषां समानाधिकरणवृत्तितद्धितत्वेन न व्यवहारो युष्मद्युपपदे लटः शतृस्थाने चावि त्यादौ भाष्ये प्रातिपदिका
र्थतद्धितयोस्त्वार्थस्य सामानाधिकरण्यमिति तदर्थः। तत्र प्रकृत्यर्थद्रव्यस्य स्वरूपतद्धितराभिभवकर्तृत्वाभावेपि तत्प्रवृत्तिनिमित्तगुणादिनिष्ठेन ते
न तस्यापि तत्त्वं बोध्यं। गोतर इत्यादौ प्रवृत्तिनिमित्तभूतजातेः स्वतस्तदभावेपि तत्सहचरितस्य वाहदोहनादिगतेन तु तस्य तत्त्वात्। एवं च तरबादिसमभिव्याहारे मा
न्यादिपदानामितराभिभवकर्तृत्वविशिष्ट आद्योऽर्थः। प्रत्ययस्तु द्योतकः कुमारितरेत्यादौ ङीप् तु न। तरप्प्रकृतिभूतेन तदंतघटकेन कुमारीशब्दादिना वयो
विशिष्टार्थगतस्त्रीत्वस्योक्तत्वात् तरबंतस्य तु प्रकर्षः प्रवृत्तिनिमित्तमतस्तद्विशिष्टार्थगते स्त्रीत्वे नवैवानवयसीति ङीष्। वयोमात्रविशिष्टार्थगते स्त्री
त्वे हि तत्प्रवृत्तिः। अतएव गोतरेत्यादौ न ङीष्। जातिप्रवृत्तिनिमित्तकत्वाभावात्। तदुक्तं भाष्ये यदि प्रथमातात्स्वार्थिकः कुमारितरेत्यादौ केवलवयसः प्र
कर्षवयोऽनतिरिक्तमिति ङीप् प्राप्नोति तरपोक्तत्वात्स्त्रीत्वस्य प्रत्ययो न भविष्यतीति तरपा तत्प्रकृतिभूतेन वयोविशिष्टार्थगतस्त्रीत्वस्योक्तत्वादित्यर्थः।
एतदुक्तं टाबपि न प्राप्नोतीत्यादि भाष्यमेकदेशिनो युक्तिरिति बोध्यं। आतिशायनिकप्रत्ययांतादातिशायनिको नानभिधानात्। श्रेष्ठतमाय कर्मण इत्या
दिकं तु छांदसत्वात्स्वार्थे साध्विति सर्वभाष्ये स्पष्टं। अतिशयेनेति। प्रकृत्यादित्वात्तृतीया। तिङश्च। अप्रातिपदिकत्वादप्राप्तेव वचनं। किमेत्तिङः प्र किमादिप्रकृति राम २९
कघादित्यर्थे स्खलितमाहाव्ययाच्च यो घ इति। किंतमामिति। आमंतस्याव्ययत्वात्ततः परस्य सो लुक्। पूर्वाह्णेतरामित्यादौ तत्तत्क्रियाविशिष्टस्यैव त
त्कालव्यवहारनियामकत्वान्न शुद्धद्रव्यप्रकर्षः। उच्चैस्तम इति। उच्चैःशब्दोत्रोच्चत्वगुणवत्परः। द्रव्यस्य स्वतः प्रकर्षाभावेपि द्रव्यनिष्ठगुणादिप्रकर्ष ए
वद्रव्यप्रकर्ष इति बोध्यं। तदुक्तं तमप्सूत्रे कैयटेन अद्रव्यप्रकर्ष — निषेध उपचरितगुणक्रियागतप्रकर्षद्रव्यविषयोऽद्रव्य इति उच्चैस्तमो [illegible]

धिकरणशक्तिप्रधानइतिउच्चैःशब्दस्तत्रोच्चत्वप्रकर्षेणतदाश्रयस्यप्रकर्षेपितस्यनद्रव्यत्वंक्रियाकारकभावरूपसंबंधविशेषणत्वेनैवत[illegible]ानेना
प्रधानतयासर्वनामपरामर्शीयोग्यत्वात्‌शक्त्याविशिष्टस्यसर्वनाम्नापरामर्शाभावाच्चातएवतदादिशब्देभ्यस्ततद्धिभक्तयः[illegible]विदितदितिसर्वनामपरा
मर्शीयोग्यंवस्तुतस्तुद्रव्यत्वेनविवक्षितमितिनमसूत्रेकैयटोक्तः।इदंपूर्वाह्णेतमामित्यत्रापिबोध्यं।द्विवचनविभज्यो।द्व्यर्थप्रतिपादकेविभजनीयेचोपपदे
द्वयोर्मध्येऽन्यतरापेक्षातिशयविशिष्टस्वार्थवृत्तेर्विभागप्रयोजकीभूतधर्मवाचकाच्चस्वार्थेप्रत्ययः।विभज्यांशेउपपदशब्दबोधितसुबंततत्वंप्रतिपदोक्तत्वा
त्पंचमीविभक्तेइतिविहितपंचम्यैवेतिबोध्यं।तेनसांकाश्यकानांपाटलिपुत्रकाणांचपाटलिपुत्रकाआढ्यतमाइत्यत्रनतरप्।पंचमीत्वत्रनविभाग[illegible]भावात्।वे
नसमूहरूपतयाविभागस्यापिसत्वात्।एतेखल्वपिनैर्देशिकानांवार्त्ततरकाइतितस्मिन्नितिसूत्रेभाष्यप्रयोगाद्बहुषुपुत्रेष्वेतेऽप[illegible]अयंमेज्येष्ठो
यमध्यमोयंकनीयानित्याद्यंतत्वत्सूत्रस्थभाष्यप्रयोगाच्चाद्व्यर्थोपपदेपीमौसाधूकृत्रेद्विवचनेतितूदाहरणमात्रमितिकेचित्।परेतुनैर्देशिकानांमध्येत्ये
भ्यःशब्देभ्यःइत्यध्याहृत्यविभज्योपपदेतरबिष्ठाभ्यामित्यध्याहृत्यासेइयसुनतएवनखल्वपिबहूनांप्रकर्षेतरपाभवितव्यंकेनतर्हिनमपेतितम[illegible]
भाष्येउक्तमित्याहुः।नतरामित्यादौप्रतियोग्यसमानाधिकरणत्वरूपात्यंतिकत्वेऽभावगतेप्रकर्षेतरप्।प्रवृत्तिनिमित्तगतेप्रकर्षेतरबादिरितितुप्रक
तर्थप्रकर्षासंभवविषये।एवंद्योत्यार्थेप्रकर्षेपिद्योतकात्तरप्प्रयानितरांगच्छतीत्यादौ।तुश्छंदसिपूर्वविप्रतिषेधमस्मावर्तिन प्रतिप्रसवत्वंस्फुटंबो
धयितुंछांदसमप्यत्रोपन्यस्तं।तुरिष्ठे।इमनिचग्रहणमुत्तरार्थंनचैतएवज्ञापकादिष्ठनीयसुनोःसिद्धौतुश्छंदसीतिव्यर्थमितिवाच्यं।इमनिचोपिकल्पना
पत्तेः।लोकेपीष्ठनादेरापत्तेश्च।यद्यपिनिमित्तस्यछंदस्त्वादिदंछांदसं।तथापितस्यैवेष्ठोपन्यासादिदमप्यत्रोक्तं[illegible]इति।सचवचनसामर्थ्यात्सर्वादेशः
अंत्यस्यटेरित्यनेनसिद्धेः।प्रशस्य।अजादीइत्यनुवृत्तंसप्तम्याविपरिणम्यतइत्याह।अजाद्योरिति।प्रशस्यत्वंगुणइत्य[illegible]नस्यक्रियात्वेपिअतएवज्ञापकात्तो
।प्रकृत्यैकाच्।इष्ठादिष्विति।तेनज्ञोदेवतास्यज्ञः स्थालीपाकइत्यत्रनेदं।अयंचप्रकृतिभावाज्ज्योपोनस्खलितेयस्येतिचेटेरित्यादेरेतत्प्रकरणस्थलोपमात्र
स्येतिभाष्येस्पष्टं[illegible]कर्वा।अत्रनेदंस्याचौहलतावेवा।अन्यथाप्रकृत्यैकाजितिसूत्रस्थभाष्योक्तरीत्याश्रेष्ठइत्यादेरुच्चारणासामर्थ्यादकारस्यलोपाभा

मु. ल. शा. शे. त. ३०

ववदत्रापितद्भावापत्तौ भेदिष्ठ इत्याद्यसिद्धेः उत्तरसूत्रस्थकस्साहचर्याच्च। कनिष्ठ इत्यादौ टेरिति लोपस्तु न प्रकृतिभावात्। कन स्तदपवादत्वाच्च। नस्त
द्धित इत्यपि न। अनउच्चारणसामर्थ्यात् सर्वादेशस्तु केत्यादेशेनापि सिद्ध इति बोध्यं। स्थूलदूर। यणादिपरमिति लुप्तषष्ठीकं। परमिति षष्ठ्यर्थे प्रथमा। पूर्वत्वेव पि स्तु
यणादिरेव। यणादीति बहुव्रीहिः। इक्परिभाषया क्षिप्रक्षुद्रयोः पकारदकारयोर्न गुणः। युवशब्दस्यागुणवचनत्वात् सूत्र एव ज्ञापकादजादौ। अन्ये तु गुणव
चना एव। न च क्षिप्रक्षुद्राव् गुणवचनौ इमनिचि तद्ग्रहणस्य चारितार्थ्यात् तयोरिष्ठनाद्यनापत्तौ क्षेपिष्ठ इत्याद्यसिद्धेः वसुशब्दो ऽणुवशब्दो गुणवचनोऽपीत्याकडारसूत्र
जातेरस्त्रीति सूत्रभाष्याभ्यां लभ्यते। प्रियस्थिर। वंहीत्यादावकार उच्चारणार्थः। अन्यथा भूयासिद्धत्वादिकारोच्चारणसामर्थ्याद्यप्रादविवटिलोपानापत्त्यावं
हिष्ठ इत्याद्यसिद्धेः। वरादिसाहचर्याद् वृंदो हलंतः। तेन वृंदिष्ठ इति प्रस्थस्फास्तु प्रेष्ठ इत्यादेर्भाष्ये उदाहृतत्वेनादंता एव। प्रेष्ठ इत्यादावादेशस्यासिद्धत्वात् प्रकृति
भावाच्च तन्निमित्तकटिलोपो न॥ स्थानिनिमित्तकोऽपि न। प्राद्यादेशानां टिलोपापवादत्वात्। बहोर्लो। इष्ठन उत्तरसूत्रेण कार्यं। तरस्य विधानात्तस्य हनग्र
हणमित्याशयेनाहेमेयसोरिति। लोपश्चादेः परस्येत्यादेः भूभावस्यासिद्धत्वाद्भूयानित्यत्रोऽगुणो न दीर्घोच्चारणं तु भूमेत्यादौ सावकाशं। विन्मतोर्लुक्। अग्रा
दीदृत्यनुवृत्ते राहेष्ठेमेयसोरिति। अत एव ज्ञापकादाभ्यामजादौ। न च विन्विषये मतुप्सत्त्वेन तल्लुकैव सिद्धौ विन्ग्रहणं व्यर्थमिति वाच्यं न कुर्वितीत्यादि
नाणिचीष्ठवद्भावेन विनो लुगर्थं तत्सत्त्वात्। विल्वकादिभ्यश्छस्येत्युत्तरमेव विन्मतोरिष्ठेमेयःसु रिति नोक्तं। तत्र त्वलुकाद्दस्यासिद्धत्वाद्दृश्यवतुरित्यत्र।
लोप इत्येव व्याख्यातं। प्रशस्यायां रूप। प्रशंसाविशिष्टेऽर्थे वर्तमानात् स्वार्थे रूपवित्यर्थः। प्रशंसा चात्र परिपूर्णत्वरूपैव स्वरूपप्रकृत्यर्थतावच्छेदकधर्मनि
ष्ठा। तत्समानाधिकरणधर्मनिष्ठा वा प्रकृत्यर्थे आरोप्यते तेन चौररूपोऽयं यद्दक्ष्णो रंजनं हरेदिति सिद्धं। प्राशस्त्यं प्रतियोगिनिरपेक्षमतिशायनं तु तत्सा
पेक्षमिति न तदनुवृत्त्या निर्वाहः। ईषदसमा। ईषदसमाप्तिविशिष्टेऽर्थे वर्तमानात्प्रातिपदिकादित्यर्थः। स्वार्थिकानां प्रकृतितो लिंगवचनानीकारात्। बहु राम ३०
गुडो द्राक्षा। तृणभकल्प इयं गौरित्यादि सिद्धं। गुडकल्पा द्राक्षेति तु क्वचित्प्रकृतितो लिंगवचनातिक्रमात्सिद्धं। णचः स्त्रियामिति सूत्रे स्त्रीयग्रहणात्तद्धितिक्र
मः। अन्यथा णचः स्त्रियां विधानात् अञश्च स्वार्थिकत्वात्सिद्धौ किं तेन। गुडशब्दस्य सादृश्याद् द्राक्षायां वृत्तिस्तत्र सादृश्यप्रयोजकधर्मस्य मा[illegible]

समाप्तिः। यन्निरूपितसादृश्य प्रयोजकधर्मस्तेषदसमाप्तिस्तद्वाचकाच्च कल्पादयः स्वभावात्। एवं च पूर्णपटुः कश्चित्तत्सादृश्यादन्यः पटुः प[illegible]ः प्रकृ
रसादृश्यं च पटुकल्पशब्दगम्यमिति सर्वत्रोपमागम्यादृष्टव्या विभाषा सुविभाषाग्रहणं कल्पवादिसमावेशार्थं कल्पाद[illegible]तिङन्तेषु सावकाशाः [illegible]र्थं
तुन ततः। तल्लोपदृष्टत्वे महाविभाषयैव सिद्धेः। अनिष्टत्वे तु न तदर्थतातस्येति बोध्यं। सुप्ग्रहणं तिङश्चेत्यस्यात्रासंबंधाय। उत्तरत्र त्वनुवर्तत एव। पुरस्तादि
ति प्रत्ययेपरत्वनिवृत्तये तु ग्रहणं पुरस्तादित्यस्यावृत्त्या पुरस्ताद्यादृशो लिंगवचने तादृश एवेत्यर्थबोधनद्वारा स्वार्थिकानां प्रकृतितो लिंगाद्यतिक्रमे प्रा
पकं। हस्ती प्रागेवेत्येवकारस्तु सर्वं वाक्यं सावधारणमिति न्यायसिद्ध इति सर्वभाष्ये स्पष्टं। प्रकारव। अत्र प्रकारो भेद एवेति। जयादित्यः [illegible]सादृश्यं भेदश्चेत्यु
भयमपीति। प्रकारे गुणवचनस्येत्यत्र वामनः। थाल्तु प्रकारमात्र इति। तत्रापि प्रकारवचने इत्येवोक्तः। सोपि प्रकारवतिन्याय्य इति [illegible]। किंच तथा स
तितथेत्यादेः सप्रकारइत्यादिरर्थः स्यात्। न च यथाला जातीयरीवाधापत्तौ तज्जातीय इत्याद्यसिद्धिरिति वाच्यं जात्यंताच्छ बंधुनीत्यनेन [illegible]षिद्धापत्तेः [illegible]
नोक्तरीत्या द्वित्वेनेव थालापि बाधानेष्यत इति वक्तुं शक्यत्वाच्च। अतएव यथाजातीयक इत्यादिभाष्यप्रयोगाः संगच्छंते। अव्ययस। अयमप्य[illegible]विकारः। अ
ज्ञातेइत्यादौ तु वाक्यभेदेनाकचोपि विधानं बोध्यं। कस्यायमिति। अज्ञातत्वाभिनयोयं अज्ञातोश्व इत्यपि विग्रहो बोध्यः। अव्ययेति सूत्रे प्रातिपदिकादिति सु
प इति च संबध्यते तेन क्वचित्सुवंतावयवे प्रातिपदिके ग्रहणं क्वचित्सुवंतटे ग्रहणं तत्र व्यवस्थामाह। ओंकार इति। इदं चाक्युष्मदस्मदोर्मात्रविषयं
।भाष्ये तथैवोदाहरणात्। अन्येषां तु सर्वनाम्नां प्रातिपदिकटेरेव प्रागकच्। अतएव क्वादेशः साकाकार्थं क्वः कौ के इत्येवमर्थमिति भाष्यं संगच्छते। त्व
यकेति। यत्नादिसुकृते त्वकच्। पचतकीति। अकचो द्वितीयोकार उच्चारणार्थ इति भावः। कुत्सिते येन धर्मेण [illegible]तेव स्तु तद्धर्मयुक्तार्थाभिधायिनः प्र
त्ययः। अश्वक इत्यादौ धावनादेः सम्यगननुष्ठानात्कुत्सेति बोध्या। कुत्सितगतकुत्सायां कुत्सितक इत्याद्यपि प्र[illegible]मेर इतिवत्। संज्ञायां कन्। कुत्सादि
हेतुकसंज्ञाविषये कन्नित्यर्थः। तद्युक्तादित्यस्य विवरणमनुकंपायुक्तादिति। धानका इति। धानाशब्दात्केकेण इति ह्रस्वे कांताद्यापि अभाषितपुंस्काच्चे
ति विकल्पात्त्वपक्षे इत्वाभावः। पूर्वेणेति। अनुकंपायास्तद्विषयत्वादिति भावः। परंपरासंबंधेपीति। आरंभसामर्थ्यादिति भावः। अनुकंप्यमानोदानेनाप्य

यतीतिधानादेरनुकं यमानसंबंधादनुकंपायुक्तत्वमितिबोध्यं।ठञ्चेति।पक्षेकः।पूर्वसूत्रद्वयेति।अनुकंपापांनीतोचेत्येतत्।व्यास्व्यानादितिभावः।घ
निलः।पूर्वसूत्रेणेवठचूकयोः सिद्धौयोगविभागादुक्तविषयातिरिक्तोर्थैतौतत्रकठच सिध्यर्थचचकारइत्येके।ठाजादौ।अस्मिन्वितिकृद्विसंनिधानादिति
भावः।ननुठग्रहणंव्यर्थंइकादेशेअजादित्वात्सिद्धेरतआह।ठग्रहणमिनि।तस्मिन्निवायुक्तशब्दात्ठेनित्यत्वात्प्राक्प्राप्तायांलोपेकादेशेवषायुकसिद्धिः।
अन्यथामातिथिकवत्तेनिपातपरिभाषयाकादेशाभावेनसिद्ध्येदितिभावः नचघचःश्वित्वेनज्ञापकेनेकादेशःस्वर्वतःपूर्वप्रवृत्तिरितिवाच्यं।ज्ञापकसिद्ध
स्यासार्वत्रिकत्वात्।ठग्रहणसामर्थ्याच्चतस्याअप्रवृत्तेः।अत्राजिनांतस्येत्यत्रत्योत्तरपदेतिपृथक्कदंलुप्तविभक्तिकंतेनलोपपदमेवानुवर्तते तत एव
षषष्ठाजादिवचनात्सिद्धमितिसंगच्छते।अतिप्रसंगस्त्वनभिधानाद्वारणीयः तेनसवित्रियइत्यत्रमज्जावाविति लोपोन।उपेन्द्रदत्तेचतुर्थादचइतिलो
पोन।विनापिप्रत्ययमिति।समुदायशक्तिग्रहकालेवयवानामपिशक्तिग्रहादवयवतोपितद्बोधः।एवमेवप्रविशपिंडीमित्यादौवाक्यैकदेशात्कार्थ
बोधः।अस्यैवानुवादकमिदं।वर्णमात्रप्रयोगस्तुननतोऽवबोधात्।उवर्णात्त्र।लइतिलोपस्यपूर्वाचार्यसंज्ञा।उवर्णात्परस्यलप्रत्ययस्यलोपः स्यादेः
परस्य।वेनद्वितीयादचऊर्ध्वेलोपः सूत्रसिद्धएवानूद्यते।ऋवर्णादपीतिभाष्येनदृष्टं।पूजार्थमिति।ठञ्चेत्यतोवेत्यनुवृत्त्यैवसिद्धेरितिभावः।उपडइति
नेंद्रस्येतिज्ञापकेनपूर्वोत्तरपदनिमित्तकार्यापेक्षयांतरंगस्याप्येकादेशस्यपूर्वमप्रवृत्तेरितिभावः।द्वितीयंसंध्यक्षरंचेदिति।एकाक्षरपूर्वपदानामुत्तरपदलोपो
व्यचः।एकाक्षरेति।अच्सहितंव्यंजनमक्षरंएकात्पूर्वपदानामित्यर्थः।द्वितीयादचऊर्ध्वमित्यनेनद्वितीयाज्विशिष्टस्यलोपाप्रासेरिदंवाग्रशीदत
इति।वाच्याशीर्येस्यतेनदत्तोवाकूकरणकशुभाशंसनेनदत्तइतिवार्थः।अत्रेकादेशपर्यंतनत्तत्पादसप्ताध्यायीस्थकार्यप्रवृत्तिर्बोध्यतयानपूर्वेकृ
त्वादिप्रवृत्तिःशेवपिद्वितीयादचऊर्ध्वभागस्याशीर्दत्तशब्दस्यलोपेयस्येतिलोपेचांतेइक्निमित्तभसंज्ञासत्वात्कुत्वाद्यप्रवृत्ताविदंसिध्यतितथापिभत्वेयलोप
स्यस्थानिवत्वात्दाकारांतनिष्ठभत्वेनचांतनिष्ठपदत्वाव्याघातात्कुत्वजश्त्वयोर्योगिकइतिस्यादितिभावः।नचसाक्षात्पूर्वपरयोरपदत्वेविधेर्यलोपादिभा
पकस्यप्रतिबंधकस्यचास्थानिवत्वस्यनिषेधइतिसिद्धांतात्कृत्वेपिस्थानिवत्त्वनिषेधइतिवाच्यं।षडिकेपिदोषापत्तेः।यदितत्रद्वितीयादचऊर्ध्वेस्यलो

पविधायककवनप्रामाण्यात्सत्वेऽस्यानिषत्वं तर्हि प्रकृतेऽपि तुल्यं। एतेन पूर्वत्रासिद्धे इति निषेधो जसि चेति निषेधश्चस्यादित्यपास्तं। नपदांतसूत्रोक्तरीत्या तस्यैव प्रवृत्तत्वा-
त्वेः प्राप्तेश्च। उत्तरपदलोपे तु अकच्स्थानादेशत्वेन स्थानिवत्वाभावात्तुल्यावधिकया भसंज्ञया पदसंज्ञा बाध्यते तत्र तद्धिता। अयथाया विभक्तावाश्रयमाणायां वा भसमासेऽपि वि-
तयापवादत्वाद्विरोधः। षष्ठेति। स्पष्टं चेदं खादिष्विति सूत्रे भाष्ये शेवलसु। एषामिति। शेवलादय आदिभूता येषां तेषामित्यर्थः। एषामकृतसंधीनां तृतीयादच इ-
ति वक्तव्यं तेन सुपर्याशीर्दत्तशब्दाट्ठचि सुपरिक इति सिध्यति। अजिनांत। उत्तरपदग्रहणात्सर्वलोपोऽत्र। अल्पत्वं महत्वं प्रति द्वंद्वे। ह्रस्वत्वं दीर्घत्वं प्रति द्वंद्वे इति भे-
दः क्वचित्प्रकृतिलिंगातिक्रमस्यापि सत्वेनाह। कुटीर इति। कासूः शक्तिः शस्त्रविकलवाक् च। किंयत्तदो। द्वयोरेकस्य निर्धारणे गम्ये निष्पन्नेन वा बिभ्यः।
किमादिभ्यो डतरजित्यर्थः। द्वयोस्तूपलक्षणं। अतएव बहुष्वासीनेषु कश्चित्कंचित्पृच्छति। कतरो देवदत्त इति प्रत्ययरितिसूत्रस्थभाष्यप्रयोगः संगच्छते। एत-
द्बलेनापि तुमेव सूत्रे एकग्रहणं। द्वयोरिति निर्धारणषष्ठी व्याख्यानादेव भविष्यतीत्यलं। अत्र निर्धारणं न प्रत्ययार्थः तं विनापि प्रतीयमानत्वात् यान्यलभ्यत्वाच्च-
तु विप्रत्ययनिर्देश इति वृत्तौ। वा बहूनां। प्रत्यास्यातमिति। द्वैपार्थस्य त्वनभिधानमत्र। अतएव ततोऽन्यतरच् नाकरे इति। पूर्वसूत्रस्य द्वयोरित्यस्य प्रत्याख्यानभाष्य-
व्याख्यावसरे कैयटग्रंथे इत्यर्थः। अतएव कतमाकतमे षामाक्षतेति पदद्वित्वप्रकरणे भाष्यप्रयोगः संगच्छते। तेन कतमो भवतामध्यापकः सूर्योदिवदत्तो
वेति सिद्धं। वाग्रहणमिति। न चाव्ययसर्वनाम्नामित्यस्याधिकारत्वात्तदनुवृत्त्यैव सिद्धे वाग्रहणं व्यर्थमिति वाच्यं तन्निवृत्तिज्ञापनार्थत्वात् तेन डतरजपि
षयेनाकच्। महाविभाषयेति। अतएवावक्षेपण इति सूत्रे भाष्ये क एतयोरर्थयोर्विशेष इति प्रयोगः संगच्छते। तमादयः प्रागवक्षेपणे कात्मा नित्या प्रत्यय-
इति प्रायिकमिति भावः। किम इति। बहुष्वासीनेषु इत्यादिभाष्यप्रयोगादिति भावः। एकाच्च। प्राचामिति पूजार्थं। वाकारस्य ष्टत्वे महाविभाषयैव सिद्धेः। अ-
कजर्थमपि न तस्यानिष्टत्वादिति स्पष्टं भाष्ये। येनेतर इति। अवक्षेपणे इति करणे ल्युडिति भावः। इवे प्र। इवार्थोपमानत्वं च तिवर्तमानात्प्रातिपदिकात्कन्
प्रकृत्यर्थमेयं सा प्रतिकृतिश्चेदित्यर्थः। प्रतिकृतिर्मृदादिनिर्मिता प्रतिमा प्रकारांतरे स्वार्थिकप्रकरणविरोधः। अश्वक इति। उपमानाच्चाभिन्न इति बोधः। लु-
म्म। अस्य लुदं वं प्रकृतिवल्लिंगाय। वचनं तु विशेष्यवद् देवहरीतक्यादिव्यक्तिरित्यत्र पाठात्। तेन चंचे मनुष्यावित्येव देवलकानामिति। प्रतिमां गृहीत्वा भिक्षा-

सु
ल·स र्थप्रतिगृहमटतामित्यर्थः।तत्तदायतनेषुप्रतिष्ठापितपूजार्थप्रतिमासुचित्रेषुनटेषुचभ्रमात्मिकाशिवाभेदबुद्धिरितिप्रत्ययोत्पत्तेरेवाभावः।स्पष्टंचेदं
रो·त· मनुंविषयेतादृश्यांवृत्तौरसप्रकरणेशंकुकमतनिरूपणावसरेप्रकाशकारैरुक्ता।यत्तुतत्रबुद्धेर्भ्रमत्वाभावोप्युक्तःसत्वनंतरावतीर्णधावापाठवत्बुद्धे
३२ स्तत्रभ्रमत्वेनप्रक्रमान्नविरुद्धइतिदिक्।अर्चासुपूजनार्थासुचित्रकर्मध्वजेषुचेतिदेवपथादिषुपाठस्तत्रनदीपूर्वइतिमद्राजस्येतिसूत्रेकैयटः।प्रक
तसूत्रेस्मावप्येतन्निरुक्तमिति।अस्वरितत्वादननुवृत्तिरेवात्रनिवृत्तिःशाखादिभ्योयदितिपाठःयइतित्वपपाठः।मुख्यादीनामाद्युदात्तदर्शनात्।उगवा
दिसूत्रस्यभाष्यविरुद्धत्वा च्चाभव्यः।आत्मवान्अभिप्रेतानामर्थानांपात्रभूतइतियावत्।तद्विषयादिति।इवार्थविषयसर्वावयवकादित्यर्थः।भाष्येत
थैवोदाहरणात्।इवार्थविषयसर्वावयवकादिवार्थोपमानत्ववर्तिकर्तमानाच्छइत्यर्थः।अतएवशस्त्रीश्यामेत्यादेरिवार्थेवोनकाकतालमितिवृद्ध
च्चेवार्थेन।काकतालीयइति।काकइवतालमिवेतिइवार्थइतएवज्ञापकात्सुप्सुपेतिसमासः।तत्रपूर्वपदमुपमानकाकागमनपरंउत्तरपदंचोक्तपूर्वपद
र्थसमानाधिकरणोपमानतालपतनपरं।समुदायश्चोपमेयदेवदत्तागमनसमानाधिकरणचोरपतनपरःएवंचोपमानकाका गमनसमानाधि
करणोपमानतालपतनोपमेयंदेवदत्तगमनसमानाधिकरणंचोरपतनमितिसमासार्थः।विशिष्टेविशिष्टनिरूपितोपमेयत्वबोधात्विशेषणेविशे
षणनिरूपितंविशेष्येचविशेष्यनिरूपितंतत्पर्यवस्यति।तत्तदुपमेयबोधेतत्तदुपमेयवाचकसमभिव्याहारस्तन्त्रं।ततस्तद्विशेषसमभिव्याहारेसमा
र्थोसमानप्रकृतिस्योपमानभूततालकृतकाकवधोपमेयःसमासार्थेपिमेयप्रयोज्यश्चोरकृतदेवदत्तवधइतिबोधःशक्तिस्वभावात्।एतेनपरस्परं।
सामर्थ्याभावाद्वृत्तिद्वयमपिदुर्लभमित्यपास्तं।तत्फलितमाह।इहकाकेत्यादि।अत्रसर्वत्रातर्कितोपनतत्वंसाधारणोधर्मइत्याह।अतर्कितो
मिठगिनि।अन्यतरस्यांग्रहणमनंतरठकःसमुच्चयार्थमितिभावः।एकशालाशब्दस्यांगुल्यादिषुपाठादितिभावमन्ये।पूगात्तु।पूगेतिनस्वरू एम
पग्रहणंव्याख्यानात्।ग्रामणीवाचकपूर्वावयवकभिन्नात्पूर्ववाचकादित्यर्थः।लौहितध्वज्यइति।लोहिताध्वजायस्यपूगस्यसएवलौहितध्व ९२
ज्यः।वातच्फ।शरीरायासजीवीनानाजातीयानामनियतवृत्तीनांसंघोव्रातः।च्फञ्इतिगोत्रेकुंजादिभ्यइत्यनेन।अस्त्रियांकिं।कौंजायनी।टिल

ञ्जौविति। ठित्वसामर्थ्याद्स्त्रियामितितत्रनसंवध्यतइतिभावः।तद्विशेषेति।व्याख्यानादितिभावः।जानकिस्त्रिगर्तेः।पर्श्वादियौ।अत्रास्त्रियामित्यनुवर्तते।य
ञश्चेतिसूत्रस्यभाष्यप्रामाण्यात्।तेनपर्शूः।स्त्रीष्यटूटेण्यण्विधायकयोष्ठित्वसामर्थ्यादसंवंधेप्यन्यत्रासंवंधेमानाभावात्।आभिजित्यइति।अपत्योष्णताय
ञ्।तस्यसार्थिकत्वेनगोत्रार्थकत्वादाभिजित्यस्यायमितिविग्रहेवुञ्।अत्रआपत्येतियलोपश्च।आभिजितकः।अयमपत्याण्णतेभ्यएव।तेनाभिजितामुहू
र्तइत्यादौन।सर्वेभाष्ये।अनैमित्तिकत्वार्थमितिननुतद्भावभावित्वरूपंनिमित्तत्वंसहविधानेपितद्भावोत्तरंभावइत्यर्थेवत्तद्भावस्यसमकालंभावइत्य
पितदर्थात्।अतएवधिन्विकृण्व्योरित्यत्रवलोपएवकार्योनधातुलोपइतिगुणनिषेध सिद्धेरकारादेशविधानंव्यर्थमित्याशंक्यतत्प्रत्याख्याने।
गुणवारणार्थंतदितिभाष्येउक्तमितिचेन्न।लोपवचनसामर्थ्यादचः परस्मिन्नित्यत्रतथानिमित्तत्वानाश्रयणात्।दंडव्यवदिर्दंडोदंडनं।व्यवसर्ग
साहचर्यात्।तयोरर्थयोर्विषयेस्वार्थेवन्नित्यर्थः।स्थूलादिभ्यश्च।प्रकारोभेदःसादृश्यंचव्याख्यानात्तइतिवर्तमानादित्यर्थः।जातीयरोपवादइति
ज्ञातीयविधौभेदएवप्रकारइतिजयादित्यमतेपवादइत्यस्यपरत्वाद्बाधकइत्यर्थः।तत्राप्युभयंगृह्यतेइतिवामनमतेयथाश्रुतमेव।अनंत्यं
अनंत्यंतगतिरशेषतःसवंधाभावः।सामिकृतमिति।समासेपिसामीत्यस्यक्रियाविशेषणत्वेनकारकत्वात्समुदायस्यक्तांतत्वं।कद्ग्रहणेग
तिकारकपूर्वस्यापिग्रहणात्।अनंत्यंतगतेरित्यस्ययद्यपीत्यादिः।अप्रकृत्यैवेति।समस्तत्वेतदेकदेशसामिशब्देनेत्यर्थः।असमस्तत्वेतत्संनि
हितेत्यर्थः।इदमेवेति।अस्यतथापीत्यादिः।वहुतरकमिति।यदितुवहुतरकंसुकरतरकमित्यादितेषाघंतात्स्वार्थेकन्वक्तव्यइतिवचनेनया
कादित्वात्स्वार्थेकनावासिद्धमित्युच्यतेतदानास्यप्रयोजनमेतदेवाभिप्रेत्येदंभाष्येप्रत्याख्यातं।एतदेवभाष्यंतस्याकृतिगणत्वेमानंविभाषा
ग्रहणादिति।प्राक्पांचीनमितिरूपद्वयंमहाविभाषयैवसिद्धमितितदस्यनित्यत्वेज्ञापकमितिभावः।तेनाक्षितंम्वित्याद्यसाध्वितिवोध्यं।आशि
तुम्भीन इत्यादितु [illegible] प्रत्ययप्रकृतेरर्थकथनंइयमभ्युच्चययुक्तिः।वृहतीजात्यंताइतिवहुवचनेनास्यापिग्रहात्।जात्यंतात्छस्येकास्यापिस्वभावतो
नित्यत्वलाभात्।अवृतेः स्वस्यनित्यत्वाभावायविभाषाग्रहणमितिभाष्यसंमतः।पंथाः।प्राक्नइति।तेनावक्षेपणेकन्वैकल्पिकएवेतत्सापि

सु·
ल·श· मितिउक्तं।बृहतीवा…ताः।कन्स्वत्ताः।अदिकृत्वियामितिकर्मधारयगर्भोनञ्तत्पुरुषः।प्रागिति।अत्रात्यंतंप्राविदेशेइत्यर्थकंनिर्लिंगम्।स्वां
शे·त· तंत्रोवेयप्रधानतया,स्वभावाल्लिंगयोगिलिंगंचनपुंसकमेवेलिंगंसर्वनामत्वात्।नस्त्रीत्वादिप्रकृत्यांसहात्यंतविरोधापत्तेरेकवचनमेव।एवंचप्रा
३३ मावधिकप्राग्देशवृत्तेःआम्राइतिवोधः तदाह।प्राचीनमिति।पदसंस्कारपक्षेइदं।यदाप्रागादिशब्दास्तद्देशकालस्थाम्रादिवोधकास्तेभ्यश्चस्व
स्वदीपस्थितंविशेष्यलिंगत्यागेमानाभावात्प्राचीनाआम्राःप्राचीनावाटीप्राचीनंवनमित्यादीतिकश्चित्तन्नमनंचित्यं।प्राचीदिगिति।लिंगविशिष्टप
परिभाषयाप्राप्तिः।प्राचीनंग्रामादिति।अत्रप्राच्यांदिशीत्यर्थेत्यन्तात्प्रागितिप्रकृतिःसचाव्ययत्वादस्त्रीस्वार्तिवत्सूत्रेभाष्येवायंप्रयोगः।जात्यं
ताच्चवंधु।जात्यंताद्वंधुनिवर्तमानात्स्वार्थात्याश्रयद्रव्यलक्षकादित्यर्थः।जातेर्व्यंजकमिति।वध्यतेस्मिन्नजातिरितिव्युत्पत्तेः।अत्रप्रकरणाबोधेनवा
चकत्वंवक्तुंशक्यंयुक्तंचेतिपरे।स्थानांता।सस्थानशब्दस्तुल्यरूपार्थेनचेत्स्थानांतमर्थवद्भवतितदाप्रत्ययः इत्यर्थः।इतिशब्दादर्थवदितिलब्धं
अनुगादेतीति।अत्रार्थेअनुगादिशब्दइत्यर्थः।अस्यनित्यत्वादस्वपदविग्रहंदर्शयति।सएवेति।अनुपाप्यादिवत्सुप्यजातावितिणिनिः।विसारि
णोः।अणिनुणइत्यतोऽणनुवर्तते।इनणीतिप्रकृतिभावः।क्रियाजन्मेतिअतएवत्रिःप्रकृतौद्विःपचतीतिन।कृत्वोपंचादिशब्दास्तुतत्संख्योत्पत्तिपरास्त
स्येवानुद्योतकास्तेषांचक्रियायामन्वयः।सूत्रस्वरसात्।द्विदशाइत्यादौसमासएवद्व्यादिशब्दानांतत्परत्वद्योतकंइत्युक्तार्थे…नसुच्।समुदा
यस्याप्रसिद्धत्वात्।भुंक्तेइतिवर्तमानप्रयोगः।त्रिरावृत्तादशेत्यादावावृत्तिक्रियाजन्मगणनेकृत्वसुच्।संख्यायाःकिमिति।गणनिवृत्तिः।संख्याश
ब्दानामेवेतिप्रश्नः।भूरिवानिति।नायंसंख्यावाचीलोकेगणनायामप्रसिद्धेरितिभावः।वहुशब्दस्तुसंख्यासंज्ञकत्वात्तत्कार्यभागित्युक्तं।तदभावे
हिक्रियाजन्मप्रश्नगणनेगम्येइत्यर्थःस्यादितितात्पर्यं।वारशब्दःकालपरः।सचभोजनपर्यायप्रइतिकालाध्वनोरितिद्वितीया।यद्यपिद्रव्यगुणयोर्गणा। एम
नयोग्यंजन्मापसिद्धमेवैवतेषामुक्तिः।क्रियापास्वनेकत्वाऽपिनिवृत्तभेदायाधातुवाच्यत्वेननतत्संभवः।तथापिक्रियाग्रहणंस्पष्टार्थं।साध्यस्वभा ३३
वैवयत्रक्रियातत्रैतत्प्रवृत्त्यर्थंतुनतत्।द्विर्वचनेवीतिद्विरावृत्तिर्द्विःप्रयोगःद्विर्बद्धंसुबद्धमित्यादिप्रयोगविरोधात्।पंचकृत्वःकर्त्ताकटान्द्विःकर्त्ताइ

त्यादौगुणभूतक्रियायोगेकारकविभक्तेरिवअस्यापिसाधुत्वमिष्टमेवेतिस्पष्टंहरिकैयटादिग्रंथेइत्यन्यत्रनिरूपितं।द्विपाकौइत्यादौनसुजादि।क्रिया
जन्मगणनस्याभावात्।तद्गणनार्थत्वेहिपाकावित्यादौद्विवचनाद्यापत्तिः।अतएवद्विःप्रयोगाविति न।तदुक्तंभाष्ये।द्विःपाकावित्यादौकस्मान्नभवतीतिने
तत्क्रियागणनेऽभिमुखीप्रवृत्तिरभ्यावृत्तिरिति।साचजन्मरूपा।एवंचनेतत्क्रियागणनमितितदर्थइतिनिरूपितंभाष्यप्रदीपोद्योते।यद्यपिसंख्या
गणनात्मिकैवतथापिगणनायांप्रसिद्धास्तेषामवग्रहणार्थं।तेनयुग्मोभादिशब्दान्नेतिदिक्।विभाषाव।अविप्रकृष्टकालक्रियाजन्मगणनन्त्रन्ते।
रित्यर्थः।प्राचुर्येणेति।व्याख्यानादितिभावः।भावइति।प्रचुरस्यवचनेबोधनेसतिप्रातिपदिकात्प्रत्ययइत्यक्षरार्थः।प्रचुरार्थबोधकाच्चदितिप्रथमास
मर्थोत्स्वार्थेमयडितियावत्।अधिकरणेइति।प्राचुर्येणप्रस्तुतान्नादिवचनात्प्रथमासमर्थादधिकरणेप्रत्ययइत्यर्थः।प्रकृतेतिर्लिङ्गसप्तम्यन्तंतत्रव
र्तमानादित्यर्थः अत्रपक्षेवचनेइत्यत्रप्रकृत्यर्थोविवक्षितः तेनभवन्मयोध्यापतिनावनीपतिरित्यादौप्रकृत्यर्थाधिकरणमात्रेमयडुपपन्नः।तंत्रेणा।
र्थद्वयेऽपिवचनात्पर्यं।व्याख्यानात्स्वार्थिकप्रकरणपाठस्वाद्यपक्षेचरितार्थः।वस्तुतोयःस्वार्थिकाइत्यस्यप्रायेणेत्यादिः।प्रकारवचनेजातीयंतावद्वधुनि
देवतांतात्तादर्थ्येयदित्यादौवाचकतायाएवप्रतीतेरितिबोध्यं।तद्ग्रहणंवाक्यभेदेनप्राचुर्याभावेऽप्यस्त्यंतस्वार्थिकमयडर्थंतेनचिन्मयंब्रह्मेत्यादिसिद्धं
।यवागूमयीति।दित्वान्ङीप्।समूहवाद्वहुवंविशिष्टेऽर्थेप्राचुर्यार्थेवर्तमानादित्यर्थः।मोदकिकादावव्याप्तितिठ्ञास्वार्थिकत्वेपिलिंगातिक्रमः।कुटीरवत्
भेषजमिति।भियःशुक्रुहस्वश्चेतिव्युत्पादिताद्भिषजशब्दादिदमर्थेण्यतएवनिपातनादेकारः।देवतांतात्तादर्थ्येतदर्थेवस्तुनीत्यर्थः।वैधकर्मणित्यज्य
मानद्रव्योद्देश्यत्वंमंत्रस्तुत्यत्वंचदेवतात्वं।तदुक्तंभाष्येदिवैरैश्वर्यकर्मणोदेवस्तस्यत्स्वार्थेतलिति।तेनदैवत्यमितिसिद्धंतस्यनयत्वाह पितृदैवत्य
मिति।एतेनपितृषुदेवत्वजात्यभावादिदमयुक्तमित्यपास्तं।नवस्येत्यादिवार्तिकेविधीयमानाअत्स्यंतस्वार्थिकाः।साधारणादिति।अतएवनिपात्न।
दित्यकेशस्यदीर्घः।[illegible]मानंधारणंअस्येत्यर्थः।अनेकंप्रत्यविषिष्टुसंबंधमित्यर्थः।देवतेति।लिंगाति।कमात्स्त्रीत्वंवर्णेचा।वर्णेकिं।लोहितःस्फटिकः।
यावदाश्रयमनुवर्तमानं[illegible]त्वाभावोनित्यत्वं।लोहितादिति।अस्मादेवज्ञापकादत्यंतस्वार्थिकानांसुबुत्पत्तेःप्रागेवोत्पत्त्यंगीकारेणांतरंगत्वात्पूर्वंलिंग

सु॰ बोधकप्रत्ययवाच्यार्थस्वार्थिकेन वा भवतीत्यर्थः। अत एवकृत्याप्यदस्यात्र प्रकरणेऽसंबंधः। तेनैतादिभ्यो त्यंतस्वार्थिको एतिकेत्येवनत्वेनिकेति
स॰श॰ किंशब्दयोणि। लञ्ज[illegible]र्थः। उपाप्यादिति। अचेतिवत्तत्येह्रस्वग्रहणादीर्घस्य स्थानित्वं। एतेनात्यस्यस्यात्तत्वानर्थ्याचलोपाभावइत्यपास्तं व्याख्यानाच
शे॰ त॰ बोधो। व्याहृतोन्यैर्नोक्तोर्थो यस्या इत्यर्थस्तदाह। संदिष्टेति। तदुक्तं तच्छब्देन वाक्। वाचा युक्ताद्व्याहृतार्थे। प्रतिपादककर्मे शब्दादित्यर्थः। तिन
३५ स्वयं वाचाकथनपूर्वकं यत्कर्म क्रियते तत्कार्मणं। तदुक्तं भाष्ये। तदित्यनेन। किं प्रतिनिर्दिश्यते वागेव यद्वा वाचा व्याह्रियते तदेव कर्मणा क्रि
यते इति। अत्र वागेवेत्युत्तरस्यैवकारेण व्याहृतार्थो यामित्यंशः संबंधो लभ्यते। क्रिययोरुत्सर्गतएकत्वं च प्रतीयते। यद्वा चावदतित त्कर्मणा
कुरुते इति श्रुत्यर्थानुवादरूपत्वाद्यद्वेत्यादिभाष्यस्य। तदुक्तं किं। वाचा कथनं विनैव यत्कर्म क्रि[illegible]नेतत्र मा भूदिति। एवं च मेत्र विशेषप्रयो
गपूर्वं क्रियमाणकर्मविशेषे रूढोयमित्याहुः इदं त्वया कर्तव्यमिति सदेशवाचं श्रुत्वा यत्कर्म क्रियते तत्कार्मणमिति वदतः कैयटस्याशयस्तु चिंत्यः
। वाचिकं श्रुत्वेति मूलं कैयटानुसारेण। क्षेत्रे रूढा इति। तत्रोत्पन्ना इत्यर्थः। प्रजानातीति प्रज्ञः। नित्यीयमिति। वृत्तौ चेदं स्पष्टं। भाष्ये नित्येष्वस्यागणनान्ना
स्यनित्यत्वं। प्रत्ययांतरं त्वस्मादस्यापवादत्वान्न भविष्यतीति परे। मंगलामंगलवचनमिति। अपेतापोढेति सूत्रे ल्यप इति सोत्र प्रयोगः। एतेनास्मा
त्सूत्र प्रयोगान्मंगलेत्यादि प्रायिकमित्यपास्तं। भाष्यानुक्तेः। अत्राल्पार्थशब्देन स्तोकादीनामेव ग्रहणं। न तदर्थैकैकशब्दस्य तत्र तत्त्वे मानाभावात्स
त्वेपि तत्र[illegible]तस्याप्रसिद्धतरत्वेनाल्पार्थशब्देन न ग्रहणं। संख्यैक। संख्यावाचिन एकत्वविशिष्टार्थप्रातिपदिकात्कारकाच्छसित्यर्थः। एकार्था एवे
ति। एकवचनशब्देनात एव गृह्यंते इति भावः। घटं घटमिति। ततः शसि घटं घटमितिवत् घटो घटौ ददातीत्यपि बोधसंभव इत्यभिमानः। पैरशः स्व
रश इति प्रयोगात्तेभ्योपि वृत्तावेकत्वविशिष्टस्यैव बोध इति जातिशस इति परे। एकवचनादिति घटौ ददातीत्यादिबोधे शसोऽसाधुत्वादिति केचित्। एम
वस्तुत एकवचनादिति संख्यातिरिक्तार्थानां परिगृहीतैकत्वानामेव वीप्से त्यर्थानुवादकं। अत एव माषौ माषौ ददातीति न। किंतु द्वौ द्वौ ददातीत्येव। ३५
तत्रैति बोध्यं। अत्राहुः। वकारो वीप्सायामित्यनंतरं द्रष्टव्यः। संख्यैकवचनाद्वीप्सायां च चात्स्वार्थेपि स चाभिधानस्वाभाव्यादेकस्वादेव। तेनैकशब्दा।

तेन तद्धा चेके सर्वत्र प्रवृत्तिः एतच्च संख्यासंज्ञासूत्रे भाष्ये स्पष्टम् समाहारे चेति तत्रैवेत्यर्थः एवं च तदविवक्षायां पूर्वकाले के इति समासे एकनदीतरः सिद्धोऽन्यथा समाना
धिकरणत्वात्पुरुषं बाधित्वाव्ययीभावे नपुंसकह्रस्वापत्तिः अच्छात्यन्वेवेति योगविभागसिद्धोऽभियुक्तोक्तो गोदावर्यौश्च नद्याश्च संख्याया उत्तरे पदे इत्यर्थ च तु न योगवि
भागस्येष्टसिद्ध्यर्थत्वात् भाष्यकृता तदनुक्तेश्चेति भावः अन्यपदार्थ संख्येति निवृत्तं नदीग्रहणमनुवर्तते संज्ञानवगमादिति संज्ञेति कर्मण्यण् तेन संज्ञानेति शविशेष
स्यानवगमादित्यर्थः नित्यसमास इति तत्स्वरूपस्येत्यर्थः तत्स्वरूपस्य च समाससमानार्थकवाक्याभावेन समासघटकपदानां विग्रहस्त्वस्वपदविग्रहमहाविभाषया अ
संबंधेमानाभावात् अत एव द्वितीयतृतीयेति सूत्रेऽन्यतरस्यांग्रहणेनोत्सर्गापवादयोर्महाविभाषाविषयत्वेऽपवादाभावे उत्सर्गप्रवृत्तिरित्यर्थे ज्ञापिते उन्मत्तगं
गमित्युदाहृते अव्ययीभावेन मुक्ते बहुव्रीहिर्नेति चोक्तं भाष्ये अस्य नित्यत्वे तेन मुक्त इत्यसंगतिः स्पष्टैव एवमन्यत्रापि बोध्यम् समासान्ताः अत्र समासप
देन तत्संबंध्यलौकिकविग्रहवाक्यपरमेवमव्ययीभावादिपदान्यपि तत्पराणि अत एव बहुकुमारीक इत्यादौ ह्रस्वो न गोस्त्रियोरित्यत्र भाष्ये स्पष्टमेतत् अंत इति
सूत्रे भाष्ये च एवं चालौकिकविग्रहवाक्ये समाससंज्ञासमकालमेव समासान्ता इति सिद्धान्तः नञ्पूर्वे समासान्ते तत्संनियोगनिष्ठाद्युदात्तत्वे तदेकवाक्यतापन्ने
पूर्वस्यनिघाते च कृते पूर्वपदस्योदात्तस्वरितयोगित्वाभावेन पूर्वपदप्रकृतिस्वराप्रवृत्तौ ऽचश्चित्त्वं व्यर्थमिति वाच्यम् तत्सामर्थ्येन समासान्तविधावाद्युदात्त
त्वस्यासंबंधज्ञापनात् तेन समृद्धा पूर्यस्य समृद्धपुरो राजेत्यादौ पूर्वपदप्रकृतिस्वरसिद्धिः द्वित्रिभ्यामिति सूत्रस्थ समासे कृते समासान्ता इत्येतत्परं भाष्य
मेकदेशयुक्तिरुक्तभाष्यद्वयविरोधादित्यन्यत्र प्रपंचितम् अनतः शब्दश्चरमावयववाची स च समुदायावयवः अत एवोपशरदमित्यत्र नाव्ययीभावादित्य
म् अव्ययानामिति टिलोपाभावश्च सिद्धः पूर्वभागस्याव्ययीभावत्वाभावेनानव्ययत्वात् यत्तु कैयटेन गोस्त्रियोरिति सूत्रे समासपदस्य समासार्थविग्रहवा
क्यस्योत्तरपदलक्षणयोत्तरपदावयवत्वमुक्तं तथा सरूपसूत्रे उक्तं उत्तरपदावयवत्वमित्यपि भाष्यकारस्य मतमिति तन्न फलाभावात् द्विपुरीत्यादौ स्त्री
त्वस्य लोकतः सिद्धेः लिंगमशिष्यं लोकाश्रयत्वाल्लिंगस्येति भाष्येण लिंगप्रकरणस्य नियमार्थत्वाभावबोधनात् अत एव परवल्लिंगमिति सूत्रे सत्वेऽपि द्वि
नावमर्द्धखारमित्यादौ नपुंसकत्वसिद्धिः पंचराजमित्यादावपि तत्प्रसक्त्यापत्त्या वकारान्तोत्तरपदे इत्यत्रोत्तरपदग्रहणस्य व्यर्थत्वापत्तिश्च अंत इत्यादि सू

ल॰ शे॰ नस्य भाष्यविरोध इ चेन्न स्वरावयवत्वम् एवं हि तत्र भाष्यम् समासस्यान्तोदात्तत्वमुत्तरपदस्यैवेति विकल्प्ये आद्येऽदम् प्रथमका इत्यादौ कपोऽन्तोदात्तत्वापत्तिमुक्त्वा अन्त्ये स्व
स॰ अ॰ रितस्वरात्तोदात्तत्वसिद्धिरित्युक्ता उभयोरपि प्रकरणेन लक्ष्यानुसारात् किंतूत्तरपदान्तस्य क्वचित्समासान्तस्योदात्तत्वमिति सरूपसूत्रस्थभाष्यं तदनाश्रयणेऽपि योज
३५ यमिति वाक्यम् तथाहि छात्र इद्धानां विभक्तौ परत एकशेष इति पक्षे ऋक् च ऋक्‌चा च ऋचौ असारूप्यादेकशेषो न प्राप्नोति इति भाष्ये समासान्तानां समासावयवत्वेऽपि समा
सभागस्य विभक्तिः परत्वाभावात् विशिष्टस्य न सरूपत्वमिति तद्भावः न च तस्यानर्थक्येन तदनुक्त्या भाष्यस्य न्यूनता इद्धावयवानामर्थवत्तामेवैकशेष इत्यर्थे प्र
मानाभावात् विशिष्टरूपोपादानाभावेन तत्परिभाषाया इहाप्रवृत्तेः भाष्यान्तरं तु तादृशं नोपलभ्यत एवेति दिक् सर्वसमासान्तो बहुजसोगोमत् जसित्यवस्थायाम भ
लौकिके वाक्ये सुपः परत्वादेव ततः पूर्वत्वे तु वाच्यार्थे विरोधः न हि सुबन्तं हि तं समासार्थं किंतु तद्विशिष्टमेव न च विशिष्टस्य सुबन्तत्वाभावेन सुबन्तात्तद्धित इति सि
द्धान्तविरोधः तेषामर्थाभावेन परिपूर्णपदमिति तन्मूलभूतन्यायस्यात्र विषयाभावात् अत एव पुंयोगादिति सूत्रे ऽन्त्यं तस्वार्थिकानां सुबुत्पत्तेः पूर्वमेवोत्पत्तिर्भाष्ये उक्ता
किं च समासान्तप्रकरणे ङ्याप्प्रातिपदिकादित्यस्याप्यसंबंधः तस्यावस्थायां वाक्यस्याप्रातिपदिकत्वात् तत्र कबुत्पत्तिकाल एव तत्पूर्वभागस्य समाससंज्ञाविरोधाभा
वात् समासान्तस्य च तद्वाक्यावयवत्वेन तद्ग्रहणेन ग्रहणात् बहुकुमारीक इत्यादावुपसर्जनस्त्रीप्रत्ययान्तप्रातिपदिकाभावान्न ह्रस्वः कप् ह्रस्वादन्तरंगतरः नादर्था
तात्पर्यम् येषां पदानां समासो न तावत्तेषामन्यद्भवति कपं तावत्प्रतीक्षत इति भाष्येण स्पष्टम् तथाभिधानात् तत्राद्यस्य तावदित्यस्य कोषः प्रथममित्यर्थः अन्य
समाससंज्ञारूपं कपा सह स्वभवनाय कपं प्रतीक्षत इत्यर्थः पूर्वं स्वप्रवृत्तौ हि तदर्थकत्वात् कपाभावेन कप्शास्त्रवैयर्थ्यभिया हि तद्भवनकालप्रतीक्षा अन्यथा तदन
पेक्षत्वेन कप्प्रतीक्षोक्तिरत्यंतासंगता स्यात् अत एव प्रत्ययस्थादिति सूत्रभाष्यादाहृते बहुचर्मिके इत्यादावापः सुपः परत्वाभावादित्वसिद्धिरिति दिक् अथाव्ययीभावे
ऽसाधारणसमासान्तानाह अव्ययीभावे अव्ययीभावे उत्तरपदतया वर्तमानं यच्छरदादिप्रकृतिकसुबन्तं तदन्तात् टच् स च समासार्थविग्रहवाक्यस्यानावयव
इत्यर्थः एनोऽह इत्यतष्टजनुवर्तते अन्नन्तादव्ययीभावादित्यादि तु फलितार्थपरतया कथंचिन्नेयम् अत्र गणे ये ज्ञयं तात्तेषां ज्ञय इति विकल्पप्राप्ते नित्यार्थः राम॰
पाठ इति केचित् प्रत्यक्षमिति लक्षणेनाभीतिसमासः परोक्षमिति इन्द्रियाजन्यं ज्ञानविषयत्वं शो आघजन्तः प्रयोगः नन्वत्राव्ययीभावाप्राप्तिरत आह साम। ७

ण्योरिति परस्योकारेति परशब्दस्य ओकारोन्तादेश इत्यर्थः एङ इति पूर्वरूपत्वं परस्योकारेति पाठे परस्याक्षिशब्दस्यादेरुकार इत्यर्थः आद्गुणः अशी आद्यचीति धर्म
परादिति भावः अत्र गणसूत्रे परग्रहणं प्रक्षिप्तमिति परोक्षे लिडिति सूत्रस्थभाष्यकैयटस्वरसः तत्र हि स मासांतोपि निपातनात्साधितः पूजार्थमिति
वेति वक्तव्येन तत्पूजार्थमपीत्यर्थः अन्यतरस्यांग्रहणस्य तु स्वरितत्वं नास्त्येव अतएव नदीपौर्णमासीति सूत्रे नदीशब्देन विशेषाणामग्रहणे शरदादिषु विपाड्
शब्द पाठस्य ज्ञापकत्वमुक्तं संख्यासंज्ञासूत्रभाष्ये नदीत्यादेर्वैकल्पिकत्वे नित्यत्वाय पाठस्यावश्यकतया ज्ञापकत्वासंगतिस्स्पष्टैव तत्रस्य यत्र पाठ
लुप्रपंचार्थस्तत्र नदीसंज्ञकस्य नग्रहणं पौर्णमास्यादिग्रहणात् न चाशब्दसंज्ञेति निषेधात्स्वरूपस्यापि ग्रहणं न स्यादिति वाच्यम् लक्ष्यानुसारेण सामर्थ्येन च त।
स्यात्रत्यागात् अतएव तत्सूत्रं भाष्ये प्रत्याख्यातमिति प्रामाणिकाः ॥ ॥ इत्यव्ययीभावः ॥ ॥ चकारबलेनेति संख्यापूर्वो द्विगुरिति योगं विभज्य पूर्वेण सं।
ख्यापूर्वस्य तद्धितार्थेत्यत्रोक्तस्य तत्पुरुषसंज्ञाविधानसामर्थ्यादेव पर्यायेसिद्धे चकारः समावेशार्थ इति भावः श्रितेति श्रितादीनां सुबंतत्वासंभवात् श्रितादि
प्रकृतिक इत्यर्थलाभः येन विधिरिति सूत्रस्थभाष्यप्रामाण्येन संबुद्धिस्त्रीलिंगप्रथमांतभिन्नेपि प्रवृत्तेरावश्यकत्वादिति भावः समर्थविशेषणत्वाद्द्वितीयादी
नां प्राप्तौ पितदंतविधिः समासप्रत्ययविधावितिनिषेधान्न भवतीति तदंतविधौ हि श्रितादयंत समर्थप्रकृतिक इत्यर्थे कष्टं परमश्रित इत्यादावपि समासापत्तिः
कष्टंश्रित इति न लोकेति षष्ठीनिषेधः पतितशब्दे तनिपतिदरिद्राति भ्यः सनो वेट् कत्वेन यस्य विभाषेति नो न निषेधप्राप्तावपि अत एव निर्देशादिड्बोध्यः अ
योग्यत्वादिति स्वयमित्यात्मनेत्यर्थे कंकन्दे शक्तिप्रधानमित्यर्थः स्वायंकृतिरिति असमासे कार्त्तिरिति स्यादिति भावः ऐकस्वर्यमपि समासफलम् ख
द्वा अस्य तत्प्रकृतिके लक्षणया द्वितीयेत्यनेन सामानाधिकरण्यम् जाल्म इति तेन केवलरूढत्वं तस्य सूचयति एतेन प्रकरणादि सहकृतवाक्येन निंदा।
प्रतीतिसंभवान्न हि निंदा इत्ययुक्तमित्यपास्तम् योगरूढतत्संभवेपि केवलरूढेतदभावात् न हि निंदेत्यस्य च विवक्षितानित्यर्थः सामीत्यर्थे कालाइति
स्वाचिन इत्यर्थः कृत्वचनात् ननुक्तेनेत्यस्य निवृत्त्या क्तांता क्तांतस्य चारगोत्तर सूत्रेण सिद्धे योगविभागो व्यर्थ इत आह अनत्यनेति परिच्छेत्तुमिति रमेर्योगे शकधृषेति तुमुन्
अत्यंत अत्यंतसंयोगान्त्यंतसंयोगसाधारणेन पूर्वेण सिद्धे इदं किमर्थमत आह ः क्तांतार्थमिति क्तेनेति अत्र नानुवर्तनमिति भावः तृतीया इदं संकटनद्वा

बृ॰शे॰ एकएवसामर्थ्येप्रवर्त्तितेन्रसा ख्यात्य स्वरान्वये उत्तरसूत्रेण निपुणश्लक्ष्णाभ्यां समासविधानात् तद्योगे हि हेतौ तृतीयातत्कृतेत्युक्तेश्चस्पष्टं चैतद्भाष्ये गुणेत्यस्य
स॰त॰ वृत्तानेस्यैतत्सापेक्षत्वेपिसौत्रत्वात्स मास : खण्डशब्दश्चखण्डगुणवत्वेनशकलबोधकइतिशंकुलाखण्डइत्यत्रकृतेह्यारकमेवसामर्थ्यशंकुलाकृतखण्डगुणवानित्य
३६ र्थः वचनग्रहणंतुगुणोपसर्जनद्रव्यवचनेनैवसमासार्थमतेनकुसुम्भेनकृतंरूपमित्यादौन-घृतेनपाटवमित्यादौचनस्पष्टंचेदंभाष्ये यद्यपिजातिसंज्ञाकृदं
ततद्धितांतसमस्तसर्वनामसंख्याशब्दभिन्नशब्दानामेवगुणवचनसंज्ञातथापिप्रकृतेव्याख्यानात्शुद्धयौगिकएवगुणवचनशब्दइतिबोध्यम् तृतीयां
तार्थेनकृतोयोगुणस्तद्वचनेनसमासइत्यर्थात्तत्कृतेत्यस्यगुणपदेनैवान्वयेनसंज्ञानुपादानाच्चगुणेनेतीयतांसिद्धेवचनग्रहणाद्गुणमुक्तवतेत्यर्थइतिभाष्य
च्चगुणपदेनधर्ममात्रमनेनखण्डशब्दस्यक्रियावचनत्वेपिनदोषः धान्येनेति अर्थशब्दोधनपरोहेतुतृतीयेतिबोध्यम् पूर्वसदृ॰यद्यपिसदृशशब्देनषष्ठ्या
समासः सिद्धस्तुल्यार्थैरित्यनेनतद्योगेषष्ठ्या अपिविधानात्एतस्याश्चनप्रतिपदविधानत्वमितिवक्ष्यते अतः प्रतिपदविधानाषष्ठीनसमस्यतइतिनिषेधा
त्रन पूर्वपदप्रकृतिस्वरोपिसदृशप्रतिरूपयोरितिसिद्धः तत्रहिद्वास्याः सदृशइत्यादौषष्ठ्या अलुकिपूर्वपदप्रकृतिस्वरार्थंसदृशग्रहणमावश्यकंमनसा
सदृशइतिसंज्ञानास्त्येवेतिनतदर्थमिदमावश्यकंतथापिभोजनहेतुकसादृश्यवानित्यर्थेभोजनसदृशइत्यत्रसमासार्थमिदमावश्यकं हेतोःशेषत्वविवक्षयाषष्ठीसमासेतुपूर्वपदप्रकृतिस्वरासिद्धिः सादृश्यग्रहणेनसदृशप्रतिरूपयोरित्यस्योपमानबोधकपूर्वपदकेएवप्रवृत्तेरितिस्पष्टंसदृशप्रतिरूप
योरित्यत्रभाष्ये यदितु भोजनेनकृतःसदृशइत्यर्थेपूर्वसूत्रेणसमासेनत्वत्तुरुषेतुल्यार्थैरित्यनेनस्वरोपिसिद्धइत्युच्यतेतदासदृशग्रहणंव्यर्थमेवेतिमकृतसूत्रे
कैयटेनध्वनितं सदृशेतिस्वरविधायकसूत्रशेषस्यभाष्यंतुएकदेश्युक्तिरितितदाशयः मिश्रंचेति पणबन्धेनैकार्थ्येसंधिस्तत्रागम्यमानेमिश्रत्वस्तुत्तरपदा
मनुपसर्गेतृतीयांतात्परमंतोदात्तमित्यर्थः अवरस्येति यद्यप्ययमूनार्थोपितथापिव्यवस्थाविषयाकारार्थमिदं भाष्येऊनार्थेत्यर्थग्रहणास्यतृतीयेतिसूत्रे
प्रत्याख्यानात्समर्थसूत्रेतृतीयातत्कृतेत्युपन्यासोपादानविकलइत्युदाहरणाच्च अत्रोनर्थग्रहणंनतिवादिनांमतेसर्वथास्यावश्यकत्वाच्चेतिदिक् कर्त्तरि राम॰
करणेचेति सूत्रेसमाहारद्वंद्वात्सप्तम्येकवचनमितिभावः तृतीयेति तृतीयांतमित्यर्थः कृद्ग्रहणेइति यत्रगतिकारकसमभिव्याहृतंकृदंतंतत्रक्वचिद्विशिष्ट ८

तेनैवपुं॰प्रातिपदिकत्वंसुविति।नचात्रद्वयोःसुपोर्लुकितदर्थस्यप्रातिपदिकार्थेंतर्भावेण द्वितीयाद्यनापत्तिः। व्याप्तिविशिष्टस्यकर्मत्वादिवोधार्थं।
तदुत्पत्तेःसुलभत्वात्।एकैकस्मिइति।द्वयोरपिसुपोर्लुकिपुनःसर्वादिपठितैकशब्दांतत्वेनसर्वनामत्वात्स्मैभावः।इद्दपुंवदिति।वहुव्रीहित्वत्वाति
देशेनोत्तरपदत्वस्यैकार्थ्येनभिन्नार्थत्वाभावेनचसामानाधिकरण्यस्यचसत्वात्स्त्रियाःपुंवदित्यनेनेतिभावः।अंतोदात्तत्वानीति।अनुदात्तंचेत्य
स्याधिकारत्वेपिभाष्यप्रामाण्यान्नेहोपस्थितिः।अतएववहुव्रीहिवद्भावेप्रकृतेपिकर्मधारयवद्भावः।किंचप्रियादिषुप्रतिषिद्धपुंवत्त्वस्यापिविधाना
र्थेकर्मधारयवद्भावः।अतएवपूर्वसूत्रयोःकर्मधारयवदितिनोक्तम्·प्रियादिषुपुंवत्त्वापत्तेः।पूर्वसूत्रेतुनस्वरातिदेशोभाष्य — प्रामाण्या।
त्।अतएवतत्रकिंप्रयोजनंसुब्लोपपुंवद्भावावित्येवंभाष्येउक्तं।अत्रकानिप्रयोजनानिसुब्लोपपुंवद्भावांतोदात्तत्वानीत्युक्तेःप्रकारशब्दःसादृश्य।
वाचीव्याख्यानादित्याह।सादृश्येद्योत्येइति।पुंवद्भावइति।पुंवत्कर्मधारयेत्यनेन।गुणवचनस्येहाकडारसूत्रभाष्यपरिभाषितइतिवोध्यं।प्र
कारःसादृश्यप्रतियोगित्वरूपमुपमानत्वं।उपमानपदंभिन्नइतिवोधइतिपरे।आनुपूर्व्येइति।वार्त्तिकेषुकर्मधारयवदितिनसंवध्यते।तदु
दाहरणेषुभाष्येसुब्लोपादर्शनात्।संभ्रमआदरोभयंचक्रियासमभिहारेचेति।पौनःपुन्यंभृशार्थश्चक्रियासमभिहारः।लोट्येवेदं।अतएव
क्रियासमभिहारेलोट्मध्यमैकवचनस्यहेभवतइतिपठित्वातस्यलोट्ज्ञापकत्वमुक्तं।अष्टमेचास्यलोट्येवोदाहरणमुपन्यस्तं।अतएवयङंतेनद्वित्वं।यत्तुलो
टःसमुच्चयादिष्वपिविधानेननकेवलेतद्द्योतनेनसामर्थ्याभावान्नलोटिद्वित्वं।यङस्तुनदतिरिक्तार्थाभावात्स्वेवद्योतनसंभवाद्यङंतेनद्वित्वमितितन्ना
अकजादेरनेकत्रद्योत्येर्थेविधानेपिकेवलस्यैवप्रकरणादिनातत्तदर्थद्योतकत्वस्यादृष्टत्वात्।भृशार्थेयङिततःपौनःपुन्यविवक्षयांतुनित्यवीप्सयोरि
तिद्वित्वंभवत्येव।पापच्यतेपापच्यतेभृशंपाकंपुनःपुनःकरोतीत्यर्थः।नन्वस्यद्वित्वफलकेभृशार्थेवृत्त्येवसिद्धेःक्रियासमभि हारपदंव्यर्थमतआह।
पौनःपुन्येपीति — इदमेवज्ञापकंपौनःपुन्यस्यकेनचितद्योतनेसौत्रद्वित्वाप्रवृत्तेरितिपौनःपुन्ययङंतेनसौत्रद्वित्वमितिभावः।भुक्त्वाभोजंभो
जमित्यादौताभीक्ष्ण्येद्वेवाच्येइति भाष्यपठितवचनांतरेणद्वित्वंमूलेत्वेतत्कृदंतेवक्ष्यते।पुनःपुनःक्रियाविच्छेदेनोत्पत्तिराभीक्ष्ण्यंतदेवचाभित्यत्वं।

त
ल॰श॰ भुक्त्वाभुक्त्वेत्यादौ विच्छेदे दिक्क्रियाया वोपात्ता। अजनादिरूपैव गृह्यते। अनुपस्थितकल्पने मानाभावात्। एवं च त्वाद्यंते नैव अजनाद्याभीक्ष्ण्यस्य द्योतित
शे॰सु॰ त्वात् त्वाद्यंतसमभिव्याहारे तिङंतस्य द्वित्वं। जीवतो वायमित्यर्थे जीवन्तिजीवतीत्यादौ। कमलानि कमलानीति वदेकं जीवतिपदं दीर्घाविच्छिन्नलक्षक
२९ मिति न तत्र शास्त्रीयद्वित्वं कर्मव्यतीहारस्य क्रियाविनिमयः नित्यमेवेदं द्वित्वं। वाहुलकं तु समासवद्भावस्यैव तदाह। बहुलग्रहणादिति। अतएवान्यश
ब्दस्य समासवद्भावरहितमेवेतरशब्दस्य तत्सहितमेवोदाहरणं भाष्ये। परस्परशब्दे परस्पराच्चेति वार्त्तिकप्रयोगात्समासवद्भावाभावः। अन्यपरेत
रव्यतिरिक्तेषु तु नास्य प्रवृत्तिर्बाहुलकादेव। अन्येषां कर्मव्यतीहारबोधकत्वाच्च। अन्योन्यादौ कर्मव्यतिहारः स्फुट एव। अन्योन्यस्मै इति। अन्यस्मै इति
। अन्यस्मै इत्यस्य द्वित्वे पूर्वपदस्य सुपः सौ स्वमसिद्धिः। इतरेतरेषामित्यादौ तु एकैकस्मै इत्यत्रोक्तरीत्या सर्वनामत्वं। वार्तिकेषु कर्मधारयवत्पक्ष संबं
ध प्रोधनाय समासवदित्युक्तिः। सुब्लुग्विधिनैव सिद्धे समासइत्युक्तिराम्रेडितानुदात्तत्वबाधेनांतोदात्तार्था। कस्कादित्वादिति। कुप्वोः कःपौ चेति
बाधित्वेतिभावः। सिद्धांतिमतमाह। अन्येत्विति। तदुक्तं। हेडेः। नचोदाहरणमादरणीयमिति। तदतिरिक्तोदाहरणाभाव इत्येवं परतयानादरणीय
मित्यर्थः। दैलहूये इति। समासवद्भावे तदभावे चेत्यर्थः। इतरेतरमित्यादौ पूर्वखंडस्य सर्वनाम्न इति पुंवत्त्वेन यद्यपि सिद्धं। तथाप्युत्तरखंडे टाबभावा
र्थं बाहुलकमावश्यकं क्लीवे चेति। अन्योन्यमित्यत्र पूर्वपदे प्राप्तो विरह इत्यर्थः। उत्तरखंडे तु अस्मद्वक्ष्यमाणान्यतमरीत्यापि तदभावः। समासे सो
रिति। कृतद्वित्वस्यान्येन समासे पूर्वखंडस्य स्येत्यर्थः। इदमुपलक्षणं परस्परमित्यत्र पूर्वपदेन पुंसके सोरमभावस्य परस्परस्मा इत्यादौ स्मैवत्स्याभा
वे पि सर्वनामत्वस्य च। इतरेतरमित्यत्र चेति। डतरादि सूत्रे सर्वादीनीति सूत्रस्थभाष्यरीत्या विहितविशेषणाददणेत्यन्ये। सोर्लुकेति। स्वादेश
विधानत्वन्योन्यमित्यादावसमासे चरितार्थमिति भावः। प्रकृतवार्तिकेति। स्त्रीनपुंसकयोरिति। वार्तिके। अन्योन्यमिमे ब्राह्मण्यो इतरेतरमिमे कुले राम
इत्यादि तत्रोदाहृत भिक्षिया मितीति। अन्योन्यसंघ्याइति सर्वस्य द्वे इति सूत्रस्थभाष्यप्रयोगो पिबोध्यः। अन्योन्यप्रादुर्भवादिति अपादाने इति सूत्र। २९
स्थभाष्यप्रयोगे कर्मव्यतिहारः स्पष्ट एव। अकृच्छ्र इति। तत्र वर्तमानयोस्तदर्थकयोरित्यर्थः। पुनस्तदेवेति। अनुवादकविभक्तेन्याय्यत्वादितिभावः। यस्य दाने

क्लेशसंभावने तत्रैव तदभावप्रतिपादनं सफलमित्याशयेनाह। अतिप्रियमिति। यद्यच्चेति। स्वशब्दस्योभयार्थकत्वात्। ज्ञातिधनवाचीतु नगृह्यतेऽनभिधानात्। द्वि
इति वीप्सायां यथाशब्दस्यावृत्तौ द्वित्वप्राप्त्या तदपि निपात्यते इति भावः। क्लीवत्वंचेति। तेन ह्रस्वसिद्धिः चेन कृतद्वित्वस्याव्ययत्वाभावसंग्रहः। ज्ञातेत्यस्य तन्त्रेत
त्वात् षष्ठीन। तृतीचि यथा यथ स्वज्ञातात्या। यथास्वरूपमित्यर्थः। ज्ञाताः सर्वे पदार्था यथायथं यथास्वभावं सर्वे पदार्था ज्ञाता इति वृत्तिसंमतम्। पूर्वपदस्याम्भावद्
ति। द्वौद्वाविति। द्वित्वे कर्मधारयवद्भावात्सुब्लुकि पूर्वपदावयवस्याकारस्यामादेश इत्यर्थः। आत्वमिति संज्ञात्वादप्राप्तिः। नपुंसकत्वंचेति। चेन कृतद्वित्वानियत
द्विवचनोत्पत्त्यभावस्य संग्रहः कर्मवद्भावादन्तोदात्तत्वं। वाच्यमिति। इदं वृत्तौ स्पष्टं। अभिव्यक्तिरप्येवमित्यन्ये। आचतुरमिति। आङ् अभिविधौ। आङ् मर्यादेत्य
व्ययीभावः शरत्प्रभृतित्वाट्टच्। चतुर्थान्तमिति फलितोऽर्थः। मिथुनीयन्त्यनेनान्वयः। मिथुनशब्देन तत्कर्म मैथुनं तदिच्छन्तीत्यर्थे क्यच्। मिथुनं गच्छतीति।
मिथुनत्वं प्राप्नोतीत्यर्थः। फलितार्थकथनमिदं मिथुनायन्ते इति कण्ड्वादौ तु पाठः। उपमानार्थाभावात्। द्वन्द्वपदस्य त्यामर्यादा तु एतावदेव पशूनामायुरि
त्येवंरूपा। स्वसा हित्येन चतुरोऽभिव्याप्येत्यर्थः। प्रपौत्रपुत्रेणापीति। चतुरोऽभिव्याप्येत्यर्थ इति वृत्तिस्वरसः। अत्यन्तसहचरितत्वेन लोकविज्ञानमत्राभिप्रे
तिः। अत्यन्तसहचरितौ लोकविज्ञाते द्वन्द्वमित्युपसंख्यानमिति वार्तिकात्। तदाह साहचर्येणेति। तेनेह न। युधिष्ठिरार्जुनौ। द्वन्द्वं स्पष्टं वीप्सायां द्वि
त्वमन्यत्र स्वार्थे। अन्यत्रापीति। द्वन्द्वं युद्धमन्याति वर्ततेति यथा। अत्र द्वयोर्द्वयोरित्यर्थो वीप्सायां द्वित्वं। शीतोष्णसुखदुःखक्षुत्तृषा द्वन्द्वानि सहते इत्यत्र स्वार्थे
द्वित्वमेकशेषाद्बहुवचनं यथा चार्थे द्वन्द्व इति स्वार्थे द्वित्वं पुंस्त्वं लोकात्। अयं योगविभागो भाष्ये न दृश्यते द्वन्द्वं युद्धमित्यत्र मर्यादावचनेन सिद्धं एवं हि
युद्धे मर्यादा। शीतोष्णादिष्वभिव्यक्ता। सहचरितत्वं शब्दप्रयोगे बोध्यं चार्थे द्वन्द्व इति तु संज्ञाशब्दो व्युत्पन्नः अवयवार्थाभानादिति तदाशयः विस्तरस्
तु बृहच्छब्देन्दुशेखरे द्रष्टव्यः। शब्देन्दुशेखरे स्वल्पे पूर्वमर्द्धमपूपुरं। प्रीयतां तेन भगवान्। नृशिवयासहितः शिवः। भूषितः फणिभाष्येण यत्र लघुः शब्देन्दुशेखरः
॥ सत्ताहृत्कमलेष्वास्तां यावत्फणिफणाधरः॥ ॥ इति शिवभट्टसुतसतीगर्भजनागोजीभट्टकृते लघुशब्देन्दुशेखरे पूर्वार्द्धं समाप्तं॥ श्रीराम ॥

॥ इतिलघुशब्देंदुशेखरपूर्वार्द्धसमाप्तम् ॥ शुभमस्तु ॥

श्रीगणेशाय नमः॥ अथ वैदिकेषु विशेषमाह छंदसि पुनः पुनर्वसो ईनारे लोकेत्विति उडुनावयवभेदे समुदाये रूढत्वादिति भावः एवं विशाखयोरपि द्वेतारे तेन लोके द्विवचनमेव
योगविभागः छंदसीत्यस्योत्तरत्रानिवृत्त्यर्थः एवं हि चानुकृष्टत्वान्नोत्तरत्रानुवृत्तिः वतीति वत्प्रत्यये इत्यर्थः मनेरिति आदेशप्रत्यययोरिति षत्वं अनंगत्वादिति अंगस्य सस्येति त
त्राधिकारात्तस्यासत्यां गभसंज्ञानिमित्तयोरेकत्वाश्रयणेन भसंज्ञानिमित्तवसुशब्दनिरूपितांगत्वाभावादिति भावः एतद्वार्तिकद्वयं छंदोविषयमिति कैयटः संज्ञाद्वय
मिति तत्प्रयुक्तं कार्यमित्यर्थः अयस्मये अयसो विकार इत्यर्थे द्व्यचश्छंदसीति मयट् तेनागित्यनुवृत्तिप्रदर्शनार्थः इंधिभवतिभ्यां चेत्यस्य क्रमप्राप्तप्रथमोपन्यासत्यागे
बीजमाहै धेरिति [illegible]तेति प्रथमोध्यायः॥ हविषि वर्तत इति हूयते तत् होत्रं ततोग्निपदेन षष्ठीतत्पुरुषः अग्नये हूयत इति तत्त्वर्थप्रदर्शनं प वाग्वेति वाको [illegible] हो विस्तागपू
र्वके प्रसेषवर्त्ते द्वितीया त्रास्त्वसे सोपसर्गस्यादिर्वा विभाषोपसर्गे इति व्यवस्थितविभाषया सिद्धे निरुपसर्गार्थमिमारंभः पुरुषमृगश्चंद्रम इति बहुलग्रहणाच्चंद्रमः॥
सश्चतुर्थी व्यत्ययो बहुलमित्यस्यैवायं प्रपंचः अडभाव इति बहुलं छंदस्यमाङ्योगेपीत्युक्तेः घस्यिरिति क्तिनि घसिभसोर्हलि चेत्युपधालोपः समानस्य छंदसीति
सः न च भवतीति अंतं [illegible] तत्परं तु सार्वधातुकमात्रविषयमिति बोध्यं हेमंतशि शिशिरशब्दस्य हेमंतः शिशिरोऽस्त्रियामित्यमरादुभयलिंगत्वेपि हेमंतशिशिरे इत्ये
तन्निहितायेस्यष्टार्थं हेमंतशिशिराविति अमरस्य प्रमाद इत्यन्ये अहोरात्रे इति रात्राह्नाहाः इति पुंस्त्वं प्राप्तं द्विलमतंत्रं अहोरात्राणि विदधत् वस्लादे शासति
लुङ् सनोरिति विहितस्य [illegible] इति वृङ्वृञोः सामान्येन ग्रहणं [illegible] प्रपूरणे आङ्पूर्वः मध्यमपुरुषैकवचनं परावर्गिति परापूर्वस्य वृजेः अक्रन्निति क्रमः अ
नुगमेनिति गमेर्गमहनेत्युपधालोपः अत्तन्वेत्यस्मिन्नेतरे यत्रालिलेसत्वादीह मंत्रग्रहणमिति इति द्वितीयः अक्रन्निति कृञो लुङि तिपि मंत्रे घसेति च्लेर्लुकि सार्व
धातुकगुणे तिप्योहल्ङ्यादिलोपे रूपं अपृणुपेनमिति गुपेर्लुङि तसलं तुजादित्वादभ्यासस्य दीर्घः छंदस्यपि निष्टनिष्टर्क्यो व्यत्ययं विद्यान्निसः पत्वं निपातनादिति क्रमये
इत्रृमत्ययचलोपयोः दीर्घश्चेति अत एव नुगभावः शिवशीति शासेरित्यन्ये [illegible] हुले यजेर्य इति देवशब्दे उपपदे इन्नादिः प्रत्ययस्वरेणांतोदात्तत्वे कृदुत्तरपदप्रकृतिस्व
रेः स्त्रीलिंग एवेदं निपातनं [illegible] पृच्छ सीप्सायामित्यतः सीव्यतेरिति प्रतिपूर्वोद्दिनादिः [illegible] इति उपपदे इत्यर्थः लोकेत्विति [illegible] नकारलोपो न [illegible]
षणीति गांसनतीति विग्रहः अत्र सनोतेरन इति नकारांतस्य निषेधात्

ग·
ल· श·
शे· सु·
३८



॥ इतिलघुशब्देंदुशेखरपूर्वार्द्धसमाप्तम् ॥ शुभमस्तु: ॥

३८

श्रीगणेशाय नमः ॥ अथ वैदिकेषु विशेषमाह छंदसि पुनः पुनर्वसो ईं नारे लोकेत्विति उद्भूतावयवभेदे समुदाये रूढत्वादिति भावः एवं विशाखयोरपि द्वे जारे तेन लोके द्विवचनमेव
योगविभागः छंदसीत्यस्योत्तरत्रानिवृत्त्यर्थः एवं हि चानुकृष्टत्वान्नोत्तरत्रानुवृत्तिः वतीति वत्प्रत्यये इत्यर्थः मनेरिति आदेशप्रत्यययोरिति षत्वं अनंगत्वादिति अंगस्य भस्येति नि
त्राधिकारात् अभ्यासन्योऽंगभसंज्ञानिमित्तयोरेकत्वाश्रयणेन भसंज्ञानिमित्तवसुप्रत्ययनिष्पन्नादपि नांगत्वाभावादिति भावः एतद्वार्तिकद्वयं छंदोविषयमिति कैयटः संज्ञाद्वय
मिति तत्प्रयुक्तं कार्यमित्यर्थः अयस्मये अयसो विकार इत्यर्थे द्व्यचश्छंदसीति मयट् नेग्गागित्यनुवृत्तिप्रदर्शनार्थः इंधिभवतिभ्यां चेत्यस्य क्रमप्राप्तप्रथमोपन्यासस्यागे
वीजमाहे धेरिति इति प्रथमोध्यायः ॥ हविषि वर्ततइति हूयते तत् होत्रं ततोऽग्निपदेन षष्ठीतत्पुरुषः अग्नये हूयतइति तत्त्वर्थप्रदर्शनं पवाग्वेति वाक्ये जुहोतिस्त्यागपू
र्वकं प्रक्षेपे वर्तते द्वितीया त्रा स्थले सोपसर्गस्यादिर्वा विभाषोपसर्गे इति व्यवस्थितविभाषयासिद्धे निरुपसर्गार्थोपमारंभः पुरुषमृगश्चंद्रमसे इति वहुलग्रहणाच्चंद्रम
सश्चतुर्थी अभ्यासे वहुलमित्यस्यैवायं प्रपंचः अडभावइति वहुलं छंदस्यमाङ्योगेपीत्युक्तेः सग्धिरिति क्तिनि घसिभसोर्हलि चेत्युपधालोपः समानस्य छंदसीति
सः न च भवति अंगारत्वं अनंतरं तु सार्वधातुकमात्रविषयमिति बोध्यं हेमंतशि शिशिरशब्दस्य हेमंतः शिशिरोऽस्त्रियामित्यमरादुभयलिंगत्वेपि हेमंतशिशिरे इत्ये
तस्मिन्हतायेस्पष्टार्थं हेमंतशिशिरावित्यमरस्य प्रमाद इत्यन्ये अहोरात्रे इति रात्राह्नाहा इति पुंस्त्वं प्राप्तं द्वित्वमतंत्रं अहोरात्राणि विदधत् घस्लादेशः स्पति
लुङ्सनोरिति विहितस्य घ इति वृङ्वृञोः सामान्येन ग्रहणं आपाति आपूरणे आङ्पूर्वः मध्यमपुरुषैकवचनं परावर्गिति परापूर्वस्य वृजेः अकर्निति कर्मः अ
तुग्मनिति गमेर्गम हनेत्युपधालोपः अत्र नवेदस्थितेरे यजुरालि लोसत्वादोह मंत्रग्रहणमिति इति द्वितीयः अकरिति कृञो लुङि तिपि मंत्रे घसेति च्लेर्लुकि सार्व
धातुकगुणो निपहः लत्याचिलोपेरूपं अकृमुपेनमिति गुपेर्लङि तमसत्तु जोदित्वादभ्यासस्य दीर्घः छंदसि निष्टनिष्टर्क्यव्यत्ययं विद्यान्निसः पूर्वनिपातनादिति [illegible]
ऽत्र प्रत्ययवर्णयोः दीर्घश्चेति अतएव नुगभावः शिक्षादिति शासेरित्यन्ये [illegible] ने यजेर्य इति देवशब्दे उपपदे इन्नादिः प्रत्ययस्वरेणांतोदात्तत्वं कृदुत्तरपदप्रकृतिस्व
रः स्त्रीलिंगएवेदं निपातनं पृच्छेः प्रच्छ शीप्सायामित्यतः सीव्यतेरिति प्रतिपूर्वाद्दिवादिः व्रश्चणीति उपपदे इत्यर्थः लोकेत्विति व्रश्च [illegible] नकाय वौ ध्नो
षणीति गंसनतीति विग्रहः अत्र सनोतेरन इति वकारांतस्य निषेधात्

ल॰ शा॰ गोसनिशब्दस्य संबनादिषु पाठः करिष्यत इति सनोतेरन् इति सूत्रस्य भाष्याश्रयणं षत्वं न प्राप्नोति तथापि इदं षत्वं मूर्धन्यवत्पाठो वैदिकसंप्रदायात् अत एव प
पू॰ वै॰ दकालेऽस्य मेव पठंति गोसनिमिति यत्तु सुषामादिषु षत्वमिति तन्न उक्तसूत्रेण भाष्यविरोधात् येपथ्यामिति पंथानं रक्षंतीति हविर्मथंतीति विग्रहः छंदसि सहः लोके तुरा
२ साहमित्यादि प्रयोगाश्चिंत्या इति हरदत्तः वहेश्च अस्य लोके प्रयोगः चरंति के विद्विष्ठो इति हव्ये नंतः हव्यशब्दे उपपदे वहेर्ञ्युट् पादस्योमध्यस्येत्यर्थः तदाह पादमध्येभि
ति जनसनखनक्रमगमो विट् उपसर्गे सुपि चोपपदे एभ्यः विट् इति विड्वनोरित्यत्र विशेषणार्थः वेरपृक्तस्येत्यत्र सामान्यग्रहणार्थश्च अप्सुजा गोजाः गोषु जायते गोषा सनोति
न्न सनति वि सा निखनति दधिक्रा मति अग्रेगाः गच्छतीत्यग्रेगाः सर्वत्र विड्वनोरित्यात्वं अग्रेगा इति सप्तम्या अलुक् अवेयज इति योगविभाग उत्तरार्थः वि
जुपे मंत्रे इत्यनुवर्तमाने छंदोग्रहणं स्पष्टार्थं छंदो ब्राह्मणानीति सूत्रबलेन ब्राह्मणे मुख्यछंदस्त्वस्यानंगीकारात् सुधीवेत्यादौ घुमास्थेतीत्वं वनिपि तुकि
त्वाभावान्नेत्वं अयं परादौ वरे इति बहुलमुक्तेति नियमार्थः क्विप्प्राप्तेः प्रसूयत इति भावः बहुलग्रहणात्क्वचिन्नापि तु घातः छंदसि लिट् छंदसि लुङ् लङ्
लिट् इति धातुसंबंधाधिकारस्थं कसुश्चेति योगविभाग उत्तरार्थः अनंतरस्यैव लिटो यमादेशाः लिट इति तु प्रत्ययान्तरत्वाभावाय अनयोः कित्वं तु ऋच्छत्यृतां
मिति प्रतिषेधविषयगुणस्य तेर तु इत्यादावविवृतातिरागात् जीवानित्यादौ प्रवृत्तिवारणाय ईजान इत्यादौ लिटः कित्वादेव संप्रसारणं सिद्धं अंजेराजिवानित्यादौ
नलोपः पोपिच्छेरुभयथेत्यनेन न सार्वधातुकत्वान्ङित्वादेव सिद्धः न चैवमाविवानित्यत्रापि गुणो न स्यात् आकारांतरप्रश्लेषेण आधातोः पुनर्विधानादिति भावः
क्याच्छंदसि किर्धीय इति व्याख्यानात् कुड्वादियं तादपि यमस्य यो नो शाकुनं भुरण्युमिति यथा लोके न सूयत इति तु लोहितादिसूत्रभाष्यरीत्या साधु मंत्रे वृषेष
सूत्रेयं च मत्यर्थं प्रथमा वृषुसेचने इष इच्छायां मनज्ञाने मनु बोधने इत्युभयोर्ग्रहणं विदादीनामपि यथादर्शनं क्तौ विधातव्य उदात्तवचनमुत्तरार्थं नभयज्ञो भावे क्य
वृदात्तो यथा स्यादिति प्रमतो नादौ च निनीति पूर्वपदप्रकृतिस्वरार्थं च लोडर्थ इति पूर्वपरान्वयि अकरमिति कृमृदृरुहिभ्यश्छंदसीति च्लेरङ् ऋदृशोऽङि गुणः उदाह १
रणेषु धातुसंबंधो मृग्यः सिपबहुलं अयं विकरणः यासि सीषादि इत्यादौ सिपा व्यवधानादिणिनिषेधो न विहितविशेषणं लोपिच्छादसत्वान्न तत एव च लसार्वधातु
कानुदात्तत्वे नैतन्नत्रेत्यनोवेनिवर्तते तदाह लोपावेति परस्मैपदेष्विति षष्ठ्यर्थे सप्तमी परस्मैपदे तिङ् आमिकारांतानामित्यर्थः पजानीति पश्चाद्गतौ तिप आट्

जिह्वायंत्य इति छंदसि परेच्छायामिति क्व च अश्वाघस्यादिति योगविभागेनालं अन्यस्यापेक्षावं न इति इदमेव जिह्वाचरणं नाम अन्येनूपमाना इत्यत्रापि छंदसत्वात्
चारेक्यच माहुः अणि श्व्यन्छानजिति अपिश्वाव्दा दाहाव पियोः स्कभायदुत्तरं अस्कभ्नाहीत्यर्थः व्यत्ययो व्यतिक्रमस्यगमनं व्यतिपूर्वादिणो भावे ण च त वक्कविरस्य
विषयावगाहनं क्वचिद्वौ क्वचित्त्रय इत्यादि लिङिति तस्य पमसधातोर्गुणः नित्यं ङित इति सलोपः यासुट् अतो येयः यलोपः आद्गुणः विकरणप्रकरणे व्यत्यय इत्येव
सिद्धे बहुलग्रहणं सर्वविधिव्यभिचारार्थं तदाह सुप्तिङिति बहूनर्थान्लाति आदत्ते इति बहुलं तस्य भावो बाहुलकं मनोज्ञादित्वाद्वुञ् दक्षिणायां इत्यत्र स्याद्
भावश्छांदसत्वात् उपग्रहपदेन लादेशव्यंग्यं स्वार्थत्वपरार्थत्वादि तस्नीति निमित्तलादेशोप्युपग्रहपदेनोच्यते इत्याशयेनाह उपग्रह इत्यादि मधुन इति
मांसे इति अमृतस्यारयोर्वा चकोमधुशब्दो नित्यक्लीव इति भावः विपूयादिति युमिश्रणे विपूर्वः विशेष इति अचि अत्र अदायेत्यवग्रहः अणि आदायेति स्यात्
नलक्षणेन त्वकारा इति न्याये नात्र फलांतराभावाद्व्यत्ययफलं चिंत्यं लिङ्याशिष्यङ् स्यागागमिवचिविदिशकि रुहिष्वेवायमङ् विकरणः प्रायेण दृश्यते
बहुलं छंदसीति अन्यथा स्मत इदितीत्वं स्यात् गुणस्तु नकित्वादिति भावः तुमर्थो भावः अव्ययकृतो भाव इत्युक्ते भाव इत्येव सिद्धे तुमर्थग्रहणात्साध्यावस्थ
णस्य विभाषा छंदसीत्येतदपवादकताया एव युक्तत्वाच्च अत एव कात्यायनेन मंत्रे स्वरक्रिया यथाम्नातमृषिर्भाषात इति पूर्व पठितानां वादित्यत्वात् स्मर्यते चै-
वं एकश्रुतिर्दूरात्संबुद्धौ यज्ञकर्मण्यसुब्रह्मण्या साम जपन्यूंखयाजमानवर्जमित्युक्तं अत्र वा शब्दः पक्षव्यावृत्तौ तान एव त्वर्थः तान एकश्रुतिरिति तद्भाष्यकृतः

लौ° का° तैत्तिरीयानुसूत्रस्य वा ग्रहणं विकल्पार्थकमाहुः तेषां नित्यत्वादिति वाक्यशेषविरोधस्तस्माद्यजुष्येकश्रुतिरेव अत्र सूत्रे जपादिग्रहणं याजमानमंत्राणामप्युपल
श्री° स्व° क्षणं कात्यायनसूत्रस्वरसात् वस्तुतः कात्यायनप्रातिशाख्ये तानलक्षणमेकं स्वरमाहुर्यज्ञकर्मणि सामजपन्यूङ्खवर्ज्जं प्रावचनो वा यजुषी त्युक्तेर्यजुषि त्रैस्वर्य
९९ मपि तत्र प्रवचनशब्देन पाठ उच्यते तत्र भवो वा स्वरो यजुषि यज्ञकर्मणि त्रैस्वर्यलक्षणो इति तद्भाष्यकृतः यद्यपि तत्समाख्याबलात् अध्वर्यवीयत्राह्मणे तत्तथापि अवि
शेषात्सर्वशाखोपनिषत्केर्मणि त्र्यायाचानेनामपि त्रैस्वर्यं परं तु प्रागुक्तकल्पसूत्रपाणिनिसूत्रतद्भाष्यादिपर्यालोचनया एकश्रुतौ धर्माधिकारबोध्यं वैकल्पिके
ध्वादिनोऽवधारणमिति न्यायात्संकल्पकालेऽगतरन्यतरो होतः आवश्यक मगृ [illegible] इत्यनयजति चोदनाचोदितानामेव ग्रहणमिति स्मार्ते गृह्याल्यां पाकोपा
कर्मादिप्रयोगेष्वनेकश्रुत्यमित्यन्यत्र विस्तरः उच्चैस्तरां वा अधिकरणं [illegible] प्रधानो [illegible] व्यात्तद्धि शिष्टभवनक्रियाकर्तरि वर्तमानात् क्रियाप्रकर्षप्रत्यये नोदा
त्ततरत्वस्पर्शे वषट्शब्देन वौषट्शब्दो लक्ष्यते व्याख्यानात् तत्रैकारस्य वृद्धिप्रेक्ष्य [illegible] प्लुतोदात्तत्वविधानात् प्रकारस्यानेनन्तरपक्षयोदात्ततरो विधीयत इत्येके
अन्ये तु [illegible] प्लुतोदात्ततरत्वं याज्यावाक्यीयेकश्रुत्यपेक्षया प्रकर्ष इत्याहुः इदमेव युक्तं भाष्यसंमतं चेति विवेकः अस्योदात्तस्येत न्याय [illegible] तेकर्तव्यत्वेनोक्तत्वादस्मि
[illegible] न प्लुतोदात्तस्याप्यसिद्धत्वाच्च शेषनिघातो नेति बोध्यं पक्षे एकश्रुतिः विभाषाछंदसि ननु विभाषाग्रहणं व्यर्थं वाग्रहणानुवृत्त्यैव सिद्धेः न च स्वतंत्रकर्मणीत्यर्थं
निरस्यर्थं [illegible] अनुरोधेन व्याख्यानमत एव न तन्निवृत्तेः संभवादिति चेदुच्यते आरभ्या विभाषा छंदसीति पदच्छेदार्थं तेन भाषायामपि पाक्षिकैकश्रुतिः अत एव श्रौतोधा
वति अलंबुसानां यातीति द्व्यर्थवाक्यमिति पक्षे [illegible] ते भाष्यं संगच्छते तत्र चेति आं तोदात्तं इत इत्यनुवृत्तिरमित्यनेन स्वेन इति वृत्तादिलोदात्ते [illegible] अलमिति निपातत्वाद्
[illegible] दात्तं वुसशब्दो तोदात्तः एवमलंबुसशब्दोऽपि एकश्रुत्यभावे हि स्वरभेदेन कथमेकं वाक्यं द्व्यर्थं स्यादिति बोध्यं अत एव दांडिनायनेति सूत्रे भाष्ये [illegible] एकश्रुतिः सर्व
नामेति अत एवाभियुक्तानां विरुद्धस्वरकात्युक्तबहुत्वाश्रयणेन श्लिष्टकाव्यादिनिर्माणं संगच्छते अत एव काव्यप्रकाशकृता वेद इव लोके स्वरो न विशेषाय हेतुरित्यु ९९
क्तं एकश्रुत्या व्यवहारादिति तदाशयः किमर्थं तर्हि यज्ञ्युपात्तमपि प्रकृत्यविभाषाभाषायामिति सूत्रितमिति त्रैस्वर्यलक्षणप्रक्रमे पाक्षिकानुदात्तलाभायेति [illegible] एते
न भाषायां स्वरो नास्त्येवेति भ्रान्ताः परास्ताः स्वरविधौ छंदोऽधिकाराभावाच्चेति दिक् परं तु मंत्रे त्रैस्वर्यप्रसक्तावेकश्रुतिर्बह्वृचानां तैत्तिरीयाणां तु भिन्नयत्रापि त्रैस्वर्यं

मिति व्यवस्थितविभाषात्वमस्य छंदसि स्वीकृतं कैश्चित्तन्नयुक्तं शाच्छोरिति सूत्रे भाष्ये परिगणितव्यवस्थितविभाषास्वपाठात् तत्र हि देवत्रातो गलो ग्राह इतियोगे
च सद्विधिः मिथस्ते न विभाष्यंते गवाक्षः संशितव्रत इत्युक्तं अत एव केषुचिद्देशेषु स्वाध्यायकाले सर्ववेदानामेकश्रुत्येन पाठो दृश्यते न चैवं छंदोग्रहणविषयत्वं छं
स्मिंस्त्रैस्वर्यं धर्माधिक्यं लोके तु समं तेत्येतदर्थं तत्सत्वात् तथापि छंदोग्रहणसामर्थ्यात् भाषायामप्यावैलक्षण्यं कल्प्यं व्यवस्थितविभाषात्वेन मपालेषु विशेषाभावात् न
हि छंदसीत्यनेनन्त्वदुक्तार्थोपि वाच्य इत्युपालभ्यते एकश्रुति स्वरसर्वनामेति भाष्ये लाघवं बोधनाच्च यथा सर्वनामशब्दात् लादयः सर्वपदस्थाने प्रयुज्यंते एवं सर्वस्वरस्था
ने एकश्रुतिः प्रयोक्तव्येति तदर्थः अनेन स्पष्टमेव त्रैस्वर्यैकश्रुत्योरैच्छिकविकल्पविषयतोक्ता वृत्तिकारोपि छंदसि ऐच्छिकमेवैकश्रुत्यं मन्यते इदानीं केषांचिद्धर्माधिक्या
य त्रैस्वर्येण पाठः परंपरासंप्रदायेन अन्येषामेकश्रुत्येनेति संप्रदायश्रद्धा जाड्यं न तु तेनेनान्यथा पठंति नेतावता विकल्पस्यैच्छिकत्वभंगः न मैवं पूर्वा...त्र इन्द्रह यत्तक
मणीत्यस्याप्रवृत्तौ अछंदसीति छेदेन नैकश्रुत्यापत्तिः धर्माधिक्याय त्रैस्वर्येण कैश्चिद्भिः पाठनादोषादित्याहुः न सुब्रह्म ननु विभाषेत्यस्य व्यवस्थितविभाषात्वात्स्वरितस्य
नु रोगं शंति ज्ञापकाच्च सुब्रह्मण्यायां तद्भावसिद्धौ नेति व्यर्थमिति चेन्न व्यवहितपरत्वकर्मणो त्वस्यापि निषेधार्थं तत्सत्वात् स्पष्टं चेदं कात्यायनसूत्रे तद्याह यज्ञे त्योर्दिदं
वे चेदं सूत्रं यज्ञकर्मणि स्वाध्यायकाले च प्रवर्तते इत्याहुः केचित्तु यज्ञकर्मण्येवास्य प्रवृत्तिर्नेति तु स्पष्टार्थमेव तेन स्वाध्यायकाले स्वरित एव विभाषा छंदसीति तु व्यवस्थि
तविभाषात्वान्न ततः परेषामनुदात्तानामेकश्रुतिश्चेति वदंति सुब्रह्मण्यायामिति सुब्रह्मण्याशी साधुरिति यत् निगदे स्वरितं तदात्मसहैकादेशौ तरतमत्वात्स्वरितः ओमिति निपा
तत्वादाद्युदात्तं तेनैकादेशोत्यांतरतम्यात्स्वरितः एकादेश उदात्तेनेति तु न प्रवर्तते अनुदात्तस्येत्यस्यानुवृत्तेः तस्थाने नोदात्तः स्पष्टं चेदं भाष्ये इंद्र आगच्छेत्यत्र इंद्रेत्या
मंत्रित सुब्रह्मण्यायां हि तौ यवर्णोः नुदात्तः स चोदात्तादनुदात्तस्येति स्वरितः तस्थाने नोदात्तः न चैवं कर्तव्ये स्वरितोः सिद्धः एतत्कार्यमुत्कृष्यत इत्युक्तेः अत एवासिद्धवदा
नेयो निघातान एवमग्रे पृष्ठे असावितीति असाविति प्रथमांतोपलक्षणं एवममुष्येत्यपि षष्ठ्यंतस्य एतानि वार्तिकानि गार्ग्य इति न च नेनानितस्योदात्तत्वेपि अस्य
सिद्धत्वाच्च पनिघाताभावे गाकारोनुदात्तो ऽस्यादिति चेन्न इष्टापत्तेः स्वरितोदात्तयोः समावेशाभावेन बोरपि समावेशात् स्यान्नस्येति अत्रस्येति विवक्षितं पूर्ववार्तिकार
भात् देवब्रह्मणोः सुब्रह्मण्यानिगदांतर्गतयोरित्यर्थः देवाब्रह्माण इति इदं वैकल्पिकं देवब्रह्मणोरनुदात्तत्वमके इति भाष्यात् पक्षे त्वेकश्रुति दूरात्संबोधनसत्वात्

स्व॰ प्र॰ अत एवैकश्रुति दूरात्संबुद्धाविति सूत्रे इदमेकश्रुतेरुदाहरणं भाष्ये उक्तं स्वरितात्संहितायां अत्रानुदात्तानामिति बहुत्वं अविवक्षितं तेनाग्निमीडे इत्यादिसिद्धिः बहुवचनोच्चा
प्र॰ स्व॰ रणं त्वनेकत्वे सर्वेषां यथा स्यात् अन्यथा तस्मादिति परिभाषया पूर्वस्यैव स्यात् यदि तु स्वरविधौ संघातः कार्यी तदुच्यते तदा सकृदर्थं संहितायामित्येतज्ज्ञापयति अन
९२ न्यपंचमीनिर्देशोत्कालो नव्यवधायक इति तेन नतिष्ठुतिद्र इति निघातः पदपाठेपि सिध्यति इमं मे इति मेशब्दोनुदात्तः तस्योदात्तात्परत्वेन स्वरितः न चास्य स्वरित
स्य प्रकृतसूत्रदृष्ट्या असिद्धत्वं नन्वस्वरितादित्या अयात्सिद्धं विकारः सुमन्त्वादौ चारितार्थ्यादिति वाच्यम् तस्मादित इत्यादि नवसूत्र्याः सत्वोसिद्धत्कार्यशास्त्रा
नेभगवता निवेशितत्वात् अत एव स्वरितस्वरणो रिति सूत्रं सार्थकमित्याहुः उदात्तस्वरितपरस्य सन्नतरः अनुदात्तः तस्यानुदात्तस्यापि एकश्रुति दूरादिति सूत्रस्य भाष्ये उदा
त्तादनुदात्तानुरागवशादेकश्रुतिरुदात्तोऽनुदात्तो वेति संदेहे नोदात्तः उच्चैस्तरां वा वषट्कार इति ज्ञापकात् अनंतरं तरनिर्देशः नानुदात्त उदात्तस्वरितपरस्येत्य
त्र सन्नतर इति ज्ञापकात् तत्र तरनिर्देशः अपर आह एकश्रुतिरुदात्ता उच्चैस्तरामिति ज्ञापकात् तत्र तरनिर्देशः उच्चैस्तरामित्येतद्भवति अनुदात्ता च सन्न
तरसंज्ञा ज्ञापकात् तत्र तरनिर्देशः सन्नं दृष्ट्वा सन्नतर इति भवतीत्युक्तं तत्राद्यज्ञापकमेवं कैयटेनोक्तं यद्येकश्रुतिरुदात्ता तदा वषट्शब्दस्यापि यज्ञकर्मणीत्येकश्रुतेः सि
द्धत्वादुच्चैस्तरामिति सूत्रं नारभ्येत तेन हि पक्षे उदात्तपक्षे एकश्रुतिर्विधीयते एवमनुदात्तत्वे एकश्रुत्यनुवृत्त्यैव सिद्धे सन्नतरग्रहणमनर्थकं तस्मादुभयानुदात्तयोः
र्भेद इति तरोधानमेकश्रुतिरिति अंत्यमते उच्चैरिद्धि इति प्रतीकमुपादाय सोमस्याग्ने वीहीवौषडिति मंत्रे यज्ञकर्मणीत्येकश्रुतौ प्राप्तायां तदपेक्षया वौषट्शब्दस्योदात्ततर
त्वं विधीयते सति चैकश्रुतेरुदात्तानुरागे तदपेक्षः प्रकर्षो युज्यते यथा मलिने वस्त्रे शौक्ल्यानुरागे तदपेक्षो वस्त्रान्तरे शुक्लतरव्यपदेशः। सन्नं दृष्ट्वेति एकश्रुतिगतमित्यर्थः
एवं च पक्षद्वयेपि स्वाभाविकोदात्तानुदात्तापेक्षया दात्ततरानुदात्ततरयोर्न कश्चिन् श्रुतौ विशेषः नाप्युच्चारणे यत्नविशेष इति लभ्यते सप्तस्वरगणनायामपि भाष्ये
उदात्ततरानुदात्ततरयोर्न कश्चिच्छ्रुतिगतो दात्ताद्यपेक्षया वातिशयविशिष्टो बोध्यो अनुदात्तस्य तद्विधाने त्वेकश्रुतिबाधनार्थं यत्वेकश्रुतेः स्थाने सन्नतरविधान- ९२
मिति तन्न मानाभावात् किं चैकश्रुतिपरस्य षष्ठ्यंतत्वकल्पने न मानं अपि चैकश्रुतिशब्दस्य स्त्रीलिंगत्वेन स्वरितपरस्येति लिंगविरोधः एवं चैकश्रुतिविषये एव ता-
स्य विधानमित्यग्निं कन्येत्यादावपि सन्नतरापत्तिरित्यपास्तं अनुदात्तानामित्युपक्रमात्सर्वेषां मा भूदित्यस्यैव यथा स्यादित्यर्थपदग्रहणं नन्वेवं सति नवसूत्र्याः पूर्वत्रा-

तेउत्कर्षत्वस्यासिद्धत्वात् गंगेइत्यादिवत्स्वरस्वनी कारस्यापि पूर्वेणैकश्रुतिः प्राप्नोति मम तु न दोषः तस्याएकस्थानि सन्नतरविधानादिति चेन्न अत्र पाठेन पर[illegible] स्वरं प्रति न
वसून्या असिद्धत्वाभावबोधनात् अन्यं प्रति त्वसिद्धत्वमस्त्येव एतेनायं सन्नतर एकश्रुतेरिवोदात्तादनुदात्तस्येति स्वरितस्यापि परत्वाद्बाधकः स्यादिति नोद्यं स्वरितो वा
मितिपरास्तमित्याहुः शुनद्वीति आमंत्रितत्वेपि पादादित्वान्न निहतं इति साधारणस्वराः प्रकृतिर्हि द्विधा धातुः प्रातिपदिकं च तत्रादौ सर्वेषु लक्ष्या[illegible]स्वराना ह धा
तोः कर्षात्वतरत्यन्तो त इति वर्तते गोपायतमिति गुपेर्न तो दात्तालयः तदंतमप्यंतोदात्तं एकाच्स्वपि व्यपदेशिवद्भावादस्य प्रकृतेः येपि उपदेशेऽनुदात्ताः पचादयस्ते
ष्वप्ययं विधिः अनुदात्तोपदेशस्येड्निषेधविधौ चारितार्थ्यात् पिबाद्यादेशानामाद्युदात्तत्वं निपातनसामर्थ्यात्तेषु नायं विधिः स्वपादिः अदादिषु आगणांतात्स्व
पादयः लसार्वधातुकमित्यस्य सप्तम्या विपरिणामः अच्यनि टीति समीरणं नात् अनिटीति किं स्वप्यात् लेनि किं चान शिस्वपानः सार्वधातुके किं सुषु
पात् किंत्येवेति नित्वद्भाष्ये दृष्टं अभ्यस्तानामादिः आदिरित्यनुवर्तमाने पुनरादिग्रहणं नित्यार्थं अचीति किं दद्यात् अनिटीति किं जक्षिष्य इदं सूत्रं[illegible]
त्रिनिमित्त निघाते प्राप्ते आद्युदात्तार्थं अनुदात्ते च अच्यनिटीति निरस्तं अनुदात्त[illegible]बहुव्रीहिरित्याह अविद्यमानेति अतएव मा स्म दधादित्यादौ नित्यत्वा
दिकारलोपे कृतेप्ययं स्वरः प्रवर्तत एव अभ्यस्तानामिति किं उर्णोति चकालीत्यादावाद्युदात्तार्थमिदं इदानीत्त्वांतरं[illegible] पूर्वं धातुस्वरेणोदात्ते ततो द्विर्वचने निघा
तेनोभयोरनुदात्तत्वाभावे विपर्यये त्वोभयोस्तत्वप्रसावि इदं स्पष्टा चेयं रीतिः[illegible]सैषपक्षो नामि[illegible] सूत्रे भाष्ये न च धाता[illegible]तस्याद्युदात्तत्व करणपाठेनाद्युदात्तविधायकलेनुद
तेचेति न कर्तव्यमिति धातोरिति सूत्रस्थ भाष्यमसंगतं लङीत्यात् तस्याद्युदात्तविधायकस्यैव[illegible]कलादिशिचसंस्थाने हि द्विर्वचनमाश्रित्य पूर्वं[illegible]तद्वाक्यत्वपि
ज्ञापकता[illegible]चिंत्य एवेत्यन्यत्र विस्तरः भीह्री अत्र लसार्वधातुकमिति मंडूकप्लुत्या संबध्यते ममालितिमध्ये हर्ष इत्यस्य प्रत्ययविकरणत्वेपि[illegible]इसः प्राप्ः[illegible]
भ्यामादीनां किं ददाति अनुदात्तेचेति तु मिमीत इत्यादौ मा[illegible] तत्र हि मा ओंडिन्वा ह लसार्वधातुकानुदात्तत्वं अभ्यस्तानां किं[illegible]धातिपिति किं जागृतं लसार्वधातु
क इति संस्पृष्टार्थं मनु प्रत्ययस्य स्वरितेति किं मर्त्यभ्यादिभ्यः परस्यापि तः प्रत्ययस्यैव संभवादिति चेन्न प्रत्ययात्पूर्व एकैकादेशोपि यथास्यात् तिसधातु उदात्तो मा भूदिति नचोदात्तन्व
दीनाम जघर्मत्वेनापि नेतीति[illegible]सम्यानिर्दिष्टपरिभाषाप्रवृत्त्या अलोन्त्यपरिभाषया चान्त्यस्यैव भविष्यतीति वाच्यं स्वविधौ संघातः कार्यीति अर्थस्यापि ज्ञापनात् एवं चा

ल. श. ङ्गोत्तरस्य वा त्वादीनामप्रवृत्तिः अत एव कर्त्तरि त्वम् इति सूत्रे तं ग्रहणं चरितार्थं संवेप्यनेकोदात्तानामयोगपद्यं युगपद्ग्रहणं तत्त्वापि पर्यायेण सर्वेषां स्यात् न त्वभावार्थं प्र
शे. ख. त्ययादिनि चरितार्थं तेनासीत्यत्र न्यादौ चित्स्वरात्तास्यादिभ्योऽनुदात्तत्वविप्रतिषेधेनेति सिद्धं अन्यथा विलेखीनेत्रोदात्तत्वं अनुदात्तत्वं चादेरित्यसंभवाभावात्प्र
१३ तिषेधोः संभवतः स्यादिति दिक्। नन्वेवमपि प्रत्ययेपि तीत्येवोच्यतां किं पूर्वग्रहणेन न चाभ्यस्तानां सार्वधातुके इत्यनुवृत्त्यापि नोः प्रत्ययस्यासंभवेन प्रत्ययग्र
व्यर्थमिति वाच्यम् पूर्वोक्तार्थज्ञापनार्थमावश्यकत्वात् प्रत्ययपरत्वे तु क्तौ तु सामर्थ्यान्निर्दिष्टपरिभाषायाः पुनः प्रवृत्त्या व्यवहितस्यैव ग्रहणमिति न दोष इति
चेन्न तीवर्थः सप्तम्यन्तं तस्मिन्नित्यस्य इति ज्ञापनार्थत्वात् प्रत्ययादिति पंचम्योर्निर्दिष्टपरिभाषाप्रवृत्त्या व्यवहितपूर्वस्य कार्यित्व एव पूर्वशब्देन ग्रहणं
न दोषः इदं च ज्ञापकस्य विशेषापेक्षत्वान्निर्दिष्टपरिभाषाविषय एव प्रवर्तते अत एव तस्मिन्निति विभाषेत्यादौ न दोषः न वा हि पूर्वोत्तरसाहचर्यान्न परिभाषाविषयः व
लुतः षष्ठ्यर्थे सप्तमीत्येव ज्ञाप्यते तदंतविधिस्तु येन विधिरिति परिभाषयान्यायसिद्धः चतुरः शसीत्यत्र च यथोना स्याः प्रवृत्तिस्तथा वक्ष्यते अत्र च हेव अ
देशात्रान्यापेक्षत्वे नञ्नित्यादिरित्यादावपि प्रवृत्तिः न चैवं गार्ग्या इत्यादौ यञोऽचेति लुकि आद्युदात्तत्वप्रसंगः इत्पदघटितेः नुबंधनिमित्तस्वरे कर्त्तव्ये आंगस्य
भावेपि प्रत्यये परतः पूर्वकार्यत्वाभावेपि लुमतालुप्ते प्रत्ययलक्षणं नास्तीत्यर्थस्य संज्ञायामुपमानमित्यनेन ज्ञापनान्न दोषः तद्धि चंचेत्यादौ आद्युदात्तत्वाय
अन्यथा कनो लुपि प्रत्ययलक्षणेन ञ्नित्यादिरित्येव सिद्धे तद्वैयर्थ्यं स्पष्टमेव अत एव अत्र यदस्य त्रटकौ लुकि न दोषः वस्तुतोऽत्र यदन्ते दौ न दोषः कार्यिणोऽ
भावेन प्रत्ययलक्षणप्रवृत्तेः प्रत्ययलक्षणेन हि तन्निमित्तमन्यस्य कार्यमतिदिश्यते न तु तस्यैव स्थानिवत्त्वं प्रतिपाद्यते असतः प्रसंगाभावेन स्थानिवत्त्वाबाधा
त् अत एव नखभिन्न इत्यादौ वैशाखादिकं न माहिदातामित्यादौ वाक्सिच इत्यस्य प्रवृत्तये इत्पदघटितेति पथिप्रियो मथिप्रिय इत्यत्र च पथिमथोः सर्वनाम
स्थाने इत्येतत्स्वरनिवृत्त्यर्थं न लुमताङ्गस्येति सूत्रभाष्यपठितमत्र लुमता लुप्ते प्रत्ययलक्षणं नेष्यत इति वचनमेव शरणं यदि शार्ङ्गरवाद्यपेक्षं कश्चित्स्वरे १३
कर्तव्ये प्रत्ययलक्षणं नेत्येव वक्तुचितं तु स्याच्चामन्त्रितस्य च सर्वस्य सुपीत्यादौ न दोषः इत्युच्यते तदा न काचिद्दोषशङ्केति वदंति केचित्तु विशेषापेक्षेन न
पञ्चत्वंतग्रहणसत्त्वासत्त्वाभ्यां स्वराश्रयकार्यभेदस्तत्रैव तत्प्रवृत्तिरिति भीह्रीत्यत्र हि पूर्वग्रहणाभावेन इदं तस्य कार्यित्वे प्रत्ययान्तानां भ्यादीनां सलोन्त्यस्य म

वन्नुदात्ते प्रत्ययांत्यस्य स्यात् सप्तम्यर्थपुरस्कारेनुपितमपहाय भ्यादीनामेवोदात्तः स्यादिति स्पष्टमुद्ग्रेदः उपोजमंगिति च अन्यतरस्यामित्यत्रापि दरिद्रु धातु विशे
यफलभेदः अग्निस्यादिरित्यादौ न तद्भेदः उभयथापि प्रकृतेरादेरेवोद्भूतत्वात् अजरूलत्रपरसप्तम्येव एवं च गर्गाइत्यादौ न लुमतेति निषेधादेव न दोष इति पथि
मथ्यर्थमपि वचनं नावश्यकं ननु सूत्रद्वये दितश्छ इति षष्ठी निर्देश एवास्तु किं परिभाषयेति चेन्न लाघवार्थत्वात् ननु चतुरः शसीत्यत्र फलभेदस्य स्पष्टत्वे
न पक्षद्वयेपि एतत्परिभाषाप्रवृत्तिर्दुर्वारा तथा च शसएवोदात्तत्वं स्यादिति चेन्न चतुरः शसङ् इत्येव वक्तव्ये मध्ये विजातीयसप्तम्यंतपाठेन अनडुह्यौ इत्याद्युः इदं
चिन्त्यं उपमानेसंज्ञायामिति सूत्रस्य भाष्यविरोधात् किं च सर्वस्य सुपीत्यत्राप्येवं सतितरां तसप्तमीनस्यात् तथा च न लुमतेति निषेधाप्रतोसर्वस्मामादिसिद्धि
चतुरः शसीत्यस्यापि लाघवार्थतायावक्तुं शक्यत्वाच्च न लुमतेति सूत्रस्य भाष्यं तु लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानं सर्वामंत्रितसिज्लुक्स्वरवर्जमप्रयोजनं
ऋगिकिं लुक्स्वराः पथिमथोः सर्वनामस्थाने लुङ्क्ष्वीति वार्तिकव्याख्यानपरं उपमानमिति सूत्रस्थं तु तत्पाख्यानपरमिति न तयोर्विरोधः इमानि च वार्तिकानिनु
लुमतांगस्येत्यत्रांगाधिकारः प्रतिनिर्दिश्यत इति पक्षस्त्वप्रत्ययेपरतः पूर्वस्य कार्यमात्रप्रतिषेध इति पक्षेपि आवश्यकानि सौवर्गाणां सप्तमीनांतदंतसप्तमीत्वात् अ
र पदत्वे चापदादिविधौ वितिवत् ञितिकित्स्वरस्यानंगत्वात् प्रतिषेधाप्राप्तिरिति कैयटः उपलक्षणं इह किंचिदंगाधिकारे लुमता लुप्ते प्रत्ययलक्षणं न भवति किं
विद्यान्यत्र न भवतीति सूत्रशेषस्य भाष्ये किंचिचेति ग्रहेणाह इदानीं सर्वत्र सुपीति प्रतिषेधो ग्रासइति तत्क्वचिद्भाष्यविरोधः किं चिच्चेति पनीकेति नितिस्वार
तिकैयटउपलक्षणं तथा व्याख्येयं इति सुधियो विभावयंतु लिति अत्राभ्यस्तानामिति नैसंप्रव्यते ष्ठवोलिलिखावः चिकीर्षकइति अत्र परत्वाद्द्वलोप नेच स्तेति
त्यः प्रत्ययांतस्य माभ्यासस्यानित्यत्वात् लोपोप्यनित्यः स्वरभिन्नस्य प्राप्तेः स्वरदीर्घयलोपेषु लोपाजादेशस्य स्थानिवत्त्व निषेधादीकार उदात्तः अत्र इति अभ्यस्ता
नामिति णमुलीत्यस्य वीवर्येत इति न्यायेन तदंत सप्तमी त्व चम्पा विपरिणम्यते अभ्यस्तानामादो णमुल् इति आदिरुदात्तः इत्यर्थः तेन जागरं जागरं लोलूयं
इति सिद्धिः लोलूयिषं लोलूयिषं इत्यादौ च नातिप्रसंगः लोलूयमित्यादावलोपस्य स्थानिवत्त्वं तु न स्वरे तन्निषेधात् एवं च विशेषाभावमभिप्रेत्य परसप्तम्येवमूले
उक्ता अभ्यस्तानामिति किं कंडूये कंडूयं एतेनामैवेति मूलेप्युच्चैः कारमिति उदाहरणं स्योपन्यासो हरदत्तकृतश्चिन्त्यः अभ्यस्तानामित्यनुवृत्तिपरवृत्तिविरोधात् यदि

ल·भा· गुव्यवस्थितविभाषाश्ववर्णेस्वतिप्रसंगनिरासमंगीकृत्यैतदनुवर्तिर्नावश्यकीतितदाशयस्तत्त्वं शाङ्कोरितिसूत्रस्थेनव्यवस्थितविभाषापरिगणनपरेणभाष्ये
धा·स्व· णविरोधः लोलूयंलोलूयश्चिमि आभीक्ष्ण्येहिलं परोलोलूयशब्दोऽनुदात्तः लोलूरित्युभयमप्युदात्तं नचतत्र कार्येऽव्ययोपदेश्यानिवर्त्यं स्वरविधौनतिषेधान् शे
९४ षनिघातः अत्र कर्त्रेषके अज्ञापितरंतसप्तमीत्वेनफलेविशेषः उपदेशोऽजंतप्रकृतिककर्मणांतस्यादिरुदात्तइत्यर्थान् लूयते केदात्तइतिप्रयुक्तस्वरेणमध्योदा
त्ता उपदेशेकिंकार्यंतरित्यादावित्वेरथैरलेचायेस्तोयथास्यादितिदृष्टं चनास्यनुदात्तेदितिसूत्रसमासैकदेशस्यान्युपदेशपदस्यानुवृत्त्यासम्यादिपरिसंख्यमेनचलब्धं
नचैवंजनेरंतर्भावितण्यर्थात्कर्मकर्तरिजायतेस्वयमेवेत्यत्रनस्यात् उपदेशेऽजंतत्वाभावादितिवाच्यम् यदितिविषयसप्तमीमाश्रित्यप्रत्ययोत्पत्तेः प्रागेवात्वप्र
वृत्तेरुपदेशइत्यस्यचयगुपदेशइत्यर्थइतिदिक् लूयते इत्यादिमध्योदात्तार्थंधात्वन्य उपोत्तमं रितोऽस्य उपोत्तमग्रहणमनुवर्तते चङ्दात्तइतिनिरु
नुअड्उपदेशात्परत्वेननास्यनुदात्तेदित्यनुदात्तः उपोत्तमं किं माहिदधत् अत्र चङ् एवस्वरः इतिधातुस्वराः अथप्रातिपदिकस्वराः नेत्वप्रायेणकृत्तद्धितप्रत्ययवले
नैवसिद्धाः उणादिषुउणादिप्रत्ययैः अप्रत्ययप्रक्षेपि टसूत्रैः क्वचिद्धिशिष्यविधानादित्यंभूत्वं अतएववृत्तौ यतेः क्विपिपुत्रीरित्यादीसर्वानुदात्तत्वमेव अतएव कर्मण्ण
लितिसूत्रेमांसशब्दस्यनत्विषयस्येतिषिट्स्वरमाशंक्यमनेर्दीर्घश्चेति औणादिकसप्रत्ययांतत्वाद्वंतोदात्तमाकैयटेनोक्ता मांसमेकः पिशंतीत्यादिलक्ष्यमपितथैव आ
ज्यशब्देतु आङ्पूर्वात् अंजेः क्वचिदितिपक्षे आद्युदात्तत्वंस्पष्टमेव एयतपक्षेतुनत्विषयस्येत्याद्युदात्तत्वं बोध्यं कर्षात्वतः कर्षतेराकारवतश्चापरेर्यमाष[illegible]तरंतस्यैतप्
र्थः क्तिन्यादिरित्यस्यापवादोऽयं वार्त्तिकं आरंतादित्यर्थे युक्तं आदंतभक्तत्वाद्यथा इत्यत्रैवस्यात् ननुपाकरूपादावपि घञासिनधातुविशेषणत्वान्नंतविधिः स्वरविधौ
व्यंजनमविद्यमानवदितितुनास्ति स्वरोहि श्यकविधेरभावात् प्रकृतनिर्दिश्यमानपरिभाषया आकारावयवत्वेपि आकारांताद्धन्तोर्विहितइत्यर्थः स्यात् इतिचेदयं
यद्यपिनिर्दिश्यमानपरिभाषया घञ एवोदात्तत्वं तथाप्यंतग्रहणं स्वरविधौसंघातः कार्यीति ज्ञापितत्वाद्द्वारेरंतस्यचपर्यायेणमाभूदित्यर्थमेवं चस्वरविधौसंघा १४
तः कार्यीति ज्ञापितत्वात् आदेरंतस्यचपर्यायेणमाभूदित्यर्थमेवं चस्वरविधौनिर्दिश्यमानपरिभाषायाअप्रवृत्तिरित्याहुः उंछादीनांच उंछ[illegible]जज्ञस्याद्य
संताः नृपव्यधावंतौवधइतिपाठस्तुचिंत्यः उदात्तनिवृत्तिस्वरेणसिद्धेः गरोविषवंतोबोदात्तः अन्यत्राद्युदात्तः वेदवेगवेष्टवंधाः करणे घञंताः भावे आद्युदात्ताः

बहुव्रीहौ कृतं र्थसि समासार्थमिदं परिहृतं सुपुनः परिहृतं वर्तनि स्तोत्रे स्तोत्रे साम निवर्तमानो वर्तनिशब्द उंछादिः अन्यत्र मध्योदात्तः स्वभेदः अन्यत्र वर्तन्यां
दाद्युदात्तः सा वर्तनी यो भावगार्हायां अन्यत्राद्युदात्तो मध्यभोगदेहावज्रंतः उंछादिराकृतिगण इति वहुवः घर्मतरु इति लिजभावे लिखितुपरं चैव सिद्धं न ज
स्यंतानामिति तु नास्ति चतुरः शसि अत्र सौवर्यः सप्तम्य इति न प्रवर्तते अन्यथा चतुरः शासित्येव वदेत् नेहेति तत्कारकारस्य नेत्यर्थः स्वरेणेति निषेधस्तु
पदृपाजादेशास्यैव स्वविधौ स्थानिवत्त्वाभावात्तस्यापि न तस्मादाद्युदात्तत्वैवेति भावः केचित्तु चतस्रादेशा आद्युदात्तनिपातनसामर्थ्याच्चतुरः शसीति न भव
तेति न च चतसृणामित्यत्र षट्त्रिभ्य इति विभक्तिस्वरस्यापि वाधापत्तिः हलादिग्रहणसामर्थ्येन तद्वाधात् तथा हि षट्त्रिचतुर्भ्यो वहुवचनविषयत्वाद्धि वच
नेकवचनेनस्तः उपसमस्ते संभवे पि विहितविशेषणान्न दोषः तत्र षड्भ्यो मष्णः सो लुगि वा न्याहलादयः त्रिशब्दे जसि नेदं सर्वनामस्थानमित्यधिकारात् श
सि एकादेशे उदात्तेनेत्यनेन न सिद्धं अन्याहलादयः तिसृ पि तिसृभ्यो जस इत्यनेन भाव्यं तिसृः पश्येत्यत्रोदात्तयण इत्यनेन भाव्यं चतुःशब्दे जसि असर्वनामस्था
न इत्यनुवृत्त्या न दोषः तस्माच्चतस्रः पश्येत्येवं व्यावर्त्यं यदि निपातनस्वरः स्वविभक्तिस्वरस्य बाधकः स्यात् हलादिग्रहणमनर्थकं स्यात् न च चतुरः शसीति
द्यावर्त्यं चतुरः शसीत्यारंभसामर्थ्येन तस्य बाधात् न च गौणे चरितार्थं वार्तिकप्रामाण्ये वृत्तत्वात् प्रत्ययत्वैरित्यादिः तत्तु तिसृभ्यो जस इति सूत्रस्थेन उपसमस्तार्थमिके इ
ति भाष्येण जस्ग्रहणवत् हलादिग्रहणस्यापि तदर्थकत्वसूचनात् वार्तिकव्याख्याने भाष्ये स्थितमपि भंगान्तरादूषितमेव तस्मादिति परिभाषणो न विहितविशे
षणे संभवति तदाशयः एवं हलादिग्रहणसार्थकं मनसि निधाय तत्प्रकाशं स्वमतेनैव वा पुनश्च मतः पश्येत्यत्र स्वरः प्राप्नोतीत्यादिग्रंथेन मूलेकृत एव
साधितं तस्माद्धैणष्ट्रीत्यादेश्चतुरः शसीत्यादेश्च प्रवृत्तिरस्त्येव सत्याभिधाने इति भाष्यसंमतमिति ध्येयं सुपो जमंतरं ते पदे इति सौवर्येषु सप्तमीनां
तदंतसप्तमीत्वादिति भावः षट्त्रीत्यस्यापवादः आवरभ्रितिति आ इति भिन्नं पदं विभाषाभाषायां पक्षे षट्त्रीत्यंतोदात्तत्वं सर्वस्य सुपि सर्वशब्दस्यागमो नो द्यु
दात्तो निपातितः उंछादिषु पाठात् मध्योदात्त एवं च सुपि किं सर्वतर इति हन्यतां चिंत्यं प्रत्ययलक्षणेन तत्रापि सुवंतत्वात् स्वार्थिकलरवादिस्तु न भाष्यारूढः
अत्र सुपीत्युक्तेः तत्फलं तु सर्वस्य विकारः सार्वः इत्यत्र सुप्युदात्तादिप्रकृतिकसुवंतत्वप्रक्षणेन सिद्धिः श्रवणं आद्युदात्तस्यैव प्रत्ययलक्षणेनापि सर्वस्वरस्येष्ट

ल॰ श॰ माणत्वात् सप्तमीनिर्देशस्तुल्यघवार्थः सौवरीणांसप्तमीनांतरंतसप्तमीत्वान् सर्वस्वरोऽन च्कस्येति वक्तव्यं सर्वके अत्राद्यौदात्तत्वएव स्निन्मादि सौवर्यइत्यस्यसाम
प्र॰ स्व॰ न्यतः प्रवृत्तिमभिप्रेत्याह ॥ गिरंतस्येति ननुजुगुप्सेत्यादौ संज्ञायाः परत्वान्नित्स्वरेकृते सन्नंतस्यधातुत्वे सति शिष्टत्वाद्धातुस्वरः प्राप्नोती तिचेन्न सनोनित्वसाम
९५ र्थ्येन सतिशिष्टस्यापिबाधेनाद्युदात्तत्वसिद्धेः न च सन्यङोरित्यादौ विशेषणार्थः सः अन्यथाव्न्स इत्यत्रापिस्यादितिवाच्यं धातोरित्यनुवर्त्यसशब्दांत् धातोरि
त्वविधानेनादोषात् पथिमथोः सर्वपथिमथिशब्दावंतोदात्तौ अत्रसौवरीणांतरंतसप्तमीपरत्वेपितुमर्थस्तुमेप्रत्ययलक्षणेनेष्यतेइतिमाध्यं तेनपथि
प्रियस्यत्रपूर्वपदप्रकृतिस्वरेणांतोदात्तएव सुपंथाइत्यादावपिप्रत्ययलक्षणेनगात्वेबसमासाद्याविभक्तिः सातुनपथिमथोर्विहितेतिनतत्राप्यस्यप्रवृत्तिः स
योनिवासे स्त्रियंतिनिवसंत्यस्मिन्नित्यधिकरणेपुंसिसंज्ञायामिति घः निवासे किं स्त्र्यशृंगाणामित्यादावेरजोभ्यां दंतोदात्तत्वमेवजयोऽप्यइति तेनैवकरणेघः अ
न्यत्रैरच्यंतोदात्तत्वं वृषादीनांच वृषुसेचने इगुपधलक्षणःकः आकृतिगणइति फिट् सूत्रेषुग्रामादीनांचेतिसूत्रितं सोप्याकृतिगणः एवंचाविहितानाद्युदात्त
स्यवृषादित्वंग्रामादित्वंवावोध्यम् अंतोदात्तस्यतुउंछादित्वंघृतादित्वंवावोध्यम् एवंचद्वाभ्यामेवसूत्राभ्यांसर्वेष्टसिद्धौइतरसूत्रद्वयप्रणयनंवैचित्र्यमेवान्न
दिष्वायेति दिक् एतदेवेति एतच्चोपपादितं निष्ठाचद्व्यजनात् आकारभिन्न आदिरित्यर्थः निष्ठेत्यादिरिषष्ठ्यर्थेप्रथमा अघात्त इत्यादौवकारइआस्यवहिरंगा
सिद्धत्वादनादितिप्रनिषेधोन आशितः कसकर्मकादप्यशेः कर्तरिक्तउपधादीर्घश्चात्रैवनिपात्यते आङ्पूर्वत्वेक्तमात्रं आङ्पूर्वत्वविवक्षितकर्मत्वेना
कर्मकत्वात्कर्तरिक्तवृत्तिः विवक्षाविवक्षयोश्चप्रयोगाधीनत्वान्नानिष्ठापादनमितितदाशयः आङ्पूर्वत्वेथाथघञिन्त्यस्याप्यवादीयं अन्येतुएयंतात्कर्मण्येवायंक्त इ
तिकर्त्तन्यनेचात्मैकर्मभूतएवविवक्षित इत्याहुः तदुभयमपिभाष्यासंमतं रिक्तेविभाषापूर्वोत्तरसाहचर्यातरिक्तशब्देविद्यमान आदिरित्यर्थः नतुतत्रैपरे इत्यर्थः रिक्तर
तिपक्षेप्रत्ययस्वरेणांतोदात्तः जुष्टार्पितेचछंदसि इति पक्षेभाषायांचप्रत्ययस्वरेणांतोदात्तौ जुषीप्रीतीत्यतः श्वीदितोनिष्ठायामितीट्प्रतिषेधः अर्तेर्णिच अर्तिह्रीतिपु ९५
कुमित्यंमंत्रे नवेवलंगतमर्थतामात्रं किंत्वारभ्यमाणेसूत्रे दोषोप्यस्तीत्याह अर्पिताः षष्ठिरित्यादिनासूत्रविरोधात्सपाठःपामादिकः इदमेवध्वनयितुंसूत्रमित्यत्र
पुष्पादृष्टमदोऽङ्पिचेतियोगविभागोयथासंख्यनिवृत्त्यर्थः एकादेशउदात्तेनेतिविभक्तेरुदात्तेप्राप्तेवचनं यतोना निष्ठाचद्व्याजिन्नत्वोद्यजसहलमेनुषतते नौ

भिन्नाद्धिहिनोयोयत्तत्तरं तस्येत्यर्थः अनावरूति प्रतिषेधोज्ञापयति हलस्वरप्राप्तौ व्यंजनमविद्यमानवदिति हलादावादेरचोःसंभवात्तद्धियकग्राहकं
मर्थेन हलोपिस्थाने उदात्तादिगुणकः कश्चित्स्यादित्यर्थाभिप्रायेण हलः स्वरप्राप्तिः स्पष्टं चेदं भाष्येति त्स्वरितापवादोयं ईङ् वंरल्यतो द्यनुबंधकत्वात्पूर्वेण
सिद्धिरितिभावः अयमपिति स्वरापवादः अत्र हङ् एवग्रहणमिति एतिसुप्यासिति सूत्रे निरूपितं विभाषा वेण्यशब्दोनित्यादाद्युदात्तः प्रायः स्थाणुरित्यनुवर्तमाने
अजिवृरीभ्योनिच्चेति व्युत्पादितत्वादिंधानेयदिवानयातदानो दात्तत्वंप्राप्तं यदिपान च तदाप्यंतोदात्तत्वमेव प्राप्तं यत्तु अमोःकास्योदात्तस्य लोपात्तलसार्वधा
तुकानुदात्तत्वे उदात्तनिवृत्तिस्वरेण प्राप्तं जंतो मध्योदात्तइति तन्न विदीधिविविदिभ्यो लसार्वधातुकानुदात्तत्वप्रतिषेधात् केचित्तु स्वरवचनस्यातिङ तेएवप्रव
त्तिः भाष्येपृथ मतोलिङीन्युक्तार्गेः विप्रोषेणेत्युक्तेर्लिङ्गभिन्नेलिङ्सदृशोऽप्रदादेशोन्येवप्रवृत्तिप्रतीतेरित्याहुः यदावेणुरिवेवेणुरिति कर्मणेषु मनुष्य इतिलुप्तरा
संज्ञायामुपमानमितिनित्यमाद्युदात्तत्वमिष्यते त्यागरागआदयानयइति तत्र कर्षात्वत इति पक्षे तोदात्तत्वं बोध्यं अंत्योपत्रिश्वपस्य स्वरेणैन्नोदात्तत्वं तत्र कुर्वन्त्य
ते चुरादावदंतौ मतोः पूर्वपूर्वमिति शब्दस्वरूपापेक्षयानपुंसकत्वादित्यस्य विशेषणं केचित्तु सूत्रे पूर्वशब्दं पुल्लिंगं पठंति स्त्रियां संज्ञायामित्यस्य स्त्रियां वर्तमाना
संज्ञा तस्यां विद्यमानआदित्यर्थस्तदाह स्त्रीनाम्नीति मंत्वंतं चेत्स्त्रीनाम भवतीत्यर्थः आत्किं इक्षुमती अत्र ह्रस्वनुड्भ्यां मतुबित्येव संज्ञायां किं खट्वावती स्त्रियां किं
उदुंबरावामउदाहरणे त्र चवद्धंचोनजिरादीनां शरादीनां चेति दीर्घः चाबुरर्थिकोन यांमतुप् मतोः किं गवादनी [illegible] पूर्वपदं हलस्यावधिभावात्तं ज्ञा शब्दसंबंधि
न आकारमात्रस्यस्यादिति पूर्वपहलान्ते हसानुमती अन्यथा स्त्रीनाम्नो मतोन्तस्येत्यर्थः स्यात् अंतोवत्याः वत्या अंतइतितु नोक्तं राजन्वतीत्यत्र माभूदिति स्वरविधौ
नलोपस्यासिद्धत्वान्नावती शब्दः किंत्वन्वती शब्दः चर्वत्वाश्रयासिद्धं अहीवतीति संज्ञायामिति वत्वं शरादीनां चेति दीर्घः योगविभागः [illegible] नेन अथापि
हसूत्राणि अपाणिनीयान्यपि नानि आद्युदात्तश्चउपसर्गादिति अवङ्स्फोटायनस्येत्यादिसूत्रेषु भाष्यादौ व्याख्यातत्वादविरुद्धत्वाच्च साधुत्वव्यवस्थापकानिभ
वंति यत्तु पाणिनीयास्यैवैतानीति तन्न हवारीशीवचउंबारीनां चेताभ्यामाकृतिगणाभ्यां क्रमेणाद्युदात्तत्वांतोदात्तत्वयोः सिद्धयोः ग्रामादीनां च घृतादीनां चेमान
योविषयव्याप्तेः ममनुभिन्नकर्तृकत्वान्नदोषः किंचांतु फिडिति प्रातिपदिकस्य पूर्वाचार्यसंज्ञा उच्चैरित्यादि नन्वत्रोदिद्वेडसिः [illegible] किदिति व्युत्पादनात्

ल.शा. न्यायस्येव लैगीनो स्यात्व सिद्धिरिति चेन्न अव्युत्पत्तिपक्षे आवेश्यकत्वात् पाटलापालंकौ वा पाटलापालंकौ औषधिविशेषस्य वाचकौ लघावंतरति प्रासे इति पूर्वपरा
शे.ख. न्वयोर्दं इदमुपलक्षणं कश्चिद्दुर्सातस्येत्यादीनामपि दुर्वृरत्वादित्याहुः सागर इत्यादि अत्रापि लघावंत इति प्राप्तं आद्युदात्तोयमिति न च नेनांतोदात्तत्वाभावेपि
१६ नियमत आद्युदात्तत्वं केन स्यात् विधायकाभावात् अतोग नियम इति वक्तुं युक्तमित्यत आह इहैवेति एषां सूत्राणामावसूत्रबाधकत्वाधनार्थत्वात् अस्त्रिया
मित्यत्र इत्यावेश्त्रियामर्थेनेन बाधकं बाध्येन बाधकं चानेनेवानुमीयते नच मृध्योदात्तत्वस्यात्रासंभवात्सर्वानुदात्तविधायकस्य फिट्सूत्रेष्वदर्शनादाद्युदात्त
विधायकमेवेति भावः स्त्रीविषयेति आद्युदात्तत्वमित्यन्ये गुरमिति नविषयस्येति स्वांगशिटामिति वाधाने ननु गुरशब्दस्यादंतत्वाभावात्कथं स्वांगेत्यस्य प्रापि
रत आह अंतरंगमिति स्त्रीविषयवर्णेति स्त्रीविषयवर्णं पूर्वाणामित्यर्थः स्त्रीविषयवर्णनाम्नामिति केषांचित्पाठः लघावंतरत्येवात्र परत्वात् अस्य नु इरि
णुदाहरणमित्यन्ये इभ्रे दंडादिनाद्यन्तयोन्तस्यां त्यादिति इदमुपलक्षणं स्वत्राद्य इति प्रत्ययस्वरेणापि ननु व्युत्पन्ने पक्षे सूत्रमेव कर्तरि भ्येति प्रत्युदाहरणमयुक्तमि
ति चेन्न अस्मादेव स्त्रीविषयग्रहणाज्ज्ञापकात् व्युत्पत्तिमार्गप्राप्तस्वरस्यापि फिट्स्वरो बाधक इति वदंति ध्वनितं चेदं एतिल्लुच्पासंशितिसूत्रे कैयटे सांतस्या
पि प्रारेरिति पाकारमकाराद्भिन्नस्य स्वशब्दस्यांतउदात्त इत्यर्थः प्रीङ् स्वोनिरिति इदं रपापाघामुक्तं पंचपादीं तु प्रीङ् स्वौह्रस्वश्चेति पठितं तथा व्याह अंत
रंगत्वादिति स्वरस्य स्वांगत्वापेक्षत्वादंतरंगत्वं चिंत्यं स्वांगशिटामिति सूत्रे नखहणात्सर्वनामप्रातिपदिकसंज्ञाकालिकत्वादंतत्वमादायना[illegible]िरिति वोध्यं त्वंपू
र्ववद्गुदाय स्वेपि वोध्यं अस्य्यादि स्वांगवाचकस्य स्वशब्दे स्वांगशिगमित्याद्युदात्तत्वप्राप्या सोप्यत्र प्रत्युदाहरणं ग्रीवायांबद्धोपि कश्मे आसन्नीत्यादौ ग्रीवाशब्द
स्यांतोदात्तत्वं तुछांदसत्वान्निर्वाह्यं हिष्टवत्सर इत्याहुरिति अत्रास्ति वीजं तु सपूर्वाच्चिदिति सर प्रत्ययस्य चित्त्वात्सिद्धं परिवत्सर इत्युदाहार्यं इति अनेनैव सिद्धे
न इत्यर्थमित्याशय इति तत्त्वं अत्र सूत्रे प्रातस्याहवर्योत्ति शब्दः पंजवादिसूत्रविहितएवगृह्यते दक्षिणस्य साधावितिप्रवीण इत्यर्थः वीणायां सामसुवादक्षिण १६
इत्युदाहरणं प्रवीण इत्यर्थः स्वांगाख्यायामादिरिति स्वांगकिं दक्षिणो देशः अत्र सर्वनामत्वादाद्युदात्तत्वं न च परत्वादेवुते नाद्युदात्तत्वमत्र भविष्यतीति वा
च्यं असमपकरणस्य बाधकवाधनार्थत्वात् कृष्णप्याम अत्र छंदसीमिवर्तत इत्याहुः अंतोदात्त इत्येव आस्ये निकिं कृष्णो मृगः वानाम अंतोदात्तत्वं वापक्षे

आद्युदात्तत्वं शुक्लगौर्योः नामधेयस्येति वर्तते तेनानामधेययोरंतोदात्तत्वमेव कृत्स्नं इति उणादिसूत्रनिपातितांतोदात्तकत्वस्य शुक्लशब्दस्य लत्वे शुक्लश
व्युत्पत्तेरिति बोध्यं अंगुष्ठोदकं अंत इति स्वादिग्रहणानुवृत्तिशंकानिवारणार्थं उदकस्य कर्दमादित्वादाद्युदात्ते द्वितीययोः पर्यायेण प्राप्ते बकस्य प्राणिनां च
कुपूर्वाणामित्याद्युदात्तत्वप्राप्ते तेन लोके इति नियमकरणसामर्थ्यादिति भावः बभ्राशब्दस्य बभ्रोः पचाद्यचि टापीति तात्पर्यं पृष्ठस्य च मृष्टस्येति पाठांतरं वा भाषा
यामिति पक्षे स्वांगशिटामित्याद्युदात्तत्वं मृष्टे च निष्ठा च द्व्यजनादिति ततः अर्थस्य साम्याद्वैयर्थ्ये त्वाद्युदात्त एव अत एव ज्ञापकादिति स्त्रीविषयवर्णेति द्विती
यपादस्य सूत्रेणेत्यन्ये नक्षत्राणामाविषयाणां नित्यावंतानामित्यर्थः नक्षत्राणां किं स्वज्ञा आवित्यादि किं अश्विनी श्रविष्ठेत्यादि अवती धनवती शब्द्य
भ्यामिष्ठनि विन्मतोरिति लुक् विषयग्रहणं चिंत्यं आवंतानामवंतनक्षत्रवाचकस्यासत्वात् नकुपूकवर्गपूर्वस्याविषयस्य नक्षत्रस्यांतउदात्तो नित्यर्थे
कुपूर्वस्येति किं बहुला आख्येति किं कृत्तिकासुजातामाणविका इत्यत्रापीति अपि ना कृत्तिका आर्यिका बहुलाकि कृत्तिकापर्यायो नक्षत्रपक्षे कृत्तिकेत्या
रेः प्रयोजनं मघाविशाखेत्यादि आकृतीति वराहहेद्द्रुणमुखमित्यादावंतोदात्तदर्शनान्न वराहशब्दोप्यत्र बोध्यः ज्येष्ठकनिष्ठयोः ह्रस्वशब्दयोर्ज्येष्ठेनदिति
प्रशस्यास्य शब्दयोर्ज्यादेशेन्नायदात्तदाम्प्रत्युदाहरणं पक्षे उदात्तयति उदात्तग्रहणानुवृत्तेरिति भावः इति प्रथमपादः ह्रस्वांतस्य स्त्रीविषयस्य नित्यं स्त्रीलिं
गस्येत्यर्थः वलिरिति वलिशब्दोपि जरया श्लथचर्मणि तनुश्च शरीरे नित्यस्त्रीलिंगः ह्रस्वेति किं नदी स्त्रीति किं मरुद्वायुः विषयेति किं लघु बहुः न विषयस्यास्ति
याविषयस्य न पो नित्यं तस्येति पाठेन विषयपदानुवृत्त्यैव सिद्धे पुनर्विषयपदं लिंगाव्ययस्य प्रत्ययलोपान्नरेण लिंगांतरोपसंक्रांतस्य वा विषयतामात्रे लौकिकत्वस्य
र्थं यथा मधोस्तु मा इव साततरत्यादौ यथावामध्यस्मिन् नास्ति मधु मांसः मधोर्भेचेति यतो लुक् वार्तिकेन ध्वनितं चेदमीच द्विवचने इति सूत्रे भाष्ये नवेति किं मूर्तेस
र्यीरिति इमसिनंतज्योतिः शब्दादौ तु नित्वादाद्युदात्तत्वमेव तिलइति यवइति लोमाशब्दे घृतादिपाठादंतोदात्ता वृत्तिसंप्रोदश्चेति सूत्रे कैयटः न चिंत्यं निलाश्चेमे
रत्वादांशाद्युदात्तस्यैव पठ्यमानत्वात् उमाशब्देपि मकरवहृदेभ्यनेन विशिष्य पर्यायेणांतोदात्तविधानात् शालिव्रीही घृतादित्वादंतोदात्तौ मूलेत्यादि किं
आद्यः गोधूमा इति अत्र परत्वात्केवलघावतेरिति मध्योदात्तत्वसिद्धेः पर्यायेणाद्युदात्तत्वसिद्धेश्चेदं चिंत्यं चणकारत्युचितं न्नः संपचेमारोनलोपेष्ट नपालि

ल.श. नीये नुदात्तादेरजित्याचैं एषामिव एतेषु पाणिनीयशास्त्रप्रवृत्तौ बाधकाभावान्नलोपस्यासिद्धत्वेनैतत्प्रवृत्तिः समाष्टशब्दौ घृतादि [illegible] स्योदाहरणं
शे.स. चतुष्कपालः इगंतकालकपालेति पूर्वपदप्रकृतिस्वरेण घृदात्तत्वं चत्वार इत्यत्रामृत्स्वरेण प्राप्ते चतुरः शसीति भिसा दैर्घ्यलुपोत्तमं षट्त्रीत्यनेन भाष्यमितिस
२७ मासउदात्त इतः त्वः किं गणः संख्यायाः किं अंतः स्वांग इदं च सर्वनामसंज्ञाप्रवृत्तिकालेयदंतं तत्रैव प्रवर्तते तेनेमं सो मम इन्तर इत्यादौ न दोषः सर्वो भास्यशब्द्गा ग
णां तोदात्तानियात्यते तयोरन्यः पिप्पलमित्यादौ तथा दर्शनात परो मात्र येत्यादौ व्यत्ययेनांतोदात्तत्वं परंमृत्यो इत्यादावाद्युदात्तस्यापि दर्शनात स्वांगेत्यादि किं घटः
अरंजनानां किं बाहूराजन्यः पाणिनां कुपूर्वमिति तस्यसमूह इति सूत्रे न्यासहरदत्तयोः कुपूर्वाणामिति पाठो दृश्यते कवर्गा येषु पूर्वे तन्मध्ये आदिरित्यर्थः सर्वनामकार्यं तु सौत्रत्वा
न्नकाविति येवसिद्धे पूर्वग्रहणं व्यवहितस्यापि ग्रहणार्थं तेन कुपूर्वमिति पाठेपि चटकादावाद्युदात्तत्वं भवत्येव उदकमिति कई माहिरयं किंत्यादि किं हरिणं अन्येन तु तर
सूत्रवदत्रापि आदिरिति न संबध्यते नपुंसकस्वरस्यान तेन चटकादावनेन मध्योदात्तत्वं हरदत्तोक्तपाठस्तु चिंत्य एवेत्याहुः स्वप्युवर्णं कृत्रिमेत्यादि किं वंधुकः उ नर्वर्त्तानां
पिता माता भ्रातर एनमाहुरित्यादौ पितृशब्दे छांदसत्वादंतोदात्तत्वं मातुस्त्वं वार्थत्वात्सिद्धमित्याहुः वर्णानां तणतिनितंतानां तांतानामिति पाठस्त्वकारोच्चार्य इति चिंत्यं
एत इति श्वेतशब्दो घृतादित्वादंतोदात्तो बोध्यः ह्रस्वांतस्य ह्रस्वह्रस्वांतस्य वधूः ह्रस्वं किं प्राप्तं अनृतं किं तृणकं नाभ्यष्ठीलेति किं जडः बधिरः कुशलशब्दो नेमाद्युदांतः स्वे
के अंतोदात्त इत्युज्वलदत्तः सरल इति दृह्यविशेषसंज्ञात्वेननाष्ठीत्यानवर्तमाने ह्रस्वांतस्येत्यस्य प्राप्तिः ग्रामादौ ग्रामादिराकृतिगणो लुवंतस्योपमेयसंज्ञा
यामुपमानमित्यनेन समानार्थमेतत लुविति किं अग्निर्माणवकः उपमेयेति किं वरणाः अदूरभवश्चेत्यणो वरणादिभ्यश्चेति लुप नामेत्यादि किं शुनकः इवार्थं वक्तः
इवपथादिराकृतिगणत्वात्कनो लुपि शुनक उपमेये वर्तते ननु तस्य यसंज्ञा न दृक्षपर्वत यद्यपि इह सूत्रे वृत्तौ नन्वाद्यमहिषसिंह दृक्षपर्वतानामिति पठ्यते तथापि
दृक्षपर्वतांश:—— विशेषणमेव ग्रहणमिष्टमिति तद्वटितमेव सूत्रं पठितं सर्वत्र विशेषणान्वयाभाव बोधनाय व्युत्क्रमः कृतः एजविशेषस्य अत्रापि लुवंतस्योप २७
मेयेति सूत्रमनुवर्तते एवं चतेनैव सिद्धे इहस्येवेति नियमार्थं तदाह अंगाः प्रत्युदाहरणमिति वृत्तौ तु इहस्य चेद्राजविशेषस्यैवेति नियमउक्तस्तच्चिंत्यं पूर्वसूत्रे व्याघ्र
ग्रहणवैयर्थ्यापत्तेः यमन्वाशब्दः कृताश्विद्धौ रूढः नचव्याघ्रशब्दस्यैतेनवैयर्थ्यमित्यन्ये अत्रांगाइत्युदाहरणं चिंत्यं तस्य जनशब्दादित्यंतत्वेनाद्युदात्तसिद्धेः

कालिंगरत्युदाहार्यं नत्रहि द्युम्नमगधेत्यण् अन्येतु लुवंतस्येत्याद्यनुवर्त्यास्य विधित्वमेवेच्छंति लघावंते अत्रादिशब्देन संबध्यते तेनानादेरपि गुरोरुदात्तः अतएव वृषाकाप
शब्दोऽनेनमध्योदात्त इति वृषाकपीति सूत्रे हरदत्तेनाप्युक्तं खंडिकादिषु उलूकशब्दोऽनेनमध्योदात्त इति कैयटेन चोक्तं वराहशब्दस्तु घृतादिरित्युक्तमेव नच गुरुत्वेन मध्ये
य आदिरित्यर्थोस्त्विति वाच्यम् वृषाकप्यादावप्रकृत्याचेत्यादिविरोधात् अन्यतोऽङीषिति सूत्रे सारंगकल्माषौ लघावंत इत्यनेनमध्योदात्ताविति हरदत्तविरोधा
च्च लघावित्यादि किं वातप्रमीः सभासंजननं कृपालीनांतत्वान्न लघुरंतोः त्रवस्त्र क्व किं देवः गुरुः किं किसलयं कल्याण इति पर्यायेणादिमध्यावुदात्तौ स्त्रीविष
यवर्णाद्युपू कचित्किड इत्यौ स्त्रीविषयवर्णनाम्नामस्त्वित्यादिपाठः सोपिमूलेध्यपूर्वस्येति सूत्रे दर्शितः मल्लिकेति अस्यमाक्षिमात्रेणोदमुदाहरणं मात्तस्या
स्वपरत्वान्मादीनां चेत्यनेनबाधात् लनेत्युदाहार्यं नचानेनैवसिद्धे ह्रस्वांतसूत्रे स्त्रीविषयस्येति वर्णानां तणोति च सूत्रं व्यर्थमिति वाच्यं अंतवन्नद्भ्वरत्यनुवृत्तेन ने
दोषः अतएव श्येनीत्युदाहरणं दत्वा हरिणीत्युदाहरणांतरं दत्तं ववकादीन्यप्युदाहरणानि नीलादयस्त्वंतोदात्ता एवेति बोध्यं पिशंगसारंगकल्माषा लघावंत इ
ति मध्योदात्ता इति कैयटादिदर्शनात् इदं बाधित्वा पूर्वविप्रतिषेधेन पूर्वमेवप्रवर्तते इत्याहुः अस्तुशब्दात्पूर्व इति अस्त्वादेरिति वक्तव्ये अस्तुपूर्वाणामित्युक्तेः स
मानाधिकरणो बहुव्रीहिर्नेति भावः अस्तुपूर्व इत्यत्र पंचमीतत्पुरुषसमासस्तु न असावित्येवसिद्धे पूर्वग्रहणवैयर्थ्यापत्तेः अनुवर्तमानं किंपरमनेनान्वयाप्राप्ते
श्च शकुनीनां च पूर्वमिति अंत्यात्पूर्वमित्यर्थः लघुपूर्वमित्यसमस्तपदद्वयं अत्राप्यादिरिति न संबध्यते पूर्वग्रहणात् अनेन कुक्कुटेति तित्तिरी मध्योदात्तो कुकुंदरपूर्वेस्मि
न्पाठस्तु छांदसः तित्तिरियजुः शाखायां मध्योदात्तः पठ्यते एतेन तित्तिरिशब्दोऽंतोदात्त इति पालिरजनादिसूत्रस्थहरदत्तः परास्तः लघुपूर्वमिति बहुव्रीहिस्तु नत्ववारि
तिपंचमीनिर्देशेनैवसिद्धे पूर्वग्रहणवैयर्थ्यापत्तेः लघोः पूर्वमिति तत्पुरुषोपि न सप्तमीनिर्देशेनैवसिद्धेः नद्युपा तनुवाचिनां पालिवाचिनां चेत्यर्थः वसुगरस्यादि
अनयोर्लघावंत इति निषिद्धेऽंतोदात्तत्वं एवं च कपोतमयूरशब्दौ लघावंते इति मध्योदात्ताविति पालिरजनादिसंबद्धस्य हरदत्तस्य चिंत्यः खंडिकादिसूत्रे मध्योदात्ता
इति कैयटश्च धान्यानां चेत्युत्तरसूत्रे धान्यवाचिकाकारस्य कसिंतानामित्यर्थः श्यामाक इति उशीरदाशेरकपालपलालश्यामाकेति सूत्रे श्यामाकग्रहणं त्वधा
न्यवाचकश्यामाकग्रहणार्थं अतएव श्यामाकायनीत्यत्रापि श्यामाकशब्द आद्युदात्त इत्याहुः माषा इत्यस्य तु धान्यानां चेत्यंतोदात्तत्वात् बालासारइत्युदाह

११ इदंद्वितीयो वेति द्वितीयमित्यधिकारादिति भावः काशीनामेमिति वक्तव्ये तु उभावप्यार्षं च ॥

ल·श· स्यानुवृत्तिं हलंतानां मसंभवेनाकारविशिष्टस्य ग्रहणं धान्येति किं आलोकः वृद्धेति किं चणकाः स्नतिकिं गोधूमाः जनपदश्च अवित्यचः संज्ञा केकयइति यांतस्यां

पु·स्व· त्यात्पूर्वमित्यनेनपरत्वात्त्रभाव्यमितितन्न बाध्यमानस्यापि विकल्पोमास्विति न स्याप्यनेन बाधादित्याहुः अंगमवंगा इत्युदाहरणं जेत्यादि किं ग्रामः अंगोराजा अर्ध

१८ तानां किं इरत् हयादीनाम अत्र केचित् जनपदश्च वचनांमित्यनुवर्त्यंति कृ गार्हेति सूत्रस्थ हरस्वस्वरसोप्येवं तन्मते पंचालाः कोसलाः इत्युदाहार्य इगंताद्यंतानां वचन अ

त्रवेत्यनुवर्तयंति तेषां न कश्चिद्दोषः कुरवश्चेदय इति चोदाहार्यं द्व्याचां किं वसातयः इगितिकिं अंगाः अतिद्वितीयः पादः ललाटमिति लघ्वावतिनइत्येतत्प्राप्त

घित्वा परत्वादिदमेवोचितमित्यभिमानः कपोल इति यद्यप्यत्र लघावंतम ध्योदात्तत्वमेवेष्टं तथाप्युदाहरणादिकं बोध्यम् मारीनां मलयो मकर इति मलेयवां

तस्यां त्यात्पूर्वमित्यस्या स्वावमवृत्तौ फलेन विशेषइत्युदाहृतं मकरः संज्ञाभूत उदाहरणं मकरवरूड इत्यत्र तु अभिव्यक्तसदार्थायेइतिन्यायेन संज्ञाभूतस्यन

गृहणं कचित्तु माकर इति पाठः तत्रस्वार्थेऽण् शीर्षादीनां च शाकलानां संयोगस्थेति सूत्रे कैयटे तु इत्यादि पाठः इदं चाद्युदात्तत्वविधायकं अनेन सर्षप शब्दे आद्युदा

त्तत्वे प्राप्ते यांतानां च गुर्वादीनामिति मध्योदात्तत्वमित्युक्तं तेन द्वितीयपादांत इदं सूत्रमितिध्वनितं फिट्सूत्रेषु तालव्यादिसूत्रमत्रपादे पठितं धान्य इति कचि

त्कोऽपपाठः श्य स्तलाभावात् कैयटरीत्या आद्युदात्तविधायकत्वे तु तत्रापि प्रवृत्तिरितिध्वनयितुमत्र जयितु उदाहृतमित्याहुः केचित्तु श्य च्य इस्येकारोच्चारं च

वर्थ्या वर्णयंति यांतानां गुर्वांतानां किं गर्दभः लघावंत इतिमध्योदात्तोयं नर्दभं पुरः इत्यंतोदात्तं तु छांदसं गुर्वादीनां कुणपः कलेः संप्रसारणं चेति कपन् अयुग्मा

मिति अव्ययपूर्वपदप्रकृतिस्वरे प्राप्ते हड इतीति पारे वतः वितस्ता इत्यर्थः आर्जिः ज्ञा हसा कला उमा काष्ठा पेशा काशीनं केचित्तु मंकार वहकुठपारेवतेति काष्ठायेत्या

इतिपठंति कर्दमादिराकृतिगणः अत्रयइति केचित्तु सुगंधितेजनस्य चेतिसूत्रं पठंति आदिर्द्वितीयो वेति अनुवर्तयंति अयं क्लीबोपि नपः फलांतानां नपुंसकस्य

फलशब्दांतस्यादिर्द्वितीयं वेत्यर्थः केचित्तु लेफो नप इति असमस्यानेपठंति नवितिनपुंसकं लशब्दे परे क्लीबस्य फशब्द उदात्तः फलं सफलमित्युदाहरंति अ

न्येतु फाशब्दस्येति व्याख्याय सफालमित्युदाहरंति कुलाप इति लघावंत इत्यस्य प्रवृत्तावपि न कश्चिद्विशेषः गवयमलयावुदाहार्यौ कुवलयार्थमंत्यात्पूर्वंप्र

हणं आंतस्य ना आकारांतस्येत्यर्थः नानानासादिवासु धेत्युदाहरणं कचित्तु यांतस्येत्यपि पाठः याशब्दांतस्येत्यर्थः केचित्तु तत्र णय शब्दोपि गृत्स्यतेन संज्ञा

चोदेवदत्त इति सिद्धमित्याहुः शिशुमारोदुंबर शिशुमारेति पाठांतरं उष्ट्रार उष्ट्रारेति रेफवर्जितमपि पाठांतरं चकारेणांत्यात्पूर्वमिति द्वितीयमिति च संबध्यते सांकाश्य
कांपिल्य अत्र सूत्रे मंडूकप्लुत्याऽदिवेति वर्तते तदाह द्वितीयमुदात्तं वेति अत एव यद्धन्निति सूत्रे राजन्य सांकाश्य कांपिल्य नासिक्य दार्वाघाट नामादि र्वतेत्येवेति के
यद्वेनोक्तं अर्वाक् शब्दे नादेरपेक्ष्यत्वांतो द्वितीय एव अतो न विरोधः एवं सप्तमी सिद्धेति सूत्रे एषामंतः पूर्वं वेति काशिकायामपि पूर्व शब्देनाद्युदात्तरूपेक्षयांत श्चा
न शब्देन गृह्यत इति बोध्यं अंत्यात्पूर्वमिति तु नानुवर्तते सांकाश्यादीनां त्रयाणां ग्रहणस्यैव वैयर्थ्यापत्तेः यांतस्यासादित्येव सिद्धेः अनंतरसूत्रे आदिर्वेति तु स्पष्टा
र्थं ईर्वांतस्य हस्तिनि हलोसंज्ञापक्षेधिकाराद्द्वितीयं ईर्वांतस्य किं भंजूषा हलादेः किं अंबरीषं उशीरदासेर अत्र तद्धय ग्रहणं स्वांगानामकुचीरीनामिति द्वि
तीयो दात्तत्वे बाधितु देवरग्रहणं लघावंते इत्यस्यानित्यत्वज्ञापनार्थं केचित्तु घृतादिषु देवरशब्दः पठ्यते एवं च पक्षे आद्युदात्तार्थं ग्रहणमित्याहुः अत्र वेति
नानुवर्तत इति केचित् महिष्यषा मेत्यादि किं सिंही अस्ति जेत्यादि किं महिषी अषाढानक्षत्रं इति तृतीयः पादः॥ शाकटिशाक अत्रो भवनस्यादि सूत्रेण पादि
त्यादि सूत्रस्य युगपद्ग्रहणे बाधितानेकोदात्तानां युगपन्न समावेश इत्यस्यार्थानुवादकं पर्यायेणेति तत्फलं तु अनुदात्तं पदमेकवर्जमित्यादेरेतद्विषयेपि प्रवृत्तिः लिंगविशि
ष्टपरिभाषा लभ्यार्थानुवादकं शकटीरति गोष्ठजस्य ब्राह्मणवाचकस्य गोष्ठजशब्दस्येत्यर्थः पारावत इति अत्र च शब्दो नोदात्तः कपिकेश हर भाषायां बहुव्रीहित्वानु
बंपरप्रकृतिस्वरः तत्र हरि शब्द इत्यंतत्वादाद्युदात्तः कपिरंतोदात्तः केचित्तु निरुदकादेराकृतिगणत्वादनयोरंतोदात्तत्वमाहुः न्यङ्स्वे न्यधीचेति पूर्वपदस्वरेकृते
यति उदात्तस्वरितयोरिति सिद्धे न्यङ्ग्रहणं तदनुवादकं निल्पशिल्प केचित्सममर्त्यशब्दं पठंति तदयुक्तं जेताहवं ऽमर्त्योदत्या दीर्घो वा धुदात्तदर्शनात् न घृतालकर्म
ण इति सूत्रस्य वार्तिकेन यतिय जेनावइत्याद्युदात्तत्वं धान्यस्थाने धन्यं पठंति तन्न पृत्वावेश्वर्य इति सूत्रे धान्यमंतस्वरितमिति वृत्तिसुपाठस्य सर्वसूत्रेस
हरदत्तेनोपन्यासात् प्रयुज्यते च धान्यमसि धिनुहीमि विश्वभक्ष भाषायां भक्ष्यवीर्या आद्युदात्तो वीरेभ्यसाधुरिति यतभाष्य यत्तेर्यना दृचो यत विल्वः सर्वान्तोदात्तो
वा केचित्तु विल्ववत्सेति पठंति अनुचानीति सर्वानुदात्तानीत्यर्थः अत्र सूत्रे छंदसीति नानुवर्तते आद्युदात्तश्चेति सूत्रस्य भाष्यप्रामाण्यात् निपाता आद्युदात्ता
कोमारो त्वंनानां निपातत्वेपि चेश्चित्वादंतोदात्तत्वं उपसर्गाश्चाभिवर्जमिति आद्युदात्ता इत्यर्थः अभिवर्जं किं अभ्यमिहि अभिरामम स्यात् इदं सूत्रं व्यर्थं उप

ल॰ श॰ अभीक्ष्णं निपातत्वेनैवोसिद्धेः न च कर्मप्रवचनीयानां तद्भावज्ञापनाय इतेषामप्याद्युदात्तस्येष्टत्वात् अभिश्चैवमाहिशुष्क इति बह्वृचः अत एव मानो मर्ता अभिद्रुहन्नि
शे॰ स॰ तिमंत्रे एवमादीनामतद्धितेषु भाष्यकृद्भिरुक्तं स्पष्टं चेदं उपसर्गसंज्ञासूत्रे भाष्ये केचित्तु उपसर्गस्यैवाभेराद्युदात्तत्वं नेष्टौ यथा स्यात् कर्मप्रवचनीयस्य तु निपातत्वा
९६ द्भवत्येवेत्येतदर्थमिदं सूत्रमित्याहुः एवादीनामंतः अहर्विश्व… योगात् आद्युदात्तो निपातौ आ द्रहस्व नु का हति श्रावस्त्वा पोमुष्वद्विरिति प्रयोगदर्श
नात् नर्थिवत्यमिति चिंतावीजं तु चिंत्यं सहस्यापि निपातत्वादाद्युदात्तत्वमिति सहस्य स इति सूत्रे आकरात् प्रयुज्यते च सह वै देवानामिति तेपुत्रसूरिभिः सहेत्यत्र तु
छांदसमंतोदात्तत्वमिति केचित् थाथादीनामुभाविति सूत्रे उदात्तावित्यनुवृत्ति पूर्वार्णं इह त्रिसूत्र्यामादिशब्दः प्रकारे इत्याहुः चादयोनुदात्ता निपाता इति वर्तते नेहयस्य
नेति आद्युदात्तत्वापवादोयं यथेति था अनुदात्त इति वर्तते पाणिनं वचो यथेमादात्तु छांदसत्वात् नानुदात्तः प्रकारादिति प्रकारे गुणवचनस्यान्यादि द्वित्वे इत्यर्थः सिद्धं
तोदात्तत्वानुवादकं शेषमिति प्रकारादि द्विरुक्तादन्य द्विरुक्तमित्यर्थः इत्येके अनुदात्तं चेत्यस्यानुवादकमेतत् अनुदात्तं पदमेकवर्जमित्यस्यानुवादकमित्यन्ये इति शां
तनवेति इदं मात्रोपदत्तमिति सूत्रे हरदत्तग्रंथे स्पष्टं शंतनुराचार्यः प्रणेतेति द्वर्यादीनां चेति सूत्रे हरदत्तः इति फिट्सूत्राणि समाप्तानि ॥ अथ प्रत्ययस्वराः कर्तव्यमिति
तव्योयं तव्यत्प्रत्ययात्स्वरितः यद्यपि तव्यस्यापि आद्युदात्ते शेषनिघाते कृते उदात्तादनुदात्तस्येति स्वरितो भवत्येव तथापि तस्यासिद्धत्वात् निमित्तकशेषनिघातत्रं प्रवृत्त्या
तित्वनिमित्तके तत्र सत्यां महान् फले विशेषः पुञ्छतीति पुञ्छ प्रमादे प्रचयएकश्रुतिः चितः सप्रकृतेरिति अत्रार्थः कचोद्यो त्वं ज्ञापकं अन्यथा तस्यैकाच्त्वात् प्रत्यया
द्युदात्तत्वेनैव सिद्धेत द्यर्थं स्यात् हस्तः प्रमाणमस्य हस्तः प्रमाणे ल इति लुक् अत्र चित्स्वरो न अंतरंगानपीति न्यायात् प्रत्ययलक्षणे तु न प्रत्ययस्यासाधारणरूपाश्रय
णभावात् कुंडिनच प्रत्ययस्यापि चित्त्वात् अनुबंधलक्षणे स्वरे प्रत्ययलक्षणभावस्य पूर्वमुक्तेश्च हलध्वस्रवांगश्चि टामित्याद्युदात्तः चतुः कसेनौत्याद्यैरात्स्वस्य
न्यस्यासिद्धत्वात् तुजस्यैव अन्यके इति अकच् ततः पर उदात्तः एवं यकेतकदित्यत्रापि बोध्यं तद्धितस्य कित इति एकं सूत्रं गोत्रेकुंजादिभ्य इति सूत्रे भाष्ये योगविभागः कर्त
व्य इत्युक्तेस्तदनुसारेण व्याचष्टे चितस्तद्धितस्येति जित्स्वरबाधनेति च्युत्रश्चित्वं तु व्रातच्फञोरित्यादौ विशेषणार्थं सावकाशमन्यथाञ्यायनादिषु स्वरितिभावः जि ९६
त्वमहत्तदर्थं सावकाशं ततश्चित्स्वरं बाधित्वा परत्वात् जित्स्वरः प्राप्तोऽनेन बाध्यत इति तात्पर्यं कौंजायना इति कुंजात् च्फञि तेरंतात् व्रातच्फञोरिति ञ्यः प्यादीनां तद्धितत्वा

रहुवुलुकुक्विजः तद्धितस्येति किं चक्रतुः कित्वाति दंशादं तो रातन्नं माभूत् यत्तु प्रत्युदाहरंति ह्रस्वः कार्यः पिलस्य तु किकित्वस्य गुणनिषेधे सावकाशत्वान्नपि तु स्वरं वाधित्वा प्र
त्वार्यं स्यादिति तन्न कार्यं चेदं तो रातन्नस्य दाक्ष्यजयजो भाविकार्ये वेति नियमेन वारयितुं शक्यत्वादित्याहुः किन्तः किं अविदूरं तिसम्योजसः बहुवचनं प्रयोगाभेदेनाभ्यस्त्वा
हृस्वात् सूत्रेभ्य इतिवत् यत्तु वार्तिककृतोक्तं तिसम्योजस ग्रहणानर्थक्यमन्यत्रास्याप्राप्तेः बहुवचनविषयत्वादस्यैकवचनद्विवचनयोरभाव एव शसि उस्तत्य ए
इति सिद्धं अन्याहलादयस्तत्र षट्त्रीति सत्सु पोत्तमामिति च सिद्धमिति तन्न अतितिस्रा वित्याद्यिव्याप्तेः फलस्य सत्वात् तदुक्तं भाष्यकृता उपसर्जनसार्थमिके जसोग्रह
णमिच्छंति अतितिस्रा वितितस्मादिति परिभाषासत्वाद्धि हितविशेषणासंभवदृत्याशयः अनेन पूर्ववार्तिककृतं प्रत्याख्यानमसंगतमिति सूचितमिति तिसृ शब्दे
नेरकृत्यपदद्वृत्यत्रगतेर्धातुलोपेवाच्यमित्युक्तेरंतोदात्तः तस्य यण्युदात्तस्वरितयोरित्यनेनौकारः स्वरितः तिस्र इति अंतोदात्तत्रिशब्दस्यादेशत्वात्सापि तथा तस्य
विम्रदनि कृते उदात्तस्वरितयोर्यण इति जसः स्वरितत्वं प्राप्तमनेन वाध्यते सावेकाचः सो परे परेकाजरूपं ततः परेत्यर्थः सोयएकाचः तस्मात्परेत्यर्थे निष्पन्नेः षष्ठ्य
रिभाष्यप्रकृतेः यथैव तएव संभवाच्च सौपदर्थविशिष्टमेकाच्रूपं तदर्थविशिष्टात्तदेकाच्रूपात्परा विभक्तिरिति फलितं राज्ञेति राजन्शब्दः कनितं त्वात् दाद्युदा
त्तः नचएकाचो विहितायाविभक्तिरित्यर्थान्न दोषः विहितविशेषणेप्रमाणाभावात् एकाज्ग्रहणव्यावर्त्यमप्येतदेव तदभावे हि सौवर्त्तमानाच्छ्व्यात्परेत्यर्थे स्यात्
सावित्यस्य द्वाभ्यामित्यादिव्यावर्त्यं स्यात् सप्तमीवहुवचनमिति किं यतीषु प्रथमैकवचनग्रहणेतु तत्रयानितिरूपसंयोगांतलोपस्यासिद्धत्वेन यान्न इति वा न हि
तस्मात्पत्र विभक्तिः विकृतिग्रहणेन प्रकृतेरग्रहणात् आगमसहितप्रकृतिग्रहणे केवलस्याग्रहणाच्च तन्मध्यपतितन्यायाच्च केवलेन विशिष्टग्रहणं वोधयति न
तेनावनापकृतेरष्टसिद्धिः नचरूपविवक्षा मत्सत्वासौ यएकाच ततः परेत्यर्थे श्वासिवितिवाच्यं दोः शब्दः [illegible] एकाच तस्य दोषन्नादेशे ततः परा विभक्ति [illegible] स्यात
रध्यतेतु मध्योदात्तं दोषभ्यामिति अयं सप्तमीवहुवचनरूप विरूपविवक्षाभावेदोषः अस्ति च दोष इत्यन्ये [illegible] एकाचो तस्मात्तरा विभक्तिरिति ननेवमपि दोः शब्द
दिश्याचेनस्यानिवद्भावात्प्रवृत्तिर्दुर्वारा नचेष्टापत्तिः तैत्तिरीये दोषभ्यां स्व हेति मध्योदात्तस्यैव पाठात् अत एव नो [illegible] न्निति सूत्रे शुनः शुनेत्युदाहरणं संगच्छते अ
[illegible] सप्तमीवहुवचनेन लोपस्यासिद्धत्वेपि श्वनशब्दात् तत्तीयादिविभक्तेरभावादसंगतिः स्पष्टैवं ममतु न दोष इति चेन्न लस्यानुरोधेनाप्याय देकाच्रूपं तत

ल·श· र्णोचस्वरेत्यर्थे नैवारेणात् त्वयेत्यादौ नु प्रथमैकवचनग्रहणेपि श्लेषः प्रथमैकवचप्रकृतेः स्थाने तृतीयादिप्रकृतेरविधानात् स्पष्टं चेदं नगोप्वन्निति सूत्रे प्रकृत
पे·स· सिद्धेत्वभाष्ये किंच काभ्यां कुलाभ्यामित्यादौ एतदप्रवृत्तीरूपविवक्षाफलरूपग्रहणे प्रमाणं तु सप्तमी बहुवचनग्रहणे नगोप्वन्निति निषेधो ज्ञापक इति भाष्यमेव स्पष्टे
२९ नत् स्त्रियामाभ्यामित्यादौ एभिरेषामित्यादौ चान्वादेशे सर्वानुदात्तत्वं न लभ्येत सावेकाचइत्यस्य प्रवृत्तेः आसु एषु इतिहि सौरूपं नच प्रकृतसूत्रस्य कैयटरीत्या
नोदात्तत्वमेवेष्टमिति वाच्यं एभिरग्नेभिरित्वमेषामित्यादिवैदिकप्रयोगविरोधात् अन्येत्वित्युक्त्या तेष्वपि न त्वाकृचि बोधनात्वे नत्वविभक्तेरुदात्तत्वेष्टत्वमिवा
तेन प्रकृतेरनुदात्तत्वे सिद्धे अशास्यास्यानुदात्तत्वविधानसामर्थ्यात् आदेशे विभक्तिस्वरो नेति वाच्यं अस्त्रियामाभ्यामित्यादौ चारितार्थ्यात् नत्यत्र सावेकाच
इति प्राप्नोति तत्र हि सप्तमी बहुवचनेएषु इति तत्र एइति नचतादृशि हालिनापि तस्य विकारः नचस्त्रियामासु इति रूपस्य सत्त्वेन प्रवृत्तिर्दुर्वारा अर्थभेदात्
नचनगोप्वन्निति निषेधात् एभिरित्यादौ न दोष इति वाच्यं प्रथमैकवचनेतुः वर्णितत्वाभावात् नचाडिदमित्यस्य दुर्वारत्वेन सर्वानुदात्तत्वं नेष्टमिति वाच्यं त
त्वांतोदात्तादित्यनुवृत्त्यात् दम्राप्तः अत्रैकाचः परेत्यस्यैकाच एव परेत्यर्थः कार्यः तेन चित्सु अग्निचित्वित्यत्र न अंतोदात्ताद् नित्यशब्दस्य स्वरितत्वेनाधिका
रप्रत्यां नित्याधिकारविहितसमास एव गृह्यत इत्यत आह नित्येत्यादि इदं च हरिपदमंजर्योः स्पष्टं परमवाचेति षष्ठ्येवाशब्दउदात्तः अंतोदात्तात्किं अव्य
चा तत्पुरुषः अव्यय पूर्वपदप्रकृतिस्वरेण उत्तरपदग्रहणमेकाच्त्वेनांतोदात्तत्वेन चोत्तरपदं विशेषयितुं अंयथा समासो विशेष्येत तथा सति शुनउर्ध्व
श्वोऽर्क् श्वोर्जेत्यादावेव स्यात् एकाचः किं राजदृषदा षष्ठीसमासः स नित्येत्यादि किं अग्निचिता उपपदसमासः कृदुत्तरपदप्रकृतिस्वरेण चिच्छब्द उदात्तः यत्तु
समासघटकपदमात्रघटितविग्रहाभावेनैव नित्यसमासत्वं तत्र भवत्येवायं विकल्पः यथाऽवाचाब्राह्मणेन अविद्यमाना वाग्यस्येति विग्रहः बहुव्रीहिर्न त्वव्यु
पयमित्यं तोदात्तत्वं इदं च कृत्वा स्वनुमेयेन व्याख्यातं उपपदमतिङ् इति सूत्रभाष्ये तु विग्रहाभावेन योनित्यसमासस्तस्मिन्नन्यत्रायं विकल्पः अन्वयोपपत्तेर्मतावादाव्ययी २०
भावेप्ययं विकल्पः स्यादित्युक्तं एवंच वहुव्रीहाववाचा ब्राह्मणेनेत्यत्रापि विकल्पो न भवत्येव निपातीयनेरिति दिक् अंचेश्छंदस्यसर्वनामस्थानमिति कीकं नपुं
सके शसि माभूत् सुटि च यथा स्यादिति अंचेरित्यत्रैकः कित्वेपि नलोपाकरणं सौत्रत्वात् यत्तु नकारो विद्यते च्छंदसि विधिर्भाषायां न गोः ॥

न्लिनिति निषेधः अडितिनिर्देशान्नत्स्यापि नलोपाभावे एव प्रवृत्तेरिति व्यवस्थेति तन्न प्रतीचो बाहू नित्यादिलक्ष्यविरोधात् अनिगन्तोऽञ्चताविति सूत्रस्थ
कविरोधाच्च अत्रोत्तरपदादिति वर्तते तेनोत्तरपदभूतां चव्यन्तात्परा विभक्तिरित्यर्थः तेन केवलां चतेः क्विपि अम्भ्यामित्यादौ नास्य प्रवृत्तिरित्याहुः स्मीच इति
दध्यंच तिरध्यङ्-अक्तिगादिना क्विन् [illegible]निति तथा च तदपवादोयमिति भावः लुप्ताकारनकारेऽञ्चताविति अर्थे न तस्यापि विभक्त्युत्पत्त्युत्तरकालमेव प्रवृत्तेरि
त्याशयेन च पूजायां दध्यंचेत्यादौ विदं सावकाश तत्र न गोश्वन्निति निषेधेनास्याः प्रवृत्तेः न चैवमपि दध्यम्भ्यामित्यादौ अस्य सावकाशत्वेन दधीच इत्या
